138
3(A)(B)(C)~~(D)~~

अप्र

न्यायकौस्तुभः

न्यायशास्त्र

Nyaya Kausthabha

न्यायकौस्तुभशब्दखंडप्रारंभः क्रियते। 1"

न्या·कौ· ॥श्रीगणेशाय नमः॥ ॥नत्वा सांबं शिवं मुकुंदपितरं श्रीकेठसेनं गुरुं भूयः सूक्ष्मधिया विभाव्य च तदुक्तार्थं समस्तं
१ हृदि॥ शब्दे मानवरे विशिष्टविविधसूक्तिसंपादके गूढार्थप्रतिपत्तये वरधियां कुर्वे प्रबंधं वरं॥१॥ अथ शब्दो नि
रूप्यते। अत्रोपजीव्योपजीवकभावसंगत्योपमाननिरूपणानंतरं शब्दनिरूपणमिति बहवो वदंति। तत्र यद्य
पि ज्ञायमानशब्दस्य शाब्दबोधकरणतावादिप्राचीनमते स्वरूपतस्तस्या संभवः उपमानस्य शब्दानुपजी
व्यत्वात् तथापि फलद्वारकः स संभवत्येव शाब्दबोधे शक्तिग्रहस्य तत्र चोपमानस्य हेतुतया शक्तिग्रहद्वारा
शाब्दबोधे उपमानस्योपजीव्यत्वात्। न चैवमुपमितावतिदेशवाक्यार्थज्ञानात्मकोपमानस्य हेतुतया तत्र चा
तिदेशवाक्यात्मकशब्दस्य हेतुतयोपमानद्वारोपमितौ शब्दस्यापि हेतुतया विपरीतस्यापि तस्य संभवेन शब्दस्यो
पमाननिरूपणानंतरं निरूपणे नियामकत्वेन संभवतीति वाच्यं। यत्प्रमाणफलसमानधर्मितावच्छेदकके सद्यत्प्रमाणफलं तदुपजीवकं भवति तत्तत्प्रमाणनिरूपणानंतरं निरूपणविषय इति नियमस्या
नंतरं निरूपणप्रयोजकत्वोपगमेन गवययोगवयपदवाच्य इत्याद्युपमितिसमानधर्मितावच्छेदककस्य गव हेरंब· १

योऽसावित्यादिवाक्यजन्यशाब्दबोधस्य तादृशोपमित्युपजीवकत्वया गोसदृशो गवयपदवाच्य इत्याद्यतिदेशवाक्या
र्थज्ञानात्मकशाब्दबोधासमानधर्मितावच्छेदककगवयपदवाच्य इत्याद्युपमितेस्तादृशशाब्दबोधानुपजी
वकतया च विपरीतस्यासंभवेनादोषात्। वस्तुतस्तत्फलधर्मितावच्छेदकताप्रयोज्यस्वफलधर्मिता
वच्छेदकताकत्वे प्रमाणस्य तत्प्रमाणानंतरं निरूपणप्रयोजकमित्युपगमान्न दोषः शाब्दबोधे धर्मितावच्छेद ध
कतायाः शक्तिग्रहात्मकोपमितिधर्मितावच्छेदकतामात्रप्रयोज्यत्वात्। उपमितिधर्मितावच्छेदकतायाश्च
सादृश्यज्ञानधर्मितावच्छेदकतामात्रप्रयोज्यत्वेनातिदेशवाक्यार्थज्ञानात्मकशाब्दबोधधर्मितावच्छेदकता
प्रयोज्यत्वात्। एतेन यत्प्रमाणफले साक्षात्तु नियमस्य नानंतरनिरूपणप्रयोजकत्वसंभवः गोसदृशो
गवयपदवाच्यः गवयोऽसावित्यादिसमूहालंबनात्मकातिदेशवाक्यार्थज्ञानमादायोपमितेरपि शाब्दबोधसमा
नधर्मितावच्छेदककत्वसंभवेनोक्तदोषस्य दुर्वारत्वादिसाशंकापि निरस्ता। शब्दज्ञानस्यैव शाब्दबोधक
रणतावादिनवीनमते च शक्तिग्रहात्मकोपमितेरेव शब्दप्रमाणतयोपमानोपजीवकत्वेन च स्वरूपतए

न्या॰ कौ॰ एवोपजीव्योपजीवकभावः संभवति॥ न चैवमेकरीत्या यथा शब्दस्योपमानोपजीवकत्वं तथातिदेशवाक्यार्थज्ञानात्म
२ कोपमानस्यापि तिदेशवाक्यज्ञानात्मकशब्दप्रमाणोपजीवकत्वेन तत्स्यानन्तरनिरूपणप्रयोजकत्वसंभव
पडे॰ इति वाच्यं। यत्प्रमाणं स्वसमानविषयत्प्रमाणोपजीवकं तत्तदनन्तरं निरूप्यमिति नियमोपगमेन शब्दस्य स्व
समानविषयकोपमानोपजीवकत्वे उपमानस्य च स्वासमानविषयकशब्दोपजीवकत्वे ~~ऽपि स्वसमानस्य च स्वा~~ पादे॰ षा
~~समानविषयकशब्दोपजीवकत्वे~~ या ऽदोषात्। न च स्वसमानविषयकत्वं यदि यत्किंचिद्विषयमादाय तदा १
तिदेशवाक्यज्ञानात्मकशब्दस्योपमानविषयीभूतगवयपदविषयकत्वेन शब्दोपजीवकत्वं दुर्वारं यत्किंचिद्या
वद्विषयमादाय तदोपमानेऽप्यसंभवि तस्योपमित्यात्मकशब्दविषयीभूतगवयत्वाविशिष्टाविषयक
त्वादिति वाच्यं। मुख्यविशेष्यमादाय तद्विवक्षणेनोपमानस्योपमित्यात्मकशब्दमुख्यविशेष्यकत्वेन अ
तिदेशवाक्यज्ञानात्मकशब्दस्य चोपमानमुख्यविशेष्यगवयविशेष्यकत्वेनोक्तदोषाभावात्। यत्तु एव हरे॰ ब॰
मपि उपमानजनकस्य सदृशो सदृशपदशक्य इत्याकारकशक्तिग्रहस्य शाब्दधीकरणत्वेन शब्दप्रमाण २

न्यायकौस्तुभशब्दखंडप्रारंभः क्रियते। १

प्रा·कौ· ञ्चैतन्न तथा च प्रकृतवाक्यार्थयथार्थज्ञानजन्यशब्दत्वं लक्षणं फलितं· अत एवैतदनुसारिणा मणिकृतापि प्रयोग
हेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणमित्युक्तं· अस्यार्थः प्रयोगहेतुभूतो यः पदार्थतत्त्वज्ञानं प्रमारूपार्थज्ञानं प्र
३ कृतवाक्यार्थयथार्थज्ञानं तज्जन्यत्वं तथा चोक्त एवार्थः अत्र वक्तृबुबोधयिषापूर्वकवाक्यत्वावच्छिन्नेव
क्तृवाक्यार्थयथार्थज्ञानस्य हेतुत्वमिति प्राचां मते पयसा सिंचतीत्यादौ वक्तृयथार्थवाक्यार्थज्ञानजन्यतया
लक्षणसमन्वयः वह्निना सिंचतीत्यादौ तु वाक्यार्थज्ञानस्यायथार्थत्वान्नातिप्रसंगः प्रत्येकपदार्थवांतर
वाक्यार्थतत्त्वज्ञानजन्यत्वमादायोक्तातिप्रसंगतादवस्थ्यवारणाय भूतं तज्ज्ञानविशेषणं महावाक्यार्थ
प्रमामादायातिप्रसंगवारणाय तत्त्वपदं· न चैवमपि वह्निना सिंचतीत्यादौ प्रत्येकपदार्थावांतरवाक्या
र्थज्ञानयोर्यथार्थत्वेन वाक्यार्थमहावाक्यार्थज्ञानद्वारा तज्जन्यत्वमादायातिप्रसंगो स्पष्टेवेति वाच्यं· ए
तदर्थमेव भूतांतस्योपादानात्· तदुपादाने भूपाठ्या विदिधात्वार्थानुसारेण महावाक्यसहकारेण प्रयोगहेतु
तादृशज्ञानजन्यत्वलाभेनोक्तज्ञानयोर्वाक्यार्थमहावाक्यार्थज्ञानसहकारेणैव प्रकृतवाक्यहेतुतया हरव· ३

नातिप्रसंगात्· यद्येवं पयसा सिंचतीत्यादावसंभवः तत्रापि स्वपूर्वोत्पन्नप्रत्येकपदार्थावांतरवाक्यार्थज्ञानस
हकारेणैव महावाक्यार्थतत्त्वज्ञानस्य प्रयोगहेतुत्वदर्शनात्तत्रेतरासहकारेणेति वाच्यमिति चेन्न· दृ ति २
यस्मिन्नसति यद्भावात्कार्याभावस्तस्यैव तस्य सहकारित्वं तथा स्वजनकस्वपूर्वोत्पन्नस्य स्वसहकारित्वाभावे
नोक्तदोषाभावात्· वस्तुतस्तु घटः कर्मत्वमानयनं कृतिरित्यादिस्वरूपायोग्यनिराकांक्षवाक्यस्य घटक
र्मकानयनादिरूपविषये प्रामाण्यवारणाय प्रयोगहेतुभूतत्वं ज्ञानविशेषणं तत्त्वं च प्रयोगहेतुर्यस्य त
त्त्वं वक्तृत्वं संवादश्च विषयतेति स्वजन्यज्ञानसमानविषयकत्वं पर्यवसन्नं तथा च स्वजन्यज्ञानसमानवि
षयवाक्यार्थप्रमाजन्यत्वं निराकांक्षादिव्यावृत्तं लक्षणार्थः फलितः यत्तु वर्णत्वेन शब्दसामान्यं प्रति स्वरूपयो
ग्यतया शाब्दप्रमास्वरूपयोग्यमात्र[illegible]लक्ष्यतया निराकांक्षादेरपि लक्ष्यतया तद्वारणार्थं कृतया नोक्त
विशेषणसार्थक्यं न चैवमपि ध्वन्यात्मकशब्दवारणाय तदवस्थमिति वाच्यं शब्दत्वस्यानेवर्णत्वे नि
वेशेपि व तद्वारणसंभवात् वर्णत्वजातेः सुखादिजातिवदप्रामाणिकतया शाब्दत्वेनैव शाब्दप्रमास्वरूपयो

लक्ष्यत्वमेवेति तदसत्त्वात् तत्तदर्थबोधेपरस्परमाकांक्षात्तदर्थोपस्थापकपदत्वेनैव स्वरूपयोग्यत्वात्॥

ग्यतया ध्वनेरपि लक्ष्यत्वस्य समुचितत्वाच्चेति तदसत् घटः कर्मत्वमित्यादिनिराकांक्षवाक्यस्य शब्दस्वरूपेण घट
कर्मत्वादिविषयकप्रमास्वरूपयोग्यत्वेपि प्रमात्वनियतधर्मावच्छिन्नमत्र हर्थविषयकप्रमानिष्ठकार्यता
नियतधर्मावच्छिन्नमत्र हर्थविषयकप्रमानिष्ठकार्यतानिरूपितस्वरूपयोग्यताया एव लक्ष्यतावच्छेद
ककोटिप्रविष्टतदर्थघटितप्रमाणत्वरूपतया निराकांक्षादेरलक्ष्यत्वात् तत्कारकविशेषणस्यावश्यकत्वा
त्। यदपि घटः कर्मत्वमित्यादिवाक्यस्य प्रमात्वनियतकर्मत्वादिविषयकघटादिप्रकारकशाब्दबुद्धित्वावच्छि
न्नं प्रतिस्वरूपयोग्यत्वात् लक्ष्यत्वमेवेति तदप्यसत् तत्तदर्थबोधेपरस्परसाकांक्षतत्तदर्थोपस्थापक
पदत्वेनैव स्वरूपयोग्यत्वात्॥ ननु नव्यनये वाक्यैकवक्तृवाक्यार्थज्ञानस्याहेतुत्वे प्रोक्तलक्षणासंभवस्तथा
हि। यावत्त्वस्य जन्यतावच्छेदकत्वे शुकादिवाक्ये व्यभिचारः न च वक्तृवाक्यार्थतु बोधयिषापूर्वकवाक्यत्व
स्यावक्तृवाक्यार्थयथार्थज्ञानजन्यतावच्छेदकत्वात्र दोष इति वाच्यं। तथापि शुकादिवाक्यस्थले वक्तृवा
क्यार्थज्ञानाघटितसामग्र्ये वोक्तवाक्यस्यापि निर्वाहे तत्र वक्तृवाक्यार्थयथार्थज्ञानस्यान्यथासिद्धदुर्वारत्वात्

स्योपमानमुख्यविशेष्यकगवयव्यक्तिमुख्यविशेष्यकतयोपमानेपि स्वसमानमुख्यविशेष्यकशब्दोपजी
वकत्वाभ्युक्तरीत्या निर्वाह इति तदसत् विशेष्यतायां मुख्यधर्मप्रकारतानिरूपितत्वनिवेशेन सामंजस्यात्॥
यत्तु मानतावच्छेदकधर्मावच्छिन्नोपजीव्यतानिरूपितमुपजीवकत्वमानं तदभिधाने नियामकं शक्तिपरिच्छि
त्तिरेवोपमानफलं ननु कारणतापरिच्छित्तिरपीत्युपमानमात्रस्यैव शब्दोपजीव्यता शब्दमात्रस्य चनोपमा
नोपजीव्यत्वे घटोस्तीत्यादौ व्यभिचारादिति न कोपि दोष इति तन्न कारणतापरिच्छित्तेरप्युपमानफलत्वसो
पमानपरिच्छेदव्यवस्थापनात् वस्तुतस्त्वनुमानपरिच्छेदसंगतेरनंतराभिधानाव्याप्यत्वास्यानंतराभिधा
नव्यापकत्वस्य च व्यवस्थापने न संगतेरुभयत्राविशेषेपि नक्षतिः अनंतराभिधाननियामकश्चोद्देशक्रम
एव यत्तु उद्देशक्रमेपि संगतिरेवबीजमिति तदसत् उत्क्रमेणासंगतेस्तद्बीजत्वासंभवेन स्वतंत्रेच्छस्येति
न्यायेनेच्छाया एव तन्नियामकत्वादित्येवं तत्त्वं॰ तत्राप्तोपदेशः शब्दः अत्राप्तः प्रकृतवाक्यार्थयथार्थज्ञा
वान् तस्योपदेशः तज्जन्योपदेशः। विशिष्टजन्यत्वं च विशेष्यस्याबाधितकतया विशेषणएजन्यत्वे पर्यव

शा॰कौ॰ द्रत्वस्योभयत्र संबंधासंभवात्॥ यत्तु प्रयोगहेतुभूतत्वं न ज्ञानविशेषणं किंतु उक्तातिप्रसंगवारणाय स्वातंत्र्येणै
५ व निविष्टे अर्थपदस्य च प्रकृतवाक्यार्थपरतया न वक्तिनेत्यादावतिप्रसंगः तच्च प्रयोगसामग्रीसहकृतत्वं प्र धा
तोः प्रत्ययार्थकतया सहकार्यसहकारिभावसंबंधरूपत्वाभिप्रेरेवात्र विवक्षणात् । तथा च प्रयोगपदस्य शब्दपरत्व
याभूतं तेन शब्दसामग्रीजन्यत्वं लब्धं तच्च न संस्कारादावितिनातिप्रसंग इति लक्षणे शब्दत्वं तन्निविष्टमिथु
नमिथ्येत्तत्वंसं॰ लघुभूतशब्दत्वनिवेशेनैवोपपत्तौ शब्दसामग्रीजन्यत्वस्य गुरोर्निवेशनौचित्यात् । नवी
नास्तु । शब्दो गुणइत्यादिप्रत्यक्षकरणस्य तादृशार्थबोधौपयिकाकांक्षाविरहितस्य वाक्यस्य वारणाय प्रमा
सामान्यबोधकशब्दस्य शाब्दप्रमारूपविशेषपरतया आवश्यकत्वया शाब्दप्रमाकरणत्वरूपलक्ष्यतावच्छे
दकलाभसंभवे लक्ष्यतावच्छेदककोटौ शब्दपदांतरप्रक्षेपं विज्ञैव प्रत्यक्षादिव्यावृत्तलक्ष्यतावच्छेदकलाभ
संभव इति लक्षण एव शब्दत्वनिवेशो न तु लक्ष्येपीति प्राहुः अज्ञायमानशब्दस्य करणतामते तादृशश हे॰ख॰
ब्दत्वमेव लक्षणे शब्दज्ञानस्य करणमते तादृशशब्दज्ञानत्वं लक्षणं बोध्यं । एवं लक्ष्यतावच्छेदकमपि मानशब्द ५

त्वं प्रमाणशब्दज्ञानत्वं वा मनमेदेन बोध्यं । यद्वा आप्तोपदेशः शब्दः आप्नोतिस्वप्रकारविशेष्यतया व्याप्नोतीति आ
प्तः यथार्थः उपदेशः शाब्दबोधः तथा च समासादि निविग्रहे तादृशबोधकरणत्वं शाब्दप्रमाकरणत्वपर्यवसन्नल
क्षणं । प्रयोगहेतुभूतेत्यादिमणिकोक्तस्याप्युक्त एवार्थः प्रयोगो हेतुभूतो यस्यार्थतत्त्वज्ञानस्येति समभ्यासात्॰
ज्ञानांतं शाब्दप्रमापरं नंदेवजन्यं यस्येति वक्तुर्व्रीहिं तराश्रयणेन शाब्दप्रमाकरत्वे समुदितलक्षणवाक्यार्थः प्र
त्यक्षादिप्रमाणातिप्रसंगवारणाय प्रमायां शाब्दत्वनिवेशः शब्दपदस्य च लक्ष्यतावच्छेदक एव निवेशः लक्ष्यताव
च्छेदकनिविष्टप्रमात्वं च प्रामाण्यव्यवहारविषयत्वं न तु प्रमाकरणत्वं तेन लक्ष्यतावच्छेदकलक्षणयोर्नाभेदः शा
ब्दत्वं शाब्दयामीत्यनुभवसिद्धो जातिविशेषः यत्तु आप्तो यथार्थः उपदेशः शब्दज्ञानजन्यत्वव्याप्यशब्दावि
षयकत्वं तिजातिमान्बोध शाब्दविषयकेति उपमितिवारणाय समासात् इति विग्रहः तथा च तादृशबोधक
रणत्वमेव लक्षणमिति तदसत् गौरवात् उपदर्शितशीसाकारणतापरिच्छिन्नेरपि उपमितित्वेनोपमि
तिवारणसंभवाच्च॰ एतेन जन्यपदधीजन्यत्वव्यभिचारर्यनुभवत्वाव्यापकजातिशून्यत्वे संति पदविषयकत्व

सा॰कौ॰ व्यभिचारिजातिमदनुभवत्वं शाब्दत्वं तदवच्छिन्नप्रमाकारणत्वं लक्षणं स संतमनुमित्यादिवारणाय उपमित्यादि-
६ वारणाय जातिमदित्यंतं सत्त्वादिकमादाय असंभववारणाय सत्यंतेनुभवत्वाव्यापकेति अनुमितित्वस्यापि ईश्व-
रीयपदज्ञानजन्यत्वाव्यभिचारित्वातिप्रसंगवारणाय जन्येतीत्यपि परास्तं· जन्यपदज्ञानजन्यत्वाव्यभिचा-
रिजातिमत्वे नैवानुमित्यादिवारणे शून्यत्वांजनिवेशे गौरवाच्च किंचानुमितौ ज्ञानत्वेनैव लिंगज्ञानस्य कारण-
तया जन्यपदज्ञानस्य ज्ञानत्वेनानुमितौ स्वरूपयोग्यतया शून्यत्वात् तन्निवेशेप्यनुमितिवारणासंभवः नच ज्ञा-
नपदज्ञानत्वेन तज्जन्यत्वनिवेशान्नोक्तदोष इति वाच्यं तथा सति शाब्दबोधेपि वर्णज्ञानत्वेन ज्ञानत्वेनैव वा
पदज्ञानस्य करणतया शाब्दत्वस्यापि जन्यपदविशिष्टबुद्धिनिष्ठतादृशजन्यत्वव्यभिचारेणासंभवात्ः अपि चय
रोक्षत्वजातेरपि जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकत्वेन शाब्दबोधेन च्छून्यत्वाभावादसंभवः न
च परोक्षत्वजातिरेवाप्रामाणिकीति वाच्यं वाध्याभावादिजन्यतावच्छेदकतया तत्सिद्धेः अन्यथानुमितित्वशा-
ब्दत्वादीनां जन्यतावच्छेदकत्वेनैककारणतापत्तेः। नचानुभवत्वेन सांकर्यात्र परोक्षत्वं जातिरि- हेरंब॰ ६

क्रमोऽस्य त्रवर्णसमुदायपर्याप्तत्वावच्छिन्नस्य क्वचिदपि क्षणेनुत्पत्त्या वाक्यत्वस्य जन्यतावच्छेदकत्वासंभवाच्चे-
ति चेन्न लक्षणस्य जन्यपदस्य प्रयोज्यपरतया वाक्यार्थज्ञानस्य वाक्यहेतुत्वाभावेपि तत्प्रयोजकत्वेनानुपपत्त्यभा-
वात्· यत्तु स्वत्वस्याननुगमेनेदं लक्षणमननुगतमिति दोषो द्रावनं तदसत्· प्रमात्वघटितलक्ष्यस्याप्येतेनानु-
गमेन लक्षणाननुगमस्यादोषत्वात्· यदि च प्रत्यक्षपरिच्छेदैककरीसा प्रमात्वमनुगतमेवेति विभाव्यते तथा-
पि नक्षतिः स्वजन्यज्ञानसमानविषयकस्वार्थप्रमाप्रयोज्यत्वसंबंधेन वाक्यविशिष्टशब्दत्वस्य किंचिद्धर्म-
विशिष्टशब्दत्वस्यैव वानुगतस्य लक्षणत्वसंभवात्· लक्ष्यतावच्छेदकं चात्र प्रमाणशब्दत्वं· प्रत्यक्षादावव्या-
प्तिवारणाय शब्दत्वनिवेशः एवं च संस्कारादावतिप्रसंगवारणाय लक्षणे शब्दत्वनिवेशः नचात्रैकस्यैव
लक्ष॰ ७ शब्दपदस्य सत्त्वात्कथं लक्ष्यैकदेशयोः शब्दत्वलाभ इति वाच्यं· शब्दपदांतरपूरणेन तल्लाभसंभवात्। यत्तु
काकाक्षिगोलकन्यायेन मध्यस्थशब्दपदस्योभयत्र संबंधेनैव तल्लाभे पूरणमनर्थकमिति तदसत्·
उद्देश्यविधेयोपस्थापकपदयोः पौर्वापर्यरूपाकांक्षायाः उद्देश्यविधेयभावप्रयोजकतया एकपदोपस्थाप्यश

शाब्दो ७

ताद्दशसामग्रीप्रतिबध्यतावच्छेदकतया विधेयताया अप्रसक्तावृत्तितया प्रसक्तस्थले स्वतंत्रप्रतिबंधकत्वस्यावश्यक
तया ताद्दशज्ञाने मानाभावात्· न चैतदनुरोधेन विधेयतायाः प्रसक्तसाधारण्योपगमान्न दोष इति वाच्यं: परामर्
शादिनियम्यायास्तस्याः प्रसक्तसाधारण्यस्यासिद्धं न विरुद्धत्वात्· न च वह्निशाब्देच्छाविशिष्टशाब्दसामग्रीका
ले वह्निमान्पर्वतो धूमवानित्याद्यनुमितेरप्यनंगीकारान्नोक्तव्यभिचार इति वाच्यं· भिन्नविषये नुमितिसामग्र्या
बलवत्त्वस्य सिद्धांतसिद्धतया ताद्दशानंगीकारासंभवादित्यलंपल्लवेन । ननु शाब्दे न प्रमाणांतरस्य तत्त्वे मानाभावात्॰
न चैवं शब्दश्रवणानंतरं शाब्दबोधासिद्ध्या प्रवृत्त्याद्यनुपपत्तिरिति वाच्यं· पदार्थोपस्थितिसापदार्थानां संसर्गावगाहि
मानसोपनीतभानेनैव तदुपपत्तेरिति चेन्न शाब्दयामीत्याकारकाशाब्दत्वावच्छिन्नावगाहिसर्वसिद्धानुव्य
वसायेन शाब्दत्वजातिसिद्धौ तदवच्छिन्नकरणतया शब्दस्य प्रमाणत्वावश्यकत्वात्· अथोक्तानुव्यवसायबला
च्छाब्दत्वसिद्धावपि तस्य मानसत्वव्याप्यत्वोपगमेन तदवच्छिन्नकरणस्य शब्दस्य प्रत्यक्षप्रमाणत्वमेव । न च शाब्दत्व
स्य मानसत्वव्याप्यत्वेपि पदजन्यपदार्थोपस्थित्यादिशून्यकाले तदवच्छिन्नापत्तिवारणाय तदवच्छिन्नं प्रति हरेः ७

पदजन्यपदार्थोपस्थितेर्हेतुत्वस्यावश्यकत्वे शाब्दत्वस्य मानसत्वव्याप्यत्वे मानाभाव इति वाच्यं· शाब्दत्वस्य मानसत्वविरुद्ध
त्वे शाब्दसामग्रीकाले मानसवारणाय मानसत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वं कल्पनीयं शाब्दत्वस्य मान
सत्वव्याप्यत्वमते तु न द्वामानसोत्पत्त्यापत्त्या तत्कल्पने न लाघवमिति लाघवेन शाब्दत्वस्य मानसत्वव्याप्य
त्वसिद्धेर्दुर्वारत्वादिति चेन्न भिन्नविषयकचाक्षुषादिसामग्रीकाले शाब्दान्यमानसवारणाय तत्र ताद्दशसाम
ग्र्याः प्रतिबंधकत्वस्य सर्वसिद्धतया शाब्दत्वे स्य मानसत्वव्याप्यत्वे ताद्दशसामग्रीकाले शाब्दबोधानुपपत्त्या
ताद्दशसामग्र्याः शाब्दान्यमानसत्वमेव प्रतिबध्यतावच्छेदकं वाच्यमिति तत्र शाब्दान्यत्वनिवेशप्रयुक्तगौरवस्य
तत्स्यमानसत्वस्य च मिथो विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तप्रतिबंधकताधिक्यप्रयुक्तगौरवस्य
च दुर्वारत्वात्· एतेन पूर्वोक्तमानसं प्रति शाब्दसामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्तलाघवमपि परास्तं· भिन्नवि
षयकचाक्षुषादिसामग्र्यभावरूपकारणबलात् शाब्दसामग्रीकाले शाब्दान्यमानसवारणाय शाब्दान्यमान
सत्वावच्छिन्नं प्रति शाब्दसामग्रीप्रतिबंधकताकल्पनावश्यकत्वात्· परं तु तत्प्रतिबध्यतावच्छेदककोटौ शाब्दा

ऽपथत

शा.कौ. मतस्याधिकस्य निवेशादि परीक्ष्यमेव गौरवं· अधिकं च अनुमानप्रामाण्यव्यवस्थापनोक्तरीत्यानुसंधेयमिति दिक्॥ अ
८ त्र वैशेषिकाः शब्दस्य प्रमाणत्वसिद्धावपि न प्रमाणांतरत्वं० अनुमान एवांतर्भावसंभवात्· तथाहि घटमानयेत्यादिपदा
नितात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदंबकत्वात् घटमानयेत्यादिपदकदंबवदि
त्यनुमानेन संसर्गज्ञानसिद्धौ ज्ञानावच्छेदकतया पदार्थसंसर्गसिद्धिः संभवतीति शब्दो न पृथक्प्रमाणं· अथ रज
तज्ञानवानयमिति ज्ञानात्प्रवृत्तिवारणाय पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्यैव प्रवर्त्तकत्वया प्रवर्त्त
कज्ञानेनानुमानात्सिध्यतीति प्रवर्त्तकज्ञानसंपत्त्यर्थं शब्दप्रामाण्यमावश्यकं· न च पुरोवर्त्तिनि रजतत्वानयनार्थिप्र
वृत्त्यौपरोक्षज्ञानस्य नोपादानप्रत्यक्षविधया नवेष्टसाधनत्वकृतिसाध्यत्वज्ञानविषयाहेतुतेति न प्रवृत्त्य
सरोधेन शब्दप्रामाण्यमितिवाच्यं। रजतानयनमिष्टसाधनं कृतिसाध्यं चेति ज्ञानस्येदंत्वेन पुरोवर्त्तिरूपोपादा
नप्रत्यक्षस्य च सत्त्वेपि पुरोवर्त्तिनि रजतत्वविपरीतज्ञानदशायां न रजतानयनार्थिप्रवृत्तिरपि तु शब्दादिनात
त्र रजतत्वनिश्चये सत्येव सत्यनुसारेण दृढज्ञानस्यापि स्वातंत्र्येण हेतुत्वात्· न चैवमपि न प्रवर्त्तकज्ञानसंपत्तिः हेरंब० ८

वाच्यं॥ प्रत्यक्षत्वातिरिक्तानुभवत्वजातावेव मानाभावात्॥ अथ वह्न्याद्यनुमितित्वाविशिष्टकार्याद्यनुमितिसामग्र्याः प्रत्य
क्षशाब्दादिप्रतिबंधकतया प्रत्यक्षत्वादेस्तत्प्रतिबध्यतावच्छेदकत्वे गौरवेणानुमितित्वस्य प्रत्यक्षशाब्दाद्यवृत्तिवैजात्यस
स्यैव तादृशसामग्र्यभावजन्यतावच्छेदकत्वस्योपेयत्वे तादृशवैजात्येन सांकर्यात् अपरोक्षत्वजातिरिति चेन्न तादृश
वैजात्यस्येश्वरज्ञानवृत्तितया नित्यसाधारण्येन जन्यतावच्छेदकत्वासंभवात्· न चेश्वरज्ञानव्यावृत्तमेव तदु
पेयतामिति वाच्यं तथा सति प्रत्यक्षत्वजात्या सांकर्येण वैजात्यस्यैवासिद्धिप्रसंगात्· न च नित्यसाधारण्येपि का
र्यतावच्छेदकत्वे बाधकाभाव इति वाच्यं तद्बाधकस्यान्यत्रास्माभिर्विस्तरेण प्रपंचितत्वात्· यत्तु· नव्यैरुक्तं शा
ब्दत्वाविशिष्टशाब्दसामग्रीकाले समानविषयकोपनीतभानस्यानुमितेश्चानुदयेन तद्वारणाय प्रतिबं
धकताकल्पने स्य लाघवेन प्रत्यक्षानुमितिसाधारणीमेकां जातिं स्वीकृत्य तदवच्छिन्नं प्रति तस्या एकमेव प्रतिबंध
कत्वं कल्प्यते लाघवात् एवं च तादृशजात्या सांकर्येण परोक्षत्वस्य जातित्वेन संभवतीति तदसत् वह्निमान् पर्वतो
घटवानिति साध्यनुमितौ व्यभिचारवारणाय पर्वतोद्देश्यतानिरूपितव ह्न्यादिविधेयतायाएवानुमितित्वस्थलीय

न्या॰ दी॰ विलक्षणविषयताशालित्वं तस्य अनुमितौनुपदार्थस्य संसर्गविशेषणतयैव साध्यघटकतया संबंधस्य विशेषणतयानता
९ दृशविषयताशालित्वमिति शाब्दबोधस्यानुमितित्वे लक्षणेन विलक्षणप्रतीतिनिर्वाहाय शब्दप्रामाण्यमावश्यक
मिति तद्(?)सत्। यत्र धर्मिण्यर्थे यादृशसंबंधेन पदार्थप्रकारकप्रतीतिर्नैयायिकानामभिमता विशिष्य तस्मि
न्नर्थे तादृशसंबंधेन तस्या[blot]कानुमितेरुपगमेनादोषात्॥ अथोपदर्शितरीत्या चैत्रो घटमानयतीत्यादौ क
र्मत्वानयनकृति चैत्रेषु आधेयत्वनिरूपकत्वानुकूलत्वाश्रयत्वात्संसर्गघटकमत्त्वानयनकृतौ मां समूहालंब
नानुमितेः कर्मत्वघटीयमानयनं सकर्मकं कृतिरानयनीया चैत्रः कृतिमानित्याकारिकायाः संभवेपि घटकर्म
कानयनानुकूलकृतिमांश्चैत्र इत्याकारकविशिष्टवाक्यार्थबोधासंभवेन तादृशवाक्यार्थबोधाय शब्दस्य प्रमा
णांतरत्वमावश्यकमिति चेन्न। तत्र खरवेकपोतन्यायेन विशेष्ये विविशेषणमिति रीत्या तादृशवाक्यार्थबोधोपगमे
मयापि घटकर्मत्वानयनकृतिचैत्राणां समूहालंबनोपस्थित्याह सैव विशेष्ये विशेषणमिति रीत्या चैत्रे घटकर्म हैवं॰
कानयनकृत्यनुमितेः राजपुरप्रवेशन्यायेन विशिष्टस्य वैशिष्ट्यमिति रीत्या तदुपगमे च प्रथमं कर्मत्वाद्घटीयादि सतु ९

पत॰ मितेस्तत आनयने घटकर्मकं ततः कृतिर्घटकर्मकानयनवतीत[blot]श्चैत्रो घटकर्मकानयनानुकूलकृतिमानित्यनुमितेरुप
गमेनादोषात्। यत्तु घटमानयेत्यादौ कर्मत्वादाधेयत्वसंबंधेन घटाद्यनुमितिर्न संभवति एवं घटो नास्तीत्यादाव
भावेऽनुयोगितया घटादेरनुमितिर्न संभवति वृत्तिनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकतया तत्संबंधा
वच्छिन्नप्रतियोगित्वाप्रसिद्ध्या तत्संबंधस्य व्यापकत्वाघटकतया तेन संबंधेन कर्मत्वादौ घटादेर्भानासंभवेन
शब्दस्य प्रमाणांतरत्वमावश्यकमिति तन्न। वृत्तिनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वेपि साध्यताव
च्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यघटितव्याप्तौ तत्संबंधावच्छिन्नप्रतियोगिताया अनिवेशेन वृत्ति
नियामकसंबंधस्यापि व्यापकताघटकत्वसंभवात् वृत्तिनियामकसंबंधस्याभावप्रतियोगितावच्छेदक
त्वे बाधकाभावेन साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानिवेशेपि तस्य व्यापकताघटकत्वसंभवाच्च।
अथ घटादन्य इत्यादौ पदार्थैकदेशपदार्थविशेषणतापत्तेरन्यत्वादौ पंचम्यन्तार्थप्रतियोगित्वादेर्भानेनानु
मानान्निर्वहति अनुमितौ पक्षस्य मुख्यविशेष्यतयैव भानात्। न चान्यत्वादिरूपपक्षस्य धर्मिणि विशेषणतया

या॰ वो॰ नभानेधर्मिवच्छेदकत्वसाध्यकानुमानान्तरादेव शाब्दबोधसमानाकारानुमितिनिर्वाहइतिवाच्यं॰ शब्दइमिति अन्यत्वा
१० देर्निधीर्मितावच्छेदकस्यभानात् अनुमानस्यचपक्षतावच्छेदकावच्छिन्नएवसाध्यभासकतयातत्तत्सादृशभानाति
र्वाहादितिचेन्न एकदेशीपदार्थान्तरान्वयस्यक्काप्यनभ्युपगमेनघटादेर्मद्दसादेरन्यत्वादिविशिष्टएवान्यत्वादि
घटितसंबंधेनघटप्रतियोगिकत्वादेरत्वयोपगमेनधर्मिविशेषणतापन्नत्वान्यत्वादेःसाक्षात्संबंधेनतत्प्रकारक
भानस्यानभ्युपगमात्।यत्तुमणिकारानुसारिभिरुक्तं योग्यतासंशयकालेपिशाब्दबोधोनुभवसिद्धःतदानीञ्च
योग्यताघटितोरूहेतोर्निर्णयासंभवेनानुमितिर्नसंभवतिलिंगतावच्छेदकांशेलिंगांशेवासंशयात्मकपरा
था. मर्शस्यानुमितिजनकत्वेतदंशेनिर्णयात्मकपरामर्शस्यैवानुमितिजनकत्वादितिशाब्दाख्यप्रमितिविशेषस्वी श्री
कारस्यावश्यकतयातदनुरोधेनशब्दस्यप्रमाणांतरत्वस्वीकारआवश्यकः।नचयोग्यतासंशयस्यग्राह्यसंशय
पर्यवसन्नतयातस्यचानुमित्यनुगुणतयाग्राह्यसंशयात्मकसंशयभेदस्यैवानुमितौपयिकनिश्चयत्वेनघटकत हेरंब॰
यायोग्यतांशेसंशयात्मकादपिपरामर्शान्नानुमित्यनुपपत्तिरितिवाच्यं॰ गौरवात्॰ग्राह्यसंशयान्यसंशयभेदस्या १०

इदंरजतमितिशाब्दजन्यज्ञानस्यरजतप्रकारकत्वादितिवाच्यं॰तत्ररजतविशेषणतापन्नस्यरजतत्वस्यापिधर्मिविशेष
णतयाभानोपगमेनसामंजस्यादितिचेन्न लाघवेनान्तरजतत्वमितिज्ञानस्यप्रवर्तकत्वानुरोधेनचपुरोवर्तित्व
तावच्छेदकवैशिष्ट्यावगाहिज्ञानत्वेनैवप्रवर्तकतयासाध्यस्यज्ञानपदस्यप्रमापरत्वेनप्रमात्वघटकतयाप्रकृ
तेतस्याप्यक्षतत्वात्॰ नचानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेनानुमानात्स्मारितपदार्थत्वेनैव
रजतादिसंसर्गःसिद्ध्यतु।जनत्वादिनातत्संसर्गइतितत्सिद्ध्यर्थंशाब्दप्रमाणमावश्यकमितिवाच्यं॰रजतादिप
दश्रवणेनरजतत्वादिनारजतादेरुपस्थितावितरबाधबलाद्विशेषरूपेणानुमितौभानसंभवात् लाघवज्ञानेतद्बा
धस्यत्वेव्यापकतानवच्छेदकरूपेणापिव्यापकमानस्यसर्वसिद्धत्वात्॰यद्वारजतादिपदश्रवणेनरजताद्युपस्थि
तौएतद्वाक्यघटकपदस्मारितारजतानयनादयःपदार्थाएतद्वाक्यतात्पर्यविषयमिथःसंसर्गवंतःआकांक्षादि
मदेतद्वाक्यघटकपदस्मारितत्वात्घटेन्नजलमाहरेत्यादिवाक्यघटकपदस्मारितार्थवदित्यनुमानाद्विशेष
रूपेणासंसर्गासिद्धिः।यत्तुशाब्दबोधेघटकर्मत्वाधेयाधाराधेयभावादिःसंसर्गमर्यादयाभासतइतिसंसर्गतया

त्वात् कुत्र शब्दस्य सत्यापत्त्याधीनत्वदृष्टितः हेतोर्वा सर्वत्र निश्चयासंभवेऽपि तन्निश्चयदशायां तथापि तत्सहेतुताकावश्यमभ्युपे
११ यनिश्चयविषयतासंबर्थलिंगकपरामर्शाद्देव शाब्दसमानाकारानुमितिसंभवे नानुमानान्तर्भावसंभवे शब्दस्य प्रमाणान्तर
त्वासिद्धेः अथ तात्पर्येण तद्वत्तया बुद्धेर्बोधयिषितत्वं तथा च कर्मत्वादिकमाधेयतादिना घटादिमत्वं ते न घटादिमत्तयानु
बोधयिषितं तत्वादिसाकारकानुमाने एवान्तर्भावो वाच्यः स च न संभवति ते न घटादिश्चरूपस्य पिते न संबंधेन घटादि
मत्तया बुद्धेर्बोधयिषितत्वं तेन नत्त्रीत्वहेतोर्व्यभिचारादिति चेन्न व्यभिचाराप्रतिसंधानदशायां भ्रमात्मकोक्तलिं
गकपरामर्शात्तत्प्रतिसंधानदशायां च भ्रमाद्यधीनत्वादिरूपविशेषणावच्छिन्नोक्तलिंगकप्रमात्मकपरामर्शा
दनुमितिसंभवादिति वदंति अत्र नैयायिकाः व्याप्त्यादिप्रतिसंधानविरहदशायामपि शाब्दबोधस्यानुभविकत्व
या तदानीमनुमितिसामग्र्यभावे नानुमितिसंभवात् शब्दस्य प्रमाणान्तरत्वमावश्यकं यदि च शब्दस्य प्रमाणान्त
रत्वे सर्वत्र शाब्दबोधजनकसामग्र्यन्तरकल्पने गौरवमिति सर्वत्र शाब्दबोधस्थले व्याप्त्यादिप्रतिसंधानकल्पन
मेव सम्यक् तथा सति क्लृप्तसामग्र्यैवोपपत्तौ सामग्र्यन्तराकल्पनेन लाघवादिति भाव्यते तथापि न क्षतिः चैत्रवाक्याद् हेतु॰ ११

यमर्थः श्रुत इत्यादिव्यवहारविषयतया शाब्दात्मकविलक्षणानुभवस्वीकारस्यावश्यकतया तत्करणतया शब्दस्य प्रमा
णान्तरत्वाविशेषकत्वात् न च तत्र श्रुधातोरनुमितिरर्थकतया भवितव्यं क्षणानुभवसिद्धिः कुतस्तत्करणतया शब्दस्य प्र
माणान्तरत्वमिति वाच्यं तथा सति पर्वतो वह्निमानित्याद्यनुमित्यनन्तरं पर्वते वह्निरनुमित इत्यादिव्यवहारवत्स
र्वतेव ह्निः श्रुत इत्यादिव्यवहारापत्तेः न च शब्दहेतुकानुमितेः श्रुधात्वर्थत्वोपगमान्नोक्तापत्तिरिति वाच्यं त
थापि यत्र शब्दहेतुनाकाशे आकाशपदशक्यमनुमितं तत्राकाशे आकाशपदशक्यत्वमनुमितमिति व्यवहारवदा
का काशे आकाशपदशक्यत्वं श्रुतमिति व्यवहारस्य दुर्वारत्वात् न च स्मारितत्वसंबंधेन शब्दहेतुकानुमितिः श्रुधात्व
र्थस्तान्नोक्तदोषः उक्तस्थले समवायेन शब्दस्य हेतुत्वादिति वाच्यं एवमप्याकांक्षादिज्ञानविरहदशायां यत्र स्मारित
त्वसंबंधेन शब्दहेतुकानुमितिस्तत्र श्रुतत्वव्यवहारस्य दुर्लभशक्यत्वात् न च नैयायिकसिद्ध शाब्दसामग्री सम
वधानाव्यवहितोत्तरानुमितेः श्रुधात्वर्थत्वान्न दोष इति वाच्यं तादृशसामग्र्याद्यप्रतिसंधाने तादृशव्यवहारानुप
पत्तेः अनंतायाः शब्दार्थादिभेदभिन्नसामग्र्या अननुगमेन श्रुधातुशक्तिग्रहानुपपत्तेश्च एतेन श्रुधातोरावरण

या. कौ. सप्तम्येवार्थः श्रूयते शब्द इत्यादौ कर्मप्रत्ययस्य प्रतिपत्त्यनुकूलविधिविषयतार्थकत्वेऽपि चैत्रवाक्यादयमर्थः श्रुत इत्यादौ व्यापारा
१२ नुकूलविधिविषयत्वेनैवार्थः॥ उच्यते उक्तकृत्यादौ ताविषयतापि कर्मप्रत्ययार्थत्वस्य ...त्वात् एवं च श्रावणप्रत्यक्षीयश
ब्दलिंगकानुमित्यात्मकव्यापारविषयताया अर्थे सत्त्वे न चैत्रवाक्यादयमर्थः श्रुत इत्यादिव्यवहारोपपत्तौ
न तदनुरोधेन शाब्दाख्यविलक्षणानुभवसिद्धिरिति न शब्दस्य प्रमाणान्तरत्वं अत एवात्मा वारे श्रोतव्य इति
श्रुत्यनुरोधेन श्रुधातोः शाब्दानुभवार्थकत्वपविनाशेऽपि तत्राप्युक्तरीत्यैवोपपत्तेरित्यपि परास्तं. आकांक्षा
दिज्ञानाभावकालीनशब्दलिंगकानुमितिमादाय तद्विषये श्रुतत्वव्यवहारोपपत्तेः। किंच श्रुधातोः श्रावणप्र
त्यक्षमात्रार्थकत्वे चैत्रवाक्याच्छ्रुतोऽयमर्थ इत्यादौ हेतुपंचम्यनुपपत्तिः। श्रावणप्रत्यक्षे वाक्यस्य विषयतया हेतुत्वे
ऽपि घटाद्दृष्टो घट इत्यादिप्रयोगवारणाय विषयत्वेन हेतुतातिरिक्ताया हेतुतायाएव हेतुपंचम्यर्थतया तस्या वा
क्येऽसत्त्वात्. नच कर्मप्रत्ययार्थघटकज्ञाने हेतुपंचम्यर्थत्वं यः वाक्यपदत्वद्रूपवाक्यज्ञानस्यानुमित्यात्मकतादृश
ज्ञाने हेतुत्वादिति वाच्यं तादृशज्ञाने हेतुपंचम्यर्थत्वस्योपगमेनुमितिरूपे तादृशज्ञाने व्याप्तिज्ञानादेर्हेतुतया हेरंब. १२

नुमितिजनकतावच्छेदककोटिनिविष्टनिश्चयत्वघटकत्वे सर्वत्र निश्चितत्वव्याप्तिकसंदिग्धसाध्यरूपलिंगकात् वह्निव्या
प्यवह्निमानयमित्याद्याकारकपरामर्शादनुमित्यापत्तेश्च ननु लिंगतावच्छेदकाविषयकस्य साध्याभाववदवृत्तित्वरूपव्या
प्तिज्ञानस्यानुमितिहेतुत्वोपगमेन लिंगतावच्छेदकांशे संशयत्वस्याकिंचित्करतया संदिग्धयोग्यताघटितधर्माव
च्छिन्नलिंगकपरामर्शादप्यनुमितिः संभवति. एवं बाधाभावरूपयोग्यतायाः संशये बाधाभावत्वेन तन्निश्चया
संभवेऽपि व्याप्यत्वेन तन्निश्चयसंभवेन योग्यताहेतुकाप्यनुमितिः संभवतीति चेन्नैवं. हेतुतावच्छेदकस्य पक्षवृत्ती
त्वसंदेहे पक्षेऽपि हेतुतावच्छेदकविशिष्टस्योचितसावर्जितसंशयेन व्याप्यतावच्छेदकविशिष्टवत्तानिश्चयं विना व्या
प्यत्वपुरस्कारेणापि पक्षे व्याप्यनिश्चयासंभवात् विरोधिनिश्चयासत्त्वेन व्याप्यवत्ताबुद्धौ व्याप्यसामान्या
भावस्य भाने बाधकाभावात्. अत एव पर्वतीयहेतौ अयं धूमो धूलीपटलो वेति संदेहे हेत्वंतरस्यालोकादेर
निश्चये कदापि न वह्न्यनुमितिः. नचैवमयमालोको धूमो वोभयथापि वह्निव्याप्य इति संशयस्थले कथमनुमि
तिरिति वाच्यं. तत्र व्याप्यतावच्छेदकतया सगतान्यतरत्वादिना पक्षे धूमादिनिश्चयानंतरमेवानुमितेरुपगमात्

ना॰कौ॰ द्धौ नेजनकत्वानुरोधेन प्रतिबंधकताभेदाभावेन शाब्दबोधे प्रतिबंधकत्वोत्तरकल्पनप्रयुक्तलाघवस्यानपायात्॰
एवं चिरन्तनमते एकस्मिन्नेव विषये शाब्दानुमित्सोस्सामग्रीसत्त्वे अनुमित्साप्रतिवारणाय अनुमित्सो शाब्दसाम
१२ ग्र्याः प्रतिबंधकत्वान्तरकल्पने गौरवं व्याप्यत्वमते तु तत्र शाब्दात्मकानुमितेरुत्पत्त्येष्टापत्त्या उक्तस्यासंभावेन तत्
त्कल्पने लाघवमिति लाघवसत्त्वेन तत्साहचर्यानुमानमपि शाब्दबोधेनुमितित्वसत्त्वे मानं। अथ शाब्दत्वस्यानु
मितित्वव्याप्यत्वे शाब्दसामग्र्या व्याप्त्यादिज्ञानघटितत्वया गुरुशरीरत्वेन भिन्नविषयकप्रत्यक्षादौ शाब्दसामग्रीप्रति
बंधकतायामवच्छेदकगौरवं लिंगादिभेदेन एकैकविषय एवं न्यायंतापेक्षया शाब्दसामग्रीबाहुल्येन प्रतिबंध ८६
कताबाहुल्यं चेति चेन्न। अन्वयव्यतिरेकिलिंगकानुमित्सोस्सामग्रीभेदेपि एकजातीयत्वव्याप्त्यादिज्ञाननिरपे
क्षपदज्ञानादिघटितसामग्र्याः शाब्दानुभवजनकत्वेपि तस्यानुमितिजनीयत्वाविरोधेन व्याप्त्यादिज्ञाने शाब्दसामग्रीघ
टकत्वस्यास्माभिरप्यनुपगमात्। न च व्याप्त्यादिज्ञानं विना शाब्दात्मकानुमित्युपगमे तत्र व्याप्त्यादिज्ञानस्यानुमिति हे॰ब॰
हेतुतायां व्यभिचार इति वाच्यं। अन्वयव्यतिरेकव्याप्तिज्ञानयोः परस्परजन्यानुमितावि वशाब्दत्वस्यानुमितित्वव्याप १२

त्वेपि व्याप्त्यादिज्ञानाव्यवहितोत्तरत्वस्य तत्कार्यतानवच्छेदकत्वेनैव तस्य निरासंभवात्। न च शाब्दजनकस्य आकांक्षा
दिज्ञानस्य जन्यतावच्छेदककोटावनुमितित्वस्याप्रवेशात्कथं तादृशसामग्रीजन्यज्ञानस्यानुमितित्वमिति वाच्यं। अ
नुमितित्वावच्छिन्नं प्रसभावज्ञानस्य कारणत्वात् शाब्दसामग्र्या अभावज्ञानरूपानुमितित्वावच्छिन्नकारणात्मका कां
क्षाज्ञानघटितत्वे तथा तज्जन्यबोधस्यानुमितित्वसंभवात्। अथ सिद्धिकाले शाब्दबोधदर्शनेन तत्र पक्षताया अ
नुमितिहेतुत्वे व्यभिचार इति। तद्वारणाय शाब्दान्यानुमितित्वमेव तज्जन्यतावच्छेदकं वाच्यमिति शाब्दत्वस्यानुमि
तित्वव्याप्यत्वे तत्र शाब्दान्यत्वनिवेशप्रयुक्तगौरवं दुर्वारमिति चेन्न पक्षताया लिंगविशेषितत्वे तन्नयानं तल्लिं
गकानुमितौ तत्तल्लिंगकेच्छाविरहविशिष्टसिद्ध्यभावस्य हेतुतया उभयलिंगकपरामर्शजन्यसिद्धिकाले नान्यलिं
गकेच्छाधीनानुमितौ व्यभिचारवारणाय तत्र तल्लिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यत्वस्य जन्यतावच्छेदके
त्वावश्यकतया सिद्धिकालीनशाब्दानुमितौ व्यभिचाराभावात्। न च व्याप्त्यादिज्ञानाजन्यशाब्दे अनुमितित्वोपग
मेऽपसिद्धान्त इति वाच्यं। पक्षताया अजन्येनुमितित्वोपगते तद्गणामस्माकं व्याप्त्यादिज्ञानाजन्येप्यनुमितित्वोपग

मा॰ को॰ प्रसिद्धेस्तदभावादिति तदवच्छेदकैरुक्तं तदसत्तमसत्व्याप्त्यादिज्ञाननिरपेक्षशाब्दसामग्रीतोऽनुमितित्वस्वीकृ
तशाब्दस्यानुमितित्वस्वीकारे विनिगमनाविरहेण पदज्ञानादिनिरपेक्षानुमितिसामग्रीतः शाब्दबोधस्वी
१७ कृतस्यानुमितित्वस्य शाब्दत्वव्याप्यत्वापत्तेर्दुरुद्धरत्वात्। न च शाब्दत्वस्यानुमितित्वव्याप्यत्वे उक्तलाघववदनुमिति
त्वस्य शाब्दत्वव्याप्यत्वे लाघवाभावान्न विनिगमनाविरह इति वाच्यं। समानविषयकप्रत्यक्षसामग्र्यास्तादृशानु
मितिं प्रति प्रतिबंधकत्वांतरं न कल्प्यते तादृशशाब्दबोधं प्रति क्लृप्तप्रतिबंधकतयैवोपपत्तेरिति लाघवस्य सं
भवात्। न चानुमितिजनकव्याप्त्यादिज्ञानजन्यतावच्छेदककोटौ शाब्दत्वस्यानिवेशात्कथं तादृशसामग्रीज
न्यज्ञानस्य शाब्दत्वमिति वाच्यं। पदज्ञानस्य शाब्दबोधे पदविषयकत्वमनिवेश्य ज्ञानत्वादिना कारणतासं
भवेनालिंगज्ञानस्य लिंगविषयकत्वमनिवेश्य ज्ञानत्वादिनानुमितिकारणत्वेनानुमितिसामग्रीजन्यतावच्छे
दककोटौ शाब्दत्वनिवेशसंभवात्॥ न चाकांक्षादिज्ञानं विनानुमित्यात्मकशाब्दबोधोपगमे तत्राकांक्षादि हे॰ ख॰
ज्ञानस्य शाब्दबोधहेतुतायां व्यभिचार इति वाच्यं। एकैकविधविशेषशाब्दबोधप्रयोजकानुपूर्वीविशेषरूपा १७

व्याप्त्यादेः श्रुततद्व्यसादिव्यवहारस्य दुर्वारत्वात्। तस्मात्शाब्दात्वविलक्षणानुभवस्य श्रुधात्वर्थत्वमावश्यकं। यत्तु शाब्दा
त्वविलक्षणानुभवस्य श्रुधात्वर्थत्वेपि तत्स्फुरणतया शाब्दस्य प्रमाणांतरत्वे शाब्दत्वस्यानुमितित्वव्याप्यत्वा
पगमेनानुमानएवांतर्भावात्। न च शाब्दबोधेनुमितित्वस्य स्वेमानाभावेन शाब्दत्वस्यानुमितित्वव्याप्यत्वं न
संभवतीति वाच्यं। विरुद्धत्वमते समानविषयकप्रत्यक्षसामग्रीकाले तादृशशाब्दबोधवारणाय तत्र तादृशसाम
ग्र्याः प्रतिबंधकत्वांतरं कल्पनीयमिति गौरवं व्याप्यत्वमते तु तादृशसामग्र्याः स्वानुमितिस्थलीयक्लृप्तसामग्रीप्र
तिबंधकतयैवोपपत्तौ न तत्कल्पनमिति लाघवतर्कसहकृतानुमानस्यैव तत्र मानत्वात्। अथ शाब्दत्वानुमि
तित्वप्रकारकेच्छयोः पृथगुत्तेजकत्वानुरोधेन प्रतिबंधकताभेदस्यावश्यकतया न क्लृप्तप्रतिबंधकतयोप
ने॰ पत्तिः न चैकत्रैवेच्छाद्वयस्योत्तेजकत्वात्पृथगुत्तेजकत्वमेवासिद्धमिति वाच्यं तथा सति शाब्दत्वप्रकारकेच्छाका
ले प्रतिबंधकतावच्छेदकसामग्रीसत्वे सत्त्वे शाब्दसामग्र्यां शाब्दान्यानुमित्यापत्तेरिति चेन्न यादृशविषयविशेषे तु
समानविषयकप्रत्यक्षसामग्रीकाले शाब्दत्वप्रकारकेच्छावलात्तादृशशाब्दबोधस्तादृशानंतविषयेषु
हे॰ हे॰

न्या॰ दी॰ त्वात्॰ न चानुमितित्वस्य शाब्दत्वव्याप्यत्वे पक्षतान घटित तत्समानविषयकशाब्दबोधसामग्रीकाले तादृशसा
१५ मग्रीजन्यशाब्दबोधो जायतामितीच्छासत्वे तादृशसामग्रीजन्यशाब्दात्मकानुमितिवारणाय तादृशसाम
ग्र्यास्तत्प्रतिबंधकत्वकल्पने गौरवमिति वाच्यं॰ शाब्दत्वस्यानुमितित्वव्याप्यत्वेपि व्याप्त्यादिज्ञानघटितसमान
विषयकानुमितिसामग्रीकाले तादृशसामग्रीजन्यानुमितिर्जायतामितीच्छासत्वे तादृशसामग्रीजन्यानुमि
त्यात्मकशाब्दबोधवारणाय तत्र तादृशसामग्र्याः प्रतिबंधकत्वकल्पने नाधिक्यात् न च तत्र तादृशशाब्द
बोधस्यापि स्वीकारे क्षतिविरह इति वाच्यं मन्मते प्युक्तस्थले तादृशानुमितेरपि स्वीकारे क्षतिविरहात्॰ न चै
वं तत्रानुमिनोमीत्यनुव्यवसायापत्तिरिति वाच्यं॰ भवन्मतेपि तत्र शाब्दबोधस्वीकारे शृणोमीत्यनुव्यवसाया
पत्तेर्दुर्वारत्वात् समाधानस्याप्युभयमते तुल्यत्वात्॰ वस्तुतस्तु। शाब्दबोधोत्तरं नानुमिनोमीत्यनुव्यवसा
येन शाब्दत्वस्यानुमितित्वव्याप्यत्वमसंभवि न च तस्या व्याप्त्यादिज्ञानघटितसामग्रीजन्यानुमिति
त्वावच्छिन्नाभावविषयकत्वान्नदोष इति वाच्यं॰ व्याप्त्यादिप्रतिसंधानविरहदशायामपि तस्योत्पात हेरंबं॰ १५

द्विषयकत्वासंभवात्॰ केचित्तु॰ शाब्दत्वस्य अनुमितित्वव्याप्यत्वेव वह्निव्याप्यधूमान्याभावविशिष्टविषो
प्यकवह्निशाब्दबोधानुपपत्तिः तद्विशिष्टे वह्निव्याप्यवत्ताबोधासंभवेनानुमित्यसंभवादित्याहुस्तद्स
त्॰ उत्कटेच्छापरामर्शनिरपेक्षाया एव सामग्र्या अनुमितिजनकत्वोपगमे नोक्तानुपपत्त्यसंभवादित्यादिकं॰ २७
अत्र प्राचीनमीमांसकाः भवत्कृतरीत्या शब्दस्य स्वतंत्रप्रमाणत्वं तथापि तत्र शब्दमात्रस्य किंतु तद्विशेष
स्य तथाहि घटमानयेत्यादिलौकिकवाक्यश्रवणानंतरं अयं वक्ता आधेयतासंसर्गककर्मत्वादिविषय
कघटादिविशिष्टज्ञानवान्॰ आधेयतासंसर्गेण कर्मत्वादिसाकांक्षपदघटादिज्ञानं तज्जन्यप्रमाघ
जन्यं यद्वाक्यं तत्प्रयोक्तृत्वात् योग्यतासंसर्गकाप्यसांकांक्षपदज्ञानजन्यभ्रमाघजन्यवाक्यप्रयोक्तृत्वात्तत्संस
र्गकतद्विषयकविशिष्टज्ञानवान् घटमानयेतिवाक्यप्रयोक्तृत्वात् कर्मत्वविषयकघटविशिष्टज्ञानवान् अहमिवेत्य
नुमानतन्मूलकात् कर्मत्वादिकमाधेयतया घटवत्तेन संसर्गेण स्वविषयकघटविशिष्टज्ञानवदुक्तपदस्मा
रितत्वात्॰ घटादिनिष्ठकरणत्वादिवदित्यनुमानाद्वा यकर्मते सत्यनुमितौ सत्सामनंतरं घटोपाकर्मतेत्या

८

ना॰ कौ॰ रिशाब्दबोध इति लौकिकशमानमनुवादकं न तु प्रमाणं वैदिकशब्दमात्रं तु प्रमाणं वेदस्य नित्यतया वक्तुरभावि
१६ न तन्न वक्तृपक्षकानुमानासंभवेन तन्मूलकोपदर्शितानुमानासंभवेनोपदर्शितरीत्यासौ नुवादकत्वासंभ
वात् गृहीतग्राह्यनुभवकरणत्वमनुवादकत्वं गृहीतग्राहीतरानुभवकरणत्वं च प्रमाणत्वमिति विवेक इति
वदंति तदसत् लाघवेन प्रमाकरणत्वस्यैव प्रमाणत्वरूपतया लौकिकवाक्यजन्यशाब्दबोधपूर्वमनुमाने
न शाब्दसमानाकारज्ञानोत्पादे पि तस्य प्रमाणत्वसंभवात्· एतेन शाब्दसामग्रीसंपादकतया लौकिकवाक्यज
न्यशाब्दबोधपूर्वं तत्समानाकारज्ञानमावश्यकमिति लौकिकवाक्यमनुवादकं वैदिकवाक्ये तु तदनावश्यक
तया तत्प्रमाणं· तथाहि क्वचिच्छाब्दप्रमा क्वचिन्नेति नियमनिर्वाहाय शाब्दप्रमायां किंचित्कारणमुपेयं तच्च
लोकवेदसाधारणं यथार्थतात्पर्यकत्वं तच्च शाब्दबोधनिरूपितज्ञाननिष्ठकारणतावच्छेदकतयावच्छे
दकं शाब्दबोधनिरूपितकारणतावच्छेदकज्ञानविशिष्टकरणस्य शब्दस्य शाब्दबोधे जननीयेसहकारित्वे
सति स्वसजनकत्वात्यन्त· परज्ञाननिरूपितकारणतावच्छेदककज्ञानविशिष्टकरणस्य यज्ज्ञाने जननीयेसह हरः ० १६

कारित्वं नाम ननु गतत्वे या परस्परजन्यशाब्दबोधे व्यभिचारवारणाय तज्ज्ञानजन्यतावच्छेदककोटावव्यव
हितोत्तरत्वनिवेशस्यावश्यकतयोक्तव्यभिचाराभावात्· न च योग्यताया एकपदार्थे ऽपरपदार्थवत्त्वरूपाया
अनुगतत्वेन तज्ज्ञानजन्यतावच्छेदके व्यवहितोत्तरत्वनिवेशस्यानावश्यकतया तद्धेतुतायां व्यभिचारो
दुर्वार इति वाच्यं· बाधनिश्चयाभावस्य स्वरूपसद्धेतुतयैव निर्वाहे शाब्दबोधे न व्यमते योग्यताज्ञानहेतुताया
एवाभावात्· तदंगीकर्तृभिः प्राचीनैश्चानुमितावपि संशयसाधारणविशेषणसंसर्गज्ञानहेतुतांगीकारे
ण योग्यताज्ञानस्यानुमितौ तन्मते व्यभिचाराभावाच्च न चानुमितित्वस्य शाब्दत्वव्याप्यत्वेनुमिनोमीत्यनु
व्यवसायस्थले प्रत्येमीत्यनुव्यवसायापत्तिरिति वाच्यं· शाब्दत्वस्यानुमितित्वव्याप्यत्वे पि प्रत्येमीत्यनु
व्यवसायस्थलेनुमिनोमीत्यनुव्यवसायस्य दुर्वारत्वात्· न चानुमितित्वप्रकारतानिरूपितविशेष्यतासंबं
धेन साक्षात्कारं प्रति शाब्दबोधभेदस्य हेतुत्वोपगमान्नोक्तापत्तिरिति वाच्यं· शाब्दत्वप्रकारतानिरूपि
तविशेष्यतासंबंधेन साक्षात्कारं प्रति अनुमितिभेदस्य हेतुतया पूर्वोक्तापत्तिवारणस्य संभवापि सुव

मा०कौ० घटादितर्कनिर्णीतत्रित्वविशिष्टकपिंजलपदार्थपरं बहुवचनांतं कपिंजलपदमिति सामान्यतः कपिंजलप
२७ दार्थत्वादिना तद्बुद्धितमेवोपयुज्यते सामान्यरूपेण निर्णयेपि तत्र पदार्थानां नियतत्वेन विशेषरूपेण तात्प
र्यसंदेहात् लोके तु घटमानयेत्यादौ घटविशिष्टकर्मतायां द्वितीयांतं घटपदमिति विशेषतः घटत्वादिना त
द्बुद्धितमेवोपयुज्यते तत्र पदार्थानामनियतत्वेन सामान्यरूपेण निर्णये विशेषरूपेण तात्पर्यसंदेहसंभवात्॰
एवं च लोके विशेषतो यथार्थतात्पर्यनिर्णयानुरोधेन शाब्दबोधः सर्वं विशेषतः एकपदार्थेऽपरपदार्थनिर्णय
स्यावश्यकतया लौकिकवाक्यस्यानुवादकत्वं वैदिकस्य तु प्रमाणत्वं॰ ननु कोयं लाघवतर्को यन्मूलकं वेदवाक्यस्य
प्रमाणत्वमिति चेत्॰ अत्र केचित् कपिंजलानालभेतेत्यादौ बहुवचनस्य यावत्कपिंजलपरत्वे यावदालंभन
स्याशक्यतयाऽननुष्ठानलक्षणाप्रामाण्यापत्तिः शक्यानुष्ठानयावत्परत्वे चाननुगमाभावात् इति किंचित्परत्वा
वश्यकत्वे त्रित्वपरत्वमेव कल्प्यते चतुष्ट्वादिप्रकारकचतुष्टादिप्रत्यक्षे त्रित्वादिसहितैकत्वसाक्षात्कारस्य हेरंब०
हेतुतया चतुष्ट्वादिविशिष्टचतुष्टाद्यपेक्षया त्रित्वविशिष्टत्रित्वस्य प्रथमोपस्थितत्वेन तस्यैव लाघवत २७

र्कत्वं न चातिरिक्तबहुत्ववत्तेस्त्रित्वादिव्यक्तेर्वा बहुत्वजातेरेव बहुवचनशक्यतावच्छेदकतया तेन रूपेण चतु
ष्टादेरपि प्रथमोपस्थितत्वं संभवतीति वाच्यं॰ बहुत्वे बहुत्वत्वं चानतिरिक्तं त्रित्वत्वादिकमेव बहुवचनशक्य
तावच्छेदकमित्याशयात्॰ अथ तथापि त्रित्वस्य नोक्तरीत्या प्रथमोपस्थितत्वं चतुष्ट्वादिप्रकारकचतुष्टादि
प्रत्यक्षे एकत्वचतुष्ट्यादिप्रत्यक्षस्य द्वित्वद्व्यादिप्रत्यक्षस्य वा हेतुत्वसंभवेन त्रित्वादिसहितैकत्वप्रत्यक्षस्या
हेतुत्वादिति चेदेवमपि बहुत्वसंख्यायास्त्रित्वादिक्रमेणैव गणनया गणनाक्रमेण त्रित्वस्य प्रथमोपस्थितत्वे
न प्रथमत्यागे मानाभावेन त्रित्वचतुष्टादेः फलतोल्पेन चतुष्टादेरनुपयोगेन च तस्य लाघवतर्कत्वसं
भवात्॰ न च चतुष्टादौ फलभ्रममामानाभावात्॰ अन्यथानुपपत्त्यैव तत्कल्पनेन प्रकृतेनुपपत्त्यभावात्॰
न चैतादृशप्रथमोपस्थितत्वस्य लाघवतर्कत्वे मानाभाव इति वाच्यं॰ तथा सति सर्वोक्तप्रथमोपस्थितत्वस्या
पि प्रथमोपस्थितत्वमात्रस्य वा लाघवतर्कत्वे न स्यात् किं बहुना वेदे लाघवतर्काद्यौक्तिरूपन्यायगम्यमेव
तात्पर्यं वेदजन्यशाब्दबोधे नियामकं न त्वन्यदिति सत्याप्यसिद्धिप्रसंगात्॰ न चानादिमीमांसकपरंपरयात

त्वे—

न्या॰ कौ॰ तथा व्यवहारेणात त्सिद्धिरिति वाच्यं प्रकृतेपि तुल्यत्वात्‌ अनादिमीमांसकपरंपरयातर्कत्वेन व्यवहारविषय
१८ त्वस्यैव तर्कत्वात्‌ अतएव समानप्रकारकत्व समानविशेष्यकत्वयोस्सत्त्वेपि शास्त्रकृतां समानविशेष्यकत्वस्यैव
लाघवतर्कत्वोक्तिः संगच्छते तत्रैव शास्त्रकृतां तथा व्यवहारादित्याहुः अन्येतु माहिंस्यात्सर्वाभूतानीतिश्रु
साहिंसायादुरदृष्टसाधनत्वबोधनेश्येनेनाभिचरन्यजेतेति श्रुत्या श्येनस्य चाभिचारफलकत्वबोधनेन लत्वावच्छिन्नाजनकत्ववि
शिष्टेष्टसाधनत्वलक्षणविध्यर्थबोधनेवाधापत्तिरिति वैधेतराहिंसायादुरदृष्टजनकत्वंमाहिंस्यादितिश्रु
त्या बोध्यतइत्युपेयं तथाच वैधत्वस्यानुगतस्याभावे ननन्तव्यक्तित्वे नतत्र हिंसाव्यक्तिभेदकूटस्यैवदुर
दृष्टजनकतावच्छेदककोटौ निवेशेन कपिंजलानालभेतेत्यत्र वहुवचनस्य चतुष्ट्वाद्यर्थकत्वे हिंसाभेद
चतुष्टयादिनिवेशेगौरवापत्त्या भेदत्रयनिवेशे लाघवात्त्रित्वमेव वहुवचनस्यार्थः। यत्तु वैधेतरहिंसात्वेनदुरे ३
दृष्टजनकत्वं किंतु वस्तुतः सहैव धेतरहिंसावृत्ति वैजात्यविशेषस्यैव हृस्यविजातीयहिंसात्वेनेतिनोक्तगौरवा
गौरवावकाशः तत्र भेदस्यावच्छेदककोटावनिवेशादितितदसत्‌ विजातीयहिंसात्वेनदुरदृष्टजनकत्वे हेरं॰ १८

कारित्वे सति स्वस्वजनकं भवति तत्त्वं तज्ज्ञाननिरूपितज्ञाननिष्ठकारणतायां विषयावच्छेदकं यथा व्याप्तिः शब्दशक्ति
र्वेत्यनुमानेन यथार्थतात्पर्यकत्वज्ञानस्य शाब्दबोधहेतुत्वसिद्धं अत्र भ्रयोवयवेंद्रियसंनिकर्षे व्यभिचारवा
रणाय सत्यंतं न तु घटकविशिष्टांतेनलिंगपरामर्षे व्यभिचारनिरासः परामर्षस्य विशिष्टासहकारित्वात्‌
यस्मिन्‌ सति परभावात्कार्याभावस्तस्यैव तत्सहकारित्वेन परामृष्यमाणलिंगत्वेनानुमितिकरणतया परा
मर्षविशिष्टलिंगसत्वे परामर्षाभावस्यासंभवात्‌ हृदो वह्निमान्‌ हृदत्वादित्यादौ परामृष्यमाणलिंग
सत्वेपि व्याप्त्यभावे नप्रमानुमितिसंभवाद्धास्ते दृष्टांतत्वसंगतिः व्याप्तिपक्षधर्मतावल्लिंगत्वेन प्रमानु
मितिकरणत्वात्‌ यत्तु एवमपि सल्लिंगपरामर्षे व्यभिचारो दुर्वारः परामृष्यमाणलिंगसत्वेपि सल्लिं
गपरामर्षाभावसंभवादिति चिंत्यं विशेष्यवत्ति विशिष्टाभावस्य विशेष्येविशेषणाभावपर्यवसा
नेन परामृष्यमाणलिंगसत्वे सल्लिंगपरामर्षाभावस्य लिंगे व्याप्तिपक्षधर्मत्वरूपसत्वाभावाप
र्यवसानात्‌ बाधाभावादौ व्यभिचारवारणाय विशेष्यम्‌ तच्च तात्पर्यं वेदेकपिंजलानालभेतेत्यादौ ला
ति॰

मा॰ कौ॰ बहुवचनस्य त्रित्वपरत्वानुपपत्तेर्दुर्वारत्वात्॰ न च तन्नापितत्संदेहः पितृकार्ये त्रीणीसादिवचनैकवाक्यतया तस्य
२९ रत्वनिर्णयात्॰ केचित्तु कपिंजलानालभेतेत्यत्र बहुवचनस्य चतुष्ट्वादिपरत्वे चतुष्टयादिव्यक्तिषु तादृशवाक्य
जन्यशाब्दबोधविषयत्वकल्पने गौरवं त्रित्वपरत्वे त्रयस्यैव तत्कल्पनं न लाघवमिति बहुवचनस्य त्रित्व
परत्वमित्याहुः। अपरे तु चतुष्ट्वादिकपरत्वकल्पने चतुष्टयाद्यालम्भनस्य फलहेतुत्वकल्पने तज्जन्यक
लिकापूर्वादिकल्पने च गौरवात्त्रित्व एव विधेस्तात्पर्यमित्थं च चतुष्टयाद्यालम्भनस्य लेलघ्वत्केरनंगत्वेन
न घवधानात्कर्मवैगुण्यमित्याहुः। ननु कपिंजलानालभेतेत्यत्र त्रित्वस्य पर्याप्तिसंबंधेनान्वयः समवाये
न वा। नाद्यः छेदनस्य प्रसक्तपर्याप्ततया त्रित्वपर्याप्त्यधिकरणकपिंजलकर्मकच्छेदकैकस्याप्रसिद्ध
त्वात्। न द्वितीयः तथा सत्येककपिंजलच्छेदनेपि कृतकृत्यतापत्तेः एकस्यापि त्रित्वसमवायित्वात्॰ यत्तु त्रित्वस्य प
र्याप्तिसंबंधेनैवान्वयः छेदनत्वरूपेण निखिलच्छेदनस्य त्रित्वपर्याप्त्यधिकरणकर्मकत्वसंभवेनोक्तदोषाभावा
दिति तन्न॰ तथा सत्येककपिंजलच्छेदनेपि [illegible]रितार्थत्वप्रसंगात् कुत्रचिज्जातकपिंजलत्रयच्छेदनस्य कपिंज हेरंब॰ २९

तुकुलये आपामा२

लत्रयकर्मकत्वसंभवादिति चेन्न॰ अत्र व[illegible]कपिंजलानालभेतेत्यत्र न तावत्कपिंजलकर्मकच्छेदकनबोधः
संभवति विजातीयावयवघटितभागात्मकच्छेदकैनस्य कपिंजलकर्मकत्वासंभवात्॥ किंतु कपिंजलपदस्य क
पिंजलावयवे लक्षणोपगमेन कपिंजलावयवकर्मकच्छेदनबोधोभ्युपेयः बहुवचनार्थत्रित्वं च कपिंजला
वयवे चेति एककपिंजलस्यावयवत्रयावच्छेदनेनैव कृतकृत्यतापत्तेः किंतु कपिंजल एव त्रित्वस्य समवा
येनान्वयः न च कपिंजलस्य पदार्थतावच्छेदकत्वेन तत्र कथं संख्यान्वय इति वाच्यं॰ धान्यस्य गृहं संयन्त्रीत्री
हिरिसादौ जातावेकवचनदर्शनेन क्वचित्पदार्थतावच्छेदकेपि सुप्विभक्त्यर्थसंख्यान्वयस्योपगमात् ए
वं च तादृशाच्छित्वसमवायिकपिंजलत्रयस्य प्रसंगप्रसक्तावयवविशेषः तादृशवाक्यस्य प्रसक्तकर्मे ए
प्रसक्तावयवे तादृशत्रित्वपर्याप्त्यधिकरणकपिंजलावयव एव सांकोस्त्वं न तु केवलमात्रव्यक्तेरन्वय इति ना
तिप्रसंगसंभावनापि॰ एतेन कपिंजलचतुष्टयच्छेदनेपि कपिंजलत्रयच्छेदनस्य जातत्वात्कपिंजलच
तुष्टयच्छेदने कर्मसांगतापत्तिः न च कपिंजलत्रयच्छेदनोत्तरं कपिंजलान्तरच्छेदने कपिंजलत्रयच्छेदनान्य

न्या॰ कौ॰ हिंसोत्तरकर्मधीनकर्मणि अनंगत्वव्यवधानोज्ञोक्तदोषं इति वाच्यं॰ एककालेपि कपिंजलचतुष्टयच्छेदकस्य संभवेऽ
२१ नेगत्ववधानासंभवादित्यपि परास्तं॰ तादृशवाक्यस्य प्रत्येकक्रमेण कपिंजलत्रयान्वयएव साकांक्षतातानचतुष्ट
यस्यान्वयेइत्यभ्युपगमादितितस्मादुक्तरीत्याबोधहेतुवाक्यस्यैवप्रमाणत्वंनतुलौकिकवाक्यस्येति निर्व्यूढमि
तिप्राभाकरमतमप्यपास्तं॰ प्रमाणत्वस्यप्रमाकरणत्वरूपतयायथार्थतात्पर्यनिश्चयानुरोधेनशाब्द
बोधस्यैवतत्समानाकारानुभवसत्वेपि लौकिकवाक्यस्यप्रमाणत्वेबाधकाभावात्॰ लाघवेनैकपदार्थेऽ
परपदार्थवत्त्वरूपयोग्यताप्रमायाः संशयनिश्चयसाधारणरूपेण शाब्दप्रमाप्रयोजकत्वसंभवेनय
थार्थतात्पर्यनिश्चयस्यगौरवेण शाब्दप्रमाप्रयोजकत्वाभावाच्चवेदार्थनिपत्तत्त्वज्ञानस्यविशेष
तयत्तात्पर्यसंदेहं प्रतिबंधकत्वस्याक्लृप्ततयास्वातंत्र्येणप्रतिबंधकत्वांतरस्यचगौरवेणमानाभावे
नचाभावेनवैदिकवाक्येपि सामान्यतस्तात्पर्यज्ञानसत्वेविशेषतस्तात्पर्यसंदेहसंभवात्तत्रापिवि
शेषरूपेणपदार्थनिवेश्यविशेषरूप[illegible]यथार्थतात्पर्यज्ञानहेतुत्वस्यैवावश्यकतयालौकिकवाक्यवदे हेखं॰ २०

विमाहिंस्यादितिश्रुतेस्तादृशज्ञनकताबोधकत्वेचर्हिंसायामपितादृशवैज्ञात्यसंदेहेननिष्कंपप्रवृत्त्यनुपपत्तिरितिवै
धेतरहिंसादुरदृष्टजनकत्वस्याकारकबोधजनकत्वमेवाभ्युपेयमितिहिंसाचतुष्टयादिभेदजनकतावच्छेदककोटि
निवेशप्रयुक्तगौरवाभावेपितादृशशाब्दबोधस्यतादृशभेदचतुष्टयादिविषयकत्वकल्पनाप्रयुक्तगौरवस्यदुरु
द्धरत्वात्॰ एतेनवैधेतरहिंसात्वेनदुरदृष्टजनकत्वेतावच्छेदककूटनिवेशगौरवापत्त्या लाघवाद्वैधहिंसापास्त
५ क्षि त्वघटितेनैवदुरदृष्टजनकत्वंकल्प्यतइतिनिभेदचतुष्टयादेर्जनकतावच्छेदककोटिनिवेशप्रयुक्तगौरवा
वकाशइतिपरास्तं॰ तावतापिउक्तगौरवस्यदुर्वारत्वात्॰ नचतत्तद्व्यक्तित्वेनजनकतामेवमाहिंस्यादितिश्रु
तिर्बोधयतीतिवाच्यं॰ तथासतिवैधहिंसाया अपितत्तद्व्यक्तित्वसंदेहेनतत्रनिष्कंपप्रवृत्त्यनुपपत्तेः देवं
प्रतिबलवद्निष्टोपधायकत्वनिश्चयस्यैवहेतुत्वात् वैधहिंसायामविस्तत्तद्व्यक्तित्वसंदेहेनदोषातुलाद
प्रसंगाच्चेत्याहुः॥ तदसत् उक्तयाद्वारुणैर्मैत्रैरित्यादौ वक्तृवचनस्य क्रित्वपरत्वानुपपत्तेः॥ नचतत्रव
क्तृवचनस्यनित्यपरत्वसंदिग्धमितिवाच्यं॰ तथापि श्राद्धप्रकरणेब्राह्मणान्भोजयेदितिवेदस्यव

व्यु॰कौ॰ २१ काधेयतासंसर्गावच्छिन्नघटप्रकारताकशाब्दबोधप्रसंगादिति चेदत्र केचित् तादृशशाब्दत्वावच्छिन्नंप्रति
व्युत्पन्नघटोपस्थापकनामोत्तरकर्मत्वोपस्थापकविभक्तिज्ञानत्वादिना हेतुत्वान्नोक्तदोषः। यद्यप्यत्र शक्त्या
कर्मत्वोपस्थापकत्वस्य निवेशे घटस्यानयनं घटाय स्पृहयतीत्यादौ कर्मत्वे घटान्वयधीर्नस्यात् षष्ठीच
तुर्थ्योः कर्मतायां शक्तिविरहात् लक्षणया तथात्वनिवेशे च घटादानयेत्यादौ पंचम्याः कर्मत्वलक्षणया क्रि
यत्वे घटान्वयधीप्रसंगस्तथापि शक्तिनिरूढलक्षणान्यतरवत्त्वाकर्मत्वोपस्थापकत्वप्रवेशान्नदोषः
नच तादृशशाब्दत्वावच्छिन्नंप्रति घटोपस्थापकनामोत्तरकर्मत्वोपस्थापकविभक्तिज्ञानत्वेन कर्म
त्वोपस्थापकविभक्तिप्राग्वर्त्ति घटोपस्थापकनामज्ञानत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरह इ
ति वाच्यं विनिगमनाविरहेण तादृशहेतुताद्वयांगीकारात् वस्तुतस्तु कर्मत्वाविशेष्यकशाब्दत्वाव
च्छिन्नं प्रत्येव कर्मत्वोपस्थापकविभक्त्यप्राग्वर्त्तिनामज्ञानत्वेन हेतुत्वं घटपटकलशादिपदसाधा
रण्येन लाघवात् तत्राधेयतासंबंधावच्छिन्नप्रकारत्वं कार्यतावच्छेदकसंबंधःस्वजन्यस्मृतिविषयत्वं हेरंब॰ २१

चकारणताघटकसंबंधः एवमाधेयत्वसंबंधावच्छिन्नघटप्रकारताकशाब्दत्वावच्छिन्नंप्रत्येव घटो
पस्थापकनामोत्तरविभक्तिज्ञानत्वेन हेतुत्वं घटेनेत्यादिसकलद्वितीयादिसाधारण्येन लाघवा
त् अत्रापि कार्यतावच्छेदकसंबंधो विशेष्यताकारणताघटकश्च स्वजन्यस्मृतिविषयत्वं एतेन यत्र घ
टमानय कलशस्यानयनमित्येव श्रुत्वा घटपदोत्तरविभक्त्या कर्मत्वं कलशायदृष्टघटं स्मरति न तु घट
पदषष्ठीपदाभ्यां घटकर्मत्वे तत्र कर्मताविशेष्यकघटप्रकारकशाब्दबोधप्रसंगइत्यपि परास्तं अ
थोक्तक्रमेण हेतुतायामपि यत्र तदस्तीत्यादौ घटकर्मत्वपरेण तच्छब्देन घटकर्मत्वोपस्थितावस्ति
त्वादिप्रकारकस्तद्विशेष्यकान्वयबोधस्तत्र व्यभिचारो दुर्वारः नच वस्तोघटीयत्वेन कर्मत्वोपस्थितजन
न्यत्वस्यापि कार्यतावच्छेदके निवेशान्नोक्तव्यभिचार इति वाच्यं तथा सति द्वितीयांतघटपदतत्पदा
भ्यां जनितस्य तादृशशाब्दबोधस्यासंग्रहापत्तेरिति चेन्न कर्मतोद्देश्यकघटनिधेयकान्वयबोधत्वावच्छि
न्नं प्रत्येवोक्तरूपेण हेतुत्वस्वीकारे तस्योक्तदोषाभावात् तदादिपदजन्यतादृशशाब्दबोधस्थले हि कर्म

व्या०कौ० त्वांशेन घटस्य विधेयत्वं वन्हिमत्पर्वतो इत्यादिसाध्यानुमितौ पर्वते वन्हेरिव किंतु घटीयकर्मत्वांशेऽस्तित्वादेरेव य
२२ त्रस्यात्तत्रैणाद्वसाद्ध्योरुपस्थितौ परस्परमन्वयबोधस्तत्रैवोद्देश्यविधेयभावस्यानुभवात्· न चाप्यंश
स्थलीयशाब्दबोधे व्यभिचारः तत्रोक्तकारणबाधे नान्वयबोधानुपगमात्· असंसर्गाग्रहादेव तत्र प्रवृत्त्या
द्युपपत्तेः तन्त्रेच्छाद्बोधान्यत्वं वा कार्यतावच्छेदकेऽनुप्रवेश्यं अत एव विपरीतव्युत्पन्नस्य घटः कर्मत्वमित्यादि
वाक्याद्धेरात्वयबोधस्वीकारेपि न तत्र व्यभिचारः व्युत्पन्नपुरुषीयशाब्दबोधत्वस्यैव कार्यतावच्छेदकत्वादि
साऊस्तत्र यत्न घटार्थकपदानुत्तरवर्त्तिन एवान्यपदस्योत्तरवर्त्तित्वसंबंधेन घटपदवत्ताक्रमेण कर्मत्वा
दिस्मृत्या घटीयं कर्मत्वमित्याद्यन्वयबोधस्तत्र घटोपस्थापकनामोत्तरवर्त्तित्वाः कर्मत्वोपस्थापकविभ
क्तेर्नोत्तरविरहेण व्यभिचारतादवस्थ्यात्· न चाव्यवहितोत्तरत्वसंबंधेन घटोपस्थापकनामप्रकार
ककर्मत्वोपस्थापकविभक्तिविशेष्यकज्ञानत्वेनैव कर्मत्वोद्देश्यकघटविधेयकान्वयबोधहे
तुत्वोपगमान्नोक्तव्यभिचारावकाश इति वाच्यं॥ तथा सत्यव्यवहितोत्तरत्वसंबंधेनवाच्यवत्वमे हेरंब० २२

न्वै ४

दिकं वाक्यस्यापत्त्यनुवादकत्वस्य ब्रह्माणोपि दुर्वारत्वाच्चेति कृतं पल्लवितेन नन्वेवं घटः कर्मत्वमानयनं कृतिरित्या
दितो घटमानयेत्यादाविव शाब्दबोधापत्तिरिति चेन्न आकांक्षाज्ञानस्य शाब्देन शाब्दबोधजनने सह
कारित्वात्· आकांक्षा चानुपूर्वी विशेष एव अनुगताया दुर्वचत्वात्· तथा च यादृशयादृशानुपूर्वी
तो यादृशान्वयबोधस्तत्रानुपूर्वीज्ञानं हेतुरिति फलितं· न चैवं घटमित्यादिस्थले कर्मताविशेष्यकवि
धेयतासंसर्गावच्छिन्नघटप्रकारताकशाब्दत्वावच्छिन्नं प्रति घटपदोत्तरामपदज्ञानत्वादिना हे
तुत्वेनित्पर्यवसितं तत्स्थलसंभवेति कृत्वा शमानयेत्यादिस्थलीयतादृशबोधे व्यभिचारात्· न च घटा
र्थकपदोत्तरामपदज्ञानत्वादिना हेतुत्वान्न दोष इति वाच्यं· तथापि घटमानयेत्यादिस्थले व्यभि
चारात्· न च घटार्थकपदोत्तरकर्मतार्थकविभक्तिज्ञानत्वादिनैव तत्र हेतुत्वमतो नोक्तव्यभिचार
इति वाच्यं· यत्र घटमित्यत्र घटपदान्न घटस्मृतिः किंतु कलशोस्तीत्यादिकलशपदात्· एवं द्वितीया
तोपि न कर्मत्वस्य स्मृतिः किंतु घटस्यानयनमित्यादिषष्ठ्यास्तत्राविघटमित्यानुपूर्वीतः कर्मताविशेष्य

व्यु० कौ० वच्छेदेनैकात्म्यज्ञानत्वेऽएवं च घटविशिष्टकर्मताबोधकत्वादिपदेनापभ्रंशेन वा जनितायां घटीयकर्मत्वमित्या
२३ द्यत्वयबुद्धावपि न व्यभिचारः तत्तद्बोधे उक्तरीत्या तादृशतादृशानुपूर्वीज्ञानत्वेनापि हेतुत्वांतरकल्पनात्तत
एव तत्र तादृशबोधोपपत्तिः घटकर्मत्वमित्यादिनिरुक्तसवाक्यस्थले च शक्तिज्ञानाद्यात्मकसामान्यसामग्र्याः
सत्त्वेपि घटकलशमित्याद्यानुपूर्वीज्ञानात्मकविशेषसामग्रीविरहादेव घटीयकर्मत्वमित्याद्याकारकान्वयबो
धानापत्तिः अत एव पश्य कापचति घटो घट इत्यादिस्थलेपि न्यूनाभ्यावद्विशेषसामग्रीविरहादेव नान्वयबो
धः तत्तत्तदर्थप्रकारांतमनुसर्तव्यं उद्देश्यतावच्छेदकविधेययोरेकस्थले भेदेन उद्देश्यविधेययोरेकस्थले
चाभेदेनान्वयबोधस्यानीकरत्यात्तदंतर्भावेण तत्तदानुपूर्वीज्ञानस्य हेतुत्वांतरकल्पनात् ॥ अत एव
पचंश्चैत्रो गच्छतीत्यत्र पचति चैत्रो गच्छतीत्यादौ पाककर्तृत्वविशिष्टचैत्रे गतिमत्त्वस्य नान्वयबोधस्ता
दृशानुपूर्व्यंतर्भावेण तथाविधान्वयबोधे प्राप्तिहेतुत्वाभावात् आख्यातार्थकृत्यादेरुद्देश्यतावच्छेद
कविधयान्वयबोधस्योदाहरणवाक्यादन्यत्रैवासुलभतया यो यमिच्छतीति सत्तात्वेत्यादिस्थलमेवेदृशावानु हेरं० २३

तौ

तद्व्यापकीभूतज्ञानत्वानित्याद्यत्वयौँधोद्देशेन तत्र तादृशानुपूर्व्यंतर्भावेण हेतुत्वकल्पनात् तत्रान्वयबोधा
नुपपत्तिरित्यादिकमन्यत्स्वयमूह्यं एवं मानमपि ग्राममपनीत्या दोधात्वाख्यातयोः स्वयस्थलेप्यानयतीत्या
नुपूर्वीज्ञानजन्यानयनाद्युपस्थितिविशिष्टेस्तुत्वादिविशेष्यकानयनादिप्रकारकान्वयबोधे आनय
तीत्याद्यानुपूर्वीज्ञानत्वेन प्रत्येकरूपेणास्वप्रयोज्यानयनाद्युपस्थितिसंबंधेन कारणत्वं ज्ञेयं न तु
कृत्यांशे विषयत्वादिसंबंधेनानयनादिविधेयकान्वयबोधसामान्यं प्रत्येवानयनोपस्थापकधा
तूत्तरकृत्युपस्थापकप्रत्ययज्ञानत्वेन कारणत्वमिति मतमादरणीयं तत्रानयनार्थकधात्वुत्तर
वर्तिन एव तिपस्तदुत्तरत्वभ्रमादानयनोपाकृतिरित्यन्वयबोधस्तत्र व्यभिचारप्रसंगात् न चाव्यवहि
तोत्तरत्वसंबंधेनानयनोपस्थापकधातुप्रकारैककृत्युपस्थापकप्रत्ययविशेष्यकज्ञानत्वेनैव तादृशो
न्वयबोधे कारणता नोक्तव्यभिचार इति वाच्यं प्रमेयत्वादिप्रकारेणापि तादृशधातुप्रकारकज्ञानादन्व
यबोधापत्तेः न च कृत्युपस्थापकात्मतत्वाद्यवच्छिन्नविशेष्यताकानयनोपस्थापकधातुत्वावच्छिन्ने

व्याख्यो २७ न्नकारताशालिज्ञानत्वेन तादृशान्वयबोधे कारणत्वोक्तौ नोक्तायत्तिरिति वाच्यं। आनुपूर्वीविशेषस्याग्रहे
तावत्तात्रादृशान्वयबोधापत्तेः इष्टापत्तौ चानुभवविरोधात् एवमग्रेपि द्वितीयाद्यर्थकर्मत्वादिकारकारणा
घातुतात्स्यात्तथाद्यग्रहेपि घटमानयतीत्यानुपूर्वीविशेषज्ञानमात्रादपि षष्ठकर्मकानयनानुकूलकृतिमानि
त्यन्वयबोधो स्यात् व्यभिचारात् तादृशानुपूर्वीविशेषस्य च निश्चय एव हेतुत्वस्य संदेहे व्यतिरेकनिश्चयपर्वान्वयबो स्या १
धानुदयात् एवमरकाणां धात्वर्थानयनादिक्रियायामन्वयबोधस्थले नु आनयतिप्रापयतीत्यादिप्रत्येकानु
पूर्वीज्ञानजन्यानयनोपस्थितिविशिष्टे आनयनाविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधे आनयतिप्रा
नयतिप्रापयतीत्यादिप्रत्येकानुपूर्वीज्ञानत्वेन हेतुत्वं एवं घटकलशमित्यादिप्रत्येकानुपूर्वीज्ञानजन्यघट
कर्मत्वोपस्थितिविशिष्टे आनयनविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधे घटं कलशमित्यानुपू
र्वीज्ञानत्वेन हेतुत्वं बोध्यं अतो घटमानयतीत्यत्रैवानयति घटमित्यत्राप्यानयने धर्मिणि घटकर्मत्व
स्यान्वयबोधः आनयति घटस्येत्यादौ घ[टं]मानयनमित्यादौ च न तादृशो न्वयबोधः उक्तहेतुद्वयस्याभावात् हेरंब० २७

२।३

यमित्यादिज्ञानादपि घटीयकर्मत्वमित्यन्वयबोधापत्तेः तस्यापि प्रमेयत्वादिरूपेण घटोपस्थापकमाघवता
गारित्वात् न च तादृशसंबंधेन घटोपस्थापकत्वावच्छिन्नप्रकारताककर्मत्वाद्युपस्थापकविभक्ति
त्वावच्छिन्नविशेष्यताकज्ञानत्वेनैव हेतुत्वं तत्र वाच्यमिति वाच्यं। घटमित्याद्यानुपूर्वीज्ञानविधुराणामपि
तादृशसंबंधेन घटोपस्थापकनामोत्तरकर्मत्वोपस्थापकविभक्तिरस्तीत्यादिज्ञानवतां घटीयकर्मत्वमित्यन्व
यबोधापत्तेः घटादिपदस्य घटोपस्थापकतामंत्वं द्वितीयादेः कर्मत्वोपस्थापकविभक्तित्वमज्ञानतोपि
घटमित्यानुपूर्वीज्ञानमात्रात् घटीयकर्मत्वमित्यनुभवस्य सर्वसिद्धत्वेन व्यभिचारता एवं स्याच्च। अ स्या १
त्रोच्यते। घटमित्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितिविशिष्टाया कर्मताविशेष्यकघटाद्युद्बुद्धौ स्वप्रयो
ज्यघटाद्युपस्थितिसंबंधेन घटमित्यानुपूर्वीज्ञानत्वेन कारणत्वं। एवं कलशमित्यानुपूर्वीज्ञानजन्य घ
टाद्युपस्थितिविशिष्टायां कर्मताविशेष्यकघटाद्यन्वयबुद्धावपि तादृशोपस्थितिसंबंधेन कलशा
ममित्यानुपूर्वीज्ञानत्वेनेति रित्या प्रत्येकमेवानुपूर्वीज्ञानस्य कारणत्वं वक्तव्यं। वैशिष्ट्यं चैकक्षण

व्या॰ टी॰ योग्यतान्तर्भावेणान्वयप्रहेतुत्वे ह्येव क्रियायां कारकस्यान्वयबोधसंभवात्। घटमित्याद्यानुपूर्वीज्ञानाव्यवहि
२५ तोत्तरएव नानादिक्रियाविशेष्यकघटकर्मत्वादिप्रकारकक्रियायां कारकस्यान्वयबोधे सति तादृशानुपूर्वीविशेष्यक
तासंयोदिज्ञानहेतुत्वस्यावश्यकतया तत एव विशिष्टान्वयबोधसंभवात्। न च घटमानेत्यादिलोपि स
त्तितादृशतासत्त्वे यहेतादृशान्वयबोधापत्तिरिति वाच्यं। आनयतीत्यानुपूर्वीज्ञानाव्यवहितोत्तरतादृशा
न्वयबोधरूपस्य तद्विशेषस्य सामग्रीविरहादेवोक्तापत्त्यभावादिति सारं॥ अथायमेति पुत्रो राज्ञः पुरु
षोपसार्यतामित्यादौ राजकीयपुरुषबोधितासत्त्वे तादृशायां राजपुरुषइत्याद्यानुपूर्वीज्ञानात्तादृशबोधो
दये न तत्त्वं तादृशानुपूर्वीज्ञानहेतुत्वस्य क्लृप्ततया राजकीयपुत्रबोधे तासत्त्वे दृशायां पुत्रो राज्ञ इत्या
नुपूर्वीज्ञानात्तादृशबोधोदये न पुत्रो राज्ञः इत्यानुपूर्वीज्ञानस्य राजकीयपुत्रबोधे प्युक्तरीत्या हेतु
त्वस्य क्लृप्ततया तादृशबोधो नेयामकाभावः आनुपूर्वीरूपाकांक्षाया निश्चयस्याविशेषेणात्तेयामक
त्वासंभवादिति चेन्न तादृशतासत्त्वे [illegible] स्यैव तत्र नियामकत्वात् अथैवमपि घटमानयेत्यादि हेरंब॰ २५

दृ १ शादिशाब्दबोधानंतरं द्वितीयक्षणे पुनस्[illegible]दृशाब्दसमानाकारशाब्दापत्तिः सामग्र्याः सत्त्वादिति चेन्न शाब्द
बोधद्वयेच्छाविरहविशिष्टसमानाकारशाब्दबोधस्य शाब्दबोधे प्रतिबंधकत्वाद्देवोक्तापत्त्यनवकाशात्॥
तादृशशाब्दबोधद्वयेच्छासत्त्वे शाब्दद्वयस्योत्पत्तौ विकाद्याभावात्तादृशेच्छाविरहवैशिष्ट्यस्य प्रतिबं
धकतावच्छेदककोटौ प्रवेशः वस्तुतस्तूक्तप्रतिबंधकत्वे मानाभावः प्रथमशाब्दबोधजनकपद
ज्ञानजन्यपदार्थोपस्थित्यादीनामन्यतमविनाशेन तादृशकारणविरहादेव वीरलक्रमेण समानशाब्दबोधधा
राया आयत्न्यसंभवात् अत एव द्वितीयक्षणे तज्जन्यपदार्थोपस्थित्यसाद्यस्थले पूर्वोक्तान्वयबोधस्य तादृशपदार्थो
पस्थितिकाले विनाशात्तदुत्तरमन्वयबोधांतरस्य सर्वमतएवावश्यकत्वात् यत्र प्रथमशाब्दबोधजनकपदा द
र्थोपस्थितिः रेखाकोक्षादिविषयिणी तत्र विनश्यद्वयस्य तादृशशाब्दबोधद्वितीयक्षणे पुनस्तादृशशाब्द
बोधाः क्षिप्यत एव शाब्दबोधानंतरमेकशाब्दबोधोपगमेऽनुभवविरोधविरहात् शाब्दबोधधाराया ए
वानुभवविरुद्धत्वादित्येव सारं अथ तथापि घटः कर्मत्वमित्यादौ शाब्दबोधवारणाय घटमानयेत्या

व्यु॰कौ॰ नुपूर्वीनिश्चयहेतुत्वकल्पनापेक्षया घटःकर्मत्वमित्यानुपूर्वीज्ञानस्य प्रतिबंधकत्वमेवोचितमिति चेन्न घटःक
२६ र्मत्वमित्याद्यानुपूर्वीज्ञानसत्वेपि घटमानयेत्याद्यानुपूर्वीज्ञानकाले शाब्दबोधोदये न तादृशानुपूर्वीनिश्च
याभावविशिष्टघटकर्मत्वमित्याद्यानुपूर्वीज्ञानाभावहेतुत्वापेक्षया तादृशानुपूर्वीनिश्चयहेतुत्वस्यैव ला
घवादित्यलमधिकेन॥ ननु वह्निना सिंचतीत्यादौ सेको न वह्निकरणक इत्याद्ययोग्यतानिर्णये यदृशाया
मपि सेके वह्निकरणकत्वादि शाब्दबोधापत्तिस्तदानीमुक्तार्थकाकांक्षाज्ञानघटितशाब्दसामग्र्याः सत्त्वादि
ति चेन्न शाब्दबोधे योग्यताज्ञानस्यापि हेतुत्वोपगमात्। योग्यता च तद्धर्मावच्छिन्नविशेष्यकतत्संसर्गक
तद्धर्मावच्छिन्नप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नस्य तेन संसर्गेण तद्धर्मावच्छिन्नवत्त्वं एवं च सेको न वह्नि
करणक इत्याद्ययोग्यतानिर्णयकाले सेकत्वावच्छिन्ने वह्निकरणकत्वावच्छिन्नवत्ताविरहनिश्चये सेको वह्निक
रणक इत्याद्याकारकस्य योग्यताज्ञानस्याभावसत्त्वान्नोक्तशाब्दबोधापत्तिः तस्याश्च संशयसाधारणं ज्ञान
मात्रमेव हेतुः सर्वत्र शाब्दबोधात्पूर्वं यो[illegible]ग्यताया निर्णेतुमशक्यत्वात्। ननु विशिष्टबुद्धिसामान्ये बाधनि कौ॰रं॰ब॰ २६

घटमित्यादिकर्मपदं विनानयतीत्यादिक्रिया[illegible]पदं वा तादृशक्रियापदं विना च घटमित्यादिकर्मपदं न जनितास्या
नयनस्य॥ तद्विशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधस्यालीकतया तदाकांक्षेरसंभवात्॥ एवं क्रियाकार
कोतरस्थलेपि तत्क्रियाकारकपदान्तर्भावेण हेतुताद्वयं बोध्यं॥ केचित्तु॥ घटमानयतीत्यानुपूर्वीज्ञानवत्त्व
वद्धितीयत्तरानयनविशेष्यकघटकर्मत्वान्वयबोधे प्रति तादृशानुपूर्वीज्ञानत्वेन हेतुत्वमेव मानयतीत्याद्य घ
टमित्यानुपूर्वीज्ञानस्याप्युक्तरीत्या हेतुत्वमपरं वस्तुत्वमित्याद्युक्तदृसत्व घटमित्यस्यानयतीत्यस्य च द्व
योः पौर्वापर्यस्य संदेहे तन्निश्चये तदंशे भ्रमत्वस्य संदेहदशायां च घटमानयतीत्यानुपूर्वीज्ञानात्तादृशा
न्वयबोधानुसन्धिप्रसंगात्॥ यादृशानुपूर्वीज्ञानस्य हेतुत्वं तत्र निश्चयत्वस्यापेक्षितत्वात् तादृशानुपू
ने३ र्व्यप्रत्वज्ञानाभावस्यापि शाब्दधीहेतुत्वात्॥ एवं घटं पटं चानयतीत्यादावानयनविशेष्यकघटकर्मत्वादिप्र
कारकान्वयबोधोपपत्तये तत्तत्सामग्र्यन्तरकल्पने महागौरवप्रसंगश्चेति दिक् वस्तुतस्तु क्रियाकारकी
भूयान्वयधर्मिपदानां पि क्रियापदस्य कारकपदस्य पूर्वत्वहेतुत्वे द्वंद्वनकल्पनीयं नामविभक्त्योर्धीरवात
नी

न्या० को० तेपि सामग्रीप्रतिबंधकतायां तस्यां तदभावान्योक्तरीत्या लाघवमिति वाच्यं तथासति योग्यताज्ञानभ्रमकाले
२९ शाब्दबोधेतरसकलकारणसत्वे तन्मते शाब्दबोधे जायमाने प्रत्यक्षानुत्पादापत्तेरिति चेन्न परोक्षताज्ञा
नेः पूर्वोक्तव्यवस्थापितत्वात् किंच योग्यताज्ञानहेतुत्वेपि तत्संदेहानंतरक्षणे आप्तवाक्यादितो योग्यतानि
श्चये तद्द्वितीयक्षणे विनश्यदवस्थयोग्यतासंदेहात् शाब्दबोधवारणाय तत्रायोग्यतानिश्चयाभाव
स्य हेतुताया आवश्यकत्वादिति चेदत्र केचित् योग्यताज्ञानस्य शाब्दधीहेतुत्वेपयःकरणकत्वाभावव
विशेके विशेष्यता त्तेकीयाकृतिरिसाधारकारिकायां विशेषणमिति रीत्या मानसादिबुद्धौ पयसाक्षिं चनीसाधारकारक
शाब्दसामग्र्याः प्रतिबंधकत्वकल्पनेन लाघवं तथाहि तादृशसामग्रीकाले सेकत्वाद्यवच्छिन्नविशे
ष्यकपयःकरणकत्वप्रकारकयोग्यताज्ञानरूपस्य तादृशमानसविपरीतज्ञानस्य सत्ताया आवश्य
कत्वेन विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयहेतुभूतविशेषदर्शनस्य विरहेणैव न तादृशमानसापत्तिः संभ
वति सेकोनपयःकरणकइत्यादेः प्रत्यक्षे जनके भूतसेकत्वाद्यवच्छिन्नविशेष्यकपयःकरणकत्वाद्यभाव हेरंबे २९

५५

व्याप्यवत्तानिर्णयरूपविशेषदर्शनसत्वे च तदभावव्याप्यवत्तानिर्णयरूपप्रतिबंधकसत्वेन सेकत्वाद्यवच्छिन्न
विशेष्यकपयःकरणकत्वादिप्रकारकोपदर्शितशाब्दसामग्र्येव नास्ति न च संशये विशेषदर्शनस्याहेतु
तया योग्यतासंदेहघटितोपदर्शितशाब्दसामग्रीदशायामेकत्वाद्यवच्छिन्नविशेष्यकपयःकरणकत्वाद्यभा
वप्रकारकसंशयवारणायोपदर्शितसामग्रीप्रतिबंधकत्वकल्पनमावश्यकमेवेति वाच्यं सेकत्वाद्यवच्छि
न्नविशेष्यकपयःकरणकत्वादिप्रकारकमानसे तादृशशाब्दसामग्रीप्रतिबंधकताया उभयसिद्धतया
सेकत्वादिविशिष्टे पयःकरणकत्वभानासंभवेन पयःकरणकत्वाद्यभावप्रकारकमानसे उपदर्शितसामग्रीप्र
तिबंधकत्वाभावेपि तादृशसामग्रीकाले संशयापत्त्यसंभवात् न च विपरीतज्ञानोत्तरप्रत्यक्षनि
र्णये विशेषदर्शनस्य हेतुत्व एवोक्तरीत्या लाघवं संभवति तत्रैव च न मानमिति वाच्यं उपदर्शितलाघवबले
नैव तस्यापि सिद्धेः। मानसे द्वाविपरीतज्ञानोत्तरप्रत्यक्षनिर्णये विशेषदर्शनं हेतुस्तथापि योग्यताज्ञानहेतुता
मते योग्यताज्ञानाभावप्रकारकात्मविशेष्यकमानसप्रत्यक्षे शाब्दसामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्तला

सा॰कौ॰ एवं दुर्वारमेव ज्ञानाभावविशिष्टबुद्धेः स्वरूपसत्‌ज्ञानस्य प्रतिबंधकतायाः सर्वसिद्धत्वादित्याहुः। अन्ये तु। यत्र
२८ सुरभिमित्यादिकवाक्यादितो बाधितार्थस्याप्याहार्ययोग्यताज्ञानादप्यन्वयबोधोऽस्त्येवानुभविकतया बा
धनिर्णयस्य न शाब्दबोधप्रतिबंधकत्वं न चैवं बाधितत्वेनावधारितेप्यर्थे शाब्दात्प्रवृत्तिप्रसंग इति वाच्यं।
वह्निवत्ताबाधेन तत्र शाब्दबोधेऽप्रामाण्यज्ञापनेनाप्रवृत्त्युपपत्तेः तदुक्तं खंडनकारैः असंतस्यापि विह
र्थे ज्ञानं शब्दः करोति हि। प्रमाबाधाऽप्रमा तत्र स्वतःप्रामाण्यनिर्णय इति अस्यार्थः असंतस्यापि बाधित
त्वेनावधारितेपि अर्थे विषये हि निश्चयेन शब्दः ज्ञानं करोत्येव हि तौ यशब्द एवकारार्थः। नन्वेवं तत्राप्र
वृत्त्यापत्तिः तज्जनकस्य विशिष्टज्ञानस्य सत्त्वादत आह। प्रमेत्यादि तत्र बाधितार्थे। प्रमा बाध्या। प्रमया
अयोग्यता प्रमया बाध्याऽप्रमात्वेन ज्ञानज्ञाप्या अप्रमाभ्रमात्मकशाब्दबुद्धिरेव भवतीति विशेषः। तावता
पि किं जातमत आह अत इति प्रवृत्तिप्रयोजक इति शेषः तथा च प्रवृत्तिप्रयोजकप्रामाण्यनिर्णयाभावान्न
तत्र प्रवृत्तिरिति भावः। न चैवं योग्यताज्ञानहेतुत्वमप्यफलं बाधनिर्णयदशायां शाब्दधीकारणायैवतस्यत्वा हेरंबः २८

र्णयाभावस्य हेतुतायाः तथैवायोग्यतानिर्[illegible]दशायां शाब्दबोधानुत्पादनिर्वाहेण शाब्दबोधे योग्यताज्ञानत्वेन
हेतुतायां मानाभावः। अथ प्रत्यक्षस्थले यद्बाधनिर्णयप्रतिबंधकतायां मिच्छाया उत्तेजकत्वानुरोधेन चा
क्षुषत्वादेरेव प्रतिबध्यतावच्छेदकतया परोक्षस्थले इच्छाविरहमनिवेश्य पृथगेव बाधनिर्णयस्य प्रतिबं
धकत्वं वाच्यं। तत्र च न परोक्षत्वजातेः प्रतिबध्यतावच्छेदकत्वं संभवति तत्र मानाभावात्। अपि तु प्रत्यक्षा
न्यज्ञानत्वस्यैव तच्च गुरुशरीरमित्यनुमितित्वशाब्दत्वयोरेव तत्त्वमुपेयमिति तयोरेव बाधनिर्णयाभा
वजन्यत्वावच्छेदकत्वं वाच्यं तथा च लाघवात् शाब्दत्वावच्छिन्ने योग्यताज्ञानहेतुत्वमेव सम्यक् बाध
निर्णयाभावहेतुत्वं निर्णयत्वप्रवेशे नागौरवात्। न च योग्यताज्ञानस्य संशयसाधारणहेतुतायाम
प्रामाण्यनिर्णयस्यैवोत्तेजकतया गौरवमेवेति वाच्यं। योग्यताज्ञानस्याहेतुत्वे प्रसक्तादौ शाब्दसाम
ग्रीप्रतिबंधकतायां ग्राह्याभावतद्व्याप्यत्वावच्छेदकधर्मादर्शनाभावकूटस्य निवेशनीयतया गौ
रवात् हेतुत्वे च योग्यताज्ञानस्यैकस्यैव निवेशनीयतया लाघवमिति तद्धेतुत्वमेव लाघवात्। न च तदहेतु

र

आ०बो० मां देवदत्तेनेत्यादौ गिरिरग्निमान् देवदत्तकर्तृकं भोजनमित्यादि शाब्दबोधवारणायासत्तेरपि शाब्दबोधहेतु
२९ त्वमुपेयं। अथ केयमासत्तिर्यदभावादुक्तस्थले नोक्तरीत्या शाब्दबोध इति चेदत्र केचित्। एकपदार्थोपस्थितस्याव्य
वधानेनापरपदार्थोपस्थितिरेवासत्तिः उक्तस्थले चोच्चारणक्रमेण पदार्थोपस्थिति सा गिर्यग्निमदाद्युपस्थि
तेरव्यवधानाभावान्नासत्तिः तच्चैवं गिरिरग्निमानित्यादावव्याप्तेरनुपपत्तिः तत्र पदज्ञाने नार्थोपस्थितेर्व्यव
धानादिति वाच्यं। यत्र गिर्युपस्थितिरेवाग्निमत्पदविषयिणी तत्रैवासत्तेरुपगमात् अन्यत्रासत्तिभ्रमेणै
व शाब्दबोधोपगमात्। वस्तुतस्तु प्रकृतान्वयबोधानुकूलक्षणाव्यवधानाभाव एवाव्यवधानं उक्तस्थ
ले च पदज्ञानक्षणस्य प्रकृतान्वयबोधानुकूलत्वान्न दोषः अत एव काष्ठैः स्थाल्यामोदनं पचतीत्यादौ काष्ठ
करणकत्वपाकाद्युपस्थितेः स्थाल्याद्युपस्थितिक्षणेन व्यवधानेऽपि न क्षतिः तस्य प्रकृतान्वयबोधानुकू
लत्वात्। यत्र च गिरिर्भुक्तमित्यादौ भुक्तपदार्थोपस्थितौ गिरिपदस्य तदर्थस्य वा पुनर्भानं तत्रासत्तिरे
व। ननु गिरिर्भुक्तमित्यादौ गिरिर्द्युपस्थितिसाग्निमदुपस्थितिं सोऽयुगपद्वस्यानाभावात्सदार्थोपस्थितिरूपकार हे०र०बं० २९

णविरहादेव तु शाब्दबोधापत्तिः। न च यत्र क्रमिकोपस्थितिसमनन्तरं समूहालम्बनतावत्स्मरणात् समूहालम्ब
नतावदर्थोपस्थितिस्तत्राशाब्दबोधापत्तिरिति वाच्यं। तत्र समूहालम्बनोपस्थितेः स्वात्मकार्थान्तरोपस्थितस्याव्य
वधानसत्त्वेनासत्तिसत्त्वादासत्तिहेतुतयाप्यनिर्वाहे लोष्टापत्तेरेव शरणीकरणीयत्वादिति चेन्न भेदघटिताव्य
वधानस्यैवासत्तिघटकतया समूहालम्बनोपस्थितेरासत्तित्ववारणायैवासत्तेर्हेतुत्वोपगमस्यावश्यक
त्वादित्याहुः तदसत् उक्तासत्तेः स्वरूपसत्या हेतुत्वे ज्ञानायावानाघः आसत्तिभ्रमेण शाब्दबोधानुपपत्तेः
नासः उपस्थितीनामनुपस्थितावपि शाब्दबोधस्यानुभविकत्वाच्च वस्तुतस्तु। निरुक्तासत्तेः शाब्दबोधोपयो
गितेमानाभावः गिर्यग्निमतोरन्वये तात्पर्यज्ञानाभावादेव तयोरन्वयबोधानुदयात् तत्सत्त्वे चेष्टापत्तेः अत
एव भ्रमो कादौ तात्पर्यग्राहकतया योजनाया उपयोगः यत्र च प्रकारान्तरेण तात्पर्यग्रहस्तत्र योजनां विनैव
शाब्दबोधः। एतेन तत्तत्पदयोरव्यवधानमेवासत्तिः तस्याश्च ज्ञानमेव शाब्दबोधजनकं व्यवहितानामपि पदा
नामव्यवधानभ्रमेण शाब्दबोधात्। अत्रापि प्रकृतान्वयबोधानुकूलक्षणानन्तरितत्वे निवेशनीयं अतो

द

न्या॰ कौ॰ नकाङ्क्षैः स्यात्तस्मामोदनं पचती सारावनुपपत्तिः मौनिनाऽव्यवधानेन लिखितानां पदानां पदानामासत्तिभ्रमादेव
३० शाब्दबोधः स्वस्वापि स्वाव्यवहितत्वादेकपदोपस्थाप्ययोः इति वर्त्तमानत्वयोः परस्परमन्वयबोधः अथवात्मास
त्तिज्ञानस्य हेतुत्वे कनकल्पने प्रयोजनाभावात् कुलकादौ चान्वयोजनायाश्चादेव शाब्दबोधः अत एव तत्र योज
नायां अप्युपयोग इत्यपि परास्तं। तात्पर्यग्रहेणैव तन्निर्वाहे निरुक्तासत्तेरपि हेतुत्वे मानाभावात्। अत्र वदंति॰
पदज्ञानजन्यपदार्थोपस्थितिरेवासत्तिस्तां च स्वरूपसत्येवोपयुक्ता अगृहीतव्यक्तिकस्य पदज्ञानादिस
त्वेपि शाब्दबोधानुदयात्। सा च स्मृतिरूपाग्राह्या तत्र च वृत्तिज्ञानस्योद्बोधकविधया हेतुत्वात् तेनाशक्ति
लिंगकानुमानजन्यानुमित्यात्मकपदार्थोपस्थितौ न शाब्दबोधः न चैवमवांतरवाक्यार्थबोधस्यासंग्रहेण
घटमानयेत्यादाववांतरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधानुपपत्तिरिति वाच्यं तत्रानयनाद्युपस्था
पकचरमपदज्ञानस्यैव घटादिपदविषयकसमूहालंबनरूपत्वोपगमेन तज्जन्यानयनादिस्मृतेश्च घटादि
विषयकसमूहालंबनत्वोपगमे न च विशेषणमितिरीत्यैव शाब्दबोधोपगमेनावांतरवाक्यार्थबोधपूर्व हेरं॰
३०

कारादिति वाच्यं बाधनिर्णयदशायामपि वह्निना सिंचतीत्यस्यैवार्थस्यान्वयबोधो नत्वनुभुत्सितस्येत्यनुभवस्य योग्यता
नहेतुत्वमंतरेणानिर्वाहात् योग्यताज्ञानहेतुत्वे आहार्ययोग्यताधीनिर्वाहकतया बुभुत्सोपगमात्। न च शाब्द
बोध एवाहार्यः स्वीक्रियतां तावतैव बुभुत्सोपयोगसंभवे किं योग्यताज्ञानस्य हेतुत्वेनेति वाच्यं परोक्षज्ञान
मनाहार्यमेवेति सिद्धांतविरोधात्। तथा सति शाब्देच्छाविरहविशिष्टबाधनिर्णयाद्यभावस्य हेतुताया उपगं
तव्यतया गौरवप्रसंगाच्च। न च तत्र शाब्दबोधहेतुतायामिप्रमिताद्यकार्थगोचराहार्यमानसप्रसक्त्या देवंशा
ब्दबोधकार्योपपत्तेः शाब्दबोधोऽप्रामाणिक इति वाच्यं श्रुतोयमर्थ इत्यनुभवस्य प्रत्यक्षेणानिर्वाहात्। शाब्द
ज्ञानत्वावच्छिन्नार्थविषयकबाधस्यैवार्थविशेषादिबोधजनकत्वाच्च अन्यथा बाधितार्थककविवाक्यादौ आ
कांक्षादेरनुपयोगप्रसंगादिति॥ प्राञ्चः अपरे तु यत्र यत्र विषये योग्यताज्ञानघटितशाब्दबोधसामग्री द
शायां कदापि कस्यचिदपि धनिर्णयो न जातस्तत्र बाधावतारदशायां शाब्दबोधवारणाय योग्यताज्ञानहे
तुत्वे बोधितात उक्तलाघवादिसाकूरितिदिक्॥ अधिकमन्यत्रबोध्यं विस्तरभयादत्र नोक्तं। गिरिर्भुक्तमग्नि

न्या॰ कौ॰ तिबेध्यन्त्रोक्ततात्पर्यानुरोधेन पिधेहीत्यादिपदाध्याहारकल्पना न यत्र च न तादृशपदाध्याहारसामग्री त
३१ त्र मानसस्यैव तादृशबोधस्योपगमे शाब्दबोधस्यैवानुपगमात् गुरुत्वस्य पदार्थोपस्थितिमात्रे शाब्दबोधजनकेन
तु पदवृत्तिज्ञानजन्यत्व हेतुतावच्छेदकं गौरवात् मानाभावाच्च। एवं चोक्तस्थले पिधानाद्यर्थाध्याहारे शाब्दे वा तादृ
[illegible] तादृशबोधोपपत्तौ न पदाध्याहारः कल्पनीयो मानाभावात्। न च घटादिपदाश्रवणादिसंबंधेनोपस्थि
तानामाकाशादीनां शाब्दबोधवारणाय पदवृत्तिज्ञानजन्यत्वस्य पदार्थोपस्थितिजनकतायामवच्छेदकत्व
मावश्यकमिति वाच्यं। तत्र तात्पर्यग्रहे तादृशशाब्दबोधे इष्टापत्तेः अन्यथा तात्पर्यग्रहाभावादेव शाब्दबो
धाभावोपपत्तेः अथैवं यत्र द्वारकर्मत्वापिधानादीनां सर्वेषामेवार्थानां प्रकारांतरेणैवोपस्थितिर्न तु
प्रकृतवाक्यार्थघटकार्थोपस्थापकस्य कस्यापि ज्ञानमस्ति तत्रापि द्वारकर्मकपिधानादिशाब्दबोधप्रसंगः य
तु यत्र प्रकृतवाक्यार्थघटकानां द्वारकर्मत्वपिधानादीनां सर्वेषामेव तत्तल्लाक्षणिकपदादुपस्थितिस्तत्र
न्यायमतेऽपि लाक्षणिकपदस्यानुभावकतया न शाब्दबोधः तदुपपत्तये च तत्तद्विशिष्टार्थबोधे शक्तिज्ञान हे॰ ख॰ ३१

जन्यतत्तद्विशिष्टार्थघटकतावच्छेदकधर्मावच्छिन्नोपस्थितित्वेन हेतुतावश्यमुपेया एवं च तादृशकारणविरहा
देव नोक्तस्थले शाब्दबोधप्रसंग इति तदसत्। सर्वलाक्षणिकस्थले शाब्दबोधस्येष्टत्वात्। लाक्षणिकं नानुभावक
मिति नियमे मानाभावात्। अत एव धूमादिसत्त्वहेतुवाक्ये धूमपदस्य धूमज्ञाने पंचम्याश्च ज्ञाप्यत्वे लाक्षणि
कत्वेऽपि शाब्दबोध इति चेन्नैवं न्यायमतेऽस्माभिरपि पदवृत्तिज्ञानजन्यपदार्थोपस्थितित्वेन हेतुताभ्यु
पगम्यैव सर्वपदाश्रवणे शाब्दप्रसंगवारणात्॥ न चैवं सर्वपदाध्याहार आवश्यक इति वाच्यं। प्रकृतवा
क्यार्थशाब्दबोधप्रयोजकसामग्र्यां पदवृत्तिज्ञानजन्यपदार्थोपस्थितेः इतरपदार्थानां चो
पस्थितिसामान्यस्य निवेशेन सर्वपदाध्याहारं विनैव निर्वाहात् द्वितीयत्वादिना निराकांक्षपदजन्यपदार्थो
पस्थितिकाले शाब्दबोधवारणाय [illegible]कांक्षितया तत्तत्पदावगाहिज्ञानस्य हेतुतायास्तत्रावश्यकतया
पदाध्याहारस्यावश्यकत्वात्। किंच तदुद्देश्यकतद्विधेयकान्वयबोधे तदुपस्थापकपदोत्तरत्वेन तदुपस्थापक
पदानुसंधानस्य नियामकतया द्वारकर्मत्वांशे पिधानादिविधेयकशाब्दबोधानुरोधेन द्वारमित्यादिपदोत्तर

व्यु०कौ० त्वेन विधानाद्युपस्थापकपदज्ञानुसंधानमावश्यकं । अत एवोद्देश्यवाचकपदविधेयवाचकपदयोः पौर्वापर्यरूपा
३२ कांक्षाया अप्युपयोगः न चोद्देश्यविधेयभावेन शाब्दबोधानुरोधेन पदाध्याहारकल्पनेपि विशेष्यविशे
षणभावमात्रेण शाब्दबोधस्यार्थाध्याहारादेवोपपत्तेर्न तत्र पदाध्याहारापेक्षेति वाच्यं । अनुमितेरिवो
द्देश्यविधेयभावानिरूपकस्य शाब्दबोधस्याप्रामाणिकत्वात् । अन्यथा तादृशशाब्दबोधोपगमे तदीय
सामग्र्याज्ञानांतरं प्रतिबंधकताया आधिक्यप्रसंगात् । यत्तु पदज्ञानजन्यपदार्थोपस्थितिजन्यशाब्द
बोधे उद्देश्यवाचकपदविधेयवाचकपदयोः पौर्वापर्येणानुसंधानं उद्देश्यविधेयभावनियाम
कं अर्थाध्याहाराधीनशाब्दबोधे च तत्तत्सर्वविशेषज्ञानं नियामकमिति तत्र तथा सत्येकविधबोधस्ये
व सामग्रीभेदात् सामग्रीप्रतिबंधकत्वादेः एवं परभावापन्नपदविषयकज्ञानजन्यपौरुद्देश्यविधे
योपस्थितिसौरेतन्मतेप्येकत्र निवेशनीयतयोक्तलाघवासंभवात् । महावाक्ये सर्वेषां पदाद्युपस्थितित्वावि
व सर्वेषां पदानुपस्थितावपि शाब्दबोधो जायते अर्थज्ञानतीसापस्येवानुपगमात् । अत एव पश्यतश्वेनमा हेरंब०
३२

कमहावाक्यार्थबोधानुपगमात् एवं च सर्वत्र खलेकपोतन्यायेन शाब्दबोधः यत्तु अवांतरवाक्यार्थबोधस्यापि महावा
क्यार्थबोधहेतुतया यत्रावांतरवाक्यार्थबोधस्तत्र विशिष्टस्य वैशिष्ट्यमिति रीत्या महावाक्यार्थबोधः यत्र च स
मोक्तितत्रोक्तस्मृतितो विशेष्ये विशेषणमिति रीत्या बोधः एवं च क्वचिद्दामपुरप्रवेशन्यायेन क्वचिच्च खले
कपोतन्यायेन शाब्दबोध इति मतं तदसत् उक्तरीत्या सर्वत्रोक्तस्मृतिरूपैकविधसामग्र्येव निर्वाहे अवांतर
वाक्यार्थबोधस्य महावाक्यार्थबोधहेतुत्वे मानाभावात् क्वचित् स्मृतिघटितत्वेन क्वचिच्चावांतरवाक्या
र्थबोधघटितत्वेन महावाक्यार्थबोधसामग्र्या भेदे न समानविषयकानुमित्यादौ महावाक्यार्थविषय
कशाब्दसामग्रीप्रतिबंधकताधिक्यप्रसंगाच्च न च विनिगमनाविरहः सर्वत्रावांतरवाक्यार्थबोधरूपैकसा
मग्र्येव निर्वाहोपगमादिति वाच्यं अवांतरवाक्यार्थबोधानुरोधेनोक्तस्मृतिरूपसामग्रीकल्पनावश्यकत्व
स्यैव विनिगमकत्वादिति । आश्रयपदवृत्तिज्ञानजन्यपदार्थोपस्थितित्वेन शाब्दबोधहेतुत्वे यत्र द्वारं कर्म
कपिधानुलासर्येण द्वारमित्येवोक्ते तत्र तादृशबोधानुपपत्तिः पदवृत्तिज्ञानजन्यपिधातोपस्थितेरभावादि

ग्रा॰ कौ॰ तत्त्वरूपस्तात्पर्यमेव शाब्दबोधे हेतुरस्त्विति वाच्यं तथा सति तात्पर्यविषयस्य तात्पर्यभ्रमेण शाब्दबोधानुप
३३ पपत्तेः नन्वेवमपि नानार्थकस्थले तात्पर्यनिर्णयहेतुत्वेऽपि शाब्दसामान्ये तस्य हेतुत्वे मानाभाव इति चेदत्रा
हुः लवणादिशक्तनानार्थकसैन्धवादिपदस्थले लवणादितात्पर्यज्ञानस्य हेतुत्वे कल्पनीये सैन्धवादिप
दजन्यलवणादिशाब्दत्वस्य कार्यतावच्छेदकत्वे गौरवेण सैन्धवादिपदजन्यलवणादिशाब्दत्वमेव कार्यतावच्छे
दकं लाघवात् तत्र लक्षणया शक्तिभ्रमेण वा घटादिपदजन्यलवणादिशाब्दबोधस्य साधारणमिति तत्रा
पि तत्कारणत्वं निर्व्यूढं एवं यत्र शक्तिभ्रमेण सैन्धवादिपदे नैव घटादयोऽप्युपस्थाप्यन्ते तत्रैव घटादितात्प
र्यज्ञानस्यापि कारणत्वं सिद्धं एवं लक्षणास्थले शक्तिलक्षणाभ्यां शक्यलक्ष्यार्थयोरुपस्थितौ लक्ष्यार्थ
स्यैव शाब्दबोधो न तु शक्यार्थस्येति नियमनिर्वाहाय लक्षणायैव नानालक्ष्यार्थोपस्थितावेकस्यैवाल
क्ष्यार्थस्य शाब्दबोधनिर्वाहाय च तात्पर्यनिर्णयहेतुत्वमावश्यकमिति सर्वत्र शाब्दबोधे तस्य हेतुत्वसिद्धिरि
त एव तात्पर्यानुपपत्तिर्लक्षणाबीजमिति प्रवादोऽपि संगच्छत इति तात्पर्यं च तत्प्रतीतीच्छयोच्चरितत्वमेव तु हेतुत्व॰ ३३

उच्चरितत्वं च ज्ञापितत्वं मौनिश्लोकादिसाधारणं तत्र पदज्ञानानुकूललिप्यादिव्यापारमादाय तात्पर्यनिर्वाहः
न च यत्र सैन्धवपदात् लवणप्रतीतिर्भवतु तुरगादिपदार्थप्रतीतिर्भवत्विति समूहालम्बनेच्छया सैन्धवपदमु
च्चारितं लिखितं वा तत्र सैन्धवपदस्योभयतात्पर्यकत्वाल्लाघवादुभयशाब्दबोधापत्तिर्दुर्वारेति वाच्यं तदंशा
वच्छिन्नस्वजन्यत्वप्रकारकत्वेनेच्छाविशेषणीयत्वात् न च यत्रैकपुरुषस्यैव तदर्थप्रतीतीच्छया सद
मुच्चारितं लिखितं वा तत्रान्यपुरुषस्यापि तदर्थशाब्दबोधापत्तिरिति वाच्यं तत्रान्यपुरुषस्य शाब्दबोधा
भावेन तात्पर्यस्य पुरुषभेदनिवेशितत्वाभ्युपगमे तत्रापत्त्यभावात् न चैवं शुकादिवाक्यात्कथं शाब्दबोधस्तत्र ता
त्पर्याभावादिति वाच्यं तत्र तात्पर्यभ्रमादेव शाब्दबोधात् विशेषदर्शिनां तु पदार्थोपस्थितिमूलकमान
सबोध एवोत्पद्यते न तु शाब्दबोध इत्युपगमात् न च तथापि मूर्खपठ्यमानवेदात् शाब्दबोधानुपपत्तिस्तत्र
मूर्खस्यार्थज्ञानाभावेन निरुक्ततात्पर्याभावादिति वाच्यं तत्र पदार्थं मूर्खपठ्यमानवेद ईश्वरोच्चरितवे क्य॰ २
दयोरभेदभ्रमेण निरुक्ततात्पर्यभ्रमस्तदा शाब्दबोधः तादृशभ्रमासत्त्वे च वेदत्वसामान्यलक्षणयेश्वरोच्च

न्या॰ कौ॰ प्तिरेव ज्ञानादेव शाब्दबोध इत्यभ्युपगमात् न च कपिंजलानालभेतेत्यादौ चतुष्ट्वादिप्रतीतीच्छया यत्राधुनिकेन व
३७ ऊवचनाद्युच्चारितं तत्र वऊवचनादेश्चलुष्ट्वादौ तात्पर्येण तस्य शाब्दबोधापत्तिरिति वाच्यं वेदत्वे न ज्ञायमान
वाक्यजन्यशाब्दबोधे न्यायगम्यतात्पर्यनिर्णयस्य हेतुत्वोपगमात् न्यायगम्यतात्पर्यं च न चतुष्ट्वादौ तस्या
वेदार्थत्वात् तात्पर्यं च लाघवज्ञानादिरूपः तत्र वऊवचनस्य सामान्यतो वऊत्वग्राहकप्रमाणेन वऊवच
६ नस्य त्रित्वपरत्वे लाघवमित्याकारकलाघवज्ञानसहकृतेन त्रित्वपरत्वं परिच्छिद्यते इति तत्र तात्पर्यं न्या
यगम्यं। कपिंजलचतुष्ट्याद्यालंभनस्य वेदार्थत्वे अधिकारणामाधिककारणभावस्य च कल्पनायां गौ
रवेण त्रित्वपरत्वे लाघवं निर्वाहः अधिकं यागेवोक्तं। ननु सैंधवादिपदजन्यलवणाद्यर्थविषयकशाब्दबो
धे सैंधवादिपदधर्मिककलवणादितात्पर्यनिर्णयस्य हेतुत्वे पिघटादर्शनेलवणानयनोदिनातात्पर्यकादर्वट
पस्य सैंधवमानयेत्यादिवाक्यात् लवणादर्शनाद्बोधापत्तिरुर्वारा॥ लवणादर्शनाद्योरुभयोरेव सैंधवादिप
दतात्पर्यनिर्णयसत्त्वात् न च लवणादर्शनाद्योः परस्परमन्वयबोधे तदर्थकपदयोरेकवाक्यताभिप्रायत्वे हेरंब॰
३७

रूपं द्वेषांशवं च श्रएवतःद्बुरविक्षेपशब्दं चश्वेतोश्वबोधावतीतिधारित्युक्तं संगच्छते अत्र द्वेषाश्रवणरद्बुरविक्षे
पशब्दश्रवणभ्यां श्वेतधावनयोरनुमित्यात्मकोपस्थितेः एवं च पदज्ञानजन्यार्थोपस्थितिविशिष्टशाब्दबोधे
तादृशोपस्थितित्वेन पदज्ञानाजन्यार्थोपस्थितिविशिष्टशाब्दबोधे च तादृशोपस्थितित्वेन हेतुता एकापद
ज्ञानजन्ययावदर्थोपस्थितिघटिताऽपरा च तदजन्ययावदर्थोपस्थितिघटितशाब्दसामग्री द्विधा पदज्ञा
नजन्यपदार्थोपस्थितिः किंचिदर्थोपस्थितित्वेन तदजन्यार्थोपस्थितिघटिता च सामग्री वा सोवेति केषांचित्सदा तत्केषांचित्
प्रकारांतरेणोपस्थितौ न शाब्दबोधइत्याकूतरूपिनपश्यतइत्यादौ कथंचिदनुमानादितएव श्वेतोश्वबोधा
वतीत्यादिबोधानिर्वाह द्वितीयसामग्रीकल्पने मानाभावात् तादृशबोधानंतरं शाब्दयामीत्याघनुव्यव
सायस्यासिद्धत्वादिति दिक्॥॥ ननु नानार्थकसैंधवादिपदस्य लेपत्रैकरूपशाब्दं वे शातुरगादिना नार्थोपस्थि पा३
तिस्तत्र सर्वेषामेव शाब्दबोधापत्तिराकांक्षाज्ञानादिघटितशाब्दबोधसामग्रीसत्वादिति चेन्न तात्पर्यनिर्णय
स्यापि शाब्दबोधसामान्ये हेतुत्वमायत्रार्थे तात्पर्यनिर्णयस्तस्यैव शाब्दबोधोदये नोक्तायस्संभवादन

त्वादौ॰ लक्षणापरावित्त्वेतादृशतात्पर्यनिर्णयस्याधिकस्य हेतुत्वात्तद्दोषइति वाच्यं॰ लवणभक्षणान्वयबोधेपि तादृशतात्प
३५ र्यनिर्णयस्य हेतुतया तदनुरोधेन तस्यावश्यकतया तद्धेतुतयोक्तापत्तिवारणासंभवादिति चेन्नैवं॰ कर्मत्वादिवि
शेष्यतानिरूपिताधेयत्वादिसांसर्गिकविषयतानिरूपितलवणादिप्रकारताशालि शाब्दबोधे तादृशप्रका
रताशालिप्रतीतिर्भवत्विति साकांक्षनिर्णयस्य हेतुत्वोपगमेन तादृशज्ञानस्य विशिष्यपदार्थद्वयावगा
हित्वेपि विषयतांश एव तत्तत्पदार्थप्रकारकतया एकपदार्थेऽपरपदार्थाप्रकारकत्वेन वा स्वार्थानवगाहि
तया शाब्दबोधात्पूर्वं तत्संभवात्॰ केचित्तु तात्पर्यज्ञानं न हेतुः नानार्थस्थले तात्पर्यविषयस्यैव शाब्दबो
धनियमस्तु एकतत्पदार्थशाब्दबोधे अन्यतत्पदार्थे तात्पर्यज्ञानस्य प्रतिबंधकतयोपपादनीयः। एवं च लक्ष्या
र्थतात्पर्यज्ञानदशायां मुख्यार्थस्य शाब्दबोधासंभवेन लक्षणावृत्तेः कल्पनमिति संगच्छते अत एव तात्प
र्यज्ञानविरहदशायां शाब्दबोधोद्वयेपि नक्षनिरिसाकूस्तदसत्॰ तात्पर्यज्ञानस्य प्रतिबंधकत्वे उभय
त्रतात्सत्वेनुभवसिद्धस्योभयशाब्दबोधस्यानुपपत्तेः एकतात्पर्यज्ञानप्रतिबंधकतायामपरतात्पर्यज्ञानस्यो हे०व॰ ३५

त्तेजकत्वे गौरवात्॰ अन्ये तु एकत्र तात्पर्यज्ञानमपरपदार्थोपस्थितिप्रसक्ते प्रतिबंधकं एवं च नानार्थस्थले
तात्पर्याविषयपदार्थोपस्थितिसत्कल्पनालाघवं उभयत्र तात्पर्यग्रहस्थले एक वा सर्वग्रहनाशे सत्येवाप
रपदार्थोपस्थितिसा शाब्दबोधइत्याकूतस्तदप्यसत् यत्रैकपदार्थोपस्थितिसमनंतरं तदुत्पत्तिकालेवाऽपरपदार्थता
त्पर्यज्ञानं तत्र तात्पर्याविषयस्यापि शाब्दबोधापत्तेः लक्षणास्थले यत्र प्रथममेव लक्ष्यार्थतात्पर्यज्ञानेन
त्र शक्यार्थोपस्थितेरसत्वे नशक्यसंबंधात्मकलक्षणाग्रहासंभवाच्च॰ अत्रेदं बोध्यं सैंधवमानयेत्यादौ लवण
तुरगादिनानार्थे यत्र तात्पर्यग्रहस्तत्र द्वितीयार्थशाब्दबोधः प्राभाकरमते आवृत्तैव सकृदुच्चरितः शब्दः सकृदेवा
र्थं गमयतीति व्युत्पत्तेः नरनंगीकर्तृनव्यमते चावृत्तिं विनैवैकदोभयार्थबोधस्तत्र मतद्वयेप्यस्याशयमित्थं
नर्णयं सभिप्रायुक्ता॥ तत्र प्राचां मयमाशयः। नानार्थप्रसायनेच्छया नानार्थादिशब्दविषयकैकानुसंधानेऽनेका
र्थप्रसायकत्वप्रकारिकावस्तुरिच्छा नसंभवति सकृदुच्चरितस्यादिनियमवलेन स्वसामानार्थकपदांत
रानुसंधानासमवहितस्य पदानुसंधानस्य नानार्थबोधकत्वनिश्चयेन तेन तादृशप्रसायकत्वस्य बाधा

शा॰कौ॰ तु न च तादृशनियमे मानाभाव इति वाच्यं तथा सति एकपदानुसंधाने युगपन्नानार्थबोधकत्वस्य दुर्वार-
३६ त्वात् तत्र वाक्यभेदव्यवहारानुपपत्तेः वाक्यजन्यशाब्दबोधभेदस्यैव वाक्यभेदव्यवहारप्रयोजकत्वात् ए-
वं चैकवाक्यगर्भता सर्वथाभावान्न नार्थवाशब्दात् युगपदनेकार्थप्रतीतिः एकानुसंधानंतर्भाविणानेकार्थप्रत्याय-
नेऽकगर्भत्वं तु नास्त्येव सर्वमावस्या क्रमोत्तत्र नानार्थबोधेनापि चरितार्थं भवतीति तत्राव्यस्यैकार्थात्वबोधः ननु
सहृदुच्चरितइत्यादिनियमो न संभवति घटो घट इत्यादौ वैकघटपदानुसंधानादप्यनेकघटादिबोधोदये
न व्यभिचारात् यत्तु तत्रैकशेषेण सरूपपदांतरलोपात्तत्स्यानुसंधानादेव नानाघटादिबोधः तथा च तत्र
त्रपदानुसंधाने समानार्थकपदानुसंधारनासमवहितत्वरूपविशेषणमेव नास्तीति नोक्तनियमे व्यभिचा-
रः अत एवैकशेषानुशासनस्यापि सार्थकत्वं अन्यथा एकेन पदेनानेकघटादिबोधसंभवेऽनेकघटादिपद-
प्रयोगाप्रसक्त्या सरूपपदांतरलोपविधायकतदनुशासनवैयर्थ्यापत्तेरिति तदसत् एवमपि घटावानये- हेरंबं
त्यादितः आनयनद्वयादेरेकेन आङ्पूर्वनीधात्वनुरूपपदेन बोधने न व्यभिचारस्य दुर्वारत्वात् न च पाति ३६

षयत्वरूपसमभिव्याहाराभावान्न तस्यापि हेतुनया तदभावान्नोक्तापत्तिरिति वाच्यं तादृशहेतुत्वे मानाभावात् तादृ-
शहेतुतामनेविलक्षणभक्षणतुरगाद्यानयनात्पर्यकात्सैंधवं कलयतीत्यादिवाक्यात्तुरगभक्षणलवणा-
नयनाद्योरन्वयबोधस्य दुर्वारत्वाच्च न च तदर्थान्वितत्तदर्थशाब्दबोधे तदर्थान्वितदर्थतात्पर्यनिर्णयस्य
हेतुत्वात्रोक्तदोष इति वाच्यं तथा सति एकपदार्थान्वितापरपदार्थस्य वाक्यार्थरूपतया तस्य शाब्दबो-
धात्प्रागेवमप्रतीत्या क्वापि तात्पर्यनिर्णयस्यैवासंभवात् अथ पदार्थत्वेन पदार्थद्वयविषयकस्य सैंधव-
पदं समभिव्याहृतापरपदार्थान्वितस्वार्थपरमित्याकारकस्य सामान्यत एकपदार्थविशेषितस्वापरप-
दार्थमवगाहमानस्य सैंधवपदं पदार्थतरान्वितं तुरगादिपरमित्याकारकस्य वा तात्पर्यनिर्णयस्य हेतुत्वो-
घ॰२ पगमान्नदोष इति चेन्न सैंधवं कलयतीत्यादौ तुरगानयनाद्यन्वयबोधानुरोधेन तादृशतात्पर्यनिर्णयस्या-
प्यावश्यकतया तत्फलेन तुरगभक्षणाद्यन्वयबोधापत्तेर्दुर्वारत्वात् तुरगानयनाद्यन्वयबोधइव तुरगभक्षणा-
द्यन्वयबोधेऽपि तादृशतात्पर्यज्ञानस्य हेतुत्वात् न च तुरगभक्षणाद्यन्वयबोधे कालिपदमितरपदार्थान्वित

व्या.सौ.
३९

तथा अपरे घटानयनविषयत्वाभेदे यत्रानयने यद्धटकर्मकत्वं वाधितं तदानयननिष्ठविषयतायास्तद्दान
यनावच्छिन्नत्वद्धटकर्मकत्वावच्छिन्नतद्धटानयननिष्ठविषयत्वाभेदेन तद्बोधस्य तद्वृत्तिधर्मावच्छिन्नतन्नि
ष्ठविषयताकत्वेन भ्रमत्वप्रसंगात् तत्र विषयताभेदस्यावश्यकतया नानादृशानियमेपि व्यभिचारादिति चे
न्नैवं एकपदानुसंधानजन्यबोधे एकविषयत्वानिरूपितत्वदर्थविषयताद्वयाभावनियमोपगमेऽनुपप
त्त्यभावात् घटादानयघटपटावानयेत्यादावानयभेदे न तद्विषयताभेदेपि तदुभयविषयतानिरूपि
ता आनयनस्वस्वप्रकारताद्रूपविषयद्वयैक्ये नोपेयते विषयभेदविरहात् घटं पटं चानयेत्यादिवाक्याच्चैन
समूहालंबनबोधसंभवः घटानयनं पटानयनमिति समूहालंबनबोधेन तद्दानविषयतानिरूपिततानयन
त्वविषयता अविभेदात्तत्समूहालंबनबोधस्य प्रत्येकज्ञानोत्पादकसामग्रीसमुदायाधीनतया प्रत्येकज्ञानीय
विषयताद्वयनियामकवशाद्विषयताद्वयसंभवात् अतस्तत्राकांक्षाक्रमेणानेकार्थबोधस्वीकारः नत्वेव
मेकशेषानुशासनमफलं घटादिसाद्दोद्विद्धिघटत्वाद्येकैकविशेषणीयैकविषयताशालिबोधस्यैकेना हरेब.
३९

पि घटादिपदेन जननसंभवादिति चेन्न तदनुशासनवैफल्यस्येष्टत्वादिति नव्यानामाशयः। बोधस्येच्छा
यां विरोधित्वे मानाभावः विरोधित्वे वा तस्य न सार्वत्रिकत्वमिति एतत्सदविषयकमनुसंधानेमेतत्सदृशार्थद्वयं
बोधयतु एतत्सदमर्थद्वयविषयकैकबोधं जनयत्विति ताकारिकानानार्थादिशब्दविषयकैकानुसंधाने
नेकार्थप्रत्यायकत्वप्रकारिका वक्तुरिच्छा क्वचित्संभवात् सेच नतद्धलाभानार्थादिस्थलेएकदानेकार्थबो
धोदुर्वारः न च तात्पर्यसत्वेपि सकृदुच्चरितं इत्यादिनियमभंगभयान्नोक्तबोधाभ्युपगमस्संभवतीति वाच्यं।
सामग्रीसत्वे नियमभंगस्याकिंचित्करत्वात्।। किंचकस्यार्थस्य प्रथमं बोधः कस्य वाऽपश्चादित्यत्र विनिग
मकाभावे नान्वसाक्रमिकबोधोपगमासंभवेन युगपन्नानार्थबोधोपगमएवोचितः न चैवं तत्र वाक्यभेद
व्यवहारानुपपत्तिः वाक्यजन्यशाब्दबोधभेदस्यैव वाक्यभेदप्रयोजकत्वादिति वाच्यं वाक्यार्थभेदस्यैव
वाक्यभेदप्रयोजकत्वात् यत्वेवं सति एतद्धटत्वं घटत्व सत्व सत्वञ्चेत्यादावपि वाक्यभेदो न स्यात् तत्र
घटपटादिविशिष्टस्यैतद्धटत्वादेर्वाक्यार्थस्यैक्यात् किं चैवं सति घटपटावानयेत्यादावपि वाक्यभेदाप

न्या॰कौ॰ तिः घटमानयपटंचेत्यादावपि तत्रापि घटानयनपटानयनरूपवाक्यार्थभेदात् । नचैष्टापत्तिरिति वाच्यं तत्
३८ थासत्येकवाक्यघटकयोरेव पदयोः समासप्रयोगैकसामर्थ्यस्वीकारे तत्र घटपटाविति घटपटपदयोः स
मासानुपपत्तेरिति तदसत् । अर्थनिष्ठस्वप्रयोज्यविषयतयोः साक्षात्सरैव परासाधारणनिरूप्यनिरूपकभा
वविरहस्यैव वाक्यार्थभेदस्यात् । घटपदात्वानयेत्यादिवाक्यजन्यबोधीयानयनादिनिष्ठविषयतानामान
यनत्वादिनिष्ठप्रकारतानिरूपितत्वेन परंपरया निरूप्यनिरूपकभावः घटमानयपटंचेत्यादिवाक्यजन्य
समूहालंबनबोधीयानयनत्वादिप्रकारमतायाविशेष्यताभेदेन भेदोपगमाल्लिनिरूपितनानानयनादिनि
ष्ठविषयतानां परंपरयापि निरूप्यनिरूपकभावविरह इत्यदोषः । तथाच निरूप्यनिरूपकभावशून्यविषयु
ताद्रूप्यशालिबोधपरवाक्ये वाक्यभेदः । अतादृशे च वाक्ये एकवाक्यत्वमिति पर्यवसितं । नचैवं सहहृद्यच्चिरि
तइतिनियमेमानाभाव इति वाच्यं इष्टापत्तेरितिदिक् । अत्र स्वस्थानस्थस्य पुनरनुसंधानमावृत्तिः निकट
स्थस्यैकदेशानुसंधानमनुषंगः दूरस्थस्यानुसंधानमनुवृत्तिः साच सिंहावलोकनमंडूकप्लुतिगंगाप्रवाह हरेखं॰ ३८

पदि वरूपपदमंतर्भाव्य तथा नियमेन दोषे इति वाच्यं । तथासति घटं पटंचानयेत्यादौ एकेनापि क्रियापदेन नाना
नयनादिबोधनसंभवेनप्राचां तत्रावृत्तिस्वीकारविरोधात् । अत एवैकपदानुसंधानेनानावृत्तिविषयावोध
कत्वनियमस्वीकारेपि न निर्वाहः उक्तस्थले घटपटानयनयोरेकशक्त्यैप्यस्यापत्तेनावृत्तिस्वीकारविरोधात् । न वो॰ ३
चानेकवाक्यार्थबोधकत्वाभावनियमेभिप्रेतः घटावानयेत्यादौ घटद्वयाद्यानयनरूपवाक्यार्थस्यैक्या
त् । घटंपटंचानयेत्यादौ घटानयनपटानयनादिरूपवाक्यार्थस्य भेदादावृत्तिस्वीकार इति वाच्यं । पदा
र्थभेदेन द्वितीयवाक्यार्थभेदस्यावश्यकतया घटावानयेत्यादौ वाक्यार्थैक्यस्यासंभवात् । नचैकपदा
नुसंधानजन्यबोधे तदर्थनिष्ठानेकविषयताकत्वाभावान्नियमः घटावानयेत्यादिवाक्यजन्यबोधे च
घटद्वयत्वावच्छिन्न घटद्वयादिविषयतानन्नानयनत्वाद्यवच्छिन्नानयनद्वयादिविषयता चाभिन्नै
व घटंपटंचानयेत्यादिवाक्यजन्यसमूहालंबनबोधे घटानयनत्वपटानयनत्वादिविभिन्नधर्मावच्छिन्नवि
षयतावच्छेदकभेदाद्विसतइति न दोष इति वाच्यं । घटावानयेत्यादिवाक्यजन्यबोधे एकघटानयनविष

त

न्या कौ एवमेव घटध्वंसपक्षी हृक्संभावि प्रयोपि साधनीयः एवमेकः कालीनास्सर्वे परमाणवः कार्यद्रव्यध्वंसाः आरंभक
३९ त्वात् नष्टपूर्वनारंभकपरमाणुवत् ब्रह्मांडसंततिः स्वसंततिमुच्छिद्यते संततित्वात् प्रदीपसंततिवदिति साधनु
मानादपि तत्सिद्धिः सदेव सोम्येदमग्र आसीत् धाता यथापूर्वमकल्पयदिति साधाः श्रुतयः सर्वभूतानि कौंते
य प्रकृतिं यांति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहमिति साधाः स्मृतयोपि प्रलयेमानं प्र
पु॰ कृतिर्मूलकारणत्वात् सा स्वमाकृतकोस्माकं सांख्यानामिवातिरिक्तप्रकृतेरनंगीकारेपि न क्षतिः एवं वेदस्यापौ
रुषेयत्वे तस्मात् त्रयस्तेपानात्त्रयो वेदा अजायंत ऋचः सामानि जज्ञिरे इत्यादिश्रुतिविरोधश्च नच श्रुति
राविर्भावपरेति वाच्यं मुख्ये बाधकाभावात् तस्मात् वेदः पौरुषेय एव। ननु किमिदं वेदत्वं पौरुषेयत्वं चेति चे
दुच्यते मंत्रब्राह्मणान्यतरत्वं वेदत्वं अत एव मंत्रब्राह्मणयोर्वेदनामधेयमिति प्राचीनगाथापि मंत्रो द्विवि
धः ऋक् यजुश्च तत्र नियताक्षरपादा ऋक् अनियताक्षरपादं यजुः यत्र ऋचां बाहुल्यं स ऋग्वेदः यत्र यजु
षां बाहुल्यं स यजुर्वेदः स गेयत्वेपि ऋग्विशेषाणां गानप्राधान्येन सामवेदः मानोत्थानायथ्या सप्रमुक्ता वेदका हरेब्र॰ ३९

अध्यापकप्रणीतत्वव्यवहारकारणाया
अन्यातेज्ञान निरोधणं

र्थ

म्नाः स्तोभाः तेन निरर्थका अपि गीयमानाः पुण्यापमृत्युषो विवक्षयाभ्युदानिकपौष्टिकपुरस्कारेणाभिहितोर्थः अथ
र्ववेदः निगदोपि यजुर्विशेषः खिलमंत्रकृतपदं ऋक्यजुर्वा एते मंत्रप्रपंचाः। ब्राह्मणं तु विधिरर्थवादोनुवादश्चेति तत
त्र विधिश्चोदना अर्थवादः स्तुतिर्निंदा परकृतिः पुराकृतिश्च अनुवादः स्वप्रयोजनं पुनर्वचनं एते ब्राह्मणप्रपंचाः
मंत्रब्राह्मणे च प्रसेकमादौ कर्मकांडं शेषे ब्रह्मकांडं कर्मकांडस्य प्रवृत्तिलक्षणे धर्मे तात्पर्यं ब्रह्मकांडस्य तु निवृ
त्तिलक्षणे तादृशश्च सर्वा एव शाखा इति सहस्रशाखस्यापि वेदस्यापूर्वे तात्पर्यं पौरुषेयत्वं च स्वतंत्रपुरुषप्र
णीतत्वे तच्च ह्यसमानानुपूर्वीकवाक्यत्वानानाजन्यस्वप्रतिपाद्यवाक्यार्थज्ञानवत्त्वं जातीयत्वं वेदभारतादौ
अध्यापकप्रणीतत्वव्यवहारकारणाया अन्यातत्वान विशेषणं पद्यमानवेदभारतादावीश्वरख्यासादि
प्रणीतत्वनिर्वाहाय ज्ञानविशेषणमिति मणिकारानुपाधिनोनव्यास्तु शब्दशक्तोपजीविप्रमाणातिरिक्त
प्रमाणाजन्यप्रमितिसविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्याप्रमाणशब्दत्वं वेदत्वं अत्र शब्दः शब्दोप
जीविचपत्यमाणं तदुभयमितिप्रमाणजन्यप्रमितिविषयार्थकपत्तेरन्यत्वे सतीति सत्यंतार्थः अस्ति चेदं त

न्या-कौ॰ फलं स्वर्गकामो यजेतेत्यादिवेदे तदर्थस्य स्वर्गादिसाधनत्वविशिष्टयागादिरूपस्यालौकिकस्वर्गादिघटितत्वेन श
६० ब्दशब्दोपजीविप्रमाणातिरिक्तेन प्रत्यक्षप्रमाणादिनाऽग्रहात्तन्निरुक्तप्रमाणनिरूप्यार्थकत्वं किंतु घटोऽस्ती
त्यादिलौकिकवाक्यस्येव तदन्यत्वस्य एवं वेदात्मकशब्दजन्ययज्ञकार्थज्ञाने वेदार्थशाब्दबोधरूपं त
ज्जन्यं यत्स्मृतिपुराणादि तदन्यप्रमाणशब्दत्वस्य च तत्र सत्वेन लक्षणसमन्वयसंभवात्· अत्र घटो
ऽस्तीत्यादिलौकिकवाक्यस्य दृष्टार्थकस्मृतिपुराणादिवाक्ये चातिप्रसंगवारणाय सत्यंतनिवेशः। शब्दो
पजीविप्रमाणातिरिक्तेन वेदात्मकशाब्दप्रमणेन शाब्दभिन्ने न च यागः स्वर्गसाधनं स्वर्गसाधनत्वं स्व
तो र्गसाधनतावच्छेदकरूपवत्वादिस्तत्र मानं दिना साध्यादिप्रसिद्धिसंपादकशब्दोपजीविप्रमाणेन वेदार्थस्य
ग्रहणासंभव इति शब्दप्रमाणभेदस्य शब्दोपजीविप्रमाणभेदस्य च सत्वेनार्थभेदप्रतियोगिकोटिप्रविष्टज
न्यत्वप्रतियोगिप्रमाणविशेषणतया निवेशः नचपदज्ञानस्य शाब्दकरणतामते शब्दातिरिक्तत्वस्य प्रमाणे
विशेषणत्वेऽप्यसंभवतादवस्थ्यमिति वाच्यं· तन्मते शब्दपदस्य शब्दज्ञानपरतया दोषात्· अत्र शब्दो हेरंब॰ ६०

वच्छिदितित्रिधा आवश्यानुषंगानुवृत्तिसाधारणं च श्रुतपदस्य पुनरनुसंधानत्वं· अश्रुतपदानुसंधानमध्याहार
इति ध्येयं इदं च वक्त्रभिप्रायघटिततात्पर्यस्य शाब्दबोधप्रयोजकत्वे स्थिते वेदे वक्त्रंतराभावेन तात्पर्यनिर्वाहाय
तीन्द्रियवेदार्थदर्शी वेदवक्ता सर्वज्ञः परमेश्वरोऽपि सिध्यति जीवानां नाम सर्वज्ञत्वात् योगिनां सर्वज्ञत्वेऽपि
योगादिविध्युपदेशकवेदमपेक्ष्य लाभे गाभ्यासानुपपत्तेः सर्वैर्गादाव योगिनः सर्वज्ञत्वस्य वेदवक्तृत्वस्य स्वी
करणीयत्वात्· अत एव वेदस्यापौरुषेयत्वमपि भारतादिवत्· अत्र मीमांसकाः वक्त्रभिप्रायघटिततात्पर्यस्य शा
ब्दबोधप्रयोजकत्वेऽपि न तदनुरोधेनेश्वरसिद्धिः अध्यापकतात्पर्येणैव तन्निर्वाहात्· अध्यापकानामसर्वज्ञ
त्वेऽपि पूर्वाध्यापकोच्चरितानुसारितात्पर्यसहकृतादिदानींतनवेदादेव तदर्थज्ञानं न च मध्ये प्रलये नाध्यापकपरंपराया
विच्छेदात्सर्गादौ तत्तात्पर्यासंभवेनेश्वरस्वीकार आवश्यक इति वाच्यं· प्रलये मानाभावेनाध्यापकपरंपराया
अविच्छेदात्· तस्माच्च वेदस्यापौरुषेयत्वमिति चेदस्यापौरुषेयत्वमेवेति वदंति· तदसत्· कालकपालानाव
त्तिध्वंसप्रागभावः कार्यद्रव्यानाधाराधारः अभावत्वात् दृशकी शब्दप्रागभाववदित्यनुमानेनातीतप्रलयसिद्धेः

न्या॰ कौ॰ प्रमितौ गुरुनैयायिकोभयसिद्धस्वर्गसाधनताबाधपनुमायकलिंगस्य स्वतःशब्दानुपजीवकत्वेनज्ञानकरण
८१ +विशेषणोपादानेनोपनीतभानात्मकप्रमितिकारणेपि ज्ञानप्रमानलिंगस्यानुमितिकरणतापक्षे यागादौ स्वर्ग+
तामतेपि व्याप्तिघटकपदार्थानां विशकलितानामुपस्थितावि विशेष्ये विशेषणमित्यादिरीत्यापरामर्शोघ
त्रानुमितिस्तदनुरोधेन व्याप्तिघटकाभावादिज्ञानस्य करणतायां रूपगतत्वतयात्तस्य च साध्याविवि
षयकस्य स्वतःशब्दानुपजीवकत्वेनतज्जन्यवेदार्थगोचरानुमितिमादाया संभवो दुर्वार इत्र प्रमात्वपफ
लद्वाराशब्दोपजीवित्वाभार्थकत्वपैवच प्रथमप्रमाणपादसार्थकत्वाशब्दप्रमाणफलेशब्दस्योप
जीव्यत्वेपि स्वस्य स्वासहकारितयानशब्दप्रमाणेशब्दस्य सहकारित्वेतिशब्दस्यनति इत्यत्र शब्दोपजीवि
त्वमितिनप्रथमशब्दपदवैयर्थ्य· ननु चक्षुरादिनाघयत्तिलादिरूपलौकिकवाक्यार्थज्ञानजननेपिकु
त्रचिद्विशेषणज्ञानद्वाराविशेषणावोधकशब्दस्य सहकारितयाचक्षुरादेरपिप्रापशः फलद्वाराश
ब्दोपजीवित्वमस्त्येवेतितादृशचक्षुरादिमात्रग्रहीतार्थके लौकिकवाक्येतिव्याप्तिर्दुर्वारा।नचयज्जन्यप्र हेरंब॰ ८१

मितिसामान्यशब्दप्रयोज्यत्वंतत्वस्य शब्दोपजीवीत्वमनेन विवक्षणान्नोक्तातिव्याप्तिरिति वाच्यं तथा सतिमनःशरी
रीरादिजन्यत्वमितिसामान्यस्य शब्दप्रयोज्यत्वाभावेनमनःशरीरादीनांशब्दानुपजीविप्रमाणतयातज्जन्य
शाब्दप्रमितिविषयार्थकत्वादेदस्य त्वसंभवापत्तेः। अद्वितीयप्रमाणपदेनासाधारणप्रमाणस्य विवक्षणान्ना धारण
मदोषः चक्षुरादेर्निरुक्तशब्दोपजीवित्वाभावेपि तज्जन्यवेदार्थोपनीतभानमादायतासंभवः असाधारण
प्रमाणप्रयोज्यविषयतया अर्थविशेषणत्वोपगमात्तत्रा नलक्षणायामनसः प्रत्यासत्तितयोपनीतवेदार्थ
निष्ठचाक्षुषादिविषयतायाअपि असाधारणप्रमाणभूतचक्षुराद्यप्रयोज्यत्वात्तत्सामान्यलक्षणापावृत्तिः॥
दिप्रत्यासत्तिलैस्वजन्यज्ञानसमानविषयकत्वेन प्रमितेर्विशेषणीयतया नसामान्यलक्षणाजन्यवेदार्थ
गोचरचाक्षुषादिप्रमामादायासंभवः। अतएव यागादिरूपवेदार्थैकदेशस्य लौकिकप्रमाणगम्यत्वेपिन
दोषः स्वर्गत्वाद्यप्रकारकस्य लौकिकप्रमाणजन्ययागत्वादिप्रकारकवोधस्य स्वर्गसाधनंयागइत्यादिवे
दजन्यवोधीयविषयतावच्छेदकत्वन्तत्समानविषयकत्वाभावात्· यागइत्यादितानीययागादिविष्टपनायाः

मा॰कौ॰ स्वर्गसाधनं यागा इत्यादिना नीय विषयतानो भेदात् तस्य च प्रमितिविषयार्थकत्वमित्यस्य प्रमितिविषयमात्रार्थकत्व
४२ मित्येवार्थः तथा चालौकिकस्वर्गादिरूपार्थबोधकत्वस्यैव वेदलक्षणगमनसंभवइति वाच्यं स्वर्गादेरपि स्व
र्गत्वादिनानुमानादिरूपलौकिकप्रमाणगम्यत्वादिति चेन्न स्वर्गसाधनत्वाद्यनुमापकयागविशेषत्वादिरू
पलिंगात्मकानुमानजन्यगुणबाध्यनुमितेस्तत्करणकप्रमितिसामान्यांतर्गतायाः शब्दोपजीवित्वा
~~दिरूपलिंगात्मकानुमानजन्यगुणबाध्यनुमितेस्तत्करणकप्रमितिसामान्यं तर्ग~~ [redacted] ता
द्विरहेण तादृशानुमानग्राह्यार्थकतया वेदे सत्वादसंभवस्य दुर्वारत्वादिति चेन्नैवं सहकारेणैव येन
स्वजन्यज्ञानसमानविषयकप्रमितिर्जन्यते तदन्यप्रमाणागम्यार्थकं यत्त्वं तदन्यत्वनिवेशेनोक्तदोषाभावा
त् गुणबाध्यनुमितेर्वेदजन्यज्ञानसमानविषयकत्वाभावात् तत्समानविषयकानुमित्यादेश्चोक्तानुमा
नादिना जनने शब्दस्य सहकारितानियमाद्वेदस्यत्ते उक्तानुमानादेः शब्दोपजीवित्वाक्षतेः अतएव चक्षु
रादिजन्यवेदार्थगोचरोपनीतभानमादाय पिनासंभवप्रसक्तिः चक्षुरादेरप्युक्तरीत्या वेदस्य स्वपदेनोपा हेरंबं॰ ४२

८ चाक्षुषादिज्ञानस्यापि शब्दप्रयोज्यतावत्त्वमक तथा ज्ञानमात्रस्यादृष्टाधीनतया श्रावणप्रत्यक्षस्यापि तत्त्वे

पजीवित्वप्रमाणत्वे शब्दप्रमाणप्रयोज्यप्रमितिकरणत्वं न तु शब्दप्रमाणप्रयोज्यत्वे सति प्रमितिकरणत्वं तत्त्याप्त
तिचक्षुरादेर्दीपदानादिजन्यादृष्टद्वारादीपदानादिकर्त्तव्यताबोधकशाब्दप्रयोज्यतया निरुक्तलक्षणे तेनाव्यावर्त्त
नात्तस्य स्मश्रवणादेरेव व्यावर्त्तनात्तदृग्गृहीतार्थके घटोऽस्तीत्यादिलौकिकवाक्ये तिप्रसंगात् अथ च
क्षुरादेरदृष्टद्वारा शब्दोपजीवित्वेन तत्रद्वारकशब्दाधीनादृष्टीयजीवितया प्रमाणमात्रमेव शब्दप्रयो
ज्यप्रमितिकरणमिति तदन्यप्रमाणाप्रसिद्धिरिति दृष्टद्वारकत्वविशेषणस्योपजीवितयापि अवश्यं प्रवेश
नद् नीयतया प्रमितिकरणोपि शब्दोपजीवित्व विशेषणसंभवइति चेन्न शब्दसहकृतेन येन प्रमितिर्जन्यते तत्त्व
स्य शब्दोपजीवित्वप्रमाणपदेन विवक्षणीयतया दृष्टाद्युपकत्वविशेषणं विनैवास्माकं निर्वाहात् न तु हि
चक्षुरादिना प्रत्यक्षादिजनने शब्दस्य सहकारिता चक्षुरादिसत्त्वे तज्जनकादृष्टजनकशब्दस्यावश्यकत्व
याचक्षुरादौ प्रमित्यनुपधायकतया शब्दव्यतिरेकाप्रयोज्यत्वात् वस्तुतस्तु स्वतः शब्दोपजीवित्व
प्रवेशे शब्दजन्यस्वर्गादिप्रस्थितिसहकृतचक्षुरादिप्रमाणजन्यवेदार्थगोचरोपनीतभानमादाय संभवः
गो

व्याको० सार्थबोधं विनापि अनन्तत्रचैत्रवाक्यजन्यस्वरूपसामान्यज्ञानात्तेनरूपेण चैत्रवाक्याजन्यबोधभ्रमेण तादृश
७३ वाक्यार्थज्ञानोत्पादेन तद्धारणादिति मिश्रैरुक्तं तत्र चारुशब्दजन्यवाक्यार्थज्ञानपर्यन्तोपजीवितानिवेशे वेदवाक्या
र्थज्ञानपर्यन्तोपजीवितानिवेशे वेदवाक्यार्थज्ञानं विनैव शब्दजन्यतादृशवाक्यार्थघटकविशकलितस्वर्गादिप
दार्थोपस्थितितो वेदार्थगोचरानुमानसंभवेनासंभवापत्तेः शब्दजन्यवाक्यार्थज्ञाने सस्य शब्दवृत्तिज्ञानज
न्यज्ञानार्थकत्वे नासंभववारणेपि शाब्दत्वजातिविशिष्टघटितार्थकवाक्येति व्याप्तिर्दुर्वारत्वात् तादृशवा
क्यार्थज्ञाने शाब्दत्वजातिग्रहस्यापेक्षणीयतया तादृशजातिमतः शब्दवृत्तिज्ञानजन्यशाब्दबोधस्यैव ज्ञा
नापेक्षानियमात् । व्यक्तिं विनाप्रमूलभूतप्रत्यक्षज्ञाने न जातेरग्रहणात् । यद्यपि स्वजन्यज्ञानसमानवि
षयकज्ञानजनके शब्दज्ञानजन्यज्ञानोपजीविताया विवक्षणेनोक्तदोषावकाशः शाब्दत्वजातिविशि
ष्टघटितस्यश्रुतेर्यथार्थ इत्यादियावार्थस्य तादृशवाक्यजन्यज्ञानविषयकज्ञानसमानविषयकज्ञान
जनकष्ठ ये त्तीस्यादिवाक्यजन्यधीः शाब्दज्ञानमात्रे शाब्दत्वेग्रहीतेपि ग्रहसंभवात्तादृशवाक्यार्थग्राहकप्र हेरंबं० ७३
नि

प्रमाणस्य समानविषयकज्ञानजनकशब्दानुपजीवितात्समानविषयकत्वं तद्विषयकत्वमेव ननु तदीयविषयता
वत्त्वं अतः स्वर्गकामो यजेतेत्यादिवाक्यजन्यबोधे यादृशी विषयता तद्भिन्नलक्षणविषयताशालिबोधजनकं किं
चिद्वाक्योपस्थापितं स्वर्गादिसाधनत्वबोधकानुमानग्राह्यत्वेपि तादृशवेदस्य नासंभव इति तदपि न सम्य
क् शाब्दत्वविशिष्टघटितयोः तादृशवाक्यार्थघटकयत्किंचिदर्थघटितार्थवाक्यार्थविषयकशाब्दबोधे शाब्दत्वं ग
हीत्वे तादृशवाक्यार्थज्ञानेन तत्रातिव्याप्तेर्दुर्वारत्वात् अत्र शब्दप्रयोज्यप्रमितिकरणभिन्नकरणकत्वे न शब्दा
प्रयोज्यप्रमितिरूपादाने । शिरोवेष्टनेन नासिकास्पर्शवदनुचितमिति शब्दाप्रयोज्यत्वेनैव तादृशीप्रमितिर्वि
वक्षणा प्रयोज्यत्वं जन्यसाधारणमिति शाब्दबोधान्यत्वमपि विशेषणमुपादेयं अन्यथा वेदजन्यशाब्दप्रमिति
मादायासंभवापत्तेः अतएव पश्चत् शब्दपदोपादानाविरोधः जन्यसाधारणप्रयोज्यत्वनिवेशेनुया
दबोधान्यत्वं न पश्चत् निवेश्यं प्रयोज्यत्वं साधारणमेवाभिप्रेतं एतन्न लाभायैव पश्चत् शब्दपदोपादा
नमिति वाच्यं शब्दाप्रयोज्यत्वेन प्रमितिरूपादाने ईश्वरप्रमितेरप्यजन्यत्वेन तथात्वाच्चेन वेदार्थस्य तद्वि

द्या१

श्या॰कौ॰ षयतया संभवः जन्यत्वेन प्रमितेर्विशेषणे तु मरमते जन्यत्वस्याऽवच्छेदकतया तद्घटितधर्मस्य गुरूनया भावप्रतियोगि
४७ तानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकलक्षणघटकभेदाप्रसिद्धिरिति वाच्यं शब्दाप्रयोज्यत्वस्य शब्दाभावाप्र
युक्तप्रागभावप्रतियोगित्वरूपस्य निवेशनीयतया तस्य च प्रागभावाप्रतियोगीश्वरज्ञानव्यावृत्तत्वात्। यद्वा उभ
यमतसिद्धत्वं प्रमितिविशेषणं तच्च नैयायिकासिद्धशब्दादिपदार्थान्तरप्रमितिव्यावर्तकमिति तद्घटितभेदप्र
तियोगितावच्छेदकस्य न धर्मान्तरसमनैयत्यं एवं च वेदार्थगोचरयोगजधर्मजन्यप्रमितेस्तन्मूलकोपनीतेर्भान
स्य वा व्यावृत्तिः नच योगजधर्माधीनप्रमितेर्योगविधुपदेशकशब्दप्रयोज्यतयोभयमतसिद्धत्वविशेषणाभावे
णापि व्यावृत्तिः संभवतीति वाच्यं जन्यमात्रस्यैवादृष्टजन्यतया दृष्टे च प्रवर्तकविधिवाक्यार्थस्यापि जन्यप्रमि
तिमात्रस्यैव शब्दप्रयोज्यत्वमिति सदृष्टद्वारकोपजीवकत्वस्यैव निवेशनीयतया योगाधीनप्रमितेरुक्त
विशेषणं विना व्यावृत्त्यसंभवात् एवं स्वर्गादिपदार्थघटकदुःखासंभेदसुखादीनां विशिष्टं खलु वि
षयताशालिज्ञानमूलकमानसविशिष्टविषयकोपनीतभानं तादृशसाध्यप्रसिद्ध्यादिमूलकानु हेरंब॰ ४७

नेशब्दोपजीवित्वासत्तेः नच यादृशचक्षुरादिव्यक्त्या शब्दजन्यविशेषणज्ञानसहकारेणैव यादृशवाक्यार्थ
ज्ञानं जनितं तादृशचक्षुरादिमात्रगृहीतार्थकतादृशदृष्टार्थकवाक्येतिव्याप्तिर्दुर्वारैवेति वाच्यं तादृश
वाक्यजनकवक्तृवाक्यार्थज्ञानस्यापि शब्दप्रयोज्यत्वेन तस्य शब्दजन्यवाक्यार्थज्ञानाजन्यत्वदलाभावेने
नैवोक्तातिव्याप्त्यभावात् शब्दजन्यपदस्य प्रयोज्यार्थकतया प्रसक्तस्वरूपवक्तृवाक्यार्थज्ञानस्य शब्दाजन्य
त्वेपि शब्दाधीनविशेषणज्ञानजन्यत्वेन शब्दप्रयोज्यत्वात् चैत्रः शब्दायतद्वाक्ये शब्दघटितवाक्यार्थबो
धकवाक्ये वाक्यार्थप्रसक्तजन्यत्वेपि तद्दलाभावादेव नातिव्याप्तिः ननु ससंताभावात् शब्दरूपविशेषणज्ञानं
विना तादृशवाक्यार्थज्ञानासंभवेन प्रमाणमात्रेण तादृशवाक्यार्थप्रमितिजनने शब्दस्य सहकारित्वपा
तादृशवाक्यार्थस्य शब्दोपजीविप्रमाणमात्रग्राह्यत्वेन तद्दलसत्वात्। परन्तु शब्दजन्यवाक्यार्थज्ञानोपजीवि
त्वस्य शब्दोपजीवीसनेन विवक्षणात् तादृशवाक्ये नातिव्याप्तिः नच चैत्रवाक्याद्यमर्थो ज्ञातस्तदादिशब्द
जन्यवाक्यार्थघटितार्थकवाक्येतिव्याप्तिरिति वाच्यं चैत्रवाक्यजन्यार्थबोधं विनापि अन्यत्र चैत्रवाक्यज

कौ॰ विषयकशाब्दादिज्ञानविशकलिततत्तत्सदार्थविषयतायाअप्रामाण्येकतयालौकिकप्रमाणजन्यज्ञानीयसुख
८५ दुःखासंभेदादिनिरूपितविशृंखलविषयतायावेदजन्यज्ञानेऽभावात् अन्यथाशब्दानुपजीविप्रमितिशब्दज
न्यज्ञानयोः समानप्रकारकत्वस्यवैपरीत्ये नतिवेशपसेप्यनिस्ताशात् नच स्वर्गकामोयजेतेत्यादिवेदवाक्येना
पितासर्वप्रमोणस्वर्गादिपदलक्षणोपस्थितौदनादिघटितौदनादिकामकार्यत्वविशिष्टयागादिरूप
लौकिकप्रमाणग्राह्यार्थाद्वेदेपिशब्दानुपजीविप्रमितिविषयार्थकान्यत्वंदुर्घटमितिवाच्यं· तादृशप्रमि
र॰ तिसमानाकारप्रतीतिपरत्वस्यैवनिवेशनीयतयातात्पर्यप्रमाधीनबोधमादायानुपपत्तिविरहात् तादृ
शप्रमितिसमानाकारप्रतीतिपदेनचतादृशप्रमितेर्य्यविषयतानवच्छिन्नविशिष्टप्रतीतिविषयकेच्छयोच्चरितत्वे
न लौकिकवाक्यार्थविषयकसमूहालंबनवेदार्थबोधस्यतात्पर्यविषयत्वेपि न दोषः नचैवंनिरुक्तात्प
र्यकलौकिकवाक्येतिव्याप्तिः प्रमाणशब्दत्वरूपविशेष्यदलस्यसत्तात्पर्यकश्रवणेतत्तद्रूपतयातद्विरहेणाति
व्याप्तिविरहात् नचैवंनिरुक्ततात्पर्यकेम्लेच्छोच्चरितवेदनैयायिकनयेऽव्याप्तिः तादृशशब्दजातीयत्वस्यतत्स हेरंब॰ ८५
शौ १

मानानुपूर्वीकत्वरूपस्यविवक्षितत्वेनतत्संग्रहाद्व्याप्त्यभावात्॥ नचैवमलौकिकवेदार्थमात्रपदंलाक्षणिकपद
घटितमोदनकामः पचेतेत्यादिवाक्यमादायतादृशवाक्यसामान्येऽतिव्याप्तिरितिवाच्यं· तस्यशब्दजन्यवाक्या
र्थज्ञानजन्यतयावेदसमानार्थकत्वस्मृतिविरहात् खेदसमार्थकवेदविपरीतानुपूर्वीकश्रुतकादिवाक्यवार
णायनिवेशनीयेनादृष्टजनकाध्ययनकर्मत्वविशेषणेनापितद्वारणसंभवाच्च· नचैवंतादृशविशेषणे
नैवदृष्टार्थकास्मदादिवाक्यवारणसंभवेनससंतत्वंव्यर्थमितिवाच्यं दृष्टार्थकभारतपुराणान्तर्गतदृष्टार्थ
कवाक्यवारकतयातस्यसार्थकत्वात्° भारताद्यध्ययनस्यविधिबोधितत्वेनादृष्टजनकतयोक्तविशेषण
स्यतत्राधारणेनतेनतद्वारणासंभवात् अथदृष्टार्थकेआयुर्वेदेऽव्याप्तिस्तत्रससंतत्वविरहादितिचेन्न
तस्यमीमांसकैर्वेदत्वानभ्युपगमेनोभयमतसिद्धवेदस्यैवचलक्ष्यतयातत्राव्याप्तेरनवकाशात् पूर्वदृष्टा
र्थकांत्रीणामपिलक्ष्यतानंगीकारात् तत्राप्यव्याप्तिराशंक्या वेदसमानार्थकत्वस्मृतिभारतादिवाक्येतिव्या
प्तिश्च शब्दजन्यसादृश्यविशेष्यदलेनवारणीया॥ तत्र शब्दजन्यत्वंशब्दप्रयोज्यत्वंतेनवेदप्रयोज्यस्मृत्सा

श्या॰ टी॰ ॰दिरूपवाक्यार्थज्ञानजन्यत्वस्याहेतो नातिव्याप्तिः अन्यथा पूर्वोक्तदोषस्याऽपिवारणासंभवाच्च· यद्यपि न्यायमते
८६ जन्यवाक्यार्थज्ञानाजन्यत्वनिवेशेनैव सामंजस्यं अस्मदादुच्चरितवेदस्यास्मदादिवाक्यार्थज्ञानजन्य
त्वेपि जन्यज्ञानाजन्येश्वरोच्चरितवेदाजातीयत्वमादायलक्षणसमन्वयात्· शब्दादिदार्थप्रतीसाधस्म
रु दादेर्वारणासंभवात्तत्संग्रहाय वाक्यार्थज्ञानशाब्दजन्यत्वनिवेशेपि तादृशवाक्यार्थज्ञानाजन्यजा
तीयत्वस्यनिवेशस्यावश्यकत्वात्· तथापि मीमांसकमते ज्ञानेजन्यत्वस्याव्यावर्त्तकतयाजन्यवाक्या
र्थज्ञानजन्यत्वस्याभावप्रतियोगितानवच्छेदकत्वेनतादवच्छिन्नभेदरूपस्यतादृशवाक्यार्थज्ञानाज
न्यत्वस्याप्रसिद्धिरितिज्ञाने शब्दजन्यत्वेविशेषणं॥ नच शब्दजन्यत्वंपदिशब्दप्रयोज्यत्वंतदाजन्यत्व
वत्तदपि परमते ज्ञानेऽव्यावर्त्तकं अदृष्टजनकप्रवृत्तिजनकविधिवाक्यस्यज्ञानमात्र एव प्रयोज
कत्वात्कामीनपुरुषांतरीदिति वाच्यं· अदृष्टाद्वारकाशब्दप्रयोज्यत्वस्यैव निवेशनीयत्वात्· श
ब्दाप्रयोज्यत्वस्य शब्दप्रयोज्यज्ञानमात्राजन्यत्वस्यवाविशेषणत्वेस्वध्वंसरूपकालोपाधिद्वाराईश्व हेरवं॰ ८६

मितिश्चोभयवादिसिद्धत्वविशेषणेनैनव्यावर्त्तनेप्रमेयत्वादिसामान्यलक्षणाजन्यपदार्थगोचरप्रमितेरुभय
सिद्धत्वविशेषणेनवारणेपिस्वजन्यज्ञानसमानाकारकत्वंप्रमितिविशेषणमुपादेयं अन्यथायागादेर्दिशकलि
तदुःखासंभवेदसुखादेश्चशब्दानुपजीविप्रमितिविषयतयाऽसंभवापत्तेः।स्वजन्यज्ञानसमानाकारकत्वं
च स्वजन्यज्ञानीयविषयिताविषयत्वमेवएतस्यप्रमितिविशेषणत्वेचस्वजन्यज्ञानसमानाकारशब्दानुपजी
विप्रमितिकत्वमेव भेदप्रतियोगितावच्छेदकतयानिवेश्यं नतुतादृशप्रमितिविषयबोधकत्वरूपतादृशप्र
मितिविषयार्थकत्वपर्यंतं प्रयोजनाभावात्· वस्तुतस्तु स्वजन्यज्ञानसमानाकारकत्वेनप्रमितिर्नविशेष्या अ
पितुतादृशप्रमितिविषयबोधकत्वं तदेवतादृशप्रमितिविषयबोधकत्वंतदेवतादृशप्रमितिविषयार्थकत्वंता
दृशप्रमितिविषयबोधकत्वंतदेवतादृशप्रमितिनिरूपितविषयताशालिबोधजनकत्वरूपं निवेश्यं लौ
किकार्थगोचरप्रमितेर्येच्छब्दजन्यज्ञानीयविषयतावत्वरूपंतादृशज्ञानसमानाकारत्वंतच्छब्दस्यैव
चतादृशप्रमितिनिरूपितविषयताशालिबोधजनकत्वमितिवेदस्यातथात्वेनसामंजस्यात्· विशिष्ट
८१

न्या॰ कौ॰ ४९ र्थातिरिक्तपदार्थरूपाया न्यायमतेऽप्रसिद्धेः ४ एकवर्णनिष्ठापरवर्णध्वंसकालीनत्वात्मकक्रमरूपा
याः परमतेऽप्रसिद्धेर्विशेष्यनिवेशोऽसंभव इति वाच्यं। उभयानुगमकप्रसिद्धरूपस्यापि एकनिष्ठापरवर
र्णध्वंसकालीनत्वात्मकत्वशब्दवृत्तित्वोभयाभावत्वादिरूपस्य कथंचिन्निर्वचनसंभवेन तेन रू
पेणैवाद्धि विधानुपूर्वीनिवेशात्। यत्तु तादृशवाक्यार्थज्ञानजन्यत्वमपि नैयायिकसिद्धभिन्नत्वविवक्ष
णान्न दोष इति तत्र जन्यज्ञानजन्यतया नैयायिकमतसिद्धभिन्नत्वनिवेशने नैवानतिप्रसंगे विशे
षणांतरवैयर्थ्यात् न च विशेषणांतरपरित्यागे जन्यत्वस्य ज्ञानेऽव्यावर्त्तकतया प्रसंग इति विशेषणां
तरोपादानमावश्यकमिति वाच्यं। ज्ञाने जन्यत्वस्याव्यावर्त्तकत्वेऽपि नैयायिकसिद्धौ ज्ञानजन्य
त्वप्रकारिकायामपि जन्यज्ञानजन्यत्वत्वावच्छिन्नप्रकारकत्वासत्वेन तदवच्छिन्नप्रकारकनैयायि
कसिद्धिविषयत्वस्य लघुतदेकदेशसमनियतत्वासंभवेन तदवच्छिन्नप्रतियोगिताकभेदस्य सि
द्धिसंभवात्। अथोक्तविशेषणेन वाक्यार्थज्ञानाधीनं यदुच्चारणं तादृशस्य सादिवारणेऽपि वाक्यार्थम हेरंब॰ ४९

ज्ञानाधीनोच्चारणयेन केनचिदुच्चारितस्य सादावतिव्याप्तिः तादृशवाक्यार्थज्ञानजन्यत्वस्यानुपूर्वीमत्व
निवेशनेऽसंभवः वेदवाक्यनिष्ठानुपूर्वीविशेषावच्छिन्नानां केषांचिद्वाक्यानां शब्दजन्यवाक्यार्थज्ञान
ता॰ जन्यत्वेन तदानुपूर्व्याः तादृशवाक्यार्थज्ञानजन्यावृत्तित्वानुपपत्तेरिति चेन्न यादृशानुपूर्वीमदद्वितीयके
वाक्यार्थज्ञानजन्यत्वं तादृश्यानुपूर्वीमत्त्वविवक्षया सामंजस्यात् मीमांसकमते वेदानुपूर्वीमद्वाक्य
कोरभावात्। न्यायमते वादिवेदव्यक्तीनां जन्यज्ञानाजन्यतयास्मत्साध्यानुपूर्व्या एव तादृशपदेनो
पादानसंभवात्। वाक्यार्थज्ञानजन्यत्वं च तज्जन्योच्चारणकत्वादिरूपं बोध्यमिति दिक्। पौरुषेयत्वं
च सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं अत्र निष्ठार्थो न विवक्षितः सजातीयत्वं च न भेद
गर्भं विवक्षितं तथा च सजातीयोच्चारणानपेक्षोच्चारणजन्यवृत्तिजातिमत्वे पर्यवसितं। यथाश्रुते
त्वस्मदादेर्वेदोच्चारणस्य सजातीयोच्चारणापेक्षत्वेन तादृशोच्चारणानपेक्षोच्चारणं माद्यं
वेदोच्चारणमेव तज्जन्यवृत्तिजातिमत्स्याघवदेऽसंभवेनाव्याप्त्यापत्तेरिति प्राहुः। सं च स्फुट पौरुषेयत्वा

वे॰

न्या॰कौ॰ नुमाने वेदत्वावच्छिन्नस्य नपक्षत्वे वेदत्वस्यानुगतस्य दुर्वचत्वात् किंतु स्वर्गकामो यजेतेत्यादिवाक्यविशेष
७८ स्यैव पक्षत्वं तावतैवेश्वरासिद्धेः नचैवं सर्ववेदकर्तृकत्वमीश्वरे न सिध्यतीति वाच्यं तत्तद्वाक्यविशेषकर्तृक
त्वानुमाने एकत्र क्लृप्तस्यैव कर्तुर्लाघवेनापरत्रापि कर्तृत्वकल्पनया सर्वासु श्रुतिषु एककर्तृकत्व
सिद्ध्या सकलवेदकर्तृत्वसिद्धेः नच एकस्या ऋचः पक्षत्वे ऋगन्तरेषु हेतौ संदिग्धव्यभिचारकत्वा
वो पत्तिरिति वाच्यं ॥ क्षितिपक्षकोपसाधकसकर्तृकत्वानुमानेऽङ्कुरादिषु संदिग्धव्यभिचारकत्वा
पत्तेः ॥ नच पक्षपक्षसमेव व्यभिचारो न दोषायेति न तत्र संदिग्धव्यभिचारकत्वे दोष इति वाच्यं प्रकृ
तेपि तुल्यत्वात् पश्चात् त्रैवर्णिकसाधारणधर्मजनकाभावप्रतियोग्यध्ययनविषयत्वरूपेण
३ वे वेदत्वेन सर्ववेदपक्षकमेवोक्तानुमानं वेदाध्ययनसामान्याभावस्य च पापजनकत्वेन तस्याः सा
मान्याभावव्यक्तेरेकस्याः प्रतियोगि षडङ्गमात्राध्ययनमतोऽनेन रूपेण सर्ववेदसंग्रहः नच हेरंकौ॰
वेदत्वज्ञाने वेदाध्ययनाभावे पापजनकत्वबोधः वेदाध्ययनाभावे पापजनकत्वबोधे च वेद ७८

रोच्चरितत्वेदेपि शब्दानां तस्य प्रयोजकत्वात् तत्कालीनपुरुषान्तरीयशब्दप्रयोज्यज्ञानस्य कालोपाधिविध
याजनकत्वात् तत्रासंभव इति वाक्यार्थज्ञानोत्पादनं तादृशज्ञानाजन्यत्वं च यथाश्रुतेप्युपपि व्यावर्तस्य
साधव्यावर्तकं परमते तेषां वर्णमात्रस्यैव रिसतया वाक्यार्थज्ञानाजन्यत्वात् तथापि तादृशज्ञाना
जन्यत्वं तादृशज्ञानाजन्योच्चारणकत्वं परमते पित्रादिकोच्चारणस्य कंठाद्यभिघातरूपस्य वाक्यार्थ
ज्ञानजन्यत्वप्रसक्तादृष्टाद्वत्त्वेरुक्तविशेषणे न संभवात्तन्नव तादृशोच्चारणकत्वं तादृशोच्चारणज
न्यत्वं तादृशोच्चारणध्वंसत्वं वा प्रथमे परमते वेदेऽसिद्धिः द्वितीये न्यायमते सदोषः नन्मते उच्चा
रणस्य शब्दजनकस्य शब्दाभिव्यंजकत्वादिति वाच्यं न्यायमतेप्युच्चारणस्य व्यक्तिविशेषसंपादनेनव्यं
जकतया तद्ध्वंसताया एव विवक्षितत्वात् । अथवा तादृशज्ञानजन्यत्वं तादृशज्ञानप्रयोज्यानुपूर्वीक
त्वं प्रयोज्यत्वं जन्यजन्यतावच्छेदकसाधारणं स्वसाधानुपूर्वी न्यायमते तादृशवाक्यार्थज्ञानज
न्यतावच्छेदकतया परमते च तज्जन्यतया तत्प्रयोज्यत्वसंभवाहृतमिति न स्फुलतावतिप्रसंगः नचाप्त्वर

ना.कौ. घस्वयंस्फुटत्वस्यास्मदाद्यननुभूतजन्मत्वरूपतयाऽविरोधात्· नचतथापिशब्दस्यानित्यतयावेदस्यानादेर्जन्य
४९ त्वघटितं निरुक्तपौरुषेयत्वं न संभवतीतिवाच्यं· उत्पन्नोगकारः विनष्टोगकार इत्यादिप्रतीत्यासिद्धस्यानित्यतया
तत्समूहस्य वेदस्य सुतरामनित्यत्वात् अत्र मीमांसकाः लाघवात् ककारादयो वर्णा नित्या एकैका एव। उत्पत्ति
विनाशवत्त्वस्य च प्रागनुपलभ्यमानत्वप्रागुपलब्धानुपलभ्यमानत्वरूपदोषाक्रम एव। नच वर्णानां
नित्यत्वे घटपदत्वादिकं दुर्वचं अव्यवहितोत्तरत्वस्यानित्येऽसंभवादिति वाच्यं यज्ज्ञानानंतरमव्यवधानेनय
ज्ज्ञानं भवति इत्यभिप्रायविषयत्वसंबंधेन घटत्वस्यैव घटपदत्वात्· पुरुषोच्चरिते च घटपदे शिक्षकस्ये ङ.५
प्स्वरस्याभिप्रायमादाय तत्संभवात्· अथ सर्वेषां ककारादीनामेकत्वे तारतारतरमंदमंदतरादिविलक्ष
णप्रत्ययानुपपत्तिः नचैकस्यामेव ककारादिव्यक्तौ तारत्वतारतरत्वमंदत्वमंदतरत्वादिनानाधर्मस्वीकारा
न्नोक्तानुपपत्तिरितिवाच्यं· तारत्वादेरेकव्यक्तिवृत्तित्वेऽजातिरूपतानुपपत्तेः नचत्वन्मतेपितारत्वादे
र्जातित्वमसिद्धं कत्वादिना संकरप्रसंगादितिवाच्यं· कत्वादिव्याप्यनानातारत्वादेरुपगमात्· नचतस्त्वा हे.वं.० ४९

वा.ना.ना.कौ.सा.टि.कं.५

दिकं वैरूप्यत्रविनिगमनाविरह इतिवाच्यं· कत्वादेर्नानात्वे तारमंदसाधारणककाराद्यनुगतप्रत्ययानुपप
त्तेरिति चेन्न तारत्वादेः कत्वादिव्याप्यनानाजातित्वेककारादिसाधारणतारकारानुगतप्रत्ययानुपपत्तेः
३ मानचतदसिद्धिः अनुभवापलापात्· नचनानातारत्वादेः स्वाश्रयसजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकश
ब्दवृत्तिजातित्वादिनानुगमात्ताराद्याकारानुगतप्रत्ययोपपत्तिरितिवाच्यं तादृशप्रतिबंधकतावच्छेदकत्वा
द्यनुपस्थितावपि तादृशानुगतप्रत्ययोत्पत्तेः एतस्यापि स्वत्वघटितत्वेनाननुगतत्वाच्च· तस्मान्नारत्वतार
तरत्वादिकमनुगतत्वान्न लाघवाच्च ककारस्य कारादिसाधारणमखंडोपाधिः तच्च सर्वमेकस्यामेव कका
रादिव्यक्तौ वर्त्तत इति न तादृशप्रत्ययानुपपत्तिः अथवा तारत्वतारतरत्वादिकं वायुनिष्ठैव जातिः तच्च दो
षविशेषवशात् शब्दनिष्ठत्वेनाभासते दर्पणनिष्ठतया मुखत्वादिरिव· तथापि ताराद्युत्पत्तिनिष्पमार्थवायु
निष्ठत्वेऽलसस्यापस्यावश्यकत्वेन पातस्यैवलाघवेन तारत्वतारतरत्वादिरूपतायानुचितत्वात् नचतस्यवा
युधर्मत्वे श्रोत्रेन्द्रियेण कथं तद्ग्रहः कर्णशष्कुल्यवच्छिन्नत्वगिन्द्रियोपनीतस्य श्रोत्रेण भानाभ्युपगमात्।

न्या॰ कौ॰ तारत्वेऽस्य शाब्दीसमनुव्यवसायापत्तिः तारत्वेऽस्य शाब्दीसमनुव्यवसायानुपपत्तिश्चेति वाच्यं । वायुनिष्ठधर्मान्तर
५० स्य श्रोत्रायोग्यत्वेऽपि तारत्वादेस्तद्योग्यतास्वीकारात् । योग्यतायाः फलबलकल्प्यत्वात् । न च श्रोत्रेण वायु
निष्ठतारत्वादिग्रहस्याभ्युपगमे श्रोत्रसंयुक्तसमवायातिरिक्तप्रत्यासत्तिकल्पनापत्तिरिति वाच्यं । अप्रत्या
सन्नस्यैव तारत्वादेः श्रोत्रेणाग्रहात् वक्ष्यमाणक्रमेण विलक्षणवायुसंयोगस्य तारत्वादिव्यंजकत्वे वातिप्रसं
गविरहात् । ननु तथापि ककारगकारादीनां निखिलककाराद्येकसाक्षात्कारदशायां गकारादिसर्वोद्
साक्षात्कारापत्तिः सर्वेषामेव शब्दानां सर्वदा कर्णशष्कुल्यवच्छेदेन सत्वादिति चेन्न । न्यायनयेऽपि वर्णा
नां प्रतिनियतजनकजन्यत्वाभ्युपगमे नैककाराद्युत्पादकविलक्षणवायुसंयोगस्यैव अस्मन्मतेऽपि वर्णानां प्र
तिनियतव्यंजकव्यंग्यत्वाभ्युपगमेन ककारादिसाक्षात्कारजनकत्वस्य तद्विरहादेव युगपदेव सर्वशब्दो
पलब्ध्यसंभवात् । कण्ठाद्यभिघातश्च तत्र विलक्षणवायुक्रियासंपादकतयोपयुज्यते । ननु न्यायनयेऽपि साव
च्छेदकतासंबंधेन ककाराद्युत्पत्तिस्तत्र समवायसंबंधेन विलक्षणवायुसंयोगत्वेन सामानाधिकरण्य हरेखं° ५०

ध्ययेनाभावेऽपि प्रयोजनकत्वबोधे च वेदत्वज्ञानमित्यन्योन्याश्रय इति वाच्यं न तत्र हि नैतादृशवेदत्वमादाय वे
दाध्ययनाभावे ज्ञानप्रयोजकं किं त्वदृष्टजनकेश्वरवाक्यत्वरूपवेदत्वमादाय ईश्वरानङ्गीकर्तृमी
मांसकमतेऽनिसानुपूर्वीकवाक्यत्वरूपवेदत्वमादाय तेऽन्योन्याश्रयाभावात् । न चैवं तेन रूपेणै
व वेदस्य कथं न पक्षत्वमिति वाच्यं । उक्तरूपयोः प्रत्येकसाधारण्येऽपि उभयसाधारण्याभावात् । उभयमत
साधारणपक्षतावच्छेदकावच्छिन्नस्यैव विवादविषयत्वात् उभयमतसाधारणपक्षतावच्छेदकं विना
दवच्छिन्ने विप्रतिपत्तिरसंभवाच्च शेषं पूर्ववदित्याहुः ॥ अन्ये तु वेदत्वे न परिभाषितत्वं अभियुक्तानां
परिभाषाविशेषरूपसंकेतसंबंधेन वेदपदवत्त्वपर्यवसितं वेदत्वं अथवाऽखंडोपाधिविशेषरूपं वा
वेदत्वमुक्तानुमाने पक्षतावच्छेदकमिति वदन्तीति संक्षेपः ॥ अधिकमस्मत्कृतेश्वरवादे द्रष्टव्यं । न च
वेदस्य पौरुषेयत्वे स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुरा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न का
रका इति स्मृतिविरोध इति वाच्यं । श्रुतिस्मृतिसौविरोधे हेतुः श्रुतिरेव गरीयसीति न्यायेन स्मृतिप्रतिपा

स्फो० दकसंयोगजन्यतावच्छेदकजातेर्नानात्वापत्तेः अपितु वायुनिष्ठमेवेति चेन्न ममापि तत्तद्वायुसंयोगानां शरीर
५२ निष्ठतया ककारादिसाक्षात्कारहेतुत्वात्‌ न चैवं हस्तलाघवच्छेदेन विलक्षणवायोः संयोगस्य सत्वेपि ककारादि
साक्षात्कारापत्तिरिति वाच्यं करणावच्छिन्नविलक्षणवायुसंयोगत्वेन हेतुत्वात्‌ पुरुषांतरीयकरणे न पुरुषां
तरीयशरीरनिष्ठसंयोगावच्छेदकः विलक्षणवायुसंयोगस्य फलबलकल्प्यतया ककारादिसाक्षात्कारदशा
यामेव तस्य शरीरे सत्वेन हस्तलाघवच्छिन्नसंयोगस्य हेतुत्वेपि क्षतिविरहाच्च इत्थं च श्रोत्रसमवायादेरपि न
प्रत्यासत्तित्वं तत्तद्विलक्षणवायुसंयोगानां बोधकत्वस्यावश्यकतयैवानतिप्रसंगात्‌ न च तथापि न्यायन
ये विलक्षणवायुसंयोगानां कत्वादिकमेव समवाये न कार्यतावच्छेदकं भवन्मते च ककारादिविषयक
साक्षात्कारत्वमिति महागौरवं न्यायनये ऽनंतककारादिकल्पनं तत्तत्पुरुषीयशब्दसाक्षात्कारं प्रति तत्त
त्पुरुषीयश्रोत्रसमवायादेर्हेतुत्वकल्पनं च फलमुखमिति वाच्यं व्यक्तिकल्पनास्थले फलमुखगौरव हेर.ब०
स्यापि दोषत्वात्‌ ममापि लौकिकविषयतासंबंधेन ककारादिव्यक्तेरेकैकत्वपा ककारादित्वाद्यो विशेषा ५२

त्वं न च तथापि लौकिकविषयत्वस्य स्वरूपसंबंधात्मकस्याननुगततया कार्यतावच्छेदकतानियामकसंबं
धत्वे गौरवमिति वाच्यं समवायवत्‌ लौकिकविषयत्वस्याप्येकत्वात्‌ तत्वापि समवायस्यैकत्वे न समवाय
संबंधावच्छिन्नाधारत्वस्यैव प्रतिव्यक्तिभिन्नतया स्वरूपसंबंधात्मकस्य कार्यतावच्छेदकतानियामकसं
बंधत्वेनाननुगमगौरवस्य सत्वाच्च न च तथापि नवकत्वादिरूपेण कादिव्यक्तिरवच्छेदिका न्यायनये तु स्वरूप
तः कत्वादिव्यक्तिरिति लाघवमिति वाच्यं ममापि स्वरूपतः कादिव्यक्तेरवच्छेदकत्वात्‌ न च जात्यतिरिक्तपदार्थ
स्य किंचिद्धर्मप्रकारेणैव भानमिति कथं कादिव्यक्तेः स्वरूपतोवच्छेदकमिति वाच्यं कादिव्यक्तेः स्वरूपतोव
च्छेदकत्वेपि कार्यकारणभावग्रहे कत्वादिरूपेण भानात्‌ न हि जात्यतिरिक्तपदार्थस्य केचिद्रूपेण भा
नं यतः केवलरूपेणावच्छेदकत्वमिसंपिनियमोस्ति मानाभावात्‌ अथ तथापि तव लौकिकविषयतया
कव्यक्तेरेवावच्छेदिका लौकिकविषयतया कत्वे च सत्रविनिगमकाभावात्‌ कार्यकारणभावद्वयाप
त्तिः न च कत्वस्यावच्छेदकत्वेपि विलक्षणवायुसंयोगाभावदशायां ककारसाक्षात्कारापत्त्या ककारस्य

द्वि

न्या० कौ० कैरवच्छेदकत्वावश्यकत्वमेवानिगमकमिति वाच्यं एवं सति विलक्षणवायुसंयोगाभावदशायां कत्वसाक्षात्का
५२ रापत्तौ कत्वस्यावच्छेदकत्वावश्यकत्वादिति चेन्न ककाराविषयककत्वसाक्षात्कारस्यालीकतया क
त्वसाक्षात्कारसामग्रीविरहादेव तदानीं कत्वसाक्षात्कारासंभवेन कत्वस्यानवच्छेदकत्वात् कोलाहलस्थ
ले कत्वाविषयकस्यापि साक्षात्कारस्य सत्वेन कव्यक्तेरवच्छेदकत्वस्य चावश्यकत्वादिति चेदं तत्तदसत्
वर्णानां प्रतिनियतव्यंजकवायोः एकावच्छेदेन समानदेशत्वे सति समानेंद्रियग्राह्यत्वात् घटे कत्वपरि
माणवदित्यनुमानेन वर्णानां प्रतिनियतव्यंजकसंयोगत्वाभावसिद्धौ ककारगकारादीनां नित्यत्वे कका
राद्येकसाक्षात्कारदशायां गकारादिसर्वशब्दसाक्षात्कारापत्तेर्महलोपि दुरुद्धरत्वात् ननु वर्णानां प्रति
नियतव्यंजकसंयोगाः एकावच्छेदेन समानदेशत्वे सति समानेंद्रियग्राह्यत्वात् घटैकत्वपरिमाणवत्
इत्यत्र किं नाम प्रतिनियतव्यंजकसंयोगत्वेन तावत् तद्विषयकसाक्षात्काराजनकजन्यसाक्षात्कारविष
यत्वं तथा सति तथाविधविषयत्वाभावस्य प्रकृते साध्यतायां घटैकत्वे घटत्वस्यैकपृथक्त्वविषयकसा हर० द० ५२

प्रत्यासत्ता वायुसंयोगानां ककारादिहेतुत्वमते न कर्णेतरे ककाराद्युत्पत्तिः तत्पुरुषीयशब्दलौकिकसाक्षा
त्कारं प्रति तत्पुरुषीयकर्णावच्छिन्नश्रोत्रसमवायस्यावच्छिन्नतासंबंधेन तत्पुरुषीयकर्णस्यैव विषयनिष्ठ
तया हेतुत्वमते न तत्पुरुषीयकर्णावच्छेदेनोत्पन्नशब्दस्य पुरुषान्तरेण ग्रहणं भवन्मते च तत्तद्विलक्ष
णवायुसंयोगानां ककारादिसाक्षात्कारं प्रति कया प्रत्यासत्त्या हेतुत्वं अव्यवहितपूर्ववर्तितामात्रेण हेतुत्वे
युगपत्सर्वशब्दोपलब्धेर्दुर्वारत्वात् सर्वदैवावश्यं यत्किंचित्कर्णावच्छेदेन तत्तद्विलक्षणवायुसंयोगसं
त्वात् कर्णस्य तत्तदनवच्छेदकतया यत्कर्णावच्छेदेन ककारादिसाक्षात्कारस्तत्र विलक्षणवायुसंयोग इति
क्रमेण हेतुत्वासंभवात् न च स्वीयकर्णावच्छिन्न विलक्षणवायुसंयोगस्य फलबलकल्प्यतया ककारा
दिसाक्षात्कारदशायामेव तत्स्यात्मनि सत्त्वान्नातिप्रसंग इति वाच्यं आत्मनो विभुत्वादेकस्य पुरुषस्य कर्णा
वच्छेदेन विलक्षणवायोः संयोगदशायां सर्वेषामेव पुरुषाणामात्मनि तदवच्छेदेन विलक्षणवायोः संयो
गस्यावश्यकत्वे नातिप्रसंगतादवस्थ्यात् न हि संयोगानिष्ठवैलक्षण्यं जनकतावच्छेदकं कर्मजन्यतावच्छे

न्या॰ को॰ ॰क्षात्कारजनकवायुसंयोगस्य ककारविषयकसाक्षात्कारस्वरूपयोग्यत्वेपि नमीमांसकनये सिद्धसाधनावका
५३ शः तन्नकथं तन्नये तथाविधस्वरूपयोग्यत्वमितिन्तु नाशंकनीयं । कदाचित् विजातीयसंयोगाभ्यां ककार
खकारविषयकसमूहालंबनजननेन तत्र तथाविधस्वरूपयोग्यत्वसंभवात् एवं च नैयायिकनये वाधवा
रणाय स्वविषयकसाक्षात्कारविषयत्वस्य पक्षतावच्छेदककोटौ निवेशः । अन्यथा एकैकमात्रविषय
कसाक्षात्कारजनकस्य एकैकमात्रविषयकसाक्षात्कारस्वरूपफलानुपधायकतया वाधवारणस्याश वा५
क्यत्वात् । नचैवं सत्यपि उपदर्शितसामान्यव्याप्तौ घटत्वस्यैकपृथक्त्वमादाय निरुक्तहेतुशालिनि घटैक
त्वे व्यभिचारः तत्र एकत्वविषयकसाक्षात्कारानुपधायकीभूतं यत् एकत्वग्रहप्रतिबंधकदोषादिकाली
नएकपृथक्त्वज्ञानरूपकारणं तज्जन्यसाक्षात्कारविषयत्वस्य एकपृथक्त्वे सत्वेन एकपृथक्त्वग्रहप्रति
बंधकदोषादिसमवधानकालीनं यत् एकत्वज्ञानरूपकारणं तज्जन्यसाक्षात्कारविषयत्वस्य एकत्वे सत्वे
नच निरुक्तसाध्यासत्वादिति वाच्यं तत्तत्साक्षात्काराजनके तत्र साक्षात्कारप्रतिबंधकासमवहितत्वस्यापित्ति हेरंब॰ ५३

वेशनीयत्वात् इति तथा च यत् एकावच्छेदेन यत्समानदेशत्वे सति यद्ग्राहकेंद्रियग्राह्यं तत् तद्विषयकसा
क्षात्कारानुपधायकं यत् तद्विषयकसाक्षात्कारप्रतिबंधकासमवहितकारणं तन्निष्ठफलोपधायक
तानिरूपकसाक्षात्कारविषयतत्कत्वे सति तद्विषयकसाक्षात्कारानुपधायकं यत् तद्विषयकसाक्षात्का
रप्रतिबंधकासमवहितकारणं तन्निष्ठफलोपधायकतानिरूपकसाक्षात्कारविषयीभूतं यद्यत्स्वं तत्तद्भे
दकूटवद्भवतीति सामान्यमुखव्याप्तिनिष्कर्षः अत्र तथाविधकारणनिष्ठफलोपधायकतानिरूपकत्व
निवेशात् घटत्वस्यैकपृथक्त्वादिसाक्षात्कारानुपधायकं यदिनरकारणासमवहितात्ममनःसंयो
गादिकं तदीयस्वरूपयोग्यतामादाय तथाविधैकपृथक्त्वादौ निरुक्तपरस्पराव्यंजकव्यंग्यत्व सत्वेपि न
क्षतिः । विभिन्नकालीनपाकजैकघटवृत्तिगंधद्वये एकगंधविषयकसाक्षात्कारानुपधायकापरगंध
साक्षात्कारविषये व्यभिचारवारणाय एकावच्छेदेनेति । स्वावच्छेदककालानवच्छिन्नतत्कं यद्यत्स्वं तद्भे
दकूटवत्त्वस्यार्थकेनातः परनपेशब्दस्य व्याप्यवृत्तित्वेपि हेतुः स्वरूपासिद्धिः केचित्तु व्याप्यवृत्तेरपि

सा॰कौ॰ त्ततीतिबलात्कालावच्छेदेकसाभ्युपगमेस्त्वतिविरहात्॰एकावच्छेदेनैतस्य एककालावच्छिन्नत्वे सतीनियमा
५७ कृतार्थएवसमीचीनत्वपादः।एवंचविभिन्नसंस्थानविशेषव्यंग्ययोर्गोत्वाश्वत्वयोर्व्यभिचारवारणाय
समानदेशत्वेसतीतिविशेषणं॰समाननियताधिकरणत्वार्थकं॰नातएककालावच्छिन्नैरेकश्येनप्रतियो३
शाखासंयोगवृक्षसंयोगयोः श्येनरूपैकदेशवृत्तित्वेपिव्यभिचारः नचैवमपिएककालावच्छिन्नश्ये
नचरणद्यावच्छिन्नश्येनवृक्षसंयोगयोर्व्यभिचारः नत्वपरस्परविषयकसाक्षात्कारावच्छिन्नसंनिकर्षजन्य रा॰तनकपरस्पर
साक्षात्कारविषयत्वेननिरुक्तसाध्यसत्वादितिवाच्यं विभिन्नदेशानवच्छिन्नत्वस्यापिनिवेशनीयत्वात् एवं दृष्टकेदका॰ ५
वंसतिसमनियताधिकरणतार्थकंसमानदेशत्वविशेषणंमर्थंउपदर्शितश्येनप्रतियोगिकशाखावृक्ष
संयोगयोः शाखाद्यवयवकवृक्षावयवरूपपरस्परविभिन्नावच्छेदकावच्छिन्नत्वेनतथाविधानवच्छि
न्नत्वविशेषणेः नैववारणसंभवादितिवाच्यं॰एवमपिघटावधिकघटकुड्यवृत्तिद्वित्वपृथक्त्वपटा
वधिकघटकुड्यवृत्तिद्वित्वपृथक्त्वयोरेककालावच्छिन्नयोः स्वस्वावधिज्ञानव्यंग्ययोर्व्यभिचारवारणायत हेरंब॰

श्री३ ५७

क्षात्काराजनकेमत्तरेकत्वविषयकसाक्षात्कारजनकं एकत्वविषयकतज्ज्ञानंतज्जन्यसाक्षात्कारेविषयत्व
स्यसत्वेनतथाविधसाध्याऽसत्वाद्व्यभिचारइतिचेन्न॰स्वविषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयत
त्वकत्वेसतितद्विषयसाक्षात्काराजनकजन्यसाक्षात्कारविषयीभूतेयद्यत्वंतद्भिन्नत्वस्यप्रकृतानुमाने
साध्यत्वेनानुपपत्त्यभावात्॰स्वपरंभेदप्रतियोगिपरंतथाचयत्॰एकावच्छेदेनयत्समानदेशत्वेसतियद्
ग्राहकेंद्रियग्राह्यंभवतितत्स्वविषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयतत्वकत्वेसतितद्वि
षयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयीभूतंयद्यत्वंतत्तद्भेदकूटवद्भवतीतिसामान्यमुखी
व्याप्तिः अनुमानप्रयोगस्तु खकारविषयकसाक्षात्कारविषयककारः स्वविषयकसाक्षात्काराज
नकजन्यसाक्षात्कारविषयत्वकारकत्वेसतिस्वविषयकसाक्षात्काराजनकजन्यसाक्षात्कारविष
यीभूतंयद्यत्वंतद्भेदकूटवत्॰एकावच्छेदेनस्ववृत्तिसमानदेशत्वेसतिस्वथोग्राहकेंद्रियग्राह्यत्वात्
घटैकत्वपरिमाणवदित्यादिक्रमेणबोध्यः अत्राजनकत्वंफलानुपधानरूपंग्राह्यं अतः खकारविषयकसा

न्या॰ कौ॰ ग्रहे अवधितानस्य हेतुत्वानभ्युपगमेनानुपपत्त्यभावादिति॥ अथ वर्णाः प्रतिनियतव्यंजकव्यंग्याः स्वग्राहकेंद्रि
५५ याग्राह्यलौकिकसाक्षात्कारविषयतदाश्रयकत्वात् घटरसगंधवदिति सत्प्रतिपक्षसत्वान्नोक्तरीत्या वर्णानां
प्रतिनियतव्यंजकव्यंग्यत्वाभावसिद्धिः संभवति पूर्वोक्तदृष्टांतसाध्यस्य प्रतियोग्येवात्र साध्यं पक्षेऽपि पूर्व
वदेवेति न न सत्प्रतिपक्षानुपपत्तिरिति चेन्न समवहालंबनसाक्षात्कारमात्रविषययोर्गंधयोर्व्यभिचारे
ण सत्प्रतिपक्षासंभवात्। वस्तुतस्तु वर्णानामुक्तरीत्या नित्यत्वे घटादीनामपि नित्यत्वापत्तिः तत्राप्ये
कजातीयानां सर्वेषां घटानामेकत्वस्य नित्यत्वस्य च लाघवेनैव कुंशीक्यत्वात्। तत्तदवयवसंयोगादि
रूपप्रतिनियतव्यंजकव्यंग्यत्वस्य तत्राभ्युपगमे नैकघटादिसाक्षात्कारदशायां न सकलघटादि
साक्षात्कारापत्तिर्नवा सर्वदोपलंभापत्तिः उत्पादादिप्रत्ययस्यापि शब्दस्येव भ्रमत्वस्य सुवचत्वा
त्। अथ तत्राशत्वे न तत्सामग्रेतनाशत्वेन कार्यकारणभावात् कथा तनाशेन घटनाशस्य दुर्वारतया
घटस्य नित्यत्वासंभवः न च जातादिनाशवारणाय स्वप्रतियोगिजन्यत्वस्य नाशकतावच्छेदकसंबंध हे॰ बृ॰ ५५

तया घटादेर्नित्यत्वे स्वप्रतियोगिजन्यत्वविरहादेव तन्नाशादितिवाच्यं लाघवात् स्वप्रतियोगिसमवेतत्वस्यैव ना
शकतावच्छेदकसंबंधत्वात्। अनंतघटादिकल्पनागौरवस्य च फलमुखत्वेनादोषत्वात् सत्वेन ध्वंसत्वेन ना
शस्य नाशकभावांतरादेव जातादेरविनाशोपपत्तेः। अनंतस्यत्वे स्वप्रतियोगिजन्यत्वस्य नाशकतावच्छे
दकसंबंधत्वकल्पनामपेक्ष्यातिरिक्तैकनाश्यनाशकभावकल्पनायां लघुत्वादिति चेन्न। व्यक्तिकल्पनास्थलेऽपि फ
लमुखगौरवस्यापि दोषत्वात्। तुल्यपुस्त्या कपालकपालिकादेरपि नित्यत्वस्य सुवचतया तन्नाशेन घटादिना
शापत्त्यसंभवाच्च। किंचैवमपि सुरवादीनां नित्यत्वे कत्वयोरापत्तिर्दुर्वारा तत्समवायिनो नित्यतयोक्तरीत्या
तन्नाशापत्त्यसंभवादिति दिक्। तस्माद्वर्णानामनित्यत्वे सिद्धे वेदनित्यत्वं च रमस्त एव निहितः कुठारः। अथ मा
स्तु ध्वंसाप्रतियोगित्वरूपं नित्यत्वं वेदस्य तथापि परतंत्रपुरुषपरंपराधीनतया प्रवाहावच्छेदरूपेणि
त्यत्वेवाधर्कभावात् एवं च नित्यत्वेन निर्दोषतया च वेदप्रामाण्यसिद्धौ सर्वज्ञ वेदवक्तृरीश्वरे प्रमाणाभा
वेनोक्तरीत्या वेदस्य पौरुषेयत्वासिद्धिरिति चेन्न स्मसाचारानुमित वेदानामुच्छेददर्शनेन तद्दृष्टांते

व

न्या० कौ० नसर्वे वेदा उच्छिद्यंते वेदत्वात् तस्य साचारानुमितत्ववेदवदित्यनुमानेन सर्ववेदानामुच्छेदे सिद्धे सजातीयध्वंससमव्या
५६ पकप्रागभावप्रतियोगित्वरूपप्रवाहाविच्छेदस्यासंभवात्। स्यादेतत् तस्य साचारानुमितत्ववेदानामुच्छेद एवा
सिद्धस्तेषां नित्यानुमेयत्वात् प्रवाहविच्छेदेपि सर्वदा तुल्यरूपता सा च कालोपाधित्वाव्यापकाध्ययन
विषयत्वानवच्छिन्नत्वं तच्च सर्वदाध्ययनविषये प्रत्यक्षवेदेऽध्ययन[illegible]विरुद्धेपि नित्यानुमे[illegible]
नविषयत्वानवच्छिन्नत्वं पये नित्यानुमेयवेदे चास्ति अनुमानं च विवादपदमपूर्वबोधिकास्मृतिः स्वार्थानुभव
जनकवेदमूला अविगीतमहाजनपरिगृहीतस्मृतित्वात् प्रत्यक्षवेदमूलकस्मृतिवत् अत्र प्रत्यक्षवेदामूल
कस्मृतांशे तः सिद्धसाधनवारणाय विवादपदमिति तदर्थस्तु इदानीं प्रत्यक्षवेदामूलकत्वेपि तत्पुष्पर्य
तेपुत्रामणं दधुर्यथांशतदिति न्यायमूलकस्मृत्यंशेनोवाधवारणाय पूर्वबोधकेति वस्तुतो विवा
२ त्वमुक्त दपदवादिसिद्धान्ततरकोटिकान्यतरं एवं च न्यायमूलकस्मृतेरप्यनेनैव वारणोऽपूर्वबोधकत्वेनेदपदं हेरंब०
मेव हेतावविगीतपदं संक्रान्तौ स्पेर्पेपहतिनो बद्धव्याइत्यादि लोभमूलकस्मृतौ व्यभिचारवारणायत्तच्च ५६

इपादानस्यावश्यकत्वात् न चैवं पक्षधरमिश्रदृशोपदर्शितस्थलमात्रत्ति विरोधः तावता क्षतेरभावात् तत्
कृत्यस्योपलक्षणपरत्वात्। अत्र विभिन्नदेशानवच्छिन्नत्वं स्वावच्छिन्नत्वभिन्नदेशावच्छिन्नत्वोभयसंबंधाव
च्छिन्नप्रतियोगिताकयत्किंचिद्देशाभाववत्त्वं अतो न विभिन्नदेशानवच्छिन्नत्वस्य दुर्वचत्वापत्तिरिति। अत्र प
र्यन्ताव च्छेदकसामानाधिकरण्येनैव साध्यसिद्धेरुद्देश्यत्वान्न नैयायिकनये विभिन्नदेशावच्छिन्नत्वका
र विषयक साक्षात्कारविषयककारे हेतोर्भागासिद्धिः जन्मते समानदेशावच्छिन्नतथाविधवर्णद्वय
मादायैव पक्षे हेतुमत्त्वसंभवादिति। एककालावच्छिन्नयोः किंचिद्देशानवच्छिन्नयोरेक घटवत्तिरस
गंधयोर्व्यभिचारवारणाय समानेंद्रियग्राह्यत्वादिति तं घ्राहवैंद्रियजन्यलौकिकसाक्षात्कारविषयत्व
त्वादित्यर्थः। नातस्तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वप्रत्यक्षं प्रतितत्पुरुषीयापेक्षाबुद्धेर्हेतुत्वेपि क्षतिः न चै
वमपि स्वस्वावधिज्ञानध्वंस्ययोर्ध्र स्वसेकपृथक्त्वदीर्घत्वयोर्व्यभिचार इति वाच्यं हस्तत्वविलक्षिता
दिरूपदीर्घत्वत्वव्याप्यजातिपुरस्कारेण दीर्घत्वग्रहे वधिज्ञानस्य हेतुतया दीर्घत्वादिस्वरूपेणादीर्घत्व

सा॰कौ॰ कल्पने गौरवेण धविधायां असंभवेन द्वितीयविधायामेव पर्यवसानेन मौनिश्लोकादिवैषम्यात्। न च तर्हि तस्या
५७ नुपूर्वीहीनस्य कथं बोधकतासंभवः आनुपूर्वीत्वेन ज्ञानस्य शाब्दबोधसामग्रीघटकत्वात् अन्यथा नदीदीन
जशराजेत्यस्य विशेषेण बोधकतापत्तेरिति वाच्यं। तदर्थज्ञापकत्वेन ज्ञानघटितसामग्र्या एव प्रकृते
शाब्दबोधजनकत्वोपगमेन तस्य तदर्थानुभावकत्वेन ज्ञातादेव वेदात् तदर्थप्रतीतिसंभवे तेन बोधकतासं
भवात् न चैवं तस्य तदर्थबोधकत्वेन वेदानुमितौ तस्य तदर्थस्य विषयतया तद्बोधकवेदस्यानुवादकतापत्
तिरिति वाच्यं। कार्येण कारणानुमाने कारणतावच्छेदकातिरिक्तस्य आद्यज्ञानविषयस्या
पकतावच्छेदकस्य विशेषणत्वेऽपि न विषयत्वमिति तत्सिद्धान्तात् क्रूलमानसप्रसङ्कायोपा
कस्य ज्ञानान्तरोपनीतस्यैव संज्ञिज्ञाने संज्ञायाश्च ज्ञानान्तरोपनीतायाः विशेषणत्वेऽपि न विषयत्वमिति ते
रैणीकारात्। न च विशेषणत्वस्य विषयतात्मकत्वेन विषयत्वाभावे कथं विशेषणत्वमिति वाच्यं।
विशेषणत्वस्य भासमानधर्मताकत्वरूपतया ज्ञानान्तरोपनीतस्य संसर्गतया धर्मित्वभाने तद्विशेषण हेरंब॰ ५७

८४

तस्य ज्ञाने तद्विशिष्टज्ञानं तस्य च संभवात् न च ज्ञानान्तरोपनीतस्य वेदार्थस्यानुमितिविषयत्वे वेदस्यानु
वादकतापत्तिरिति वाच्यं। वेदार्थग्राहकस्य ज्ञानान्तरस्य स्मृतिजन्यतया प्रमाणान्तरत्वान्न प्रमाणान्तरा
भावेऽगृहीतार्थग्राहकत्वरूपानुवादकताभावात्। अथ कदाप्यपठितस्य वेदत्वेन संभवति तत्सत्त्वेऽभिव्य
क्तेः मौनिश्लोकवदभिप्रायाज्ञाततो वर्गमासंभवात् आनुपूर्वीहीनवर्णमात्रस्यैवानिरर्थकत्वात् तदान
२५ चानुपूर्वीसहितस्यैव वेदस्यानुमानान्न दोष इति वाच्यं तस्यानानात्वेन विशिष्टज्ञानासंभवात् इति चे
२६ न्न हस्तकरादिप्रदर्शनानां धूमानलपक्षलशमानेपानय घटमित्यादीनां च प्रत्येकं व्यभिचारेण शाब्दबोधे
पदानां वाक्यानां चानुपूर्वीज्ञानस्याहेतुत्वात्। किंतु तत्तदर्थज्ञापकत्वेन ज्ञानमेव तत्र हेतुः। न च प्रकृ
तेऽप्यस्ति तदर्थमेव वयं च कचिद्वर्णस्वरक्रमविशेषाणामुपयोगः अत एव कुशमानयेत्यादौ शाका
रसंदेहे क्रियानुच्चारणे वा हस्तकरादिसंदेहेऽपि शाब्दबोधः अत एव दृष्टं चास्मत्तत्त्वद्विलिंगमिति श
ब्दात्प्रतीतेन धूमेनालोकेन वा वह्नेरनुमाने न तु तदर्थज्ञापकत्वेन ज्ञानात् पदार्थोपस्थितिमात्रं जनयते

व्या॰ कौ॰ नतु वाक्यार्थबोधः नामत्वविभक्तित्वादिना ज्ञानं विना कोक्षादिज्ञानासंभवेन तदसंभवात् न च तदर्थज्ञापकत्वेन ज्ञा
५८ नहेतुता मते आकांक्षादिज्ञानस्य न तत्र हेतुतेति वाच्यं तथा सति घटः कर्मत्वमानयनं कृतिरित्यादि निराकां
क्षवाक्यादपि घटकर्मत्वानयनकृतिबोधकत्वेन ज्ञानेपि घटमानयेत्यादिवाक्यादिव शाब्दबोधापत्तेः एवं च
कर्मत्वाद्युपस्थापकविभक्त्यादिमद्विशेषत्वादिना ज्ञानं विना तदर्थज्ञापकत्वज्ञानमात्रात्कथं शाब्द
बोधः न चैवं कुशमानयेत्यादौ शकारादिसंदेहे कथं शाब्दबोध इति वाच्यं तत्रापि सामान्यतस्तथाज्ञान
सत्वात् अननुगमेन तत्र द्विभक्त्यादिमद्विशेषज्ञानत्वादिना हेतुत्वासंभवादिति चेन्न घटः कर्मत्वमित्याद्य
न्वयविरोधिपदाजन्योपस्थितित्वादिनैव तत्र हेतुत्वात् एवं च तत्तन्नानापदजन्यपदार्थोपस्थित्या
पत्र शाब्दबोधस्तत्रैवानुपूर्वीज्ञानस्य हेतुतया तत् विनाप्यनुमितवेदात् शाब्दबोधे बाधकाभावः न चा
नुपूर्वीज्ञानघटितसामग्र्या अन्यत्र शाब्दबोधजनकत्वेन क्लृप्तायाः अत्राभावे कथं शाब्दबोध इति वा
च्यं अत्र तदर्थज्ञापकत्वेन ज्ञानघटिताया धर्मिग्राहकमानसिद्धाया विलक्षणसामग्र्या एव शाब्दबो टी॰ ब॰ ५८

प्रमाणपरं प्रागुक्तन्यायमूलकस्मृतेर्व्यभिचारवारणाय महाजनेत्यादि तच्च लौकिकप्रमाणाविषयार्थकं वेद
एव व्यभिचारवारणाय स्मृतीति तच्च स्मृतित्वेन प्रसिद्धार्थकं वस्तुतो मन्वादिप्रणीतत्वमेव स्मृतित्वं एवं च लो
भमूलकस्मृतेर्व्यभिचारवारणाय विगीतेति न दर्यं साध्ये वेदमूलत्वे स्वजन्यानुभवद्वारा वेदाजन्यत्वप
दार्थे ज्ञानादिव्यवहितस्य कुविन्दादेरिव स्मृताववि ज्ञानाद्यव्यवहितस्य वेदस्य जनकत्वान्न बाधसंभाव
ना तादृशजनकत्वं चाज्ञानस्याप्यन संभवतीति पक्षधर्मताबलात् लिप्सानुमेयप्रच्छन्नवेदसिद्धिः अध्य
यनविषयत्वविरहस्यैव सार्वदिकाध्ययनं विषयत्वव्याप्यत्वेन व्यापकाभावाद् ध्येयन विषयत्वस्य तत्रासं
भवात् अथ यथा मौनिनामेकाक्षरादिकं कुचालिप्यादिना ऽन्येभ्यः प्रतिपाद्यते तथेश्वरेणापि स्वाभिप्रायस्या
पि वेदः स्मृतिकर्तृभ्यो मन्वादिभ्यो लिप्यादिना प्रतिपाद्यते ऽनंतरं च ते स्मृतिस्मारर्थप्रनीस स्मृतयः प्रणीयंतः
इति कस्याप्यध्ययनविषयत्वाभावेपि वेदात् स्मृतिप्रणयनं संभवतीति न पक्षधर्मताबलादपि लिप्सानुमेयवे
दसिद्धिः संभवतीति चेन्न वेदस्य उच्चारणाद्यभिव्यक्तानुपूर्वीमत्वलच्छन्नत्वाभ्यां द्विविधतया तत्रानुपूर्वी

त्या कौ॰ गीतशिष्टाचारत्वेन कर्त्तव्यतामनुमाय सा कर्त्तव्यता वेदबोधिताऽलौकिका विगीतशिष्टाचारकर्त्तव्यता ला
दिति वेदानुमानं मंगलमाचरेदित्याद्विशेषाकारेण तु न वेदानुमानं तथा व्याप्त्यभावात् न चास्तु प्रत्य
५९ क्षवेदानुमानं प्रत्यक्षत्वउच्छेदानुपपत्तेः प्रत्यक्षशाखा वा वत्यत्वम् एकाः कार्याः कार्या अष्टकाइत्येवंरूपमे
व वाक्यमनुमेयमिति तत्र नानावेदकल्पने गौरवात् मन्वादिस्मृतिमूलं हि नानेकविधं दृष्टमिति कथमाधु
निकोनेकवेदमनुमिनुयात् न च स्मृत्यर्थबोधको वेदः स्मृतिसत्त्वे एवानुमेयः स्मृतेर्नानाविधत्वा ह्र॰ ५
द॰ तत्तस्य च प्रद्वेषादावनुच्चरितस्यैव वेदत्वं श्रोत्रग्रहणाहंतया शब्दत्वं वाक्यत्वमर्थबोधकत्वादिस
त्त्वस्मृत्याचाराभ्यां चानुमितो वेदार्थबोधफलीति पूर्वपूर्वेणानुमितवेदात्तदुत्तरोत्तरस्मृत्याचारा
विति नो धपरंपरा स्वतंत्रप्रमाणमूलकत्वात् तस्मादिदस्यानित्यानुमेयत्वं नत्वच्छेद इति अत्रोच्यते उ
च्छिन्नवेदार्थप्रतीत्यस्य स्मृत्याचारयोरुपपत्तेः सामर्थ्यं तरकल्पने मानाभावः अतएवाश्रया सिद्धि हेद॰ बं॰
र्नवाबाधः स्मृत्याचारानुमितस्यास्माभिरप्युपगमात् न च तस्मात्कथं बोधः आनुपूर्वी सा हि ५९

सा तत् न च तत्र मानाभावः यदि स वेदा आनुपूर्वीरहितः स्यात्तदाननुभावकः स्यादिति तर्कसहकृतानु
मानस्यैव मानत्वात् एवं च स्मृत्याचारयोर्वेदजन्यानुभवमूलकत्वानुमानादेव पक्षधर्मताबला
त् प्रत्यक्षवेदमूलकत्वसिद्धिः अन्यथानुभावकत्वाभावेन तस्य मूलत्वानुपपत्तेः तस्मात् स्मृत्याचारा
नुमितिर्वेदः प्रत्यक्षाध्ययनविषयः वेदत्वात् संमतवत् उच्छेदस्त्वाधुनिकानामहरहरुपलब्धिप्रमाणश
क्तिकत्वात् स्कलि निंदावाक्याभ्यां च प्रवृत्तिनिवृत्तिपराभ्यां प्रवृत्तिनिवृत्तिहेतुतार्थ एव कल्पते न तु
विधायकनिषेधे च वाक्यं गौरवादुक्तदोषाच्च यत्र चार्थवादादेर्वेदत्वं तत्रार्थावगमस्तत्र न जल्कल्पनापि प
यातरति मृत्युं तरति ब्रह्महत्यां योश्वमेधेन यजत इत्यादौ न च तस्याध्ययनविषयत्वे वहुभिर्मेधाविभि
र्धारणासंभवेन कथमुच्छेद इति वाच्यं एकस्य सकलशाखाध्ययने सामर्थ्याभावात् एकेनैवापरेणापि तदनध्य
यने नगरवोच्छेदसंभवात् शाखात्वस्यैव प्रत्यक्षशाखात्वस्यापि सावैदिकाध्ययनविषयत्वव्याप्यत्वेमाना
भावात् न च सहस्रशाखाविरोधः सार्द्धशतद्वयसंख्यावच्छेद इति वाच्यं अध्ययनाभावस्यैवोच्छेदपदार्थत्वात् अथ

मा० दै० शाखोच्छेदे वर्णपदवाक्येहानिशंकयाप्रत्यक्षवेदादपि वाक्यार्थप्रयोगयोरनिश्चये वैदिकव्यवहारमात्रवि
६० लोपापत्तिरिति चेन्न श्रूयमाणतावेदस्यैव महाजनैः परिग्रहे तन्मूलकानुष्ठानसंभवात् एतेन सर्वज्ञो
च्छिन्नशाखाबोधितांगकतासंदेहेन सर्वत्रानाश्वासप्रसंग इत्यपि निरस्तं संति चानेकशाखाबोधितेतन्त्र
कर्मणि कर्त्तव्यताबोधिका मन्वादिस्मृतयः कालक्रमभाविनमेतादृशमनाश्वासमाशंक्यैव तैस्त
त्स्मृतिप्रणयनात् न च स्मृत्याचारयोर्महाजनपरिग्रहादेव प्रामाण्यमस्तु किं वेदेनेति वाच्यं प्रलये ति ५
स्मृत्याचारयोरुभयोरेवोच्छेदात् सर्गादौ निःसर्वज्ञेश्वरप्रणीतवेदमूलकस्य स्मृत्याचारयोरा
वश्यकत्वात् अन्यथा मूलाभावेनांधपरंपरापातप्रसंगात् मन्वादीनां तदानीं तदीयदर्शित्वं तदु
पायश्रवणाद्यभावात् पूर्वसर्गसिद्धसार्वज्ञ्यकल्पने प्रतिसर्गं तेषां मन्त्राद्यनुकल्पने च गौरवे
कस्यैव नित्यसर्वज्ञस्य कल्पनायां लाघवात् न चेश्वरप्रणीताः स्मृतय एव संत्विति वाच्यं तासां मन्वादिप्रणी
तत्वेन वेदमूलकत्वेन स्मृतित्वेन च स्मृतेः तदुक्तं प्रतिमं चेतरं चैव वेदबाह्यकृतिरन्यापि विधीयत इति अत्र विधानमे हेरंब०
६०

बोधजनकत्वोपगमात् न च क्लृप्तसामग्र्यभावे विविलक्षणसामान्यं तरेण कथं कार्योत्पत्तिरदृष्टगोचरत्वादि
ति वाच्यं। तथा सति तत्र घटादिकार्यकर्त्तुः शरीरापेक्षया जनकत्वस्य दृष्टतया क्षित्यादिकार्येईश्वरस्याश
रीरिणः शरीरापेक्षां विनैव जनकत्वस्यानुपपत्तेः कार्यवैलक्षण्यात् सामग्रीवैलक्षण्याभ्युपगमे
प्रकृतेप्यदोषात् एवं च नित्यानुमेयवेदस्थले वर्णपदविभक्त्यादिविशेषघटितत्वेनाज्ञातस्याखंड
ता स्यवाक्यार्थानुभावकत्वं तत्र यदर्थस्थानीयो वाक्यार्थः अस्तु वा स्वाखंडस्यैव वाक्यार्थानुभावकत्वम
खंडत्वे तस्य क्रमाग्रहाभावात् न च तत्पर्णानुपूर्वीनानात्वात् विशिष्यानिश्चये कथं शाब्दबोध इति वाच्यं
अत्रा विलक्षणा या एव सामग्र्याः स्वीकारात् न च क्लृप्तहेतुं विनात सोनुभावक इति वाच्यं तस्यासि
द्धाश्रयासिद्धेः सिद्धौ तु बाधः तेन विनैव सर्वानुपपत्तिं परिहृत्य धर्मिग्राहकमानेन तदनुभावक
त्वसिद्धेः अतएव स्मृतिभिः दाम्पत्यकल्पितविधिनिषेधकत्वात् तदर्थप्रतीतिः प्रवृत्तिनिवृत्ती अन्यथा वि
धिनिषेधकानां नानाविधत्वेन विशेषानुमानासंभवात् ततोर्थधीः स्यात् एवं मंगलाद्याचारेष्वपि

ना०कौ० पारत्वं प्रवृत्तिजनकज्ञानविषयत्वं पर्यवसन्ने। इत्थं च प्रवर्तनायाः लिङर्थत्वस्य सर्वसंमतत्वात् कृतिसाध्यत्वे बलव
६१ दनिष्टाननुबंधित्वे इष्टसाधनत्वे च लिङर्थः समुद्यायगमनादौ कलंजभक्षणादौ चैत्यवंदनादौ च प्रवृत्त्यनुसरता
तदवच्छिन्नज्ञानस्यैव प्रवर्तकत्वात्। पुष्पवंतादिपदस्य सूर्यचंद्राद्योरिव लिङः प्रत्येकशक्तेरूपगमान्नैकत्र लि
ङस्त्रितयबोधकत्वानुपपत्तिः अथ कृतिसाध्यत्वे लिङो न शक्तिः लाघवेन साध्यतासंबंधेन कृतिप्रकारक
स्यैव प्रवृत्तिजनकतोपगमेनारब्धालत्वेनारब्धत्वसामान्यशक्त्योपस्थापितायाः कृतेः साध्यतासंबंधेन पाकाद्या
वन्वयोपगमेनैवपत्वेति तादृशप्रवृत्तिसंभवात् कृतिसाध्ये तादृशज्ञानाभावेन प्रवृत्त्यसंभवाच्चेति चेन्न। आ
ख्यातत्वस्यैकस्यानुगतस्याभावे न तिङ्त्वस्यादेरेव शक्यतावच्छेदकतया लिङ्त्वावच्छिन्नस्य कृतिसाध्य
त्वत्वावच्छिन्ने एव शक्तिकल्पनात्। न च लिङ्त्वावच्छिन्नस्यापि लाघवात् कृतित्वमेव शक्यतावच्छेदकमास्तामि
ति वाच्यं। यद्यत्रियत्नोपस्थितेर्वृत्तिसाध्यत्वेन यत्तदात् यादृशधर्मप्रकारेण नियतोपस्थितिस्तादृशधर्म
स्यैव तत्पदशक्यतावच्छेदकतया तु भवात्तुरोधेनालिङः कृतिसाध्यत्वत्वावच्छिन्ने शक्तिकल्पने गौरवस्याकिं हेरंबं ६१

चित्कारत्वात्। अन्यथा वेदपदस्वर्गपदादेरपि गुरुधर्मावच्छिन्नशक्तिविलोपापत्तेः पचतीत्यादावाख्यातसामान्यश
क्त्युपस्थाप्यकृतेर्धात्वर्थविशेष्यत्वेनैवान्वयस्य व्युत्पन्नतया पचेतेत्यादौ तस्या धात्वर्थविशेषणतयान्वयासंभ
वान्न च व्युत्पत्तिभेदाश्रयणान्न दोष इति वाच्यं। व्युत्पत्तिभेदस्य शक्तिभेदं विना निर्वाहतया शक्तिभेदस्यावश्यक
त्वे उक्तरीत्या कृतिसाध्यत्वत्वावच्छिन्न एव तदौचित्यात्। अथ मास्तु कृतिसाध्यत्वे लिङः शक्तिः कृतसाध्ये प्रवृत्ति
वारणे तु कृतिसाध्यत्वज्ञानस्य प्रवृत्तिहेतुत्वकल्पनादेव सुलभं। न च प्रवर्तकज्ञानस्य विधिजन्यत्वनियमनिर्वाहा
य लिङस्तत्र शक्तिरवश्यकीति वाच्यं। तन्त्रालिङः शक्त्यंगीकारेपि तादृशनियमानिर्वाहात्। तथाहि दुग्धानी
तनकृतसाध्ये कालांतरीयकृतिसाध्ये भाविवीयोवराज्यादौ विरानीतनकृतसाध्यताज्ञानदशायामपि का
लांतरीयकृतिसाध्यताज्ञानसत्त्वात्प्रवृत्त्यापत्तिः एवं स्वकृतसाध्ये हनुमदादिपुरुषांतरीयकृतिसाध्यत्वेस
मुद्रोल्लंघनादौ स्वकृतसाध्यताज्ञानदशायामपि हनुमदादिपुरुषांतरीयकृतिसाध्यताज्ञानात्प्रवृत्त्या
पत्तिरितितत्तत्कालीनतत्तत्पुरुषीयप्रवृत्तिं तत्तत्कालीनतत्पुरुषीयकृतिसाध्यताज्ञानस्यैव हेतुत्वं वाच्यं न

न्या॰कौ॰ याच तादृशज्ञानस्य न विधिजन्यत्वं तत्तत्कालतत्तत्पुरुषांतर्भावेन कृतिसाध्यत्वे लिङः शक्त्यभावादिति चेत्‌ प्रवर्त्त
कज्ञानस्य विधिप्रयोज्यत्वनियमनिर्वाहायैव लिङस्तत्र शक्तिकल्पनात्‌ विधिना सामान्यतः कृतिसाध्यत्वबोधिते
६२ अनुमानादिना प्रवर्त्तकस्य तत्तत्कालीनतत्तत्पुरुषीयकृतिसाध्यताज्ञानस्य संभवात्‌ वस्तुतस्तु यद्विशेषयो
रिति न्यायेन सामान्यतः प्रवृत्तौ कृतिसाध्यताज्ञानत्वेन केवलकृतिसाध्यताज्ञाने हेतुत्वस्यावश्यकतया केव
लकृतिसाध्यताज्ञानस्यापि प्रवृत्तिजनकतया प्रवर्त्तकज्ञानस्य विधिजन्यत्वनियमनिर्वाहायैव लिङः कृतिसा
ध्यत्वे शक्तिरवश्यकी इति सारं तच्च कृतिसाध्यत्वादिज्ञानं चिकीर्षाद्वारा प्रवृत्तिजनकं प्रवृत्तिजनकस्य उपाय
विषयकं ज्ञानं चिकीर्षाद्वारकमिति नियमात्‌ प्रवृत्तिजनके उपायज्ञाने व्यभिचारवारणाय प्रवृत्तिजन
कमिति फलज्ञाने उपायज्ञानप्रसक्तेश्च व्यभिचारवारणायोपायविषयकमिति उपायत्वे च साध्यतारूपविष
यताशालित्वमतो नोक्तस्थले व्यभिचारः अत एव मणिकृतापि ज्ञानस्य कृतौ जन्यायां चिकीर्षातिरिक्तं न कर्त्त
व्यमस्तीति ग्रंथेन तथैवोक्तेः अत्र चिकीर्षातिरिक्तं न कर्त्तव्यमस्तीत्यस्य चिकीर्षाद्वारकत्वमेवार्थः ननु हेरंबं॰ ६२

वान्यतत्त्वानुपूर्वीभेदः तत्तद्देशविशेषे तत्तदानुपूर्व्या एव जनकत्वेनानुपूर्वीभेदासंभवात्‌ तस्मान्नपूर्वं प्रसक्त
वेदमूलावेदस्मृत्याचारौ अग्नेश्च कालक्रमेण पुरोगत्व बलश्रद्धाग्रहणाचरणादिशक्तेरहरहरपचीयमानत्वा
त्तदध्ययनविच्छेदेन शाखोच्छेदात्‌ स्मृत्याचाराभ्यामेव कर्त्तव्यतामधिगम्य प्रवृत्तिः। न च तथापि स्मृतिरेवास्तु
वेदमूला मंगलाचारस्तु ईश्वराचारादेव घटादिप्यादिसंप्रदायवदिति वाच्यं। वकृव्यापारघटितस्य तत्तदाचारस्य
गुरुत्वेन मंगलमाचारे हिंसादिवाक्यस्येव लाघवेन कल्पनात्‌ न च मंगलादिपदशक्तिग्रहार्थमाचार आ
वश्यक इति वाच्यं स्वर्गादिपदवद्वाक्यादेव तदुपपत्तेः अत एव वचनमात्राद्यत्र न प्रवृत्तिस्तत्रैव परीक्षका
णामाचारापेक्षेति न च प्रलयासिद्ध्या उच्छेदः संभावित इति वाच्यं प्रलये नाहमासीन्न रात्रिरासीदित्यादि
श्रुत्यनुगृहीतानामनुमानानां प्रमाणानां बाधाः पूर्वमेव व्यवस्थापनात्‌ तस्मादुपदर्शितरीत्येश्वरकर्त्तृकत्वेन
वेदप्रामाण्यसिद्धौ बाधकाभावेन वेदपौरुषेयतासिद्धिरविकलेति कृतमतिशयविस्तरेण। सोयंश
ब्दो द्विविधः विधिरर्थवादश्च विधित्वं च प्रवर्त्तनार्थकलिङादिघटितत्वं प्रवर्त्तनात्वं च प्रवृत्त्यनुकूलव्या

न्या.कौ. त्वं संभवत्येव तथा चैकतरार्थे क्रियमाणेऽन्यतरपदवैयर्थ्यमेवेति कथमेतत् सेयमुभयतःपाशा रज्जुरिति। अ
६३ त्राहुः। चिकीर्षाऽवश्यंव्यापारकत्वस्य स्वसमानविशेष्यकचिकीर्षाऽवश्यंव्यापारकत्वमेवार्थः। उपादानप्रत्यक्ष
स्य निर्व्यापारकतया चिकीर्षारूपव्यापारकत्वाभावात् साक्षादसाधनस्येति। फलज्ञानस्य चिकीर्षाव्यापार
कत्वेपि स्वसमानविशेष्यकचिकीर्षामात्रव्यापारकत्वाभावाद्व्यभिचारवारणाय उपायविषयस्येति सार्थ
कमिति यद्वा चिकीर्षातिरिक्ताव्यापारकत्वमेव तदर्थः नवीननैयायिकनये चिकीर्षाविषयसाधनतया उपादा
नप्रत्यक्षस्य उपादानेच्छाव्यापारकत्वोपगमात् चिकीर्षातिरिक्त उपादानेच्छाव्यापारकत्वात् तत्र व्यभिचारवा
रणाय साक्षादसाधनस्येति न च तस्य उपादानेच्छाव्यापारकत्वे साक्षादसाधनत्वमस्त्येवेति कथं व्यभिचार
वारणमिति वाच्यं। उपादानप्रत्यक्षस्य अन्यकाले प्रवृत्त्यभावेन तस्य स्वातन्त्र्येणापि हेतुत्वोपगमात्। इत्थं
च तत्र तत्कृतेः साक्षादसाधनत्वे सति वृत्तिकृतिजनकत्वं कृत्युपायविषयकज्ञानत्वस्य व्यापकं चिकी
र्षातिरिक्ते तत्राऽकृति व्यापाराजनकत्वमिति अस्मिन्कल्पे मूलार्थः। पूर्वकल्पे तु स्वसमानविशेष्यकचि हरिवं. ६३

कीर्षाव्यापारकत्वं तादृशज्ञानत्वव्यापकमिति मूलार्थोऽवसेयः। तेन फलस्य कदाचिदुपायत्वेपि न दोषाप
त्तिरिति दिगिति वदंति तच्चिंत्यं स्वसमानविशेष्यकत्वप्रवेशेऽपि फलज्ञाने व्यभिचारवारणाय विशेषणोक्तोपा
दानस्य वैयर्थ्यात्। एवं उपादानप्रत्यक्षस्य उपादानेच्छाव्यापारकत्वे प्रमाणाभावेन च द्वितीयकल्पोऽप्यसं
गत एवेति वस्तुतस्तु अनन्यथासिद्धान्वयव्यतिरेकाभ्यामेव कृतिसाध्यत्वादिज्ञानस्य चिकीर्षाद्वारा
प्रवृत्तिजनकत्वमिति सारं। अथ कृतिसाध्यतादिज्ञानस्य चिकीर्षाप्रवृत्त्योर्हेतुत्वे मानाभावः कृतिसाध्य
तादिज्ञानकाले चिकीर्षाप्रवृत्त्योर्वारणस्य तत्र कृतिसाध्यतादिज्ञानाभावस्य हेतुत्वेनैव निर्वाहात्। न
च यादृशप्रकारकेच्छा सा तत्प्रकारकज्ञानसाध्येति नियमबलात् चिकीर्षां प्रति कृतिसाध्यताज्ञानस्य हेतुत्व
सिद्धौ चिकीर्षाद्वारा कृतिसाध्यताज्ञानस्य प्रवृत्तिहेतुत्वसिद्धिरिति वाच्यं। कृतिसाध्यत्वेन पाकमिच्छामीति
चिकीर्षाननुभवेन तस्याः कृतिसाध्यत्वप्रकारकत्वे कृतिसाध्यपाकादिक्रियाविशेष्यकेच्छात्वेन तत्रोक्तरू
पात्कृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानस्य हेतुत्वसिद्धावपि तत्र बलवदनिष्टाननुबंधित्वप्र

सा॰ दी॰ कारकज्ञानस्येष्टसाधनत्वप्रकारकज्ञानस्य च हेतुतायास्तथाप्यसिद्धेरिति चेन्न कृतिसाध्यताज्ञानाभावादेस्तत्त्वे
६७ न तत्र हेतुत्वेतरद्वच्छेदकगौरवापत्त्या कृतिसाध्यताज्ञानादेरेव तत्त्वेन तत्र हेतुताया उचितत्वात्। किंच जनन
कीभूतज्ञाने विघटयत एव ज्ञानं तस्य प्रतिबंधकत्वमिति नियमबलात्तत्र कृतिसाध्यतादिज्ञानहेतुतासिद्धिः। ता
दृशनियमार्थस्तु यत्तत्प्रतिबंधकज्ञानं भवति तत् तज्जनकज्ञानविघटकमपि भवति यथा व्यभिचारज्ञान भ ४
मनुमितिप्रतिबंधकज्ञानं भवति तत् अनुमितिजनकव्याप्तिज्ञानविघटकमपि भवतीति एवं च तादृशनि
यमेन कृतिसाध्यताज्ञानादेश्चिकीर्षाप्रतिबंधकज्ञानत्वेन हेतुतायाश्चिकीर्षाजनकज्ञानविघटकत्वसाध
नेपक्षधर्मताबलात्कृतिसाध्यतादिज्ञानादेरेव चिकीर्षाजनकत्वसिद्धिः। यद्यपि जनकज्ञानकज्ञानविघट
कत्वेन तथासिद्धतया तदभावस्य हेतुत्वात् स्वरूपासिद्धिर्दृष्टांतासिद्धिश्च तथापि प्रतिबंधकत्वेन कारणी
भूताभावप्रतियोगित्वं किंतु प्रयोजकीभूताभावप्रतियोगित्वं प्रयोजकत्वं च कारणत्वत्कारणसाधार
णमिति न दोषः हेतुतौ ज्ञानपदोपादाने च विषयांतरसंचारादौ व्यभिचारवारणाय साध्ये ज्ञानपदं च स्वरूप हरव ६७

चिकीर्षातिरिक्तो द्वारकत्वं अनुपयोगात् चिकीर्षाद्वारकत्वसिद्ध्यै च चिकीर्षाजनककृतिसाध्यतादिज्ञानस्य प्रवर्त
कत्वसिद्धिः। मिथ्याज्ञानस्येति साक्षादसाधनस्योपायविषयस्य चेत्यर्थः तेन प्रवृत्तिविषयप्रत्यक्षे फलज्ञाने च न व्य
भिचारः प्रवृत्तिप्रत्युपादानप्रत्यक्षस्य हेतुतया तत्र व्यभिचारात् साक्षादसाधनत्वं एवं फलज्ञानस्य प्रवृत्तिहेतुत्वनये
तत्र व्यभिचारवारणायोपायविषयस्येति विशेषणीयमिति तस्याशयः न च इदमसंगतं चिकीर्षातिरिक्तं न कर्त
व्यमस्ति तस्य चिकीर्षातिरिक्तव्यापारकत्वं वा चिकीर्षा ऽवश्यं व्यापार इति वा ऽर्थः आद्ये उपादानप्रत्यक्षस्य
प्रवृत्तिं प्रति साक्षात्साधनस्य निर्व्यापारतया चिकीर्षातिरिक्तव्यापारकत्वमस्त्ये वेति व्यभिचाराभावात् साक्षा त्तिवा६
क्षादसाधनस्येत्यर्थः। द्वितीये फलज्ञानं फले इष्टसाधनताज्ञाने चिकीर्षा तत्र का उपाये च। ततः प्रवृ
त्तिरिति प्रणाल्या चिकीर्षावश्यं व्यापारो भवत्येवेति तद्वारणाय उपायविषयस्येत्युपादानमव्यर्थकं फ
लज्ञानस्य प्रवृत्तिं प्रति हेतुत्ववादिना चिकीर्षाया अवश्यं व्यापारत्वोपगमात् अत्र तूपादानप्रत्यक्षस्य नि
र्व्यापारकत्वादेव चिकीर्षारूपनियतव्यापारकत्वात्तत्र व्यभिचारवारणाय साक्षादसाधने सत्यसार्थ

बाधितत्वेन हेतुत्वं न ...स्मि प्रमितिवाच्यं ।१

न्या॰ दौ॰ पक्षविशेषयोरिति न्यायेन प्रवृत्तिसामान्ये तस्य हेतुत्वसिद्धेः न च तात्पर्यसंशये शाब्दप्रतिबंधके व्यभिचारः मलि
६५ कारनपेतात्पर्यनिश्चयस्य शाब्दबुद्धौ हेतुत्वादिति वाच्यं प्रतिबध्यसमानविशेष्यकत्वस्य ज्ञानवि
शेषणत्वेनादोषात् मिथ्याज्ञानजनकेति मणिप्रतीकमादाय साक्षाद्विरोधिन इतिशेषः तेन बाधप्र
तिरोधादौ न व्यभिचार इत्याकूतेषामयमाशयः । यत्कार्यं प्रति साक्षादविरोधि यज्ज्ञानं तज्ज्ञानं तत्का
र्यजनकीभूतज्ञानमवश्यं प्रतिबध्नातीति नियमः तथा च बाधादौ साक्षाद्विरोधित्वाभावादेव हेतुत्वाभा
वान्न व्यभिचार इति नन्वेवमपि कृतसाध्यताज्ञानेन चिकीर्षासाक्षाद्विरोधित्वे न हेतुना चिकीर्षा
जनकज्ञानविरोधित्वसाधने स्वरूपासिद्धिः परैः कृतसाध्यताज्ञानस्य चिकीर्षाप्रतिसाक्षादेवविरो
धित्वोपगमात् न च ज्ञानातिरिक्तकार्याविरोधित्वमेव साक्षादविरोधित्वं तथा च बाधादौ ज्ञानातिरिक्त
कार्यविरोधित्वरूपसाक्षाद्विरोधित्वाभावान्न व्यभिचारः न वा कृतसाध्यताज्ञानेप्येवं स्वरूपासिद्धिः हेत्व॰
तत्र ज्ञानातिरिक्तेच्छाविरोधित्वसत्त्वादिति वाच्यं अनैकांतिकज्ञानवदिति दृष्टांतस्य साधनविकलत्वापत्तेः ६५

ज्ञा

अनैकांतिकज्ञानेनाधीतिरिक्तकार्यविरोधित्वाभावादिति चेदत्रोच्यते । शेषवदित्यस्य ज्ञानस्य स्वस्य शेषवदित्यर्थः
इत्थं च साक्षाद्विरोधित्वं प्रतिज्ञानस्य प्रतिबंधकताजनकज्ञानं न विधेयकत्वे नैवेति नियमः पर्यवस्यति
साक्षाद्विरोधित्वे च स्वविषयविरुद्धविषयावगाहिज्ञानभिन्नत्वं तथा च यज्ज्ञाने स्वविषयविरुद्धनिष्ठप्रका
रतावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभिन्नयत्कार्यप्रतिबध्यतानिरूपितप्रतिबंधकताकं भवति तज्ज्ञानं त
त्कार्यजनकीभूतज्ञानविरोधि भवतीत्येव नियमः एवं च बाधादौ न व्यभिचारः तत्र स्वविषयविरुद्धप्रकार
तावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभिन्नप्रतिबध्यतानिरूपितप्रतिबंधकत्वाभावात् न वा स्वरूपासिद्धिः कृ
तसाध्यताज्ञाने तादृशप्रतिबध्यताभिन्नापि चिकीर्षानिष्ठा प्रतिबध्यता तन्निरूपितप्रतिबंधकताश्रय
त्वात् न वा दृष्टांतस्य साधनवैकल्यं तादृशविरुद्धप्रकारतावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभिन्नप्रति
बध्यतानिरूपितप्रतिबंधकतासत्त्वात् स्वविषयविरुद्धत्वं च यादृशाभाववगाहि तद्यादृशाभावव्याप्यावगा
हितया वा स्वनिष्ठप्रतिबंधकतातन्निरूपितप्रतिबध्यतायाः प्रकारतासंबंधेनावच्छेदकतापर्याप्त्यधिकरणं यत्त

ना कौ० त्वं तेन व्यभिचारज्ञानविषयधूमत्वादिविरुद्धत्वस्य वह्न्यादौ सत्त्वात् तादृशविरुद्धनिष्ठप्रकारतावच्छिन्नज्ञानविष

६६ प्रतिबध्यताभिन्नप्रतिबध्यतानिरूपितप्रतिबंधकत्वाभावान्न दृष्टांतस्य साधर्म्यवैकल्यमिति नन्वेवं प्र

तिबंधकत्वे कारणीभूताभावप्रतियोगित्वं तथा च दृष्टांतासिद्धिः अनुमितिं प्रति व्यभिचारज्ञानाभा

वस्य हेतुत्वादिति चेन्न प्रतिबंधकत्वस्य ज्ञ फलानुत्पत्तिनैयत्यरूपस्य याथार्थ्यात् तथा च यज्ज्ञा

नं ग्राह्याभावावगाहित्वया ग्राह्याभावव्याप्यावगाहित्वं यावद्यावत्स्वनिष्ठा प्रतिबंधकता तन्निरूपिता

यज्ज्ञाननिष्ठप्रतिबध्यता तद्ज्ञानाश्रयपक्षकार्यानुत्पत्तिप्रयोजकं भवति तत्र तत्कार्यजनकीभूतज्ञा

नविरोधि भवतीति नियमः प्रयोजकत्वं च एतज्ज्ञानप्रयुक्तफलाभाववत्त्विति प्रतीतिसाक्षिकः स्वरू

पसंबंधविशेषः न च तथापि सिषाधयिषाद्येकधर्मदर्शनादौ व्यभिचार इति वाच्यं तन्नाश्यभिन्नवृत्तित्वविशि

ष्टतत्तत्कार्यानुत्पत्तिप्रयोजकत्वस्यैव निवेशनादिति दिक्। अत्रेदं चिंत्यं साक्षादविरोधित्वस्य प्रतिबंध

कज्ञानविशेषणतया निवेशे नैव बाधादौ व्यभिचारवारणसंभवे साक्षादविरोधित्वं प्रतीत्युक्ता साक्षा हेत्व: ६६

कथनेन तु साध्यप्रविष्टप्रयोजनाभावात्। व्यापकेऽव्यर्थविशेषणत्वस्यादोषत्वात्। विघटकत्वे च प्रतिबंधकत्वे।

ननु तथापि बाधसिद्ध्याद्यौ व्यभिचारः न च तद्धावत्त्वप्रतिबुद्धेः कता हेतो निवेशनीयेति वाच्यं। हेतुसाध्यताज्ञान

व्यभिचारज्ञानाभावयोरपि बाधाभावात्प्रयोजकत्वे चिकीर्षानुमितेः प्रयोजकतया स्वरूपासिद्धिदृष्टांतासिद्ध्योराप

त्तेरिति चेन्नैवं यादृशज्ञाने संशयनिश्चयसाधारणज्ञानत्वेन यत्र प्रतिबंधकं तत्तज्ज्ञानविशेषज्ञानं विघटयद्

यप्रतिबंधकमिति नियमः बाधसिद्ध्यादेः संशयसाधारणज्ञानत्वेनाप्रतिबंधकत्वात् तत्र व्यभिचारः नापि

त्वं सिद्धे ज्ञाने संशयसाधारणज्ञानत्वेनेच्छाप्रतिबंधकत्वे सिषाधयिषापीच्छादर्शनादिति न तत्रापि व्यभिचारः न च

सिद्धत्वसंशये बरूवित्तमया बाससाध्ये नेच्छेति सिद्धज्ञानस्य संशयसाधारणज्ञानत्वेन तत्र प्रतिबंध

कत्वान्न निश्चयस्याहेतुतया साध्याभावव्याप्यवत्त्वाद्व्यभिचारोऽस्त्वेवेति वाच्यं। तत्रापि बलवद्द्विष्टानुबंधित्वनिश्च

यविघटकतया साध्यसत्त्वात्। न चैवं तत्र साध्यतासंशयोऽपि न प्रतिबंधक इति स्वरूपासिद्धिरिति वा

च्यं। तत्र प्रवृत्तिमात्रप्रतिबंधकत्वेऽपि निश्चयप्रवृत्तौ तथात्वात्। न चैवं निश्चयप्रवृत्तौ तस्य हेतुत्वसिद्धाव

म॰ को॰ रूपादिविशेषः। तथा च सेशपसाधारणज्ञानत्वेन प्रतिबंधकत्वे जनकीभूतज्ञानविघटकतया व्याप्तमिसत्र पूर्वोप
दर्शितास्मरीसानिष्टार्थेत द्वेषस्य फलासर्पमिति वाच्यं तथा सत्युपदर्शितनियमे साक्षाद्विरोधित्वस्यैवनि
६१ वेशाभावे साक्षाद्विरोधिन इति शेष इति मिश्रग्रंथस्याग्रे तत्तद्ग्रंथे न विरोधे पूर्वापरग्रंथविरोधरूप
दोषो दुरुद्धर एवेति॥ किंच कृतिसाध्यत्वादिज्ञानस्य चिकीर्षाप्रवृत्तिहेतुत्वमते पाकादिगोचरचिकीर्षा
हेतु कृतिसाध्यत्वाभाववान्पाक इत्याकारकानुमितिसामग्र्याः प्रतिबंधकत्वं न कल्प्यत इति लाघ
वं॥ चिकीर्षादिसामग्रीकाले पाकत्वादिधर्मितावच्छेदककृतिसाध्यत्वादिप्रकारकज्ञानस्यावश्यकत
या तस्य बाधबुद्ध्या तादृशानुमितिप्रतिबंधकत्वेन बाधाभावघटितानुमितिसामग्र्याश्चिकीर्षादिसा
मग्र्याश्च युगपन्मिलनासंभवात्। कृतिसाध्यत्वादिप्रकारकज्ञानस्य तत्प्रतिबंधकतामते च तादृश
ज्ञानाभावघटितचिकीर्षादिसामग्र्यास्तादृशानुमितिसामग्र्याश्च मिलनसंभवेनोक्तप्रतिबंध
कत्वकल्पने महागौरवापत्तिः अथ कृतिसाध्यत्वादित्रयस्य। लिङर्थत्वेन कलंजभक्षणे द्विसाहेनञो हरि॰ ६१
ष्ट

धात्वर्थकलंजभक्षणाद्यौ लिङर्थाभावबोधकत्वानुपपत्तिः कलंजभक्षणादौ कृतिसाध्यत्वेष्टसाध
नत्वेष्टसाधनत्वयोरभावासत्वात्। एवं श्येनेनाभिचरन्यजेतेत्यत्र धात्वर्थश्येनयागे लिङर्थान्वयासंभ
वः श्येनस्य नरकानुबंधित्वेन तत्र बलवदनिष्टाननुबंधित्वान्वयासंभवादिति चेन्न आद्ये योग्यतया
नञा कृतिसाध्यत्वेष्टसाधनत्वयोरभावबोधनासंभवेन बलवदनिष्टाननुबंधित्वाभावमात्रबोधनात्।
द्वितीये योग्यतया बलवदनिष्टाननुबंधित्वान्वयासंभवेन कृतिसाध्यत्वेष्टसाधनत्वयोरेवान्वयो
गौरवादिति संप्रदायः। वस्तुतस्तु इष्टसाधनत्वमात्रं लिङर्थः कृतिसाध्यत्वं नालिङर्थः तस्य लिङर्थत्वा
भावेपि कृतेराख्यातसामान्यार्थतया। लिङोपि तदर्थकत्वेन पचेतेत्यादौ कृतेः पाकानुकूलत्वभानस्याव
श्यकतया तुल्यवित्तिवेद्यतया साकाङ्क्षत्वेपि कृतिसाध्यताभानात्। न च प्रसक्तेस्तुल्यवित्तिवेद्यतयाभा
नोपगमेपि परोक्षे तदनुपगमाच्चोक्तरीत्या कृतिसाध्यताभानं संभवतीति वाच्यं तथापि साध्यांतरासं
धनेन कृतिप्रकारकज्ञानस्यैव लाघवेन प्रवर्तकतया आख्यातसामान्यार्थकृतेः साध्यतासंबंधेनैव क्रियायांवि

न्या॰कौ॰ च्छिजन्यज्ञानेभावेन प्रवर्त्तकज्ञानसंपत्तेः नचेच्छायाः स्वप्रकारप्रकारकज्ञानजन्यत्वेन चिकीर्षाया कृतिसाध्यत्व
६८ प्रकारकज्ञानहेतुत्वस्यावश्यकत्वे तत्र द्वारा प्रवृत्तावपि तदावश्यकमिति वाच्यं साध्यतासंबंधेन कृतिप्रकार
कत्वेच्छाया एवं चिकीर्षात्वात् नच पचतीत्यादौ आख्यातार्थकृतेः क्रियाविशेष्यतयैव भानमिति युक्तं सत्त्वेः कृ
सत्तया पचेतेत्यादौ तस्याः क्रियाविशेषणतया भानासंभवदिति वाच्यं युक्तत्वे विष्येण तदुपपत्तेः नच यु
क्तत्तिभेदस्य शक्तिभेदनिर्वाहकतया शक्तिभेद आवश्यक इति वाच्यं शक्त्यभेदेपि युक्तिभेदेन बाधका
भावात् अतएव प्राचीनैराख्यातसामान्यार्थकृतेः शक्तिभेदं विनैव युक्तिभेदेन कर्त्तृप्रत्ययस्थले क्रि
याविशेष्यतया भानं कर्मप्रत्ययस्थले च क्रियाविशेषणतया भानमुपेतं। नच लिङ्प्रत्ययात्कृतिसा प७
ध्यत्वत्वावच्छिन्नस्य प्रतिपत्तोपस्थितेरनुभवसिद्धतया तत्र लिङः शक्तिरावश्यकीति वाच्यं तादृशानु
भवे विवादात् एवं बलवदनिष्टाननुबंधित्वमपि न लिङर्थः बह्वायाससाध्ये कर्मणि वकृतरदुःखस्यापि हेरंब॰
ज्ञायमानत्वेन तत्र प्रवृत्त्यनुपपत्त्यात्तज्ज्ञानस्याप्रवर्तकत्वात् अल्पदुःखस्यापि कुतश्चिद्बलवत्त्वेनानुगता ६८

द्विरोधित्वस्य प्रतिबध्यविशेषणतामुपगम्य कृतिसाध्यताज्ञानस्य चिकीर्षाप्रवृत्तिहेतुत्वोपपादनमसंगतं।
अस्तु वा तस्य प्रतिबध्यज्ञानविशेषणत्वं तथापि तस्य न स्वविषयविरोध्यवगाहिज्ञानभिन्नत्वरूपत्वं
तत्र ज्ञानांशनिवेशस्य व्यर्थत्वात् किंतु स्वविषयविरोध्यवगाहिभिन्नत्वरूपत्वमेव तथा च कृतिसाध्य
ताज्ञानपक्षकोपदर्शितानुमाने स्वरूपासिद्धिर्दुर्वारा चिकीर्षायाः कृतिसाध्यताज्ञानविषयविरोधिकृ
तिसाध्यतावगाहित्वेन कृतिसाध्यताज्ञाने स्वविषयविरोध्यवगाहिभिन्ननिरूपितज्ञाननिष्ठप्रतिबंधता
रूपहेतोरभावात् किंचैवं सति वस्तुतोऽसिद्धत्वधीरिच्छाहेतुरित्यादिप्रघट्टके नासिद्धत्वज्ञानमुपक्रम्यन
चतत्रेच्छाहेतुः। सिद्धत्वज्ञानस्य तद्विरोधित्वापत्तेः अन्नकृतज्ञानमिति न्यायात् वस्तुबाधस्यापि इच्छाया अ
सिद्धत्वेनासिद्धाविषयतया सिद्धत्वज्ञानस्य विषयविरोधाभावादिसत्त्वे तन्मिश्रग्रंथस्यासंगतिः तत्
त्र विषयविरोधाभावादिसत्त्वस्य बाधादेरिव सत्त्वस्याप्रतिबंधकत्वाभावादि सार्थकत्वापातग्रंथात् साक्षाद्
विरोधित्वस्य विशेषणतालाभात् न सत्तत्र विषयविरोधाभावादिसत्त्वस्य निश्चयत्वेन प्रतिबंधकत्वधि

ला॰ वी॰ नरीसासामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्तलाघवेनैव कृतिसाध्यत्वादिप्रकारकज्ञानस्य प्रवृत्तिहेतुत्वसिद्धिरि
६९ तिवाच्यं इच्छाया हेतुत्वकल्पने उत्तेजकत्वाभावेन स्थलांतरे प्रतिबंधकत्वं यैवोपपत्तौ सामग्र्याः पितादृश
सामग्रीप्रतिबंधकत्वाकल्पनेन लाघवासंभवात्. तस्मादिष्टसाधनत्वमात्रस्य लिङर्थत्वे दोषाभावा
त्स एव लिङर्थः एतेन कृतिसाध्यत्वादित्रयस्य लिङर्थत्वेन कलंजभक्षयेदित्यादिनिषेधस्थले एक
लिङभिहितानां कृतिसाध्यत्वादित्रयाणां मध्ये कृतिसाध्यत्वेष्टसाधनत्वयोर्धात्वर्थे कलंजभक्ष
णादावेकस्य बलवदनिष्टाननुबंधित्वांशस्य नञर्थत्वे नैकलिङः प्रत्ययाभिहितेषु मुख्य
त्ववैचित्र्यकल्पनापत्तिः एवं तस्यैवांशस्य विधिस्थले धात्वर्थान्वयित्वान्नञः स्य निषेधस्थले
नञर्थान्वयेन नानात्वकल्पनापत्तिः एवं नयवतीसादौ नञर्थस्य प्रथमांतपदार्थे दृष्टत्वाच्च यस्य प्रकृते धात्व
र्थान्वयेन तत्कल्पनापत्तिरिति दूषणोद्भावनं परास्तं। निषेधस्थले नञस्तात्पर्यग्राहकत्वेन नि हेत्वं॰
रर्थकत्वात्॥ अत्र प्राचीनभाट्टानुसारिणो मीमांसकाः अभिधेयविध्यर्थः। तथा हि प्रवृत्तिर्हि द्विवि ६९

धा स्वेच्छाधीना पराधीना च तत्र स्वेच्छाधीनप्रवृत्तौ स्वेष्टसाधनताज्ञानं परप्रयोज्यप्रवृत्तौ परनिष्ठप्रवर्तना
ज्ञानं च हेतुः अनिच्छतोपि पुत्रादेः राजाज्ञादितः पितृशिरश्छेदादौ प्रवृत्तिदर्शनेन राजा मां प्रवर्तय
तीत्याकारकज्ञानस्यान्वयव्यतिरेकानुविधानात्. प्रवर्तनात्वं चात्र प्रवृत्तिजनकत्वमतिरिक्तं वेत्यन्य
देतत्. एवं च स्वर्गकामो यजेतेत्यादिविधिप्रयोज्ययागादिगोचरप्रवृत्तेरपि विधिरूपपरप्रयोज्यत्वया
विधिनिष्ठप्रवर्तनाज्ञानस्य हेतुत्वमवश्यमुपेयं तत्र तस्यैव कारणत्वेन तत्कल्पनात् तच्चांतरेणाभिधायका
लिङ्निष्ठत्वाल्लिङर्थत्वेन संभवतीति अभिप्रायः। लिङ्निष्ठलिङर्थत्वं चावश्यकं आज्ञादिरूपायाः परा त्वं
ज्ञादेश्चेतननिष्ठायाः प्रवर्तनाया अचेतने लिङ्यसंभवात्. इयमभिधा शब्दभावनापदवाच्याभिधा
वनापात्र शब्दभावना अर्थभावनाभेदेन द्विविधा तत्. अथ भावना या द्विविधे भावनांशत्रयं पतीति भाट्ट
प्रवादविरोधः त्रिविधत्वस्यैवांशत्रयरूपत्वादिति चेत् भावनाज्ञाने किं भाव्यं केन भाव्यं कथं भाव्यमि
त्याकांक्षोदयेन कर्मकरणेतिकर्तव्यतात्रितयाकांक्षोत्थापकत्वस्यैवांशत्रयवत्त्वरूपत्वात्. न च भाव

भा·दी· मज्ञानोत्तरतादृशाकांक्षोदये मानाभाव इति वाच्यं· तथा सति लिङ्पदज्ञानजन्यार्थभावनाज्ञानोत्तरं यागा
७० दिगोचरार्थभावनाविशेष्यकस्वर्गादिफलेच्छत्वप्रकारकबोधस्यानुभवसिद्धस्यापलापापत्तेः। न चैवं फ
लाकांक्षासिद्धावपि करणाद्याकांक्षाऽसिद्धेवेति वाच्यं· कर्माकांक्षायाः करणाकांक्षानियतत्वेन तस्याः अ
पि सिद्धेः· अत एवेतिकर्त्तव्यताकांक्षापि सिद्धा करणाकांक्षायास्तन्नियतत्वात्· अत एव विधिवादे
पक्षधरमिश्रैरप्युक्तं अन्यथा स्वर्गादिफलं न भावयेत् तस्यैतत्त्रितयाधीनत्वादिति अत्र
स्वर्गादिफलं न भावयेदित्यस्य विधिना स्वर्गादिफलकत्वेनार्थभावनानवबोधे तस्यार्थकलयात
स्तैतत्त्रितयाधीनत्वादित्यस्य च स्वर्गादिफलकत्वादिप्रकारकबोधस्य तादृशाकांक्षात्रयाधीनत्वादि
त्यर्थकतयोक्तार्थलाभात्· ननु लिङ्पदार्थभावनोपस्थितेरुत्तरं निरुक्ताकांक्षात्रयं भवतीत्यु
क्तमसंगतं भट्टमते अभिधाया एव लिङ्पदवाच्यत्वेन ततः फलानुकूलव्यापाररूपार्थभाव
नोपस्थितेरसंभवात्· एवमभिधायाः शब्दभावनात्वाभावेन तस्याः शब्दभावनात्वाभिधानमप्यसं हेरंब· ७०

नतिप्रसक्तं बलवत्स्यदुर्बलत्वात्· एवं बलवदनिष्टाननुबंधित्वस्य बलवद्द्वेषविषयदुःखाननुबंधित्वमात्ररूप
स्य ज्ञानस्य वर्त्तकं वा कालांतरीयबलवद्द्वेषविषयदुःखानुबंधित्वज्ञानेपि एतत्कालीनएतत्पुरुषीयतादृशद्वेषवि
षयदुःखाननुबंधित्वज्ञानेन प्रवृत्त्यनुदयात् तत्कालीनतत्पुरुषीयप्रवृत्तिं प्रति तत्कालीनतत्पुरुषी
यबलवद्द्वेषविषयदुःखाननुबंधित्वज्ञानस्यैव हेतुत्वं वाच्यं तथापि तत्काले यत्पुरुषस्य कापि नतादृ
शद्वेषस्तत्राप्रसिद्धत्वात् ज्ञानासंभवेन प्रवृत्त्यनुपपत्तिः प्रवर्त्तकज्ञानविषयस्यैव लिङर्थतया लिङो
नानाशक्तिकल्पनापत्तिश्च· न चैवं कलंजभक्षणादौ प्रवृत्त्यापत्तिरिति वाच्यं तत्र क्रोधेर प्रवृत्तौ तत्र
क्रोचरबलवद्द्वेषस्य प्रतिबंधकत्वेनोक्तापत्त्यभावात्। अत एवांतरालिकप्रमेयस्य बलवद्द्वेषस्य ज्यो
तिष्टोमादौ न प्रवर्त्तत्वे अन्यस्तत्प्रवर्त्तते एवेत्युपपद्यते। अथैवं न कलंजं भक्षयेदित्यादौ नञा लिङर्था
भावबोधनानुपपत्तिः कलंजभक्षणादेरिष्टप्रादिरूपेष्टसाधनत्वेन तदभावस्य नञा बोधनासंभवादि
ति चेन्न तत्र नञ्समस्तासर्वश्राहकत्तयानिष्टसाधनत्वस्यैव निरूढलक्षणया लिङर्थत्वात्· न च सर्वेपदर्शी

न्या॰ कौ॰ ७१ वनीयस्त्वित्तौ सत्यां अस्याः किं भाव्यं किं करणं केति कर्त्तव्यतेत्याकारके जिज्ञासारूपाकांक्षोदयात्। अस्याश्च
आख्यातादिप्रवृत्तिः करणं लिङ्शब्दनिरूपितशक्तिज्ञानं वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधे
येनोपधावति स एवैनं भूतिं गमयतीत्यादिस्तुत्यर्थवादः सहकारी चेतिकर्त्तव्यतेति च न भाव्याद्युप
स्थित्युपायः। तदुक्तं भट्टपादैः। लिङोभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः संबंधबोधो
धः करणं तदीयं प्ररोचनाचागतमोपयुज्यतेइति अत्र लिङोभिधेत्यस्य लिङ्वृत्तिरभिधेत्यर्थः वृत्ति
त्वं च स्वरूपसंबंधेन तत्समवायानंगीकारात्। शब्दभावनेत्यस्य शब्दनिष्ठा भावनेत्यर्थः शब्दनिष्ठा
भावना शब्दभावनेति व्युत्पत्तेः भाव्येत्यस्य फलमित्यर्थः संबंधबोध इत्यस्य शक्तिज्ञानमित्यर्थः
तदीयमित्यस्य शब्दभावनीयमित्यर्थः प्ररोचनेत्यस्य वायुर्वै क्षेपिष्ठा देवतेत्यादिस्तुत्यर्थवाद
इत्यर्थः अंगतयेत्यस्य सहकारितयेत्यर्थः तदियं भट्टमतनिष्कर्षः स्वर्गकामो यजेतेत्यादौ लिङा आ
ख्यातत्वसामान्यशक्त्या अर्थभावनोपस्थाप्यते तदुत्तरं तत्र कर्मकरणेतिकर्त्तव्यताकांक्षोपदर्शित हेरंब॰ ७१

जिज्ञासारूपा जायते ततः स्वर्गकर्मिकाया यागकरणिकाप्रयाजादीतिकर्त्तव्यताकास्वर्गकामकर्तृकाभावने
त्याकारकार्थभावनाविशेष्यकबोधपर्यवसायी स्वर्गकामः प्रयाजादिसहकृतेन यागेन स्वर्गं भाव
येदित्याकारके बोधः अत्र यागकरणकत्वं न यागनिष्ठकारणतानिरूपकत्वं यागेऽर्थीभावनाकारण
ताभावात् किंतु यागनिष्ठविषयतानिरूपकत्वरूपं पारिभाषिकं तत्र विषयत्वं चात्र जन्यत्वं यद्वा याग
जन्यफलप्रयोजकत्वं प्रकृते यागकरणकत्वं वस्तुतस्तु स्वर्गोत्पत्त्यनुकूलव्यापारसमूह एव चात्र स्वर्ग
ग कर्मिकार्थभावना तत्र यागकरणकत्वं च यागघटितत्वमेवेति एतादृशकरणकत्वं चात्र यागस्य
संसर्गमर्यादया भासते न तु प्रकारतया तदुपस्थापकपदाभावात् तादृशपदकल्पने गौरवात् न
चात्र प्रयाजादेः कथं शाब्दबोधे सहकृतत्वरूपेतिकर्त्तव्यताकत्वसंबंधेन भानं तद्बोधकशब्दाभावा
दिति वाच्यं दर्शितसहकार्याकांक्षायाः प्रकारान्तरेणानिवृत्तेरन्यथानुपपत्त्या प्रयाजादिपदाध्या
हारेणैव तादृशबोधोपपादनात् एवं च युक्तमिति नैयायिकैः अस्य कामनाविशेषणतयोपस्थितस्याविस्व

भा॰कौ॰ र्गस्य फलकतासंबंधेनात्र योगे चये बोध्यः। एवं। लिङा। लिङ्त्वावच्छिन्नानिरूपितविशेषशक्त्या शब्दभावना
७२ या होपस्थितौ किं भाव्यं केन भाव्यं कथं भाव्यमित्साकारकाङ्क्षासाहूप्याकोस्त्ताज्ञायते। ततः पुरुषप्रव
त्तिरूपमिका। लिङ्शक्तिग्रहकरणिकास्तु सर्थवादेति कर्त्तव्यताका विधिनिष्ठा शब्दभावनेसाकारका
शब्दभावना विशेष्यक बोधपर्यवसायी विधिः स्तु सर्थः वादसहकृतेन लिङ्शक्तिग्रहेण पुरुषप्र
वृत्तिं भावयेदित्साकारको बोधः अत्र विधिया के पादृशार्थबोधक पदेन श्रूयते लदर्थकपदे कल्प
नयैव बोध उपपादनीयः ततः स्वर्गफलिका यागकरणिका प्रयाजादीति कर्त्तव्यताका स्वर्गकामकर्तृ
कार्यभावना। लिङ्पदनिरूपितशक्तिग्रहकरणकस्तु सर्थवादेतिकर्त्तव्यताकविधिनिष्ठशब्दभाव
नात्मकप्रवर्त्तना विषया इति महावाक्यार्थबोधः प्रवर्त्तकोज्ञायते विधुपरक्ता भावना लिङर्थ इति भट्ट
सिद्धान्तात्। विधिः प्रवर्त्तना तदुपरक्तात् द्विशिष्टार्थभावना लिङ्प्रतिपाद्येति सादृशसिद्धान्तार्थोवसेयः हेरंब॰
न च तादृशसिद्धान्तो निर्युक्तिक इति वाच्यं। पितुः शिरश्छेदं कुर्विसादि राजाज्ञादिस्थले राज्ञाज्ञा विष ७२

गतमितिचेन्न तेषां निरुक्तव्यापारस्याख्यातसामान्यार्थत्वेन लिङ्पदस्यापि शक्यतयाभिधायाः शब्दभाव
नात्वोपगमे न चोक्तासंगस्याभावात्। तदुक्तं भट्टपादैः अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्म
भावना त्वन्या सर्वाख्यातस्य गोचर इति अत्राभिधाभावनामिस्यास्याभिधीयतइत्यभिधाशब्दस्तत्रिष्टभाव
नामिसर्थः। अन्यां अर्थभावनातोभिन्नां आहुः स्वशक्त्योपस्थापयति अर्थात्मभावनेति अत्रार्थो धात्वर्थो
यागादिः अर्थि सा द्राग्माव्या आत्मत्वं जनकत्वरूपविषयित्वे वृत्तित्वं वा। एवं च यागादिविषयिणी आ
त्मवृत्तिर्वा भावनाअर्थात्मभावनाशब्दार्थो बोध्यः अन्या अभिधारूपशब्दभावनातो भिन्ना सर्वा
तस्य गोचरइ सस्य सर्वाख्यातशब्दस्यार्थः। अयोक्ताकोक्षात्रयसहकारेणार्थभावना कर्मकरणेतिक
र्त्तव्यताएतत्त्रितयान्विता। लिङ्पदेन बोध्यत इत्युक्तमसंगतं अर्थभावनायाः कर्मादीनां विशिष्यापरि
चयादिति चेन्न तस्याः स्वर्गादिकं कर्म यागादिकं करणं प्रयाजादि सहकार्येवेति कर्त्तव्यतेति प्रसिद्धत्वात्
एवं शब्दभावनापि कर्मकरणेतिकर्त्तव्यतैतत्त्रितयान्विता। लिङाभिधीयते। लिङ्शब्दात् शब्दभा

फ॰

वा॰को॰ पस्त्वंविधिवाक्येनश्रूयते न स इं कल्पनीयमित्युक्तमेव अत्रावांतरबोधे भावनायाः फलकत्वभानेऽपि महा
७३ वाक्यार्थबोधे तत्त्वभासते प्रयोजकीभावात् अथवा प्रथममुपदर्शितां शब्दविशिष्टार्थभावनाविशेष्यक एव
अवांतरबोधः तदुक्तं च शब्दभावनायामुपदर्शिताकांक्षायां समुपदर्शितां शब्दविशिष्टार्थभावनावि
शेष्यकनिरूढः शब्दभावनात्वविशिष्टप्रवर्त्तनाविषयत्वविषयकमहावाक्यार्थबोध उत्पद्यते न तु शब्दभाव
नाविशेष्यकावांतरबोधोऽपि प्रयोजनाभावात् मध्येतथाबोधकल्पने गौरवाच्च अत्र च विषयत्वं जन्यत्वं
न द्वैवफलाकांक्षानिवृत्तेरिति। अत्र महावाक्यार्थबोधे अर्थभावनायां स्वर्गादिफलकत्वभाने तु घ
टेजलमाहरेत्यादौ छिद्रेतरत्वादिवदन्वयप्रयोजकरूपवत्वरूपयोग्यताविधया अर्थभावनायां प्रवर्त्त
नाविषयत्वान्वये तस्यताद्दशयोग्यतात्वात्।। अथान्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञानविधयार्थ
भावनानिष्टस्वर्गादिफलकत्वज्ञानस्य तत्र हेतुत्वे अभिधायितत्त्वेन ज्ञातास्वरूपसतिवा हेतुरिति हेरंब॰
प्रसंगादिति प्रवर्त्तनात्वेन ज्ञातानचनिष्फले दुःखैकफले वा कर्मणि सा तथा ज्ञातुं शक्यते अपि तु भा ७३

वनात्वेन ज्ञातानच भाव्यानुपस्थितौ तत्संभवः न च क्रियाभावाकष्टत्वादिति समभिव्याहृतफले प्रतिभावनात्वेन न
ज्ञातेति पक्षधरमिश्रग्रंथासंगतिः तेन ग्रंथे न प्रवर्त्तनात्वेनाभिधानं च ये अभिधागतस्वर्गादिफलजनकत्व
लक्षणान्वयप्रयोजकरूपवत्वरूपयोग्यताज्ञानस्य हेतुतापाः लाभादिति चेन्न। तत्र भावनात्वेन ज्ञाने सनं
तरं प्रात्तत्रेति पूरयित्वा सा न तथा ज्ञातुं शक्यते दृश्यनेन सहान्वयोगीकारेण यत्रार्थभावनात्वज्ञानं तत्र सा
प्रवर्त्तनाप्रवर्त्तनात्वेन ज्ञातुं शक्य तद्दर्शकस्य तथाविधग्रंथस्योक्तार्थ एव विश्रामेण संगतेरभावा
त् न चात्रार्थभावनाया अप्रसक्तत्वेन कथमुक्तार्थलाभ इति वाच्यं दुःखैकफले कर्मणि सत्र कर्म
परस्यार्थभावनार्थकत्वेन तस्याः प्रसक्तत्वात् एवं प्रवर्त्तकज्ञानस्येयसर्थमपि तज्ज्ञानमावश्यकं या
ज्ञान गादेर्निष्फलत्वज्ञानकाले प्रवृत्तिपारणायस्वकरणकत्वसंबंधेन यागादिविशिष्टायामर्थभावना
यामिष्टसाधनस्य हेतुतायाभट्टमतसिद्धत्वात् यागादिविशिष्टभावनायामिष्टसाधनताज्ञानकाले वि
शेषणीभूतयागे पि दृष्टसाधनताज्ञानस्यावश्यकत्वयात्तथा विधेष्टसाधनताज्ञानकाले यागादेर्नि

न्या॰ कौ॰ फलत्वज्ञानासंभवात् नचैवं सति न्यायमते विशेष इति वाच्यं न्यायमते क्रियागतेष्टसाधनताज्ञानस्य हेतु
७४ तया विशेषसंभवात् केचित्तु अर्थभावनागतेष्टसाधनताज्ञानं न भट्टमते प्रवृत्तिहेतुः अपितु अभिधा
गतेष्टसाधनताज्ञानं अत एव पक्षधरमिश्रैरप्युक्तं क्रियागतेष्टसाधनत्वं न विध्यर्थः अपित्वभिधा
गतमिति विशेष इति अन्यथा तेषां तत्र विध्यर्थत्वकथनस्यासंगतेरित्याहुः तत्र तथा सति क्रियायां निष्फ
लत्वज्ञानकालेप्रवृत्तिवारणासंभवात् अर्थभावनाविशेष्यकेष्टसाधनताज्ञानहेतुत्वेनु तद्वार
णप्रकारस्योक्तत्वात् नचैवं सति अभिधागतमिति श्रयं थ विरोध इति वाच्यं लक्षणायात्तत्राभिधाप
दस्यार्थभावनापरत्वात् नचैवमप्यपि मिश्रग्रंथविरोधः भट्टमते भिधाया एव लिङर्थत्वेनार्थभाव
नागतेष्टसाधनत्वस्य लिङर्थत्वाभावादिति वाच्यं तत्र स विध्यर्थशब्दस्य विधिजन्यप्रतीतिविषयार्थे
कत्वेन तथा विधशब्दबोधफलकतासंबंधेन स्वर्गादेरन्वये स्वर्गादिफलकत्वस्यापि निरुक्तविधिप्रतिपा हेरंब॰
द्यत्वेन विरोधाभावात् अथैवं फलभावनात्वेनार्थभावनामात्रबोधोस्तु अर्थभावनायां तथाविधप्रवर्त्त ७४

पस्तादृशाशिरश्छेदानुकूलो व्यापार इत्साकारकस्यार्थभावनाविशेष्यकप्रवर्त्तनाप्रकारकबोधस्य प्रव
र्त्तकत्वस्य क्लृप्तत्वे न तदनुसारेण तादृशसिद्धांतोपगमस्य निर्युक्तिकत्वाभावात् एतेनात्र निरुक्तार्थभा
वनाविषयिणी शब्दभावनेति शब्दभावनाविशेष्यकार्थभावनाप्रकारक एव महावाक्यार्थबोधः अ
न्यथा वोत्तरार्थभावेनाविशेष्यकबोधे भाव्यस्य स्वर्गादेः प्रकारतया चयस्यत्वेन तयावाक्यार्थबोधेभा
व्यार्थभावनायाः प्रकारतयाभानस्यैवौचित्यादिति केषांचिदुक्तिः स्विंसैव तथा समुपदर्शितसिद्धां
तविरोधापत्तेः यदि च राजाज्ञादिस्थलेपि प्रवर्त्तनाविशेष्यकबोधस्यैवोपगमेन विधिसंबंधात् भाव
नालिङर्थ इति सिद्धांतविरोध इत्युच्यते तदास्तु प्रवर्त्तनाविशेष्यकबोधस्य कानो हानिरिति अत्रापि शब्द
भावनायां शक्तिग्रहकरणकत्वेपि शक्तिग्रहप्रयोज्यप्रवृत्त्यादिरूपफलप्रयोजकत्वरूपेपारिभाषिकमेवप
याश्रुतेशक्तिग्रहे शब्दभावनायाजनकत्वरूपकरणत्वाभावेन तथाविधकरणतानिरूपिकत्वरूपत
त्कारणकत्वस्यासंभवेनासंगत्यापत्तेः अत्रापि पूर्ववत्करणकत्वादेः संसर्गविधयैवभानमुपगंतव्य

ना॰कौ॰ पसेर्यंतदुपगमात्तत्तत्त्वस्फुरत्सर्थवादेनकथंतत्संपत्तिरितिवाच्यं॰नछूटकीभूतयत्किंचित्सद्दस्यप्राश
७५ स्तरूपवत्त्वदृनिष्टाननुबंधित्वेलक्षणोपगमात्। अतएवार्थवादानांस्वार्थेऽप्रामाण्यमितिसिद्धांतः॥न
चतथापिस्वकरणकत्वसंबंधेनतत्रलिङ्शब्दनिरूपितशक्तिज्ञानभानेकिंमानमितिवाच्यं॰करणांको
क्षावलेनतत्रतज्ज्ञानात्॰इदमत्रावधेयम्॥पक्षधरमिश्राणांशब्दभावनाविशेष्यकार्थभावनाप्रकार
कबोधएवंसंमतः॥तथासत्येवपूर्वोपदर्शितलिङ्र्थस्वभावत्वलाभेनज्ञातेसनंतरंयात्तत्रेलिङ्ग्रहणंविने
वअभिधानमितिविशेषइत्यत्राभिधापदस्यार्थभावनायांलक्षणांविनेवयथाश्रुतत्वेऽर्थस्व न्
रसतएवनिर्वाहात्नचशब्दभावनायांस्वर्गादिफलकत्वस्याभानेकथंस्वरसतस्तन्निर्वाहइतिवा
च्यं॰स्वर्गादिफलकत्वविशिष्टायाःस्वविषयकत्वसंबंधेनयागविशिष्टायाभावनायाजनकत्वरूपवि
षयितासंबंधेशब्दभावनायामन्वयेविशिष्टान्वयमर्यादयान्वयप्रयोजकाकांक्षावत्त्वाकांक्षापयोग्यता हेरंब॰
विधयास्वर्गादिफलकत्वलाभसंभवात्। अर्थभावनाविशेष्यकबोधांगीकारेउपदर्शितरीत्या ७५

पूरणलक्षणयोरनुसरणक्लेशःस्फुटएव॥एवमेतन्मतेशब्दभावनायांयागाद्यनुकूलत्वबोधेयागादौकृति
साध्यताज्ञानस्यपरिरुक्तरीत्यासमानवित्तिवेद्यत्वानुसरणंविनैवनिर्वाहइतिशाब्दभावनायांयागादिवि
शिष्टार्थभावनायाःस्वजनकत्वस्वजनककृतिप्रयोजकत्वान्यतररूपस्वविषयत्वसंबंधेनान्वयोपगमेन
शब्दभावनायांस्वजनककृतिप्रयोजकत्वरूपयागाद्यनुकूलत्वबोधस्यस्वरसतएवलाभान्नउक्तमते
चसमानवित्तिवेद्यत्वानुसरणक्लेशः॥शाब्दबोधेसमानवित्तिवेद्यत्वाभावेनतदनुसरणेप्यनिर्वाह
श्चस्फुटएव॥एतन्मतेयागादौसफलत्ववत्त्वदृनिष्टाननुबंधित्वयोर्लाभोपिविशिष्टान्वयमर्यादयासुघ
टएवः नचैतन्मतेविधुपरक्ताभावनालिङ्र्थइतिसिद्धांतविरोधइतिवाच्यं॰प्रकृतेविधितस्यैवक्त
कतानप्रकारत्वरूपतयाउक्तमतेशब्दभावनायामिवेतन्मतेप्यर्थभावनायांतत्सत्वेनाविरोधात्वि
ध्युपरक्तेत्यस्यविधिसंबद्धेत्यर्थकतामुपेत्यतादृशसिद्धांताविरोधस्यपूर्वमुपदर्शितत्वाच्च॥एवमेतन्मतेलि
ङर्थेलिङ्त्वावच्छिन्नशक्यत्वरूपेयथाश्रुतमेवउक्तमतेतुलिङ्जन्यप्रतीतिविषयत्वरूपंवाच्यमितिविशेष

न्या॰ कौ॰ · ममपि स्फुरमेवेति दिक् । अत्र भट्टमते लिङ्‍ · त्वावच्छिन्ननिरूपितशक्तिचतुष्टयं बोध्यं एका शब्दभावनात्वसा
७६ नानुकूलात तज्ज्ञानस्याकांक्षोत्थापकत्वेन शब्दभावनात्वविशिष्टप्रवर्त्तनात्वज्ञानानुरोधेन चावश्यक
त्वात् · अपरा च प्रवर्त्तनात्वज्ञानानुकूला राजाज्ञादिस्थत्वे प्रवृत्तिजनकत्वेन क्लृप्तस्य तादृशज्ञानस्या
वश्यकत्वात् अपरा च प्रयत्नानुकूला अभिधाख्या सा सा प्रत्ययसजनके न शाब्दप्रवृत्तिजनने व्यापार
त्वेन तस्या आवश्यकत्वात् अपरा चाभिधात्वज्ञानानुकूलात तज्ज्ञानस्याप्यनुभवसिद्धत्वादिति श
क्तिचतुष्टयमिति वदन्ति अत्रोच्यते शाब्दिकभिन्नस्याभिधापदवाच्यत्वे मानाभावेन कुत्र तथा शक्तिक
ल्पनं न च परप्रयोज्यप्रवृत्तिप्रतिपरनिष्ठप्रवर्त्तनात्वज्ञानस्य हेतुतया राजाज्ञादिस्थत्वानुरोधेनावश्यक
तया विधिनिष्ठप्रवर्त्तनाज्ञानं विना न प्रवृत्तिरिति तदुपपत्त्यर्थं विधिनिष्ठोऽभिधाख्यातिरिक्तपदार्थोऽवश्यं विधि
शक्यमुपेयइति वाच्यं स्वेच्छाधीनप्रवृत्तिमत्त्वेऽवश्यक्लृप्तस्वेष्टसाधनत्वज्ञानहेतुतयैव राजाज्ञादि
तःपित्रादिशिष्येच्छुतोपुत्रस्येष्टसाधनतात्वानकल्पनेन प्रवृत्तिनिर्वाहो तादृशकार्यकारणभावे मानाभावा हेरंबं॰ ७६

नाविषयत्वाभानं निष्फलमिति चेन्न तत्कोचरपरप्रयोज्यप्रवृत्तौ तदनुकूलपरनिष्ठप्रवर्त्तनात्वज्ञानस्य कारण
तया राजाज्ञादिस्थत्वानुरोधेनावश्यकतया तत्संपत्त्यर्थमेव तदुपगमात् न च तदुपगमेऽपि कथं तादृशकार
णसंपत्तिरिति वाच्यं · कृतिसाध्यताज्ञानविलम्बागादौ प्रवृत्तिकारणं यथा यागादिप्रवृत्तौ यागादिगोचर
कृतिसाध्यतात्वज्ञानस्य हेतुतया तत्संपत्तमेस्वजन्यस्वप्रयोज्यकृतिजन्यत्वान्यतररूपस्वविषयत्वसंबंधे
न शब्दभावनायां यागादिविशिष्टार्थभावनाया मद्वयोपगमेन समानवित्तिवेद्यतया शब्दभावनायाम
पि स्वजनककृतिप्रयोजकत्वरूपयागाद्यनुकूलत्वबोधस्यावश्यकतया तादृशकारणसंपत्तिसंभवा
त् । न च तथाप्यर्थभावनायां प्रयाजादिसहकृतत्वभाने मानाभावइति वाच्यं प्रयाजादिसहकारित्वे
देहसंवाद्यफलजनकत्वसंदेहाहितस्य प्रवृत्तिबंधकस्य द्वेषस्योत्सारणार्थं तत्र तदन्वयोपगमात् अत्रा
प्ययागादिविशिष्टार्थभावनायां तज्ज्ञानेयागादिविशेषणैरोपितज्ञानेनानुपपत्तिसमभावात् न चैवमपि प्रव
र्तनायांस्तु सर्वथा सहकृतत्वस्यभानं किमर्थमिति वाच्यं । बलवदनिष्टाननुबंधित्वरूपप्रवर्त्तकत्वानस

श्रा.लो. निष्ठीववद्देवलीश्वरानिष्टैवे साचार्यमतमपि परास्तम्॥० अत्राभिनवभाट्टमीमांसकाः इष्टसाधनतारूपाप्रव
७७ र्तनालिङादिवाच्ये सत्यापि वक्ष्यमाणदोषदुष्टतयाऽयमत्र प्रवर्त्ततामित्याकारकप्रवक्तृसुदेश्यकेच्छात्मक
प्रेरणारूपाप्रवर्तनैव लिङादिवाच्यातथाहि।इष्टसाधनतायां लिङर्थत्वेपि चतिनयचतीत्यत्रक्त
तेःप्रथमांतपदार्थेन अन्वयर्थयोरभेदेनाभेदान्वयांगीकारनिमित्तंव्युत्पत्तिद्वयेन पंचतिनपचेदित्यत्र नञ्श्रवणालु
प्तत्वेपि प्रथमांतपदार्थधात्वर्थमुख्यविशेष्यकबोधांगीकारेण व्युत्पत्तिद्वयं नातिरात्रइत्यादिवाक्ये चनञ
र्थविधर्थेष्टसाधनतान्वयांगीकाराद्व्युत्पत्तिः स्वतंत्रेति व्युत्पत्तिपंचककल्पनेगौरवं॥ निरुक्तप्रेरणाया
लिङ्गर्थत्वे तु पचेदित्यत्र याकभावनायां स्वप्रयोज्यत्वसंबंधेन लिङर्थप्रेरणान्वयवत् नपचेदित्यत्रापि २
स्वप्रयोज्याभावप्रतियोगित्वसंबंधेन याकभावनायामेव प्रेरणान्वयान्न व्युत्पत्तिभेदकल्पनं पचतीत्यत्र
चचैत्रादेः कृताधेयत्वसंबंधेनैव नयचतीत्यत्रापि स्वाधिकाभावप्रतियोगित्वसंबंधेन कृतावेवान्वया हेरंब
न तत्कल्पनमिति लाघवं॥ किंचाचार्याद्युक्तगामानयेत्यादिवाक्यजन्येष्टसाधनताज्ञानादेव शिष्यादेःप्रव ७७

त्ताचार्यप्रेषितोहंगामानयामीत्याद्याचार्यादेःप्रवर्त्तकत्वव्यवहारानुपपत्तिः इष्टसाधनतारूपप्रवर्त्तनाया आ
चार्ये द्यावसत्त्वेन प्रवर्त्तनाश्रयत्वरूपप्रवर्तकत्वाभावात्।अस्मन्मते च प्रेरणारूपप्रवर्त्तनाश्रयत्वस्य त
त्रसत्वान्न तद्व्यवहारानुपपत्तिः नच प्रवृत्तिजनकेष्टसाधनताबोधकलिङाद्युच्चारयितृत्वं तस्य प्रवर्त्तक
त्वमवहारइति वाच्यं तथा सति राजप्रेरितपदातेस्तादृशलिङाद्युच्चारयितृत्वेन प्रवर्त्तनकत्वापत्तौ पदाति
प्रेरितोहंगामानयामीति किंतु राजप्रेरित इति पदातौ प्रवर्त्तकत्वाभावव्यवहारानापत्तेः नचान्याप्रेरितत्वे स
तितादृशलिङ्गुच्चारयितृत्वं प्रवर्त्तकत्वमिति नोक्तदोष इति वाच्यं तथा सति पिशुनप्रेरिते राज्ञि प्रवर्त्तकत्व
व्यवहारानापत्तेः॥ किंच भवन्मते येन स्वेन एव पाकादौ इष्टसाधनतादि बुद्ध्या प्रवृत्तेन तस्य पाकभावनाव
र्त्तमानतादृशायां चैत्रः पचेदितिप्रयोगापत्तिः इष्टसाधनतादिविशिष्टपाकानुकूलकृतिमत्त्वस्य चैत्रेऽबा
धितत्वात्।अस्मन्मते तु तादृशप्रवृत्तेः प्रेरणाप्रयोज्यत्वाभावाद्विषयबाधेनाप्रामाण्योपपत्तिः अथ भवन्मतेपि
परान्यप्रेरणान्वये त्वस्य प्रवृत्तिस्तत्र पाकभावनावर्त्तमानतादृशायां चैत्रः पचेदिति प्रयोगस्य प्रामाण्याप

ता॰की॰ तिः पाकाद्यनुकूलयत्नश्चैत्रनिष्ठकृतेः प्रेरणाप्रयोज्यत्वस्याबाधादिति चेन्मैवं प्रयोज्यत्वं हि स्वज्ञानजन्येष्टसाधनता
१८ नुमितिजन्यत्वं स्वज्ञानं प्रेरणाज्ञानं तच्च तत्तत्प्रवृत्तिप्राक्कालवृत्ति तल्लिङादिपदज्ञानेनोत्पादितमस्मास
नासंबंधेप्रवेश्य तद्दृति तादृशव्यक्तिस्पन्येष्टसाधनतानुमितिजन्यत्वस्वरूपयोग्यत्वं। लिङर्थप्रेरणाया
भावनान्वये संसर्गइति तादृशसंसर्गेण लिङर्थप्रेरणावत्वस्य भावनावृत्तेर्मानतादृशायां तस्या बाधान्नयेदि
तिप्रयोगापत्तिः किंचान्यलभ्यत्वादिष्टसाधनत्वस्य न लिङ्वाच्यत्वं प्रवृत्तिविषये यागादाविष्टसाधनतानुमा
नेनैवेष्टसाधनताबोधसंभवात् भवति हि अयमत्र प्रवर्त्ततामिसाकारकाच्छेच्छाविषयत्वादिष्टसाधनत्वया
पमनस्तेन तदनुमानं अत्रासुखे सुखत्वभ्रमेणासुख एव वा सुखं मे जायतामित्युदासीनेच्छाविषयत्वे
इष्टसाधनत्वाभावात्तत्र व्यभिचारवारणाय हेतावाकारकपर्यंतानुधावनं प्रतारकतादृशेच्छाविषये व्यभिचा
रवारणाय नेति। अत्रेच्छाविषयत्वं इच्छाविषयीभूतप्रवृत्तिविषयत्वं बोध्यं तेन प्रवृत्तौ लदाश्रये पुरु हेरंब॰
षेच्छाविषये इष्टसाधनत्वाभावेपि न व्यभिचारः यागादावेव हेतुसत्वादिष्टसाधनतानुमानमिति वदंति तद १८

त्। अथ तथापि व्यापारभिन्नस्य कारणस्य परसमवेतव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारैवेति नियमस्य निष्ठ
स्यदादिद्वारा चक्रादिनिष्ठभ्रमिजनके दंडादाववधारितइति तादृशनियमवलेन लिङोस्मदादिसमवेतप्र
वृत्तिजनकत्वं स्वनिष्ठाभिधारूपव्यापारद्वारैवेति निर्वहतीति। लिङ्निष्ठाभिधाख्यपदार्थसिद्धिरेवंशपकीति वा
चेन्न अनुमितिकरणव्याप्तिज्ञानादौ अस्मदादिसमवेतपरामर्शादिजनके स्वनिष्ठव्यापारद्वारकत्वाभावेन व्य
भिचारात्तादृशनियमस्यैवासिद्धेः। न च परसमवेतव्यापारजनकत्वं स्वव्यधिकरणव्यापारजनकत्वरूपं नियम
घटकमिति न व्याप्तिज्ञानादौ व्यभिचारः अस्मदादिसमवेतपरामर्शस्य तद्व्यधिकरणत्वाभावादितिवाच्यं।।
तथापि गयाश्राद्धादौ स्वव्यधिकरणपित्रादिनिष्ठादृष्टरूपव्यापारजनके स्वनिष्ठव्यापारद्वारकत्वाभा
वेन व्यभिचारस्य दुर्वारत्वात् अनुकूलतर्काभावेनोपदर्शितनियमस्याप्रयोजकत्वाच्च एवमुक्तरीत्येष्टसा
धनताज्ञानस्य प्रवृत्तिसामान्ये हेतुत्वावधारणेन आवश्यकेष्टसाधनताज्ञानविषयेष्टसाधनत्वस्यैव
विध्यर्थत्वौचित्यात् एतेनासाभिप्रायो विध्यर्थः स चेच्छाविषयरूपः प्रवर्त्तनात्मकश्चेच्छा च लोके पुरुष

न्या. दे. र्तकत्वव्यवहारानुपपत्तिरप्यसंगता स्यात्तेषां प्रवृत्तिजनकेष्टसाधनताबोधजनकलिङाद्युच्चारयितृत्वस्यै
७९ व प्रवर्तकत्वरूपत्वात् राजप्रेरितपदातेः स्वातंत्र्याभावात् पिशुनप्रेरितराजादेः स्वातंत्र्याच्चाप्रवर्तकत्वव्य
वहारोपपत्तेः पाकभावनावर्तमानतादशायां पचेदितिप्रयोगापत्तिरप्यसंगता तादृशप्रयोगवारणे भवतोऽप्य
ध्याहर्तव्यया भावनानिष्ठस्य तत्तत्प्रवृत्तिप्राक्कालीनतत्तल्लिङादिपदज्ञानोत्तरत्वस्य तादृशप्रयोगोपाधित्वे
नंगीकृतस्यानुकूलत्वस्य प्रतिपादकधातुसमभिव्याहृततत्तत्प्रवृत्तिप्राक्कालीनतत्तल्लिङादिपदज्ञाना
नंतरत्वोभयसंबंधेन पाककृतित्वावच्छेदमंगीकृत्य वा तद्वारणीयः प्रेरणायेष्टसाधनत्वस्याक्षेपेणान्यलभ्यत्वं
तस्य लिङ्वाच्यत्वाभावे प्रयोजकतयोपन्यस्तं तदपि न सत्। इष्टसाधनत्वेन प्रेरणायामप्याक्षेपसं
भवेन प्रेरणाया अप्यन्यलभ्यतया लिङ्वाच्यत्वासंभवात्। तथाहि दृश्यते हि कुलालसमीपे घटसामग्रीं कृ
त्वा तिष्ठति पुरुषे कुलालस्य घटनिर्माणप्रवृत्त्युद्देश्यकेच्छानुमानं ततः प्रवृत्तस्य च कुलालस्येत्थं तत्प्रेरितेन
मया घटं कृतमित्यादिव्यवहारः भवति चेष्टसाधनत्वादिज्ञानं प्रवृत्तिसामग्रीघटकं भवद्भिरपि प्रवर्तनया तदाक्षेपो हेरंब. ७९

गीकारात्। एवं चेष्टसाधनताबोधकशब्दोच्चारणमपि प्रेवप्रवृत्त्युद्देश्यकेच्छारूपप्रेरणाया अन्यलभ्यत्वा
ल्लिङ्वाच्यत्वे। न च सर्वार्थवादेषु परीक्षस्यापि संभवाद्धि निगमनाविरह इति वाच्यं। शब्दनिरपेक्षस्य स्वतः प्र
वृत्तौ बालस्य स्वेष्टसाधनताज्ञानजन्यत्वस्य प्रेरणाज्ञानजन्यत्वस्य चावगमेन शब्दसमनंतरभाविप्रवृत्ति
हेतुत्वेनेष्टसाधनताज्ञानानुमानसंभवस्येव विनिगमकत्वात्। शब्दापेक्षपरप्रयोज्यप्रवृत्तौ दृष्टसाधनता
ज्ञानमनपेक्ष्य प्रेरणाज्ञानजन्यत्वस्य क्वाप्यनवगमात्। तत्र प्रेरणाया दृष्टसाधनतापेक्षस्य भवतोऽपि संप
न्नत्वात्। गुरुतरासत्त्वघटितत्वे दिच्छायाः प्रेरणाया इष्टसाधनताक्षेपमपेक्ष्येष्टसाधनत्वेन प्रेरणाक्षेपे ला
लाघवाच्चेति दिक्। किंचेच्छारूपप्रेरणाया लोके पुरुषनिष्ठत्वसंभवेऽपि वेदस्यापौरुषेयतया सा किं
न्निष्ठेति वक्तव्यं। न च वेदे साऽलिङादिनिष्ठेति वाच्यं गुणे गुणानंगीकारात्। अन्यसत्त्वावच्छिन्नप्रतिद्रव्यत्वेन सम
वायिकारणतया लिङ इच्छायाः समवायिकारणत्वासंभवात्। अन्ने च शब्दस्य द्रव्यत्वात्तत्र दोष इति वाच्यं सं
दृशसमवायिकारणतावच्छेदकतया सिद्धस्य मूर्तत्वस्य मनोऽभावेन मूर्तद्रव्यत्वस्य विभुत्वाभावेनामूर्तद्रव्य

ना॰ को॰ सर्वत्रासंभवात् न च भवतो जीवातिरिक्तेश्वरे निषेधांगीकारवदिदिकाशदेपि निषेधांगीकारे बाधकाभावः गुणो गुण
८० स्यासामिरूपगमादिति वाच्यं ईश्वरस्य चेतनत्वेन शब्दस्य चाचेतनत्वेन वैषम्यात् अनुभवविरुद्धयत्किंचित्क
ल्पने उपेक्षणीयत्वापत्तेश्च अत्रेदं विचार्यते इष्टसाधनत्वविषयितया प्रवृत्तिजनकतावच्छेदकत्वपर्या
प्त्यधिकरणं नवा इष्टसाधनत्वज्ञानाकालीनकृतिसाध्यत्वज्ञानं प्रवर्त्तकं न वेति वा विप्रतिपत्तिः तत्र प्रथ
मे विधिकोटिर्नैयायिकानां निषेधकोटिर्गुरूणां द्वितीये विधिकोटिर्गुरूणां निषेधकोटिर्नैयायिकानां
अत्र गुरवः कृतिसाध्यताज्ञानं चिकीर्षाद्वारा प्रवृत्तिहेतुः नेष्टसाधनताज्ञानं उपायेच्छाद्वारा प्रवृत्ते
र्हेतुः उपायेच्छायाः स्वातंत्र्येण प्रवृत्तौ हेतुतायां मानाभावात् न च कृतिसाध्यताज्ञानस्य प्रवृत्तौ हेतुता
यां मानाभावः कृतसाध्यताज्ञानकाले प्रवृत्तिवारणाय कृतसाध्यताज्ञानाभावस्यैव हेतुत्वमस्त्विति वा
च्यं यावत्प्रकारकेच्छा तावत्प्रकारकज्ञानसाध्या इति व्याप्तिबलात् चिकीर्षां प्रति कृतिसाध्यताज्ञान हेरंब॰
स्य हेतुत्वसिद्धौ चिकीर्षाद्वारा कृतिसाध्यताज्ञानस्य प्रवृत्तिहेतुत्वसिद्धेः अन्यथा कृतसाध्यताज्ञाना ८०

सत्त्व लाघवेन लघुसत्तिभेदकल्पनमनाहत्य संवेधभेदमात्रमाश्रित्य पचति न पचतीत्यादौ समानाकारबोधांगीकारे
चैत्रः पचति न पचतीत्यादिवाक्यजन्यशाब्दबोधानंतरं वर्त्तमानकालीनपाककृतितदभावयोश्चैत्रवृत्तित्व
संशयानिरासस्यानुभवविरुद्धस्यानुपपत्तेः पाककृतिः कीदृशीति प्रश्ने चैत्रः पचति न पचतीत्युत्तरयोरौचित्यापत्ते
श्चाभवन्मतेपि संसर्गभेदेन लघुसत्तिभेदकल्पनप्रयुक्तगौरवस्यावश्यकत्वाच्चाकिंचैवं चैत्रः पश्यति चै
त्रं पश्यति चैत्रेण पश्यतीत्यादौ लाघवात् तत्तद्विभक्तीनां जन्यत्वार्थसंसर्गकबोधजनकत्वे तात्पर्यग्राहकता
मंगीकृत्य चैत्रप्रकारकक्रियाविशेष्यकैकरूपबोधांगीकारसंभवे न प्रतिसमभिव्याहारं नानार्थ्यसुब
ला र्थयोः सुबर्थक्रिययोश्चान्वयनिर्वाहाय लघुसत्तिभेदांगीकारप्रयुक्तगौरवस्यानापत्तिः एतेन पचेत्रप
चेदित्यत्रापि लुप्त्यत्तिभेदकल्पनाभावप्रयुक्तलाघवोक्ति निरस्ता पचेदिति शब्दजन्यबोधान्न प्रवर्त्त
यति निवर्त्तयति वेति संशयनिरासासंभवाच्च तादृशबोधादेव कृतिः प्रेरणावती न वेति संशयनिरासा
पत्तेश्च कीदृशी कृतिरिति प्रश्ने पचेत् न पचेदित्युत्तरयोरुत्तरत्वापत्तेश्च किं चेत्यादिनोक्ताचार्यादेः प्रव

न्या०कौ० रकज्ञानाभावघटितप्रवृत्तिसामग्रीसत्त्वकालीनतादृशानुमितिसामग्रीकालेपाकगोचरप्रवृत्तिवारणाय तादृशानु
८१ मितिसामग्र्याः प्रतिबंधकत्वकल्पनेन महागौरवापत्तेः नच कृतिसाध्यत्वाभाववत्साकवान्देश एतादृशविशिष्टविष
यताशालिमानसंप्रतिपाकगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वेन कल्पते तत्र तादृशमानससामग्री
काले पाकविशेष्यककृतिसाध्यत्वाभावप्रकारकज्ञानस्यावश्यकत्वे प्रवृत्तिसामग्र्या एवाभावात् कृतिसाध्य
त्वाभाववान् एतादृशज्ञानाभावस्य हेतुत्वे लाघवमिति वाच्यं। कृतिसाध्यत्वप्रकारककृतिसाध्यत्वाभाव
प्रकारकपाकविशेष्यकज्ञानयोरेकदा सत्त्वे न तादृशमानसंप्रति तादृशसामग्र्याः प्रतिबंधकत्वं मयापि क
न कल्प्यते इति बाधकाभावात्। एवं कृतिसाध्यताज्ञानस्य हेतुत्वे कृतिसाध्यत्वप्रकारकपाकविशेष्यकज्ञा
नत्वावच्छिन्नाभाववान् मानसंप्रतिपाकगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वेन कल्प्यते तादृशप्रवृत्तिसामग्री
काले पाकविशेष्यककृतिसाध्यत्वप्रकारकज्ञानस्यावश्यकत्वेन कृतिसाध्यत्वप्रकारकज्ञानाभावमान हेरंब०
से स्वरूपसत्कृतिसाध्यत्वप्रकारकज्ञानप्रतिबंधकत्वेनोपपत्तिरिति भवन्मते तादृशमानसंप्रति तादृश ८१

सामग्र्याः प्रतिबंधकत्वकल्पनेन महागौरवापत्तिरिति एवं प्रामाण्यविशिष्टकृतिसाध्यत्वप्रकारकपाकविशेष्यक
ज्ञानवान् इष्टमिति यावत् सोयाकगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वेन कल्प्यते तादृशविशिष्टविषयताशालि
मानससामग्रीघटकत्वेन अप्रामाण्यप्रकारककृतिसाध्यत्वप्रकारकज्ञानस्यावश्यकत्वे न न तादृश्या
सामग्र्याः प्रतिबंधकत्वं भवन्मते कृतिसाध्यत्वप्रकारकज्ञानाभावघटितप्रवृत्तिसामग्री तादृशमानस
सामग्र्योरेककालसत्त्वे बाधकाभावात्तादृशमानसंप्रति तादृशप्रवृत्तिसामग्र्याः प्रतिबंधकत्वकल्पने म श्रा
गौरवापत्तिरिति न च पाककृतिसाध्यतानेन प्रमेति ज्ञानाभावस्य स्वातन्त्र्येण — ननु त्वं मयापि वाच्यमिति वा
च्यं। तर्हि एतादृशशर्वकारणभावाकल्पनेन लाघवादिति। एवं इष्टविशिष्टकृतिसाध्यत्ववत्साकवानयं
देश इति विशिष्टवैशिष्ट्यबोधसामग्र्याः प्रतिबंधकत्वे विशेषणतावच्छेदकप्रकारकज्ञानस्य निवेशोपि
नास्ति मन्ते प्रवृत्तिसामग्रीमुद्दयानस्यावश्यकत्वादिस्तत्र मस्सद्गुरुहेयम्। अथ कृतिसाध्यताज्ञानस्य हेतुत्वे जी
वनयोनि कृतिसाध्यताज्ञानाभावात्प्राणपंचकसंचारकथं न प्रवृत्तिः न चेष्टापत्तिः तस्य सुखदुःखदिवत्प्र

मा॰ टी॰ प्रवृत्तिस्वरूपायोग्यत्वात्॥ न च प्रवृत्तिसाध्यताज्ञानत्वेन हेतुत्वात् तत्र प्रवृत्तिसाध्यताज्ञानाभावान्न प्रवृत्तिरिति वा
८२ च्यं पाको न कृतिसाध्यः पाकः प्रवृत्तिसाध्य इति ज्ञानानंतरं च कृतसाध्यतेन तो कृतिसाध्यताज्ञानत्वेन कृतिसाध्य
ताज्ञानस्यैव प्रवर्तकत्वं स्वीकरणीयं तथा च जीवनयोनिकृतिसाध्यताज्ञानात् प्राणपंचकसंचारे प्रवृत्त्यापत्ति
रिति चेत् न चिकीर्षाधीनत्वस्य कृतौ विशेषणत्वात् तत्र चिकीर्षाधीनकृतिसाध्यताज्ञानाभावान्न प्र
वृत्तिः न च साध्यतायाः द्विषयितासंबंधावच्छिन्नप्रतियोगिताकप्रवृत्त्यभावत्वावच्छिन्नप्रतियोगिताकाभा
वविशिष्टविशेष्यतासंबंधेन कृतिसाध्यताज्ञानस्य हेतुत्वात् तादृशसंबंधेन कृतिसाध्यताज्ञानस्य प्राण
पंचकसंचारेऽभावात् प्रवृत्त्यभावापत्तौ कथं चिकीर्षाधीनत्वविशेषणमिति वाच्यं घटे जीवनयोनि
कृतिसाध्यताज्ञानात् प्रवृत्त्यापत्तेस्तादृशसंबंधेन कृतिसाध्यताज्ञानस्य तत्र सत्त्वात् तद्वारणाय कृतौ
तद्विशेषणस्यावश्यकत्वादिति एतेन धर्मितावच्छेदकमिश्रितकृतिसाध्यताज्ञानस्य हेतुत्वकल्पनात् प्राण हेत्व॰
पंचकसंचारत्वं धर्मितावच्छेदकीकृत्य कृतिसाध्यताज्ञानस्य हेतुत्वाकल्पनात् तत्र प्रवृत्त्यापत्तेरभावात् कथं ८२

भावस्य सर्वदा सत्त्वेन सर्वदा चिकीर्षापत्तेः कृतसाध्यताज्ञानाभावस्य हेतुत्वे अवच्छेदकगौरवापत्तेश्च न च भवन्म
ते कृतिसाध्यताज्ञानस्य हेतुत्वे निश्चयत्वनिवेशेन गौरवमिति वाच्यं कृतसाध्यताज्ञानत्वेन प्रतिबंधकताया
मतनिश्चयानास्कंदितत्वनिवेशेन गौरवापत्तेः कृतिसाध्यत्वनिश्चयापेक्षया भ्रमत्वनिश्चयस्य गुरुशरीरत्वा
त् अत्र केचित् कृतिसाध्यताज्ञानकृतसाध्यताज्ञानाभावस्य हेतुत्वे कल्पनीये तत्र कृतसाध्यताज्ञानाभा
वविशिष्टं प्रति कृतिसाध्यताज्ञानाभावत्वेन हेतुत्वकल्पनावश्यकत्वे तदपि कृतसाध्यताज्ञानाभावविशिष्ट
तया कृतकार्यकारणभावेनैव निर्वाहसंभवात् न च प्रवृत्तौ कृतसाध्यताज्ञानाभावस्य स्वातंत्र्येण हेतुत्व
मिति प्राहुः तदसत् कृतिसाध्यताज्ञानस्य हेतुत्वे भवदुक्तरूपोपदर्शितरीत्या पाकगोचरप्रवृत्तिं प्रति कृतिसाध्य
ताभाववान्पाक एतादृशानुमितिसामग्र्याः प्रतिबंधकत्वकल्पने प्रवृत्तिसामग्रीकाले पाकत्वधर्मिताव
च्छेदककृतिसाध्यताज्ञानस्यावश्यकत्वेन बाधमुद्रयैव तादृशानुमितिप्रतिबंधकत्वेनानाभाव
घटेतानुमितिसामग्र्याः प्रवृत्तिसामग्र्याश्च युगपन्मिलनासंभवेनैवैवोपपत्तेः भवन्मते कृतसाध्यत्वप्रका

सा॰के॰ तत्र प्रवृत्तिरिति न च श्रमो न कृतिसाध्यः किंतु भोजनसाध्यस्तथा च कृतिसाध्यताज्ञानाभावादेव प्रवृत्तिवारणसंभवे
८३ किमर्थं कृतौ तादृशविशेषणमिति वाच्यं क्रियां विनापि गुरुतरभारोत्तोलनादौ श्रमस्यानुभवेन कृतिसाध्यत्वे
पि श्रमे सत्त्वादिति न च धर्मितावच्छेदकमिष्टे तत्कृतिसाध्यताज्ञानस्य हेतुत्वात् तत्र श्रमत्वं धर्मितावच्छेदकं कृतस्य कृति
साध्यताज्ञानस्य हेतुत्वाकल्पनात् न तत्र प्रवृत्त्यापत्तिरिति वाच्यं धर्मितावच्छेदकताप्रसाससा कृति
साध्यताज्ञानस्य लाघवेन हेतुत्वकल्पनात् श्रमे प्रवृत्त्यापत्तिसंभवाद्विशेषणस्यावश्यकत्वादिति अत्रेद
मवधेयं तादृशविशेषणदानेपि पत्रअन्नपरिपाकादिप्रयोजकश्रमस्येष्टया गमनागमनादिकं कृतं तत्र
गमनागमनादिकृते फलेच्छामुद्दिश्य श्रमेच्छाधीनत्वेन तादृशकृतिसाध्यत्वाद्ज्ञानात् तत्र श्रमे तादृशकृतिसा
ध्यत्वमात्रं च भोजनादिनान्तरीयकश्रमे प्रवृत्तिवारणाय प्रकारता संबंधेन विशेष्यतावच्छेदकतासंबंधेन
वा प्रवृत्तिं प्रति श्रमत्वमेदस्यावश्यं हेतुतया स्वेच्छाधीनत्वविशेषणं व्यर्थमेव परंतु घटादौ जीवनयोनिकृतिसा हेरंबं॰
ध्यताभ्रमात् प्रवृत्तिवारणाय इच्छाधीनत्वमात्रं कृतौ निवेशनीयं न च गुरुमते ऽन्यथाख्यात्यस्वीकाराद्दो ८३

षइति वाच्यं विसंवादिप्रवृत्त्यनुरोधेन तादृशकृतिसाध्यत्वासंसर्गग्रहादेर्हेतुत्वेन हेतुताया आवश्यकत्वात्॰
अन्यथा ख्यातिस्थानाभिषिक्तज्ञानद्वयस्वीकारेपि तादृशकारणबलादुक्तापत्तिवारणसंभवादिति॰
केचित्तु भ्रमो न कृतिसाध्यः किंतु क्रियासाध्य इति तथा च कृतिसाध्यताज्ञानाभावादेव प्रवृत्त्यापत्तिवार
णसंभवात् कृतौ तद्विशेषणमिति न च गुरुतरभारोत्तोलनादौ क्रियाविरहात् कथं भ्रम इति वाच्यं
तत्रापि नाडीक्रियाधीनभ्रमसंभवात् एवं पूर्ववदित्याहुः न च केवलकृतिसाध्यताज्ञानस्य हेतुत्वे तत्रो
पि भोजने प्रवृत्तेरिति वाच्यं तत्तत्कालीनकृतिसाध्यताज्ञानस्यापि हेतुतया तत्कालीनकृतिसाध्य
ताज्ञानस्याहेतुत्वे न तत्र प्रवृत्त्यापत्तिसंभवात् न च तत्तत्कालीनकृतिसाध्यताज्ञानस्य हेतुत्वे किं मानमि
ति वाच्यं इदानीं कृतिसाध्यं करवाणि कृतिसाध्यमिति ज्ञानकाले प्रवृत्त्यापत्तेरेव मानत्वात् अथ इदानीं कृ
तिसाध्यं नेष्टसाधनमिति ज्ञानकाले प्रवृत्त्यापत्तिः न च तत्तत्कालीनकृतिसाध्यताज्ञानस्य हेतुताकल्प
नेनैव तद्वारणमिति वाच्यं अत्र तत्कालपदेन दंडात्मकः कालो ग्राह्यः क्षणस्तस्यापरिचेयत्वात्

न्या॰ कौ॰ यावदंडात्मककालमध्ये तत्तस्यतदंतर्गततत्तत्क्षणे प्रवृत्तिदर्शनात्तत्तत्कालीनकृतिसाध्यताज्ञानस्य हेतुतापा
८६ आवश्यकत्वेद्वितीयक्षणेनेष्टसाधनमितिज्ञाने सतिसत्त्विचकृतिसाध्यताज्ञाने तदुत्तरक्षणे प्रवृत्त्या
पत्तेर्वज्रलेपत्वादिति चेन्न· स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य हेतुत्वात्तत्र स्वं पुरुषः
तत्रविशेषणं कामनाप्रुचितत्कालजीवित्वं च तथा च नेष्टसाधनमिति ज्ञानकाले तल्लिंगककार्यताविर
हान्न प्रवृत्तिः नच सामान्यतः स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे विशेषलिं
गककार्यताज्ञानसत्वे नेष्टसाधनमिति ज्ञानसत्वे तस्य प्रवृत्त्यापत्तिरिति वाच्यं कार्यगोचरप्रवृत्ति
त्वावच्छिन्नं प्रति इष्टसाधनत्वालिंगककार्यताज्ञानस्य हेतुत्वात्तनिस्य गोचरप्रवृत्तित्वावच्छिन्नं प्रति
प्रुचितत्कालजीवित्वलिंगककार्यताज्ञानस्य हेतुत्वात्तथा च नेष्टसाधनमिति ज्ञानकाले इष्टसाधन
त्वालिंगककार्यताज्ञानविरहान्न प्रवृत्त्यापत्तिरिति अथवा लस्य स्तनयानगोचरप्रवृत्तिर्न स्यात् इष्टसाध हेरंब॰
नतालिंगककार्यताज्ञानापेक्षणे शुष्ककंठतया बालोपि येतेति चेन्न· एककालीन एकात्मवृत्तित्वसंबंधेन ८६

त

तादृशे विशेषणमिति निरस्तं कृतिसाध्यताज्ञानात् घटे प्रवृत्तिवारणाय तदावश्यकत्वात् घटत्वं धर्मितावच्छे
दकीकृत्य घटगोचरप्रवृत्त्यनुरोधेन तादृशज्ञानस्य हेतुत्वकल्पनादिति । अतएव प्रवृत्तिं प्रति कृतिसा
ध्यताज्ञानस्य धर्मितावच्छेदकताप्रत्यासत्त्यैव हेतुता लाघवात् तथा च प्राणपंचकसंचारत्वे चिकीर्षाधी
नकृतिसाध्यत्वभ्रमात् प्रवृत्तिवारणाय प्रकारतासंबंधेन प्रवृत्तिं प्रति प्राणपंचकसंचारत्वभेदस्यावश्यं
हेतुताकल्पनीयतया कृतत्वाचिकीर्षाधीनत्व विशेषणं व्यर्थमेवेत्यपि परास्तं· उक्तदोषवारणाय तादृशवि
शेषणस्यावश्यकत्वात् नच भोजनसाध्येश्रमादौ प्रवृत्त्यापत्तिस्तत्रापि चिकीर्षाधीनकृतिसाध्यताज्ञानस
त्वादिति वाच्यं स्वेच्छाधीनत्वस्यैव कृतौ विशेषणीयत्वात् तत्वं च स्वावच्छिन्नविशेष्यताकेच्छाधीनत्वं स्वपदं
प्रवृत्तिविशेष्यतावच्छेदकत्वेनाभिमततत्तद्धर्मपरं उत्कटक्षुत्काले च श्रमत्वादेस्तादृशधर्मतया भोजनादिकृतेः श्र्व
तरवच्छिन्नविशेष्यताकेच्छानधीनतया श्रमोनस्वेच्छाधीनकृतिसाध्यः किंतु भोजनेच्छाधीनकृतिसाध्य इत्यतः
श्रमो नानरीयकतयेष्यते अन्येच्छाधीनकृतिसाध्यत्वात् अतः तथा च स्वेच्छाधीनकृतिसाध्यताज्ञानाभावान्न

सा॰कौ॰ कालीनप्रागभावविशिष्टत्वं इष्टसाधनत्वेच्छावह्निनश्चैवक्षणवृत्तित्वं तथाचएकक्षणे प्रागभावविशिष्टत्वे
८५ पूर्वक्षणवृत्तित्वं विरुद्धमतो ज्ञानेन गृह्यानुमशक्यतया ऽन्यथानुपपत्त्या तादृशज्ञानविशिष्टज्ञानत्वेन हे
तुत्वमितिनचइष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानत्वेन हेतुत्वे इष्टसाधनताज्ञानकृतिसाध्य
ताज्ञानप्रामाण्यप्रतीतानाभावनिश्चयत्वादीनामेकत्र निवेशे विनिगमनाविरहेणानंतकार्यकारणभावाप
त्तेरिति वाच्यं इष्टसाधनताज्ञानत्वेन कृतिसाध्यताज्ञानत्वेन हेतुत्वमस्तु लाघवादिति वाच्यं पाक
मुख्यविशेष्यकेच्छात्वावच्छिन्नं प्रति पाकविशेष्यकइष्टसाधनताज्ञानत्वेन हेतुत्वं न कल्प्यते मन्मते मुख्य
विशेष्यकपाकसाध्यसुखत्वप्रकारकेच्छाया एवोपगमेन पाकमुख्यविशेष्यकइच्छाविरहेणोक्तहेतुत्वाक
ल्पनात् भवन्मते तत्कल्पने गौरवमिति एवं पाकमुख्यविशेष्यकइच्छां प्रति पाकमुख्यविशेष्यकसिद्धत्वज्ञा
नाभावस्य हेतुत्वाकल्पनात् विलाघवाच्च न च सुखविशेष्यकइच्छां प्रति सुखत्वप्रकारकज्ञानत्वेन हेतुत्वे ला
घवात् भवन्मते पाकसाध्यसुखत्वप्रकारकेच्छास्वीकारेण पाकतासाध्यसुखत्वप्रकारकज्ञानत्वेष्टनहेतुत्वे हेरंब॰ ८५

शरीरगौरवमिति वाच्यं पाकसाध्यसुखत्वप्रकारकइच्छाया उभयवादिसिद्धत्वेन भवन्मते सिद्धकार्यकार
णभावकल्पनेनैव निर्वाहसंभवात् परंतु सुखत्वप्रकारकेच्छां प्रति सुखत्वप्रकारकज्ञानत्वेन हेतुत्वे न कल्प्य
ते तादृशेच्छाविरहात् भवन्मते तत्कल्पने महागौरवापत्तेः न च पाकगोचरचिकीर्षां प्रति पाकसाध्यसुखेच्छा
त्वेन हेतुत्वे गौरवं मन्मते सुखेच्छात्वेन हेतुत्वे लाघवमिति वाच्यं पाकसाध्यसुखेच्छाया एव सुखेच्छात्वेन हेतुत्वा
दिति वस्तुतस्तु इष्टसाधनतालिंगककार्यतानुमितिनिष्ठवैजात्यमवश्यं व्यभिचारभिया स्वीकरणीयं त
थाच विजातीयानुमितित्वेनैव प्रवृत्तौ कारणत्वमस्तु लाघवात् भवन्मते कृतिसाध्यताज्ञानेष्टसाधनता
ज्ञानेनिश्चयत्वेनिवेशप अनाहार्यत्वे च निवेशप स्वातंत्र्येण प्रवृत्तौ इष्टसाधनताज्ञानस्य कारणत्वकल्प
ने एकत्र अप्रामाण्यप्रकारकज्ञानाभावनिश्चयत्वादिनिवेशप्रयुक्तविनिगमनाविरहेणानंतकार्यका
रणभावकल्पने च महागौरवापत्तिः। मन्मते अनुमितौ संशयत्वाहार्यत्वाभावेन निश्चयत्वाद्यनिवेशात्
एवं स्तनपानगोचरप्रवृत्तिसिद्धत्वेन स्मरणात्मकपरामर्शजन्यानुमितेस्वीकारान्न दोषः एवं प्रसक्तादोष

न्या॰ कौ॰ वत्तिसामग्रीप्रतिबंधकतायांइष्टसाधनत्वप्रकारकज्ञानानिवेशेलाघवंभवन्मतेतत्प्रवेशेमहागौरवापत्तेः॥
८६ एवंसामग्रीप्रतिबंधकतायांनिश्चयत्वादिनिवेशप्रयुक्तविनिगमनाविरहेनिबंधनानेकप्रतिबध्यप्रतिबं
धकभावकल्पनेनानंतगौरवमिति॰ अथश्रुतिविहितकालजीवेतलिंगककार्यतानुमान हेतुत्वकल्पनागौ
रवंएवंचतत्रापिलाघवेनविजातीयानुमितित्वेननिसर्गोच्चरप्रवत्तित्वेनकार्यकारणभावःकल्पनीयः॥
तथाचउभयपरामर्षजन्यानुमितौउभयजातिसत्वेनप्रत्येकमात्रजन्यानुमितौपरस्परासंताभावसमा
नाधिकरणप्रत्येकजातिसत्वेनजातिसांकर्यात्कथंविजातीयानुमितित्वेनहेतुत्वमितिचेन्नप्रवत्तिजन
कतावछेदकत्वेनतदुभयपरामर्षजन्यानुमितौएकाजातिःस्वीक्रियतेतादृशजातेरेवकारणतावछेदकतात्क्त्न
चयत्रेष्टसाधनमितिज्ञानविषयेघटत्वादिलिंगिकादृष्टसाधनताज्ञानविषयेइष्टसाधनत्वादिलिंगककार्य
तानुमितिर्ध्वनयाकौविषयीकृतौ सम्रहालंबनात्मिकाजातात्तत्रतादृशावैज्ञान्यस्यावश्यकत्वेनइष्टसाध
नमितिज्ञानाविषयेप्रवत्तिःस्यात्॰ तादृशावैजात्यावछिन्नानुमितित्वादित्विवाच्यंभवन्मतेपिशब्दसाधनता हेत्व॰ ८६

इष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानत्वेनहेतुत्वात्तस्तनमानगोचरप्रवत्तिस्थलेतादृशसंबंधे
नस्मरणात्मकइष्टसाधनताज्ञानविशिष्टतादृशज्ञानसंभवात्रव्यभिचारःनचेष्टसाधनताज्ञानविशिष्टकृ
तिसाध्यताज्ञानत्वेनकृतिसाध्यताज्ञानविशिष्टतादृशज्ञानत्वेनवाविनिगमनाविरहात्कार्यकारणभावद्वयंत
द्वयेसयाइष्टसाधनताविषयककार्यताज्ञानत्वेनैवहेतुतास्त्वएककालीनत्वाप्रवेशेनलाघवामिति
वाच्यं॥तादृशेष्टसाधनताविषयककृतिसाध्यताज्ञानस्यासंभवात्॰ एकत्रएककालावछेदेनसाध्यत्वसाध
नत्वयोर्विरोधेनगृहीतुमशक्यत्वात्तथाहि॥साध्यत्वंकृत्युत्तराघ्रक्षणवत्तित्वंइष्टसाधनत्वंचइष्टाप्य
न्तिमत्वंसएनत्तित्वेसतिइष्टकालवत्तित्वनयोरेकत्रएकज्ञानेनग्रहमाणताज्ञानसामान्यसामग्रीवशा
द्विशेष्यविशेषणयोरेकक्षणवत्तित्वं भासतेतथाचैकस्याघ्रक्षणवत्तित्वंइष्टकालवत्तित्वंचाप्रसिद्धम
तोज्ञानेनग्रहीतुमशक्यत्वाइष्टसाधनताविषयककृतिसाध्यताज्ञानासंभवेनइष्टसाधनताज्ञानविशि
ष्टकृतिसाध्यताज्ञानत्वेनावश्यहेतुत्वंस्वीकरणीयमितिपद्यकृतिसाध्यत्वंप्रतियोगितासंबंधेनकृति

मा॰ कौ॰ नेष्टबलवद्द्वेषापत्तिभीत्याउपायेच्छात्वावच्छिन्नंप्रति इष्टसाधनताज्ञानत्वेनहेतुत्वेलाघवात्स्वीयविशेष्यता
८९ वच्छेदकत्वेनकार्यतावच्छेदकसंबंधः इष्टसाधनत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकत्वप्रत्यासत्त्याहे
तुत्वमितिच पाकेच्छां प्रति पाकः सिद्ध इति ज्ञानस्य प्रतिबंधकत्वाकल्पनेन लाघवे तद्विनस्वप्रकारतानिरू
पितविशेष्यतावच्छेदकत्वसंबंधकत्वसंबंधेन क्लृप्तप्रतिबंधकत्वेनैव निर्वाहसंभवादिति यत्तु विजातीयानुमि
तित्वेन हेतुतानेष्टसाधनत्वज्ञानस्य हेतुत्वेन अविजातीयानुमितित्वेन हेतुत्ववत् इष्टसाधनताज्ञानोद्बोधि
तविजातीयस्मृतित्वेनापि कारणत्वमस्तु विनिगमनाविरहात् नचेष्टसाधनताज्ञानस्य स्मृत्योद्बोधकत्वा
कल्पनात् स्मृतित्वेन हेतुत्वमिति वाच्यं॥ जन्यमात्रस्य कालोपाधित्वेन कालस्योद्बोधकत्वेन तस्य काल
त्वेन उद्बोधकत्वे कल्पनादिति नच विनिगमनाविरहादुभयस्यापि कारणत्वमिति वाच्यं। अनुमितिमात्र
सत्वे प्रवृत्तिर्नस्यात् एवं इष्टसाधनतालिंगककार्यतानुमितौ इष्टसाधनताज्ञानविशिष्टहृत्तिसाध्यतामान हेरं॰
सेवातादृशवैलक्षण्यप्रसंगी कार्यमिसत्त्वापि विनिगमनाविरहः॥ नचानाहार्यत्वादिनिवेशे गौरवमेव विनि ८९

त्वे

मकमिति वाच्यं तादृशज्ञानस्याप्रत्यक्षत्वात् एव तादृशज्ञाने स्वीकारात् किंच प्रवृत्ताविष्टसाधनताज्ञानस्य हेतु
ताकल्पने लाघवमित्यपि न युक्तं इष्टसाधनताज्ञानस्य हेतुत्वे पाकविशेष्यक इष्टसाधनत्वप्रकारकतान
त्वावच्छिन्नाभावसमानसेप्रवृत्तिसामग्र्याः प्रतिबंधकत्वेन कल्पने ज्ञानाभावप्रहे स्वरूपसंज्ञानस्यैव प्रतिबंध
ग्रं कत्वात् अतएवाकांक्षार्थे अन्वयानुभवे सति अर्थपानुभवाभावज्ञानं नास्तीत्येवोक्तं पक्षधरमिश्रैः भ
वन्मते इष्टसाधनताज्ञानजन्यविलक्षणानुमित्युत्तरं तादृशमानसवारणीयता तादृशसामग्र्याः प्रति
बंधकत्वे महागौरवापत्तेः। नच लिंगोपहितलैंगिकभानांगीकर्तृनैयायिकानां मते विलक्षणानुमि
तिकाले इष्टसाधनताज्ञानावश्यकत्वेन मम मापि तादृशसामग्र्याः प्रतिबंधकत्वं कल्प्यत इति वाच्यं अ च
स्मन्मते तथास्वीकारेपि अर्थतथास्वीकारात् साध्यत्वसाधनत्वयोरेकत्रभानस्यास्वीकारात् एवं इ
ष्टसाधनत्वाभाववान् पाक एतादृशानुमितिसामग्र्याः पाकगोचरप्रवृत्तिं प्रतिप्रतिबंधकत्वं न कल्प्यते ता
दृशसामग्रीकाले इष्टसाधनताज्ञानसत्वेन बाधमुद्रयैव प्रतिबंधकत्वसंभवादिति। अपि च अप्रामाण्य

त्र

न्या॰ कौ॰ व्याप्य इति रुचिविष्टसाधनताज्ञानं कार्यत्वव्याप्येष्टसाधनत्वेवान पेक्ष्य कइ सा कारक सम्हात्वेन परामर्शा
८८ नंतरं यत्रेष्टसाधनताज्ञानमप्रमा पाक श्च कार्य इत्यनुमितिः तदनंतरं चिकीर्षाकाले प्रवृत्तिकाले वा अ
प्रामाण्यविशिष्टेष्टसाधनताज्ञानमानसवारणाय तत्र चिकीर्षा सामग्री प्रवृत्तिसामग्री वा प्रतिबंधका
वाच्या अतो गौरवापत्तेः मन्मते तादृशसामग्रीकाले प्रवृत्तिसामग्र्या एवाभावात् अप्रामाण्यप्रकारकज्ञाना
नास्कंदितेष्टसाधनताज्ञानरूपकारणविरहादिति। न चेष्टसाधनताज्ञानस्य हेतुत्वे प्रवृत्तिसामग्री
प्रतिबंधकतायां इष्टसाधनताज्ञानस्य वैशिष्ट्यानिवेशे लाघवमिति वाच्यं इष्टाविशिष्टइष्टसाधनं मू
तपाकवानयं देशः इत्याकारकविशिष्टविषयताशालिप्रत्यक्षसामग्र्याः प्रवृत्तौ प्रतिबंधकतायां विशेष
णतावच्छेदकप्रकारकज्ञाननिवेशो न क्रियते इति लाघवं संभव[redacted]दिति एवं च इष्टसाधनतां मृतइति
साध्याभूतपाककालीनज्ञानवानहमिति विशिष्टविषयिताशालिमानसे घटादिचाक्षुषसामग्री घटाघनु
मितिसामग्री घटादिशाब्दसामग्र्यादीनां प्रतिबंधकत्वं न कल्प्यते विशेषणतावच्छेदकप्रकारकज्ञानमुद्राया हरे॰ ८८

ज्ञानाधीनइच्छोत्तरं उपादानविषयेकानिष्टसाधनताज्ञानोत्तरं प्रवृत्त्यापत्तेः तत्रेष्टापत्तौ मन्मतेपि तुल्यमिति।
न च विसंवादिप्रवृत्तौ स्वतंत्रोपस्थितमन्कृतिसाध्यत्वासंसर्गागतस्य हेतुत्वकल्पने गौरवमिति वाच्यं एक
देशिनोऽन्यथा ख्यातिस्वीकारे सति विरहात्तन्न च गुणगत जातौ मानाभावे कथं विजातीयानुमितित्वेन
हेतुत्वमिति वाच्यं॰ अत्रापि एकदेशिमतात्म्रयणादिति वदंति॥ अत्र नैयायिकाः। यद्यपि इष्टसाधनताज्ञान
विशिष्टकृतिसाध्यताज्ञानत्वेन हेतुत्वं न तत्र विनिगमनाविरहेण कार्यकारणभावद्वयस्यावश्यकत्वना
वच्छेदकगौरवेण गौरवापत्तेः तदपेक्षया स्वातंत्र्येष्टसाधनताज्ञानत्वेन कृतिसाध्यताज्ञानत्वेन हेतुत्वमे
व लघीयः एवं च इष्टसाधनताज्ञानकृतिसाध्यताज्ञाननिश्चयत्वानाहार्यत्वाप्रामाण्यग्रहाभावादीना
मेकत्र निवेशे विनिगमनाविरहेण नैतत्कार्यकारणभावकल्पनाद्यतेश्चं मन्मते स्वतंत्रहेतुत्वे नैकत्राप्र
माण्यग्रहाभावादीनामनिवेशेन लाघवादिति मध्यपिठत्वेयाकमुख्यविशेष्यकेच्छां प्रति इष्टसाधनता
नत्वेन हेतुत्वे गौरवेतद्यपि नु भवन्मते चिकीर्षा प्रति इष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानत्वेन हेतु

न्या॰ कौ॰ दृशापक्षज्ञानत्वेनैव प्रतिबंधकत्वकल्पने लाघवात्। भवन्मते तादृशपरामर्शस्थले प्रवृत्तिसामग्र्याः अनावश्यकत्वे
८८ न तादृशपरामर्शघटिततादृशसिद्ध्यभावघटितानुमितिसामग्री घटादिप्रत्यक्षेच्छाविरहविशिष्टप्रतिबंधिकाया
आवश्यकत्वे गौरवापत्तेः। अस्मन्मते परामर्शसिद्ध्यभावाघनिवेशे लाघवसंभवात्। न च सिद्धज्ञानकाले प्रवृत्तिसा
मग्रीविरहे प्रत्यक्षाद्यापत्तिवारणाय तादृशानुमितिसामग्रीप्रतिबंधिकाभावनापि वाच्येति वाच्यं। असिद्ध
त्वस्यापि साध्यपक्षकोटौ निवेशादिति एवं इष्टसाधनत्ववान् कृतिसाध्यीभूतपाककालीनज्ञानवानहं
मितिमानसे प्रवृत्तिसामग्रीप्रतिबंधकताया कृतिसाध्यताज्ञानस्य निवेशो न क्रियते विशेषणतावच्छेदक
का प्रकारकज्ञानमुद्रया तस्यावश्यकत्वादिति भवन्मते कृतिसाध्यतानुमितेरेव हेतुत्वात् तस्य निवेशस्यावश्य
कत्वादि सकलमसत् इहेष्टेति सिद्धम् इष्टसाधनताज्ञानस्य प्रवृत्तौ हेतुत्वमिति। अत्र सोदलोपाध्यायाः। पाकग
तेष्टसाधनताज्ञानं न हेतुः चिकीर्षां प्रति तस्याहेतुत्वात् अचिकीर्षितस्य प्रवृत्त्यविषयत्वेन तस्य चिकी हेरंब॰
र्षाद्वारैव हेतुत्वात् चिकीर्षापदस्य सन्नंतत्वेन सन्नो धात्वर्थमुख्यविशेष्यकेच्छावाचित्वेन धात्वर्थमु ८८

ख्यविशेष्यकेच्छावाचित्वेन धात्वर्थमुख्यविशेष्यकेच्छां प्रति धात्वर्थमुख्यविशेष्यकत्वइष्टसाधनताज्ञानत्वेन हे
तुत्वात् कृतिगतेष्टसाधनताज्ञानत्वेन हेतुत्वमिति न च कृतिर्न्यायाकृत्या कृतिरिष्टसाधनमिति ज्ञानकाले प्रवृत्त्याप
त्तिरिति वाच्यं। पाकानुकूलाकृतिरिष्टसाधनमिति ज्ञानस्यैव हेतुत्वात् एतेन पाको न कृतिसाध्य इति ज्ञानका
लेपि प्रवृत्त्यापत्तिरिति निरस्तं। पाकानुकूलत्वं कृतौ गृहीत्वा पाकादावपि कृतिसाध्यत्वविषयीकरोति स
मानसंवित्संवेद्यत्वात् न च पाको नेष्टसाधनमिति ज्ञानकाले पाकानुकूलाकृतिरिष्टसाधनमिति ज्ञान
काले प्रवृत्त्यापत्तिरिति वाच्यं। साक्षादिष्टसाधनत्वस्य कृतौ विरहात् पाकद्वारेष्टसाधनत्वमेव कृता
विशिष्टसाधनत्वं तथा च कृतौ विष्टसाधनत्वज्ञानकाले पाकादावपि इष्टसाधनत्वज्ञानावश्यकत्वेन ता
दृशज्ञानकाले पाको न इष्टसाधनमिति ज्ञानविरहान्नापत्तिरिति न च पाकानुकूलाकृतिरिष्टसाधनमि
ति ज्ञानस्य हेतुत्वे पाकानुकूलाकृतिरिति संशये प्रामाण्यग्रहाभावानान्न प्रवृत्तेः निश्चयत्वनिवेशे गौरवमि
ति वाच्यं। भवन्मतेपि कृतिसाध्यताज्ञानस्य स्वतंत्रहेतुत्वे अप्रामाण्यज्ञानाभावनिर्णयत्वानाहार्यत्वा

न्या॰ दी॰ दिति विशेषसाम्यादिति न च साक्षात्साधनत्वज्ञानासंभवे परंपरासाधनत्वज्ञानादपि प्रवृत्तिदर्शनात् कथं कृतीष्टसा
९० धनताज्ञानस्यैकरूपेण हेतुत्वं उभयसाधारणानुगतसाधनत्वस्यैवाभावादिति वाच्यं॰ उभयसाधार
णसाधनत्वस्यापि दिक्तस्य स्वीकारादिति वदंति तन्न पाके इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुत्वे समानवि शे
ष्यताप्रत्यासत्त्यैव कार्यकारणभावः कल्प्यते कृतीष्टसाधनताज्ञानहेतुतावादिमते तु प्रवृत्तेर्मि न्नविशे
ष्यकत्वान्न तथेति विषयभेदे नैकार्यकारणभावकल्पने गौरवमिति चेत्तन्मतेपि विशेष्यतासंबंधेन
प्रवृत्तिं प्रति स्वीयइष्टसाधनत्वनिष्ठप्रकारतानिरूपितकृतित्वनिष्ठविशेष्यतानिरूपितानुकूलत्वनिष्ठा
वच्छेदकतानिरूपितावच्छेदकत्वसंबंधेन कृतीष्टसाधनताज्ञानस्य हेतुताकल्पनेन विषयभेदेन कार्य
कारणभावकल्पनागौरवमिति वाच्यं॰ अन्यथासिद्धिपंचकाराहित्यविशिष्टानियतपूर्ववर्त्तित्वघटिता
नुकूलत्वविषयतानिवेश्यकार्यकारणभावकल्पने अन्यथासिद्धिपंचकाभावानां मिथो विशेषणविशे
ष्यभावेन विनिगमनाविरहात्कार्यकारणभावबाहुल्यात् गौरवतद्रूपेश्य प्रवृत्तिं प्रतिपाके इष्टसाधनताज्ञा हेरंब॰ ९०

पकप्रवृत्तिसामग्रीप्रतिबंधकत्वे नैवोपपत्तेः। भवन्मते इष्टसाधनतादिलिंगककार्यतानुमितिघटितसाम
ग्री अव्याप्यकत्वेनानेतघयादिवाक्षुषादिसामग्र्यास्तादृशमानसे प्रतिबंधकत्वेकल्पनेमहागौरवापत्तेः।
न च सिद्धत्वसाधनकाले सिद्धत्वज्ञानाभावाघटितप्रवृत्तिसामग्र्यसत्त्वे घटादिचाक्षुषादिसामग्रीकाले
तादृशमानसापत्तिवारणाय तादृशसामग्र्याः प्रतिबंधकत्वं तयापि वाच्यमिति वाच्यं॰ उपदर्शितमानसे
असिद्धत्वेनपाकस्य विशेषणीभूतत्वात् असिद्धत्वज्ञानकाले सिद्धत्वज्ञानासंभवादिति न चेष्टसाधन
ताभावबाध्याकइति बाधसत्त्वे तादृशमानसं जायतामितीच्छासत्त्वे घटादिचाक्षुषसामग्रीसत्त्वे तादृश
मानसवारणाय तस्याः प्रतिबंधकत्वमावश्यकमिति वाच्यं बाधकाले मानसेच्छासत्त्वे आहार्यमानसो
त्पत्तेन तादृशमानसापत्तिविरहात् तादृशसामग्र्याः प्रतिबंधकत्वमिति एवं इष्टसाधनत्वकृतिसाध्यत्व तादृ
तवर्द्धिष्याप्यधूमवान् इष्टसाधनत्ववत्कृतिसाध्यत्ववत्पर्वत इत्यादृशपरामर्शघटितानुमितिसामग्र्याः प घ
रादिप्रसत्त्वे प्रतिबंधकत्वेन कल्प्यते वह्निपर्वतविषयकप्रवृत्तिसामग्रीमतत्वादृशसाध्यज्ञानविशिष्टता
त

स्या०कौ० ज्ञानेतरस्यमिन्नाविशेष्यकत्वात्। अतएवविधिवादेमणिकारैरुक्तं समानविशेष्यकत्वेलाघवमिन्नविशेष्यत्वेगौरवमि
९१ तितत्रलाघवंकारणताग्रहस्यसहकारित्वं गौरवेकारणताग्रहस्यप्रतिबंधकत्वमित्यर्थः। इयंरीतिस्तुयत्रसमान
विशेष्यकज्ञानस्यहेतुतासंभवतितत्रैव अन्यत्रानुमिन्नविशेष्यकज्ञानमपिकारणमित्यवधेयमितिपरेद्विसनोधा
त्वर्थस्यविशेष्यकवान्वितत्वेनैवसाधुत्वं नेत्यंचाससनोधात्वर्थप्रकारकेच्छाबोधकत्वात्तथाहिपाकंचिकीर्ष
तीत्यादौपाकादिमुख्यविशेष्यकत्वेनैवपाकःक्रियतांपाकंकृसासाधयामिसाक्षात्कारकेच्छारूपाचिकीर्षा
तुभूयात्तेद्वितीयादिविभक्तेर्मुख्यविशेष्यतार्थकत्वात्। नचविषयतामात्रमेवद्वितीयार्थोस्त्वितिवाच्यंत
थासतिपाकत्वमिच्छतिपाकत्वंचिकीर्षतिशत्रुनाशेच्छाकालेशत्रुमिच्छतीत्यादेरपिप्रयोगस्यापत्तेः। नचकृ
तेर्मुख्यविशेष्यत्वमस्तुभूयंतेपाकादेर्मुख्यविशेष्यकचिकीर्षाबोधस्यास्तादृशविशेष्यत्वासंभवात्। नच
नहिकृतेः कीदृशंविषयत्वसत्वमसत्पार्थेच्छायांप्रतीयतइतिवाच्यं। धातोरिच्छाप्रकारवाचित्वेनइच्छायांप्रका
रितासंबंधेनान्वितार्थबोधकतयाप्रकारितापाएवसनर्थेच्छायांकृतेः संसर्गतयाभानात्। अथैवंपाकादिद हेरंब० ९१

३ वच्छिन्नत्वयातत्रापितादृशप्रयोगानुपपत्तेः वस्तुतः संबंधसंबंधमानानुपगमात्कृतिसंबंध

त्वादिरूपपरादिचिकीर्षास्थलेपाकंचिकीर्षतीत्यादिप्रयोगापत्तिः नचद्वितीयार्थपाकादिविशेष्यकत्वेनकृति
संसर्गतयाभासमानस्यप्रकारित्वस्यावच्छेद्यावच्छेदकभावमानान्नदोषइतिवाच्यं कृतिसाध्यतयापाकेच्छायामपि
साध्यत्वप्रकारितायाएवपाकविशेष्यकत्वतया तत्रापितादृशप्रयोगानुपपत्तेः। वस्तुतःसंबंधसंबंधमानानुपग
मात्कृतिसंबंधतयाभासमानप्रकारित्वेविशेष्यतयावच्छिन्नत्वस्यप्रकारतयासंबंधतयाचमानासंभवः। एतेन
नचिकीर्षायांसाध्यतासंबंधेनकृतेःप्रकारत्वेपिनिस्तारइतिचेन्नद्वितीयांतसमभिव्याहारस्थलेद्वितीयार्थ
स्यपाकादिविशेष्यत्वस्येच्छायांप्रकारत्वेपिबाधकाभावात्तस्यावच्छिन्नत्वस्यप्रकारितानिष्ठसंबंधतावच्छेद
कतयाभानोपगमेनादोषात्। ननुपाकंचिकीर्षतीत्यादौप्रकारत्वेवद्वितीयार्थोस्तुधात्वर्थविशेष्यत्वेवेच्छायां
भासतांपूर्ववत्प्रकारताविशेष्यतयोरवच्छेद्यावच्छेदकभावभानोपगमात्पाकादिचिकीर्षायांकृत्यादिवि
षयकत्वस्यपाकत्वस्यपाकत्वादिप्रकारतानवच्छिन्नत्वादयाकत्वंचिकीर्षतीत्यादिप्रयोगः नचैवंगृहादिप्र
कारकस्थित्यादिगोचरेच्छादशायांगृहंतिष्ठासतीत्यादिप्रयोगापत्तिरितिवाच्यं भवतामपिस्थित्यादिप्रकारे

स्या॰ टी॰ ९२ त्वगृहादिगोचरेछायादशायां तादृशप्रयोगापत्तेर्वीरस्यैवनचसकर्मकधात्वर्थसंयोपस्थापितेछायामेवकर्मप्रत्य
यस्यस्वार्थान्वयबोधौपयिकाकांक्षास्वीकारात्रदोषइतिवाच्यंमयापोस्थंसुवचत्वात्त्वस्थलस्थकर्मत्वासंवं
धावच्छिन्नप्रकारताद्वितीयादिरूपकर्मप्रत्ययेनसमर्पयेच्छायांप्रतिपाद्यतइतिप्रसूत्पत्तेः गृहादिस्थितिगोचरे
छायांचाध्येपतासंबंधेनैवगृहादेःस्थितत्वांशेप्रकारतयानगृहेनिष्ठासतीसाद्दयःप्रयोगाः यत्तुसन्प्रत्ययस
मभिव्याहारस्थलेप्रकृत्यर्थएवद्वितीयादिकर्मप्रत्ययार्थान्वयः नतुसन्नर्थेछायामेवान्वयइतिप्रसत्तेगृहेस्थि
ष्टासतीसांद्रिप्रयोगापत्तेः प्रकृत्यर्थस्यतत्राकर्मकत्वात्पाकंचिकीर्षतीत्यादौचसाध्यत्वविषय
त्वरूपंप्रकृतिकर्मत्वंद्वितीयार्थः अतोनपाकंचिकीर्षतीतिवत्पाकसंचिकीर्षतीत्यादयःप्रयोगाइतितत्र
गगनदर्शनंभवतीत्यादौछायाबोधकत्वस्यगगनंदिदृक्षतेइत्यस्यविशेषाद्दर्शनविषयतावाक्यस्यप्रामाण्यानुपप
त्तेः दर्शनेनगगनकर्मकत्वबाधात्तत्रपरविषयकत्वेनवैस्त्वगतप्राघटविषयकदर्शनस्येच्छाविषयत्वात
त्र घटंदिदृक्षतइतिप्रयोगापत्तेश्चनचतत्रघटकर्मकत्वविशिष्टदर्शनविषयितेच्छायांभासतेइतिनियमाद हेरंब॰ ९२

कार्यकारणभाव ४

नस्यहेतुत्वमेवसम्यक् नचभवन्मतेपि अनन्यथासिद्धनियतपूर्ववर्त्तित्वरूपकृतिसाध्यत्वविषयतांनि
वेश्यकृतिसाध्यताज्ञानस्यस्वतंत्रहेतुताकल्पनेमहद्गौरवमितिवाच्यं नत्रकृत्वभाववदत्तित्वस्यकृति
साध्यतापदार्थत्वेनगौरवानवकाशात् नचतथापिभवन्मतेकार्यकारणभावद्वयकल्पनेगौरवमिति
वाच्यं तन्मतेउक्तानुकूलत्वविषयतानिवेशनेनैकाल्पनेअन्यथासिद्धिपंचकाभावानांविशेष्यविशेषणभावे
नविनिगमनाविरहात्पंचकार्यकारणभावकल्पनागौरवंकारणतावच्छेदकगौरवंचतदपेक्ष्यकार्यका
रणभावद्वयकल्पनेलाघवस्यातिस्फुटत्वात् नचानुकूलत्वमतिरिक्तमेवतथाचप्रवृत्तिंप्रतिकृतिष्व
साधनताज्ञानस्यहेतुत्वेएकएवकार्यकारणभावःभवन्मतेतुकार्यकारणभावद्वयमितिगौरवमि
तिवाच्यं ज्ञानस्थलेनकारणताग्राहकप्रमाणावतारेसमानविशेष्यत्वमेवसहकारिनतुभिन्नविशेष्य
कत्वंतस्यकारणताग्रहेप्रतिबंधकत्वात्तथाचपाकेष्टसाधनताज्ञानस्यपाकःकृतिसाध्यएतादृश
ज्ञानस्यचसमानविशेष्यकतयातयोरेवप्रवृत्तिकारणताग्राहकप्रमाणावतारोभवतिनतुकृतीष्टसाधनता

न्या॰ कौ॰ नेलाघवं तादृशसामग्रीकाले कृतीच्छाया असत्त्वेन तादृशकारणाभावादेवेतदनुसक्तेः तत्सत्त्वे कृतिसामग्र्या इच्छा
९३ घटिताया जिज्ञासासहितज्ञानसामग्रीतोपि बलवत्तया कृतेरेवोत्पत्तेः नच ज्ञानप्रवृत्त्योर्युगपदसादो
पगमे स्मृतिरहात्मा तादृशसामग्रीप्रतिबंधकत्वं कृतिसाध्यत्वप्रकारकेच्छायाः प्रवर्त्तकत्वाद्दिनाप्येनस्वी
क्रियत इति न लाघवमिति वाच्यं जिज्ञासानंतरं ज्ञानस्यैवानुभवेन प्रवृत्त्यभावस्यानुभवसिद्धत्वात् तद
नुरोधेन प्रवृत्तौ तादृशसामग्रीप्रतिबंधकत्वकल्पनस्यावश्यकत्वात् अनुभवानादरे ज्ञानं प्रति जिज्ञा
सीयज्ञानसामग्रीप्रतिबंधकतायाअपि विलयप्रसंगादिति सोदरोपाध्यायानुपाधिमत्तमपि निरस्तं
अनुभवावरोधो दरेपाकं कृत्यासाध्यया मीति कृतिसाध्यत्वप्रकारकया कृतिविशेष्यकेच्छायाअ
पि प्रवर्त्तकत्वस्यानुभवानुरोधेनावश्यकत्वात् तदनादरे चौरकृतेरपि कृतीच्छाया अपि हेतुत्वासिद्धेरिति
सक्षेपः। यत्तु इष्टसाधनत्वस्य विध्यर्थत्वेन कलंजभक्षये हिंसादौ लिङो निष्टसाधनत्वे लक्षणा न च हेरंब॰
पदंता सर्वप्राहक मिसेववाच्य न च्यासंगतं तथा सति ज्योतिष्टोमेन यजेतेति लौकिकवाक्यस्यापि प्रामा ९३

ण्यापत्तेः श्रुत्या स्वर्गसाधनत्वावगमेपि तात्कालिकानिष्टसाधनत्वस्य यागे बाधकाभावादिति तदप्यसत् न
कलंजमित्यादौ लिङो निष्टसाधनत्वे निरूढलाक्षणिकत्वात् ज्योतिष्टोमेन यजेतेत्यत्र निषिद्धलक्षणांगीकार
त्वा स्याभुक्तौ न अन्यथा घटपदत्वमित्यादिवाक्यस्यापि घटादिपदस्य पटादिलाक्षणिकतया प्रामाण्यापत्तेस्तत्वापि
दुर्वारत्वात् यदपि लिङ इष्टसाधनतार्थकत्वे लिङ्शब्दे साधनताशब्दयोः पर्यायतापत्तिरिति तदप्यसत्
लिङः प्रदत्तान्त इष्टसाधनताशब्दस्यवाकत्वात् लिङ्शब्दादिष्टसाधनत्वत्वेनेष्टसाधनताबोधादि प
ष्टसाधनताशब्दाच्चेष्टसाधनवृत्तिधर्मत्वेन तद्बोधात् पर्यायस्य पदस्त्वाभावाच्च यदपि अन्येष्ट
साधनेष्वस्य प्रवृत्त्यभावेन मत्दिष्टसाधनताज्ञानस्यैव प्रवृत्तिजनकत्वं वाच्यं तथा चनेष्टसाधन
त्वं लिङर्थः प्रवृत्तिजनकज्ञानविषयस्यैव लिङर्थत्वात् प्रवृत्तिजनकस्य मदंशांतर्भावेन तादृश
ज्ञानस्य च विधिवाक्यादसंभवात् मदंतभावेणशक्तौ शक्त्यानंत्यापत्तेरिति तदप्यसत् प्रवृत्तिप्रयो
जकज्ञानविषयस्यैव लिङर्थत्वे तथा विधितइष्टसाधनत्वोपस्थितौ प्रवर्त्तकस्य मदंतभविएनज्ञानस्य

ना॰ कौ॰ मनसासंभवात् किंच यद्विशेषयोरिति न्यायेनेष्टसाधनताज्ञानत्वेन प्रवृत्तित्वेन हेतुमद्भावस्यावश्यकतया प्रवृत्ति
९६ जनकस्य सामान्यत इष्टसाधनताज्ञानस्य विधिजन्यत्वसंभवेन प्रवृत्तिजनकज्ञानविषयस्य लिङर्थत्वे वितन्त्रश
क्तौ बाधकाभावात् तस्मादिष्टसाधनत्वं विध्यर्थ इति सिद्धं अत्र इष्टं क्वचित्साक्षात्कृत्तु स्वेव क्वचिच्च परंपर
या अत एवाचार्यप्रेरणया प्रवृत्तौ अस्यार्थे इष्टस्य परंपरया विशिष्टतया तत्साधनताज्ञानात् शिष्यादेशे
वानयनादौ प्रवृत्तिः आचार्यप्रेरणया हं गामानयामि न किंचिन्मम इष्टमिति व्यवहारस्तु न मे साक्षा
त्किंचिदिष्टमित्येवं परतया संगमनीय इति केचिद्वदन्ति वस्तुतः सर्वत्र इष्टसाक्षात्केत्तुरेव आचार्य तस्तु
प्रेरणया प्रवृत्तावपि आचार्यप्रसादादिकं साक्षात् शिष्याणामिष्टमस्तीति न दोषः उपदर्शितव्यवहारस्याचा
र्यप्रसादाद्यतिरिक्ते दुग्धपानादिकमिष्टं मे नास्तीत्येवं परतया संगमनीयः गुर्वादिप्रेरितबालादेर्बलात्कारे
णाध्ययने पित दृष्टाभावप्रयुक्तगुर्वादिक्रोधजन्यताडनाभाव एवेष्टं किं नास्तीति वा इति तत्साधनताज्ञानात्प्र हेत्व॰
वृत्तिः यत्तु इष्टसाधनताज्ञाने प्रवर्तके अभिष्टसाधनइवेष्टसाधनेपि कथं कर्मे। न्यायेन द्वेषादेव प्रव ९६

केच्छायां चतादृशविशिष्टविषयकत्वस्याबाधात्वातिप्रसंग इति वाच्यं एवमपि तत्र घटो द्विष्टदृश्यत इति प्रयोगस्य दु
र्वारत्वात् इच्छाविषयीभूतदर्शनकर्मत्वस्य घटप्रतीयमानस्याबाधादित्यत्र प्रकारएव रमणीय इति चेन्नैवं पा
कं चिकीर्षतीत्यादिवाक्यजन्यशाब्दबोधे पाकादिविशेष्यकत्वावगाहितायाः अनुभवसिद्धत्वात् सनोधात्व
र्थप्रकारकेच्छायाः विलक्षण्यावश्यकत्वात् धात्वर्थविशेष्यकेच्छाबोधकत्वसंभवेपि तत्प्रकारकेच्छावाचित्वे
वार्थक्याभावेन पाकं कृत्या साधयामीतीच्छायाः चिकीर्षीपदार्थत्वनिराकरणायोगात् न च पाकं कृत्या
साधयामीति कथं चिकीर्षाकारोपितादृशशाब्दे तेच्छाविषयस्य कृतिसाध्यत्वाविशिष्टपाकस्याबोधना
त् आत्मनि कृतिकारणकपाकसिध्यनुकूलव्यापारस्यैवतेनप्रतीतेरिति वाच्यं आत्मनि पाकसिद्ध्य
नुकूलकृतिरूपव्यापारबोधे पाकेपि स्वकृतसाधीनसिद्धिकत्वरूपं स्वकृतिसाध्यत्वस्य नु ल्य वित्तिवेद्य
तया भानेन तादृशवाक्यस्य चिकीर्षाविशिष्टबोधकत्वात् कृतिरूपव्यापारस्यणिजर्थता लाभाय कृत्ये
ति कथनात् एतेन कृतीच्छायाः कृतिहेतुत्वे कृतिं प्रति जिज्ञासाविशिष्टज्ञानसामग्र्याः प्रतिबंधकत्वाकल्प

का०कौ० ज्ञानादीनामपि हेतुबोध्यं न च सुखेच्छावैशिष्ट्यं सुखेच्छाजन्यतावच्छेदके निवेश्यतां तस्य सुखसाधनता
९५ ज्ञानजन्यतावच्छेदके निवेशे प्रयोजनाभावः एवं वैपरीत्येनापीति वाच्यं कार्यतावच्छेदकयोर्व्याप्यव्याप
कभाव एव कारणानां परस्परसहकारिता स्वीकारे वैपरीत्येनापीति वाच्यं कार्यतावच्छेदकयोर्व्याप्यव्या
पकभाव एव कारणानां परस्परसहकारिता स्वीकारेण परस्परजन्यतावच्छेदककोटौ परस्परवैशिष्ट्य
निवेशस्यावश्यकतात् अन्ये तु तादृशसंबंधेन स्ववैशिष्ट्यमेव स्वस्वकार्यतावच्छेदककोटौ निवेशनी
यं कार्यतावच्छेदकयोर्व्याप्यव्यापकभावविरहेऽपि समानाधिकरणमात्रेणैव कारणानां परस्परसहका
रित्वस्वीकारादित्याहुः स्वतंत्रास्तु फलसाधनत्वस्यापि स्वज्ञानजन्येच्छायां प्रकारत्वाभ्युपगमात्सु
खसाधनत्वप्रकारतानिरूपितापाकतावच्छिन्नोद्देश्यतात्वच्छालीच्छां प्रति सुखेच्छात्वेन सुखसाध
नताज्ञानत्वेन च हेतुत्वं यद्वा सुखसाधनताज्ञानस्यैवैतादृशेच्छात्वावच्छिन्नं प्रति हेतुत्वे सुखेच्छायास्तु सु
खसाधनताधीजन्येच्छात्वावच्छिन्नं प्रति साऽस्तु तत्र फलसाधनत्वस्य स्वविशेष्यकज्ञानजन्येच्छायां प्रका हेरं० ९५

त

रत्वे मानाभावात् यद्यपि सुखेच्छादिजन्यतावच्छेदका जातिविशेषा एव स्वीक्रियंते सुखदुःखाभावयोरिच्छात्त
त्साधनताज्ञाने च यदा वर्त्तेते तदा तस्मिन्निच्छाद्वयमेव स्वीक्रियाते प्रयत्नयौगपद्यवदिच्छायौगपद्य स्वीकाराद
न तत्र तत्संकर्यमिति विभिनेरुक्तं तदपि विंसं एतादृशानेकज्ञाने मानाभावात् अन्यथा तत्तत्कर्मत्वजन
कतावच्छेदकतानाजातिसंस्कारयोर्गपद्ययोः स्वीकारेणैवोपपत्तौ संस्कारे सविषयकत्वासिद्धिप्रसंगात् किं
च पदाशतफलव्यक्तिषु दृष्टान्तस्थलोपायभूततत्तत्सुखं तत्तद्व्यक्तित्वेन विषयीकृत्याश्वमासत्वं तद्ध्वंसेच्छा
त्मकत्यागरूपाश्वमेधसामग्री च तदा तादृशशतेच्छीत्पत्तावविनिगमनाविरहेण सर्वासामेवाश्वमेधात्पत्ता
तन्मतेऽश्वशतक्रतुत्वापत्तिः अपरे तु प्रकारतासंबंधेनेच्छाविशिष्टावच्छिन्नकार्यतानिरूपितसाधनत्वनि
ष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन ज्ञानत्वेन कारणता प्रकारतासंबंधेनेच्छात्वेन कार्यता
इति मन्यमिकारीनवापाकलादिभेदेन भिन्नकारणता अत्र चेच्छाविषये विशेषणां ज्ञानेऽनुल्लसत्ते
न फलेच्छाविरहदशायां नोपायेच्छापत्तिर्न वेष्टसाधनताज्ञानेनेच्छाया अविषयीकरणेऽप्युपायेच्छानुपप

१

न्या॰ बौ॰ त्तेः इत्थं चोपायेच्छायां फलेच्छायाः स्वातंत्र्येण कारणत्वोपगमो निरस्तः कारणतावच्छेदकविशिष्टकारणस्य
९६ कार्ये सत्ति पूर्वकालेऽपेक्षणीयतया फलेच्छाविरहकाले उपायेच्छापत्त्यसम्भावात् नचोक्तविशेष्यतावच्छेदक
तासंबंधेन ज्ञानं विना विप्रकारतासंबंधेन सुखत्वदुःखाभावत्वयोरिच्छोत्सत्त्वव्यभिचार इति वाच्यं सुखत्वं
दुःखाभावत्वान्यवृत्तित्वविशिष्टप्रकारताया एव कार्यतावच्छेदकसंबंधत्वोपगमेन व्यभिचाराभावात्
नन्वेवं यत्र सुखत्वदुःखाभावत्वे धर्मितावच्छेदकीकृत्येष्टसाधनताज्ञाने न कृतं तत्र सुखत्वदुःखाभावत्व
योः सुखत्वदुःखाभावत्वान्यवृत्तित्वविशिष्टप्रकारतासंबंधेनेच्छापत्तिरिति वाच्यं सुखं सुखमित्यादि
तः शाब्दबोधवारणाय सुखत्वाद्यन्यवृत्तिविषयतासंबंधेन ज्ञानं प्रति सुखत्वादिभेदत्वेन कारणताक
ल्पनेपुणात्वस्यैव कार्यतावच्छेदकत्वोपगमे नोक्तापत्त्यभावादिति प्राहुः रिति दिक् तच्चेष्टसाधनत्वं स्वर्गा
दिसाधनत्वत्वे नैव लिङः शक्यं तेन रूपेण ज्ञानादेव वक्ष्यमाणस्येच्छाप्रवर्तकत्वात् न त्विष्टसाधनत्वत्वे
न इच्छायाः स्वरूपसत्या एव हेतुत्वेन तज्ज्ञानानपेक्षणात् वक्ष्यमाणवृत्तिमयापासस्याधे आयुक्तिकत्व हे॰ख॰ ९६

सम्भवोपपत्तेरिति तन्न अन्तरालिकपुमे दुःखाभावदशायां प्रवृत्त्यापत्तेः नच चिकीर्षाया असत्वेत दभावादेव
न प्रवृत्तिर्न तत्सत्वे चेष्टापत्तिरिति वाच्यं इष्टसाधनताज्ञानस्योपायेच्छां प्रति हेतुतयेष्टसाधनत्वज्ञानाद्वि
कीर्षाया एवासंभवात् ननूपायेच्छां प्रतीष्टसाधनताज्ञानस्य हेतुत्वमसंभवि मुपायत्वस्येच्छाविषयत्व
स्य चाननुगमात् नच पाकेच्छां प्रति इच्छाविषयसुखसाधनताज्ञानं हेतुरित्येवं रीत्यानत्वसंभव इति वा
च्यं कालांतरीयपुरुषांतरीयेच्छामादाय तिप्रसंगवारणाय तत्तत्कालीनत्वतत्पुरुषीयत्वनिवेशस्याव
श्यकतया ननुगमतादवस्थ्यात् इच्छाविषयताज्ञानेपि स्वरूपसत्सुखेच्छासुखसाधनताभ्यां पाकेच्छो
त्पत्त्येव नच पाकेच्छां प्रति सुखेच्छात्वेन सुखसाधनताज्ञानं त्वेन च हेतुतान्योक्तदोष इति वाच्यं दुःखा
भावेच्छासत्वे दुःखाभावसाधनताज्ञानोत्पाद्यमपि पाकेच्छोत्पत्त्या व्यभिचारप्रसंगादिति चेन्न स्वसामानाधि
[illegible] करण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन सुखेच्छां सुखसाधनं पाक इति ज्ञानोभयविशिष्टे
च्छां प्रति सुखेच्छात्वेन सुखसाधनताज्ञानत्वेन च हेतुत्वोपगमात् एवं दुःखाभावेच्छा दुःखाभावसाधनता

ता॰ कौ॰ ९९ तस्मात्स्वर्गाद्युपस्थितावपि साधनत्वबोधकाभावात्। न चैवं साधनत्व एव शक्तिरस्त्वामिति वाच्यं। तस्य कार्य
तावच्छेदकविशिष्टकार्यनियंत्रितत्वेन सामान्यतस्तत्केस्याभावात्। नत्विष्टसाधनत्वस्य विध्यर्थत्वे ज्योतिष्टो
मेन स्वर्गकामो यजेतेत्यादौ तृतीयानुपपत्तिः तद्विधायककर्तृकरणयोरिति सूत्रस्यानभिहिताधिकारीय
त्वेन करणत्वानभिधान एव तद्विधानेन लिङा तदभिधाने तृतीयाऽसंभवात्। न च पदार्थयागग
त साधनत्वे लिङाभिधानेपि तद्विशेषज्योतिष्टोमादिप्रातिपदिकार्थगतस्यानभिधानात्तृतीयानुप
पपत्तिरिति वाच्यं। ज्योतिष्टोमपदार्थयागयोरभेदादिति चेन्न लिङा साधनत्वमात्राभिधानेपि तद्वि
षकरणत्वस्यानभिधानात्। ननु चैवमपि लिङादिना ज्योतिष्टोमादौ स्वर्गत्वविशिष्टसाधनत्वं कथं बोधनी
यं स्वर्गत्वादेर्गौगात्मानवाजपेयादिजन्यस्वर्गादिसाधारण्येन ज्योतिष्टोमादिजन्यतावच्छेदकत्वासं
भवेन तत्र स्वर्गत्वादिविशिष्टसाधनत्वबाधादिति चेन्न। विजातीयतत्तत्साधनत्वस्यैव विधिना बोध
नात् वैजात्यं च विधेयस्तथा शक्तिस्वीकारा ~~द्देवोपस्थितेतदर्थमेव च लिङादेस्तत्तत्साधनत्वे शक्तिस्वीकारा~~ हेर॰ कौ॰ ९९

देवोपस्थितेरेतदर्थमेव च लिङादेस्तत्तत्साधनत्वे शक्तिस्वीकारात्। केचित्तु स्वर्गत्वादिकमेव ज्योतिष्टोमादि
जन्यतावच्छेदकं अतिप्रसक्तस्याप्यवच्छेदकत्वे बाधकाभावात्। न चैवं स्वर्गत्वावच्छिन्नस्य ज्योतिष्टोमा
दिरूपकारणाभावाद्गौगात्मानादितोनुत्पत्तिः प्रसंगः उत्पत्तौ वा घटादौ रासभवद्व्यभिचाराज्ज्योतिष्टोमादेरका
रणत्वप्रसंगः एवं गुणसमवायिकारणतावच्छेदकत्वस्य द्रव्यत्वेनांगीकारेण सत्तायामेवांगीकारे गुणादावपि
रूपाद्यापत्तिरिति नातिप्रसक्तमवच्छेदकमिति चेन्न ज्योतिष्टोमादिजन्यापूर्वविशिष्टसमवायसंबंधेन स्वर्ग
त्वावच्छिन्नं प्रति ज्योतिष्टोमादेः कारणत्वापगमे नादोषात्। एवं तृणादेरपि तृणत्वाद्यवच्छिन्नं संयोगसं
बंधेन वह्नित्वावच्छिन्नं प्रति तृणत्वादिना हेतुतेति न तत्रापि वैजात्यकल्पनाः अत एव व्रीहिभिर्यजेतेत्या
दौ परस्परव्यतिरेकेणाप्रत्येकफलजनकत्वेपि न दोषः व्रीहिभिर्यष्टव्य इति संकल्पपूर्वावच्छिन्नसमवा
यसंबंधस्यैव व्रीहिकार्यतावच्छेदकत्वे नादोषात्। संकल्पापूर्वे च फलापूर्वोत्पत्तौ नष्टमिति प्रयोगांतरेय
वादीनामुपादानेनानुपपत्तेः न चैवं रासभादेरपि घटहेतुत्वापत्तिः रासभाद्यवच्छिन्ने संयोगस्य कार्यता

द्वित्वसामग्र्याभावादेव तदभावोपपत्तेरित्याहुः। अपरे तु कं वुद्धीमान्नास्तीत्यादौ गुरुधर्मानवच्छेदकत्वपक्षे घटत्वा

क.कौ. वच्छेदकत्वोपगमे न व्यभिचाराभावादिति वाच्यं यवादेः कसात्कारणादेरन्वयव्यतिरेकाभ्यां हेतुतासिद्धावपि रासभा
१८ देर्हेतुत्वे मानाभावात्। किंचावश्यकत्वनीयदंडादिभिरन्यथासिद्धेरेव एवं गुणादौ रूपायत्तिरपि न तत्तद्रूपेण
तद्व्यक्त्यसमवायिकारणतया आवश्यकत्वे न विशेषसौवच्छिन्नप्रतियोगितायाः एव संबंधत्ववद्द्राविवि
जातीयस्वर्गसमानाधिकरणसंताभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन स्वर्ग
ना समानाधिकरणाभावप्रतियोगितावच्छेदकत्वभावः प्रतीयत इति नानुपपत्तिः। अन्वयितावच्छेदकव
च्छिन्नप्रतियोगिताकत्वमुसत्तिश्च नञ्समभिव्याहारस्थल एवेति न तद्विरोध इति प्राहुरिति दिक्। न
व्यासक्त अनन्यथासिद्धतदभाववद्वत्ति रूपताव्याप्यत्वघटितसाध्ये पक्षत्वज्ञानमेवसाध्यस्वर्गादिकत्व
पर्यवसितं लिङर्थः। युक्तं चैतत्॥ अन्यथा १२शेतरीसाज्योतिष्टोमादिकं विनापि गंगास्नानादितः स्वर्गा
दिकमिति ज्ञाने व्यभिचारज्ञानसत्त्वे न लिङादिनेष्टसाधनतायाबोधनासंभवात्। साध्ये प्रकारत्वस्य लिङर्थ
त्वे तु इष्टत्वसामानाधिकरण्येन ज्योतिष्टोमादिमदन्यावृत्तित्वग्रहे वाधकाभावः। अद्रव्यं गंधवदिति ग्रहेपि मा हेरंब०
१८

विशिष्टतज्ज्ञानं विना प्रवृत्त्यसंभवाच्च। न चैवं लिङो नानार्थत्वापत्तिरिति वाच्यं। तदादिपदे वुद्धिविषयतावच्छेद
कत्वस्येवात्रापि शक्यतावच्छेदकानां स्वर्गादीनामिच्छाया विषयतया अनुगमकत्वात्। तथाहि यथा तदादिप
देन तदादिपदं वुद्धिविषयतावच्छेदकवति शक्तमित्याकारकः शक्तिग्रहः वुद्धिविषयतावच्छेदकत्वमुपल
क्षणतया घटत्वादीनामनुगमकं न तु तदंशे शक्तिः पदोपस्थितिस्तु प्रकारतादिमहिम्ना घटत्वादि नैव
न तु वुद्धिविषयतावच्छेदकत्वस्योपस्थितौ शाब्दबोधे वा भानं तथा प्रकृतेपि लिङादिपदमिच्छाविषयता
वच्छेदकवत्साधनत्वे शक्तमित्याकारकः शक्तिग्रहः इच्छाविषयतावच्छेदकत्वं स्वर्गत्वादीनामनुपलक्ष
णतयानुगमकं न तु तदंशे शक्तिः पदार्थोपस्थितिस्तु समभिव्याहृतस्वर्गादिपदमहिम्ना स्वर्गादिसाधनत्वत्वे
नैव न तिच्छाया उपस्थितौ शाब्दवोधे वा भानं। इत्थं च विशिष्टेष्टतावच्छेदकस्वर्गत्वादिप्रकारेण शाब्दवोधो
त्पसाविधेर्वान्यसाधारणकरज्ञाननिर्वाहः एवं चेच्छाविषयतावच्छेदकत्वोपलक्षितस्वर्गत्वादिविशिष्टसा
धनत्वे विधेः शक्तिरिति पर्यवसन्नं। न चैतस्य स्वर्गकामादिपदाक्राभेनान्यलभ्यतया न तत्र शक्तिरिति वाच्यं

न्या॰ कौ॰ ९९ ऊर्जो वरूध्यै इत्यपूर्ववादे चतुर्थीवनवार्थसाधिका दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिभिः फलाकांक्षानि
वर्तेष्वेतल्लेपल्लवेन। ननु तथापि स्वर्गकामो यजेतेति विधिना यागे स्वर्गसाधनत्वबोधोनुपपन्नः देव
तोद्देशेन द्रव्यत्यागरूपस्य यागस्येच्छारूपतया कालांतरभावि स्वर्गपर्यंतमसत्त्वे न स्वर्गाव्यवहितपूर्व
कालवृत्तित्वघटितस्य स्वर्गसाधनत्वस्यासंभवात्। न च यागस्य साक्षात्स्वर्गसाधनत्वासंभवेपि अपू
र्वरूपव्यापारद्वारा स्वर्गसाधनत्वसंभवस्सेवेति वाच्यं लिङादीनां तादृग्व्यापारानुपस्थितत्वात् द्वारापि स्व
र्गसाधनत्वस्य बोधासंभवादिति चेन्न स्वरूपसंबंधरूपतया कार्यनियतपूर्ववृत्तित्वरूपतया पदा
तररूपतया विधिना यागे सामान्यतः स्वर्गसाधनत्वेन स्वर्गसाधनत्वे बोधिते पश्चात्तन्नियामकस्य
स्वर्गाव्यवहितपूर्वकालवृत्तित्वस्य बाधप्रतिसंधानेन स्वर्गसाधनत्वानुपपत्तिप्रतिसंधानेन तदुपपाद
कतया स्वर्गपर्यंतस्थाय्यपूर्वरूपव्यापारकल्पनेनादोषात्॥ अत्रेदं विचार्यते विधेरपूर्वबोधकतास्ति हर॰ ब॰
न वेति तत्रापूर्वकल्पकमिति वादिनां न्यायविदां सा नास्तीति सिद्धांतः अपूर्वं न कल्प्यं किं तु[illegible]मिति विद ९९

वा

तः प्राभाकरास्तु स्वर्गकामो यजेतेत्यादिकालांतरभाविफलकामसमभिव्याहृतवैदिकविधेरपूर्वबोधक
तां स्वीकुर्वंति तेषामि[illegible]याशयं वर्णयंत्समभियुक्ताः फलकामना क्रियायां कामिनं नियोजयति प्रवर्तकधर्मव
त्तं करोतीति लिङ्सु स्वर्गकामो नियोज्य इत्युच्यते नियोज्यत्वं च तस्य ममेदं कार्यमिति धर्मत्वमेव यागादिक्रिया
यां चलेन रूपेण स्वर्गादिफलकामस्यान्वयः। अथ किमर्थं नियोज्यतया कामिनोऽन्वयः स्वीक्रियते कर्तृत्वे
नैरासो भासतां आवश्यकं च कृतिविशेष्यतया तन्नानं भावनाया विशेष्यतयान्वयितस्य संख्यान्वयनिया
मकत्वात् (आख्यातोपात्तभावनाविशेष्य एव प्रथमायाः साधुत्वात्। न च स्वर्गकामकार्यत्वस्य क्रियाया
मन्वये स्वर्गकामनियोज्यकत्वप्रयोजकं स्वर्गकामकार्यताज्ञाने विषयत्वे विना यागादेस्तत्कृतिसाध्यत्व
निर्वाहात् इदं स्वयप्रयोजकरूपलक्षणेपि योग्यताज्ञानविधया स्वर्गकामनियोज्यकत्वबोधः स्वर्गका
मकार्यत्वबोधे अपेक्षित इति मलिकारेणापि नाहृतः क्रियाकार्यतया लिङ्बोधयितुं शक्यते स्वर्गकामनि
योज्यान्वययोग्यताज्ञानविरहादित्यनेन प्रथमतः कार्यताबोधनासंभवे हेतुर्विधया नियोज्यत्वबोधसाम

न्या-कौ. श्रीवरहो ऽभिहितएतदभिप्रेतेत्येवेति वाच्यं। यतः कर्तृत्वबोधे योग्यताज्ञानविधया नियोज्यत्वभानापेक्षा प्राभाक
१०० रैर्नाभ्युपेयते पचतीत्यादौ लडभ्याख्यातेपि तत्स्वीकारापत्तेः। एवं च क्रियायां कामिकार्यताबोधेपि कामिनः
कर्तृव्याप्यत्वबोधपर्यवसितः विशेष्यविशेषणभावमात्रं वैपरीत्यादिति तुल्यं युक्तमात्तत्रापि कामिनो
नियोज्यतया भानमनपेक्षितमेवेति चेत् स्वर्गकामनाविशिष्टस्येहि कर्तृत्वेनान्वयो न संभवति काम
नारूपविशेषणांशे तदन्वयस्यायोग्यत्वात् कस्यांसंभवात्। अथ चैत्रः पचतीत्यादावन्वयितावच्छेदकचै
ल त्रत्वादेः कर्तृत्वबाधेपि यथा तदुपलक्षिते धर्मिणि कर्तृत्वान्वयस्तथा प्रकृतेपि कामनोपलक्षिते पुंसि
तदन्वयो निःप्रत्यूह एव विशेष्यांशे चाप्यनन्वयित्वरूपोपलक्षणत्वेपि तस्याः ब्राह्मणत्वादिवत्स्वतः क
र्तृत्वावर्त्तकतासंभवस्त्येवेति निःकामसाधारणकर्तृत्वान्वयप्रसंगो वारणीय इति चेन्न विशिष्टान्वय
परतायावेदस्यौत्सर्गिकतया संभवस्तां कथं चिद्विशेषणतापामुपलक्षणताभ्युपगमस्यानौचित्यात्॥
न च विशेष्यान्वयि कैर्नाकर्तृत्वेन कामनाया आश्रयत्वेनानन्वयेपि तत्समानकालतया तस्या विशेष हेरंब० १००

णत्वाधिकरणपेनद्रव्यं गंधाभाववदितियथादिति वदंति॥ अथेष्टसाधनत्वं साध्ये एककर्तृत्वानलिङर्थः नित्य
नैमित्तिकयोः फलाभावेन तदसंभवादिति चेन्न प्रत्यवायपरिहाररूपफलस्य तत्रापि सत्त्वात्। शास्त्रबले
न तत्करणे प्राप्तस्य प्रत्यवायस्य तत्करणे परिहारावश्यंभावात् न च वेदबोधितत्वेन निष्फलयोरेवतयोः
प्रवृत्तिरिति वाच्यं। वेदसहस्रैरपि बोधिते निष्फलत्वज्ञानदशायामप्रवृत्तेः न चैवमफलाकांक्षिभिर्यज्ञो वि
धिदृष्टो य इज्यते॥ यष्टव्यमेवेति मनः समाधाय स सात्त्विक इति भगवद्वचनविरोध इति वाच्यं। यज्ञो दानं तपः
कर्म पावनानि मनीषिणां॥ एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च। कर्त्तव्यानीति मे पार्थ निश्चितं मतमु
त्तममिति स्पष्टाहरो भगवतैव पावनत्वोक्तेः तस्मादनुद्दिष्टेपि प्रत्यवायपरिहारः फलमिति फलं त्यक्त्वा क्रि
यमाणस्य पावनत्वमिति तदाशयः। संध्यामुपासते ये तु सततं संशितव्रताः विधूतपापास्ते यांति ब्रह्मलो
कं सनातनमिति क्वचिन्नित्येपि फलश्रवणाच्च। न चार्थवादात्मकमुक्तवचनं ज्ञापकं स्तुतिश्च प्ररोचनार्था
सा च पुरुषत्वस्पर्थे ति वाच्यं॥ तथा सति सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविसादेरपि तथात्वापत्तेः चतुर्थी तु

तासंबंधेन कृतेरन्वयबोधोपगमे तादृशान्वयप्रयोजक १

मा॰कौ॰ १०१ [redacted] तांज्ञानमपि योग्यता तोहेन तादृशान्वयबोधहेतुः तथाहि परं परासाधनस्थले हि तदंशेतस्य प्रयोज
कत्वज्ञानस्य योग्यताज्ञानविधया तदंशेत कार्यप्रयोजकताबोधहेतुत्वं गुरूणामनुमतं अतएव तन्मते या
गस्य स्वर्गसाधनताबोधे अपूर्वसाधनताबोधापेक्षा कामनायाश्च न साक्षात्कृतिप्रयोजकता अपि तु कार्यताज्ञा
नसंपादनेनैवेति कामनाविशिष्टे कृतिप्रयोजकत्वान्वयस्वीकारे नियोज्यत्वोपस्थिति प्रकारैर्वा अभिहितं चे
तदा लौकिकतापि एतज्ज्ञानद्वारा कृतिजनकत्वमिति बोधजनकज्ञानध्रौव्येनान्वयांगीकारादिति ग्रंथे
न एवं कार्यतैकदेशे कृतावपि कामनाविशिष्टस्यैव पुंसोऽन्वय उक्तयुक्त्या स्वीकरणीयः सचाधेयतासंबं
धेन न संभवतीति प्रयोज्यतासंबंधेनैव वाच्य इति कामि कार्यत्वभानांतर्गतकृतिवृत्ति कामनाप्रयोज्यत्वनि
र्वाहकनियोज्यत्वभानानुरोधेनापि कामनाविशिष्टे निरुक्त नियोज्यत्वबोधापेक्षेति नाहत्सक्रिया कार्यतेत्सा
द्दिचिंतामणि ग्रंथिसंगतिः। नच गुरूणां क्रियाकार्यताबोधो न शाब्दः किं लोपादानिक एवेति तत्क थं तत्र योग्य
तापेक्षेति वाच्यं। शाब्दसामग्रीसहकृतानुपपत्तिज्ञानस्यैवोपादानत्वात् तदुक्तमनुपादानं तावदनुपपत्तिसहकृ हे॰ ब॰ १०१

तः शब्द इति कामनाया एव कार्यताज्ञानोपयोगो न साक्षादपि तु स्वविषयककाम्यसाधनतात्मककार्यत्वानुमायक
लिंगज्ञानसंपादनेन। तदुक्तं स्वकामनानंतरं काम्यसाधनताबोधात्कार्यताज्ञाने सति स्यादितिं एवं च कामनायां
कार्यताज्ञानप्रयोजकत्वरूपनियोज्यत्वभाने उक्तयुक्त्या क्रियानिष्टेष्टसाधनताज्ञानप्रयोजकत्वं तत्र गुरूणां
क्रियानिष्टेष्टसाधनत्वं विनिर्मानानतत्र काम्यसाधनताभानमिति स्वर्गसाधनताज्ञानं विना न नियोज्या
न्वयबोधसंभवः। अथ योग्यताज्ञानात्मकं नियोज्यत्वज्ञानं मानसमेवोपगंतव्यं ननु शाब्द नियोज्यत्वस्य पदा
नुपस्थितेरिति न तत्र योग्यताज्ञानापेक्षे [redacted]ति चेन्न। ज्ञानप्रकाससत्तिमनभ्युपगच्छतां गुरूणामन
सो वहिरक्षत्वात् मेण नियोज्यत्वज्ञानस्य शब्दप्रयोज्यस्येवोपगंतव्यत्वात् तच्च शाब्दत्वजातिमदोपादानि
कं वा फलतो न विशेषः। पदजन्य नियोज्यत्वोपस्थितिविरहश्चार्थाध्याहारमतेः प्रयोजकः। अस्तु वा नि
योज्यत्वमपि विध्यर्थः॥ स्वर्गकामयागयोः संसर्गो नियोज्यत्वमिति तु नामार्थधात्वर्थयोः साक्षादन्व
यस्यानुसन्नत्वादनुपादेयं। कार्यताबोधो याग विशेष्यक एव मिश्राणां संमतः यस्तु स्वर्गकामः स्व

ना॰ कौ॰ नियोज्यककार्ययागक इत्याकारकबोधस्तैरभिहितः स्वर्गकाम इति साध्ययागनियोज्यः स्वर्गकाम इति निर्द
१०२ र्थः तत्र स्वर्गकामस्य विशेष्यतयाभानं तत्राख्यातेऽप्यस्याप्यसंख्यान्वयानुरोधेन पदमिहिम्नैतत्तु न सम्य
क्। चरमभाविन्यौपादानिककर्तृत्वबोधेन कर्त्रादिसंख्यान्वयेनैवोपपत्तेः कार्यताबोधे संख्यान्वयांगीका
रेऽपि औपादानिकबोधे संख्यान्वय एव तत्र प्रथमासाधुत्वनिर्वाहकः कार्यताबोधस्याप्यौपादानिक
त्वात्। अतएव कार्यत्वपक्षकसमभिव्याहृतक्रियान्वयित्वविप्रतिपत्तिसंगतिः। कार्यत्वबोधस्य शाब्दत्व
जातिमत्त्वे तादृशजातिमतिबोधे क्रियासंसृष्टतयाभासमानत्वरूपक्रियान्वयित्वाभावस्यैवाप्रसं
गात् पूर्वकार्यताबोधानुत्तरबोधापक्षक्रियान्वयित्वाभावो विप्रतिपत्तिविषयक इति चेन्न॥ अपूर्वकार्य
यत्वोपाः क्रियाकार्यत्वं विना दुर्ज्ञेयत्वात्। सापि लिङ् अनुपपत्तिद्वारा परंपरया बोध्यैवेति मिश्राशये या
संगते रशक्यपरीहारत्वात्। नचोक्तबोध एव कर्तृत्वबोधः न तु चरमकर्तृत्वावगम इति मिश्राशय इति हरेः॰
वाच्यं। अनुपदमेव नन्वेवं नियोज्यत्वेनैव स्वर्गकामाद्यन्वयेऽधिकारिणोऽलाभे प्रवर्तकत्वायोग इति चेन्न। १०२

या

ण त्वमास्तं दंडी गच्छतीत्यादौ गमनकर्तृत्वाद्यन्वये दंडादेर्विशेषणत्ववदिति वाच्यं। विशेष्योपर्याश्रमत्वेनान्वितेवि
शेषणस्याश्रयतयैव विशेषणत्वस्यौत्सर्गिकतया सागायोगात् कृति स्थले उपायचिकीर्षाया अंतरीत
याः फलकामनाया असत्त्वेन तत्समानकालनाऽपितस्या असंभवात्। नियोज्यत्वेन कामिनोऽन्वये चम
मेदं कार्यमिति ज्ञानप्रयोजकत्वरूपनियोज्यत्वस्य कामनांशेऽपि सत्त्वाद्विशिष्टान्वयो निराबाधः काम्यसा
धनताज्ञानस्य कर्तव्यतानुमापकतया कामनायास्तत्प्रयोजकत्वात्॥ अथैवमाख्यातार्थकृतेरपि प्र
योजकत्वासंबंधेन कामनाविशिष्टे अन्वयसंभवात् नियोज्यत्वेन कामिनः अन्वयोऽपि फलः कृतिसाध्य
ताज्ञानस्य कामनाप्रयोज्यकत्वेन तद्द्वारा कृतेरपि कामनाप्रयोज्यत्वादिति। नच विनिगमनाविरहे
ण नियोज्यतयाप्यन्वयो निःप्रत्यूह इति वाच्यं॥ नियोज्यत्वेनान्वयेऽपि कर्तृत्वेनान्वयस्य प्रथमायाः सा
धुत्वनियामकत्वेनावश्यकत्वमिति प्रागेवोक्तत्वादिति चेत्॥ आस्तां प्रथमासाधुत्वनिर्वाहकत्वेन
कर्तृतया कामिनोऽन्वयस्तथापि तदनुरोधेनैव नियोज्यत्वभानमनावश्यकं विशिष्टान्वयप्रयोजक

न्या॰ क्रो॰ विधिपक्षे अन्वयप्रकारतयासाधनत्वं शाब्दमिति तदुक्तेः शाब्दं शाब्दज्ञानविषयः अन्वयप्रकारतयाऽन्वयि
१०३ तावच्छेदकतयाऽन्वयप्रयोजकरूपस्यान्वयितावच्छेदकतया भाननियमे अन्वयप्रयोजकरूपस्य प
दन्वयप्रयोजकं रूपांतरं तस्यापि भानप्रसंगेनानवस्थेति वाच्यं। पदार्थतावच्छेदकरूपस्यान्वयप्रयोज
करूपान्वयितावच्छेदकांतरानपेक्षणेनानवस्थापरिहारात्॥ अथ यदि कार्यत्वाबोधे पीष्टसाधनत्वमा
सते तदागतं तेषां काम्यसाधनताविषयककृतिसाध्यताज्ञानस्य प्रवर्त्तकत्वासंभवबीजभूते न साध्य
त्वसाधनत्वयोर्विरोधनिबंधनैकधीविषयत्वासंभवेनेति चेत् साध्यत्वसाधनत्वयोर्विरोधेनैकज्ञा
नविषयत्वं पूर्वमुपपादितमनेकेषां विदुषामनुमतं न तु सर्वेषामिति मतभेदेन सर्वसामंजस्यात् अत एव
यजेतेत्यादौ विष्टसाधनयागरूपधात्वर्थे कार्यत्वान्वय इति मतेऽसाधनत्वस्याभिधात्मकत्वादिनोन्तर
सिद्धस्य संगमितं एवं यागस्य स्वर्गसाधनत्वमुपपाद्यानेनानावगम्यकाम्यमानस्वर्गसाधनं यागः स्वर्गका
मकार्य इति उपादानसचिवाच्छब्दादेवेति सालिकानाथग्रंथोप्युपपादितः साधनत्वं शाब्दमिति हरं॰ ९३

प

रूपत्वं कार्यताबोधनकृतिथोऽस्पताबोधे अन्वयितावच्छेदकतया साधनत्वमानाभिप्रायकं। वस्तुतस्तु अ
न्वयप्रकारतयाऽन्वयप्रयोजकरूपवत्त्वयोग्यतात्वेन साधनत्वं शाब्दसहकारीति मूलार्थकरणाद
न्वयप्रयोजकरूपस्य फलीभूतज्ञानविषयत्वानियमेप्युपपत्ते अत एव दीधितिकृतापि सचतेषामन्व
~~यप्रयोजकरूपस्य फलीभूतज्ञानविषयत्वानियमेप्युपपत्ते अत एव दीधितिकृतापि सचतेषामन्वे~~
रूपवत्त्वं तेन तज्ज्ञानं यथा मंगलेन च, शाब्दबोधे तदनुप्रवेशोऽपि नियतो मानाभावादिति आभिहि
तं प्रसक्षमाणदीधितावित्यवधेयं एवं च यथामतं कार्यबोधतज्जनकवुद्ध्योस्तज्जनके वुद्धावेव काम्य
साधनताज्ञानस्यावश्यकत्वे साक्षात्स्वर्गसाधनस्य यागादेरपूर्वद्वारैव स्वर्गसाधनत्वं यद्यपि नव्यैस्तत्रा
नापूर्वोपस्थितिं विनेत्यपूर्वे विधिशक्तिरस्त्येव न इति मिश्रानुसारिप्रेयाः केचित्तु कामनाविशिष्टस्य कार्य
तान्वयितया भानेऽतर्गतस्य कामनाधीनकार्यत्वभानवस्य साक्षादेव निर्वाहकं काम्यसाधनताज्ञानं
कृतेः कामनाधीनत्वं कृतिप्रयोजककाम्यसाधनत्वशरीरे कामनांतर्भावादेवेति काम्यसाधनत्वस्फु

त॰ चौ॰ मनाधीनकार्यताऽवच्छेदकप्रयोजकतया तद्रूप एव तस्य योग्यताऽवगमात्तन्नियोज्यत्वज्ञानमनपेक्ष्यैव का-
१०८ म्यसाधनताज्ञानेन कार्यताज्ञानमुत्पाद्यते यागस्य स्वर्गसाधनत्वमुपादानेनावगम्य काम्यमानस्व-
र्गसाधनं यागः स्वर्गकामकार्य इत्यवैतीति प्राचीनग्रन्थस्याप्यत्रैव स्वरसोऽवसीयते तत्र नियोज्यत्व-
ज्ञानापेक्षायाः कार्यताबोधे अनुपपितावच्छेदकतया नियोज्यत्वभानस्य वा प्रदर्शनात्। कामना-
विशिष्टस्य नियोज्यत्वमपि तद्विशिष्टस्य कृतिप्रयोजकतानिर्वाहकमिति तज्ज्ञानमप्यवश्यापेक्ष-
णीयमिति चेत्तत्किं यावन्निर्वाहकज्ञानमेव शाब्दबोधेऽपेक्षितं तथा सति चिकीर्षाप्रयोजकत्वादेरपि
कृत्युपयोगितानिर्वाहकतयात ज्ज्ञानमप्यपेक्ष्येतेति विवक्षवोधेऽनर्थाः प्रसज्येरन्। अर्थबोध्यधीनबोधे
नियोज्यत्वभानानुपगमे स्वर्गकामस्यैव संवेदितेत्यादिवाक्यमप्रमाणं स्यात्। न। तस्य स्वर्गकामतयापि चै-
संवेदनसंभवेन स्वर्गकामनाधीनकृतिसाध्यत्वस्यापि तत्राबाधात्। मम तु स्वर्गकामनाधीनस्य कृतिसा- हेरंब॰
ध्यत्वज्ञानस्य विषयोऽनवैसंवेदने अन्यथाख्यात्यनभ्युपगमेन चैत्रसंवेदनादौ काम्यस्वर्गसाधनत्व- १०८

भ

चरैभाविन्योपादानिकबोध एव कर्तृत्वाधिकारित्वयोरपि लाभादिति तैरेव वक्ष्यमाणत्वात्। तथा च स्वर्गकाम नि-
योज्यको यागः स्वर्गकामकार्य इत्याकारकस्तद्घटितकार्यताबोधः श्रेयान्न यागः। नियोज्यस्वर्गकामकार्योप-
गा इति तदर्थः। यागविशेष्यकस्वर्गकार्यताज्ञानप्रयोजकस्वर्गकामनाविशिष्टप्रयोज्यकृतिसाध्यो याग
इति निगर्वः। न च योग्यताज्ञानत्वेन नियोज्यत्वज्ञानस्य पूर्वापेक्षणीयत्वेपि फलीभूतज्ञाने तज्ज्ञानम-
नर्थकमिति वाच्यं तदन्वयप्रयोजकरूपविशिष्ट एव तदन्वय इति नियमात्तदुक्तं मिश्रैर्योग्यताव-
च्छेदकप्रकारेणैवोपस्थितस्यैवेतरान्वय इति घटोच्छेदेतरत्वं स्वर्गकामनियोज्यत्वस्य योग्यतावच्छेदकतयोप-
स्थितेरिति तत्र योग्यता यागादिनियोज्येतरन्वयागादिकर्तृत्वबाधः इतरबाधकुच्छेरनुमितौ व्यापकताना-
वच्छेदकरूपकारकभासकत्ववच्छाब्दबोधेपि सदानुपस्थितप्रकारैर्भासकतायाः स्वयुक्तिसिद्धत्वात्॥
वस्तुतस्तु अर्थाध्याहारवादिनां तेषां योग्यताज्ञानात्मकनियोज्यताबोधवत् फलीभूततज्ज्ञानेपि नेतरबा-
धापेक्षेति विषयाबाध एव योग्यताऽवच्छेदकरूपस्य फलीभूतबोधे भानं मानाभिहृतो प्यनुमलं कार्यता।

न्या॰कौ॰ कमेवस्यात्तथाचापूर्वकार्यत्वानुपपत्त्या यागकार्यताला भइतिक्रियाकार्यत्वमोपादानिकमितितद्वि
१०५ द्धांतोभज्येतः यदिचपूर्वहूस्तयोः साध्यसाधनभावः स्वरूपसंबंधविशेषः पदार्थांतरमेव वेतिनासौ
हूतियागयोः साध्यसाधनभावघटितः अपितुतन्निपतद्दत्तुच्यनेलदाहूतिकामनयोः प्रयोज्यप्रयो
जकभावोपिनकामनाकार्यताज्ञानयोः प्रयोज्यप्रयोजकभावघटितइत्यपि [illegible] वितुल्यं स्वर्गकाम
नियोज्यान्वयपयोग्यताज्ञानविरहादित्यपिननियोज्यत्वरूपे पुनान्वयपरं अपितुस्वर्गकामरूपोयो
ज्यः तत्कार्यतान्वयपरमेव कामनाविशिष्टस्वहीसादिनाकार्यताज्ञानस्यकाम्यसाधनतावोधीनता
विशिष्टनियोज्यतानिर्वाहकत्वेन कथमपिकाम्यसाधनतायाः कार्यताधीनकामनाधीनाकार्यत्वनि
र्वाहकत्वमितितदन्वयेसायोग्यलेतिसूचयितुमित्याकूः। नद्यपेनिष्कर्षः। यागादिरूपकोलांतरभावि धा
साधनीभूतक्रियायांव्यापारघटितस्यताहशफलसाधनत्वस्य ज्ञानंन व्यापारोपस्थितिंविनाअप्र
वरूपव्यापारस्यचोपस्थापकांतराभावाद्विधेरेवतदुपस्थापकत्वमंगीकार्यंतच्चवद्यतिंविनाननिर्वाहती हेरंब॰ १०५

द्वा४

य

त्तिवैदिकलिङः कार्यत्वं नतत्रशक्तिः कल्प्यतेदित्वसाधनत्वस्वरूपसंबंधविशेषः पदार्थांतरंयातच्चप
रंपरासा[illegible]धनस्यापिनव्यापारघटितंएवंचव्यापारानुपस्थितावपिसाधनतात्वेनसामान्यधर्मेणप
सु रंपरासाधनत्वमपिपुर्हेपरंपरासाधनत्वेनचज्ञानमनपेक्षितइत्युच्यतेतदपिसाक्षात्साधनत्वे
नगृहीतेसाधनत्वान्वयवुद्धौफलसमपर्यंतस्यापिव्यापारजनकत्वरूपान्वयप्रयोजकधर्म
ज्ञानमपेक्षितंयोग्यताधीयः शाब्दधीजनकत्वादितियागादेःस्वर्गसाधनत्वान्वयवोधेहेतुक्षत
स्यस्वर्गपर्यंतस्यापिव्यापारजनकत्वज्ञानस्यनिर्वाहायताहशव्यापारेविधिशक्तिकल्पनमावश्यकंतत्त
था चविधिप्रसयात्कार्यतावाचित्वोपस्थितौतत्रयागस्यजन्यतासंबंधेनतदेकदेशेकृतौचका
मनाविशिष्टस्यप्रयोज्यतासंबंधेनान्वयोपगमात्स्वर्गकामोयजेतेत्यादितः यागविषयकं स्वर्गकामका
र्यमित्याकारकः शाब्दिकोऽन्वयवोधः विषयफदस्य जनकार्थकतयायागविषयकमित्यस्ययागजन्यमि
त्यर्थः तत्रचकामनाविशिष्टस्यकृतौप्रयोज्यत्वेनान्वयेकार्यताज्ञानवत्त्वरूपस्यनियोज्यत्वस्याचप्रयो

न्या.कौ. छेदकतया जलेन घटमाहरेत्यादौ घटे छिद्रेतरत्वं ज्ञानोपायमे क्रियायां कामिकार्यताबोधे कामिनः क्रिया
१०६ नियोज्यत्ववदुक्तबोधेपि कामिनोऽपूर्वनियोज्यतया भानमावश्यकं तथा च काम्यसाधनताज्ञानजन्यकार्य
ताधीमत्पुरुषकार्ययागविषयकमित्याकारक एवापूर्वकार्यताबोधः। इत्थं च यागस्य पुरुषकामनानां स्व
र्गार्थता च यागस्योपायत्वेन स्वर्गहेतुभूतापूर्वनियोज्यतया पुरुषस्य स्वर्गहेतुभूतपुरुषप्रवृत्तिजनक
कार्यताज्ञानजनककाम्यसाधनताज्ञाननिर्वाहकतया च कामनाया इति तत्सिद्धान्तोपि संगच्छते एवमपू
र्वे स्वर्गपर्यन्तस्थायित्वमपि प्राथमिकबोधे भासते तावत्त्वैव फलसमपर्यन्तस्थायिव्यापारजनकत्वरूप
योग्यताया न निर्वाहात् तत्र छिद्रेतरत्वादिवत् पदानुपस्थितमपि भासते अस्तु तदपि विध्यर्थ एवमपूर्व
कार्यतायां प्रतीतायां अपूर्वकार्यत्वं यागस्य कार्यत्वं विना नोपपद्यते यागद्वारैवापूर्वस्य कृतिसाध्यत्वादि
त्यनुपपत्तिज्ञानसहितसामग्रीतः स्वर्गसाधनयागः स्वर्गकामकार्य इति द्वितीयो बोधः तत्र काम्यसाधन हेरंब.
त्वरूपयोग्यता पदानुपस्थिताप्यन्वयितावच्छेदकतया भासते तत्त्वं च यागस्य स्वर्गकामकृतिसाध्यत्वं स्वर्गका १०६

रूपत्वलिंगस्य विशिष्टज्ञानासंभवेन भोक्तृस्य पुंसस्तादृशलिंगासंसर्गाग्रहाद्वकार्यत्वासंसर्गाग्रहमात्रोपगमा
नाविशिष्टनियोज्यत्वस्य तत्र बाध इति तादृशवाक्याप्रामाण्योपपत्तिरिति चेन्न स्वर्गकाम समभिव्याहृ
तविधिजन्यकार्यताबोधे स्वर्गसाधनत्वस्याप्यप्रयोजकस्यान्वयितावच्छेदकतया भाननियमो
पगमे नैव तदप्रामाण्योपपत्तेः। साध्यत्वसाधनत्वयोरेव धर्मिण्येकज्ञानविषयत्वेतु स्वर्गसाधनता
ज्ञानविषयत्वस्यैव योग्यतात्वमपयत्वे तदेव च कार्यताबोधेऽन्वयितावच्छेदकतया भासते इति अ
न्यथा स्यात्तमनभ्युपगमेन तदपि बाधितं चैसवेदनाद्दावितिन किंचिदनुपपन्नं। अथ कामनायाः कृ
तिप्रयोजकत्वं कार्यताज्ञानसंपादनद्वारैवेति कृतिजनककार्यताज्ञानप्रयोजकत्वरूपेमेव तन्न त्व
कार्यताधीप्रयोजकस्वरूपनियोज्यत्वघटितमिति कामनाविशिष्टस्य कर्तृत्वभानांतर्गतनियोज्यत्व
भानमिति चेन्न हि अपूर्वस्य कृतिसाध्यत्वे यागेनेति कृतिसाध्ययागसाध्यत्वात्मकमेव तत्तत्त्वं च यागस्य
कार्यत्वघटितमिति यागस्य कार्यताभानमपूर्वकार्यताभानं नर्गलमिति क्रियाकार्यत्वमाभिधानि

न्या-को॰ ज्ञानविषयाऽपेक्षिताद्दशवोधद्वयस्य शब्दजन्यत्वमनियतं प्रमाणान्तराधीनवोधे नापि निर्वाहादिति वो
१७ धअत्र यस्यैव तन्मते शब्दजन्यत्वनियमाद्वोधत्रयप्रवादः। केचित्तु स्वर्गकामकार्यत्वेनापूर्ववोधानंत
रमपेक्ष्या यागविषयकं कार्यमिति द्वितीयो वोधः। काम्यसाधनत्वेन स्वर्गकामकार्यत्वेन च क्रियाया वोधा
स्तृतीयः स्वर्गकामो यागकर्त्तेति चतुर्थः स्वर्गकामकार्यमिदमहं च स्वर्गकामः अतो ममेदं कार्यमिति यागे
षष्ठः प्रतिसंधानं पंचममिति पंचैव ज्ञानानि शाब्दानीत्याहुः। परे तु यागविषयकं स्वर्गसाधनत्वेन ज्ञाय
मानं स्यापि कार्यं नियोज्यस्वर्गकामीयमिति प्राथमिको चयवोधः। नियोज्यत्वं योग्यतात्वेन स्वर्गका
मेष्व कारैः तेयाभासते विशिष्टान्वयनिर्वाहकत्वेन स्वर्गकामस्य संसर्गतया पि भासते ततोऽतींद्रियत्वे
न फलत्वेन च साक्षात्कृत्ससाध्यस्यापूर्वस्यावगतं कार्यत्वं यागस्य स्वर्गकापि कार्यत्वं विनानुपपन्न
मित्यनुपपत्तिज्ञानसहकृतप्रमा तापूर्वद्वारक कार्यसाधनत्वज्ञानात् नियोज्यस्वर्गकामीयः स्वर्गसा
धनत्वेन ज्ञायमानो यागः कार्य इति द्वितीयो वोधः तोयत्कृतिसाध्यत्वेन यागो ज्ञानं त्साकृतिराश्रया। व्यति हेरंब॰
त १०७

रेकेणानुपपन्नत्वे सत्यनुपपत्तिज्ञाने स्वर्गकामः स्वनियोज्यकस्वर्गसाधनत्वेन ज्ञायमानकार्यप्रयोगानुकूलकृति
मान् स्वर्गकामः स्वनियोज्यकस्वर्गसाधनत्वेन ज्ञायमानकार्ययोगानुकूलव्यापारवानिति वा तृतीयो वोधः
क्रियानुकूलव्यापारवत्त्वमेव कर्तृत्वं अत एव यागे स्वर्गकामकृतिसाध्यत्वेऽवगते तत्कर्तृत्वमपि लब्ध
मिति तृतीयवोधो व्यर्थ इत्यपि परास्तं। सामान्यतः शक्त्या आख्यातोपस्थापित स्वव्यापारस्य कर्तृसाकांक्ष
तया प्रथमांतपदोपस्थाप्यान्वयित्वनियमेन च तृतीयवोधस्यावश्यकत्वात्। ततोऽनानधिकृतः कर्त्तेति
न्यायेन स्वर्गकामस्यावगते कर्तृत्वे यागजन्यफलस्वामी त्विति चतुर्थो वोधः ततश्चैतद्वाक्यस्यावगतप
दत्वं घटितमेतज्ज्ञानजनने विनानुपपन्नं ज्ञानसाहितेन स्वर्गकामस्य यागः कार्यः स्वर्गकामो यागः कार्यः
स्वर्गकामो यागस्य कर्त्ता भोक्ता चाहमपि स्वर्गकाम इति प्रतिसंधाने न यागो मत्कृतिसाध्यः अहं च प
र्मिकर्त्ता तदधिकारी चेति प्रवर्त्तकं पंचमं ज्ञानमुत्पद्यत इति प्राभाकरसंप्रदाय इति प्राहुः। ननु आशु
विनाशिनः कालांतरभाविफलसाधनतान्वयेयदि फलसमयस्यापि व्यापारवत्त्वं त्योग्यतात द्वारेण

न्या॰कौ॰ यादिषु षड्यागेषु परमापूर्वसाधनता न्वयवोधानुरोधेन षस्मं कालिकापूर्वोप्णम पिवाच्यात्वमंगीकृ
१०८ रणीयंतत्रापितस्यैव योग्यतात्वात् तथाग्नेयोष्टाकपालोभवसमावास्यायांऐंद्रंदधिभवसमावस्यायां
आग्नेयोष्टाकपालोभवति पौर्णमास्यां ताम्पामग्नि षोमीयमेकादशकपालं पौर्णमास प्रायच्छेतडपां
शुयागमंतरायजतीतिषट्द्रव्यदेवतासंवंधरूपैः यागैर्वे विधिप्रतिरूपकीभूतेमांतर्भावितणिजंतेन
भवतीत्यादिना न्यघतद्धेतुत्वंषड्णांगात्मकदर्शपौर्णमासस्वरूपे प्रतिपादयेतिनद् नंतरंचनत्प्रतीतसा
धनत्वानुपपत्त्यादिषुडुत्पसपूर्वाणि कालिकापूर्वव्यपदेश्यानिकल्प्यंतइति प्राभाकरसिद्धांतभंग
प्रसंगः यागेविनाव्यापारीयस्थितिं स्वर्गहेतुत्वस्यैव परमापूर्वहेतुत्वस्यापि ग्रहीतुमशक्यत्वात्तत
स्मादुभयत्रापि पूर्वकल्प्यतावाच्यतावास्तु मनुवेषम्येणाधेत्नरतीयंएवमंगीपूर्वेपि। यत्नादौप्रधा
नविधिप्रवृत्त्यानडुपस्थापितपरमापूर्वमद्दृष्टत्वसाधनत्वमाग्नेयादीनां वोध्यतेतदानीं सामान्यतोया
गः फलपर्यंतस्यापि व्यापारवानितियोग्यतानिश्चयो स्येवप्रधानविधिनैवापूर्वस्योपस्थितत्वात्सएव हेरंब॰ १०८

४ यागस्य प्रथमप्रतीतिरूपोत्पत्तिबोधकतयोत्पत्तिवाक्यानिदर्शपूर्णमासाभ्यां यजेत स्वर्गकाम इति प्रधानविध्यर्थाकृतंप ७

~~मकार्यंइतिद्वितीयो वोध॰॰॰काम्यसाधन॰॰॰योग्यता॰॰॰नुपपत्तिः तापुच पिता वच्छेदकतयामास~~
~~[redacted]~~ प्रकृतिसाध्यत्वे स्वर्गकामस्ययागकर्तृत्व विनानुपपन्नमित्यनुपपत्तिधीघटित
शाब्दा स्वर्गकामोयागकर्त्तेतितृतीयो वोधः। यद्यपि क्रियाकार्यतावोधात्पूर्वमोपादानेकः क्रियायाः का
म्यसाधनतावोधोप्यवश्यमंगीकरणीयः तंविना योग्यताज्ञानविरहेण क्रियाकार्यत्ववोधासंभवा
त् तडुक्तं एवमपूर्वकार्यतावोधेवोद्धा विप्र शतिअपूर्वंजनिकालावत्कामिकृतिः सापदियागविषया
व भावेतिलदेवापूर्वजनयितुं शक्नोतिनत्वन्यथान्यतस्तद्धेतुत्वसत्तेः कामिकृतिश्चयागविषयातदाभव
तिपदियागः काम्यमानसाधनस्यातकाम्यसाधनतायाज्ञानएवकामिनः कार्यताधीनियमात्
एवंयागस्यस्वर्गसाधनत्वमुपादानेनावगम्यकाम्यमानस्वर्गसाधनयागः स्वर्गकामकार्यइत्युपादा
नसन्निवाछद्वाददवैलीति। एवंमिश्रमते कामिनः क्रियानियोज्यातयावोधोप्यवश्यमंतरास्वीकरणीयः तेन
नियोज्यत्वस्यकार्यत्ववोधोयथिकयोग्यतात्वस्वीकारादिति वोधपंचकमिवनतुत्रयंतथापियोग्यता

सा॰कौ॰ तवबोधात् अनंतरं च यएवं च विद्वानमावास्यायां यजते एवं विद्वान् पौर्णमासीं यजते इति विद्वद्वाक्याभ्यां पौ
१०९ र्णमास्योः क्रियाकलापस्वरूपतावगते साक्षात्तदवबोधे पि पर्यवसितस्य पक्ष्यमाणसाधनत्वस्य रक्षणार्थं कलिकापू
र्वकल्पनेमितिचेन्न एवं सति कलिकापूर्वाणामविद्यमात्रकल्पनायाः उपपादने थ भिन्नकल्पनाया अनुपप
न्नत्वात् अथोत्पत्तिवाक्यानि यदि षड्यागानां परमापूर्वसाधनत्वबोधये स्युस्तदा बोत्कलरीत्या कलिकापूर्वाणां
वाच्यत्वं स्यात्तदेव न किंतु तेषां दर्शपौर्णस्वरूपमात्रबोधकत्वमुपेयं तत्त्व इति नोत्कलरीत्या तेषां वाच्यत्वेति
चेन्न तथापि दर्शपौर्णमासाभ्यां यजेतेति प्रधानविधेः दर्शपौर्णमासौ परमापूर्वसाधनताबोधकतया द
र्शपौर्णमासाभ्यामिति द्विवचनेन प्रथममपठितैरुत्पत्तिवाक्यैश्च एककारणकलापस्वरूपतयावगते यागे
परमापूर्वसाधनताबोधस्यातिस्फुटतया चलदनुरोधेनैव कलिकापूर्वाणां वाच्यताभ्युपगमस्याव
श्यकत्वादिति चेदत्र केचित् कलिकापूर्वाणामपि तन्मते न वाच्यत्वं किंतु कल्प्यत्वमेव कल्पता प्रवादस्तत्प ह॰ब॰
रमापूर्वसाधनत्वप्रसक्त्यान्यथानुपपत्त्या तद्बोधकवाक्यस्योपगममात्रनिबंधन इति वदंति अपरे त्वाहुः य १०९

द्वापवच्छेदेन कालांतरभाविसंप्रतिसंधानं तेनैव तेनैव रूपेणाभासमानं फलं प्रति फलसाधनाच्चये फलप
र्यंतस्यापि व्यापारवत्त्वं योग्यता तादृशं च रूपं स्वर्गत्वादिकमेव न तु कार्यत्वं कार्यस्याव्यवहितक्षणे पि संभ
वात् एवं च कार्यसाधनतात्वेन परमापूर्वसाधनत्वं चयपेद्वारोपस्थितेस्तपेक्षाविरहे यत्कलिकापूर्वाणां
न बोध्यता परं तु अग्ने स्वर्गपर्यंतस्थायिकार्यांतरजनकानामाग्नेयादीनां तादृशकार्यजनकत्वं परमा
पूर्वद्वारायैव पर्यवस्यतीति तत्त्वस्य सर्वादीर्घ्यं कालांतरभावी तिव्यापारं विना तज्जनकत्वानुपपत्त्या कलि
कापूर्वाणि कल्प्यंते इति तेषां कल्प्यत्वमिति एवं भंगापूर्वप्युत्करीत्या कल्पतो लेति दिक् । न त्वेवं मार्गस्वि
र्गसाधनतानिर्वाहाय अपूर्ववाच्यमिति यद्यंगीक्रियते तदा यो ब्राह्मणायावगुरेत् शतेन यातयादिति
यात स्याद्यो ब्राह्मणवधोध प्रागभावाबाधस्य शतेनाकल्पनरकं विशेषवानि सर्यका ब्राह्मणावगोरण
स्य शतयातनाहेतुत्वग्रहार्थं दुरितापूर्वस्यापि वाच्यत्वमावश्यकं विशेषाभावात् तथा च तत्र शतयात
नाहेतुत्वमवगम्य तन्निर्वाहकं दुरितापूर्वं कल्प्यत इति शाभाकरसिद्धांतविरोधो दुर्वार इति चेदत्राहुः न

ना॰ बो॰ एवं दुंदुरदृष्टतयादि सनेनावगारणापातनी विधिये तेनत्र च स्वर्गसाधनत्वं योग्यता तत्र हृष्टश्च नद्वारोपस्थितिं
११० विनेति मुक्तं तदपूर्वस्य वाच्यत्वं प्रसक्तं तेतु हेतु हेतुमतोर्लिङ्. सन्तु शासनवले नाव गौरवेण शलयात नयोर्लि
यतपौर्वापर्यमात्रं प्रतिपाद्यते तत्र च न । द्वारोपस्थितिरपेक्षितेति द्वारं विनैव पूर्वापर्यनिश्चयसंभवाल्लि
ङ्दुरितापूर्वस्य वाच्यत्वं । न चैवं दुरितापूर्वकल्पमिति नस्यादिति वाच्यं । कारणतस्कल्पनायां गौर
वेणान्यथासिद्धिपंचकरहितस्यैवावगोरणस्य नियतपूर्ववर्त्तितयोपस्थितस्य कारणत्वकल्पनेऽन्यथा
नियमवद्भिरभूतात्कोशाघा अपूर्वं शोतेश्चेल्लिङ्दुरितापूर्वकल्पनायाआवश्यकत्वादिति प्राभाकरमतनिगर्वइति
अत्रन्यायविदः अन्वयप्रयोजकरूपवत्वे यदि योग्यतास्यात्तदैवोक्तरीत्यापूर्वस्य वाच्यत्वं संभाव्यते
न देव न अन्वयप्रयोजकरूपवत्वस्य योग्यतात्वे स्थलजलाभिप्रायकस्य पयसासिंचतीतिवाक्यस्यापि
योग्यतापत्तिः अन्वयप्रयोजकरूपस्य द्रवद्रव्यत्वस्य स्थलजलेपि सत्वात् । न चानन्वितवृत्तित्वेनानुप हेरंब॰
स्थितधर्मवत्वमेवान्वयप्रयोजकरूपत्वमिति नोक्तातिप्रसंग इति वाच्यं तथा सत्येनन्वयनिश्चयविरहस्ये ११०

च परमापूर्व साधनतान्वयबोधजनक इति तदसत् तादृशानिश्चयस्याग्नेयत्वादिरूपान्वयितावच्छेदकाय
कारकत्वेन परमापूर्वस्योपस्थितौ तज्ज्ञातीयद्वारसंभावनयान्वयबोधसंभवादिति वाच्यं । शाब्दबोधेन्व
यप्रयोजकरूपवत्त्वरूपयोग्यतानिश्चयस्यैव जनकत्वात् । अन्यथा रोगनाशकौषधभक्षणादौ फ
लपर्यंतस्यापि मायारस्य धातुसाम्पादेर्दृशेनेनत संभावनया स्वर्गसाधनत्वधीसंभवेनापूर्वमात्रस्यैव वाच्य
तानस्यात् । यत्तुपिष्टैः पुरुषैरेकदानुष्ठितानामाग्नेयादीनां षण्णां योगबद्ध संभवे न साक्षात्साधनत्वं
साधनत्वलारेण प्रथमं तेषां परमापूर्वसाधनत्वधीस्तु घटैवेति न कालिकापूर्वोपस्थितिसापेक्षापदं तेन च
क रमेकैकत्वेऽपत्वाद्वारेणेन साक्षात्साधनत्ववाधप्रतिसंधाने साधनत्वसामान्यरसार्थमुत्सर्गन
कल्पनेनतेषां कल्पनेत्वमिस्युपाध्यायैरुक्तं तदप्यसंमंजसं प्रथममेककार्तकत्वस्य पाणि पिहितत्वाभावेन
योग्यतानिर्णयासंभवात् अमावास्यापौर्णमासी विहितयो मेनागपद्यसंभावनाया असंभावितत्वा
च । अर्थैक्रमेण नेयादीनां मेकैकपरमापूर्वसाधनत्वमवगम्यते तत्र च नानुपपत्तिः साक्षात्साधन

न्या·कौ ११९ प्रादुपस्थितस्यैव शाब्दबोधविषयत्वेन सच्छिद्रेतरत्वस्य पदानुपस्थिततया शाब्दबोधविषयत्वासंभवात् नन्व
घटपदस्य सच्छिद्रेतरघटत्वावच्छिन्ने लक्षणया सच्छिद्रेतरत्वमपि पदोपस्थितमेवेति वाच्यं अन्वयानुप
पत्तिज्ञानादिविरहेणानिर्वीजलक्षणायां मानाभावात् लक्षणाप्रतिसंधानाभावेपि शाब्दबोधस्यानुभ
वसिद्धत्वाच्च अथ घटादिपदस्य घटादौ व्यवहारादिना शक्तिग्रहे सच्छिद्रेतरत्वादेर्भानात् शक्तिग्रह
जन्यसंस्कारोपस्थितस्य तस्य शाब्दबोधे भानमस्तु आकाशशब्दाच्छब्दस्यापि शब्दाश्रयत्वस्य शब्दा
श्रयत्वविषयकाकाशशब्दशक्तिग्रहजन्यसंस्कारोपस्थितिशब्दाश्रयत्वस्याकाशशब्दजन्यशाब्दजन्य
शाब्दबोधे भानदर्शनादिति चेन्न वृत्त्यापदजन्योपस्थितिविषयस्यैव शाब्दबोधविषयत्वेन सच्छिद्रे
तरत्वादौ वृत्त्या घटपदजन्योपस्थितिविषयत्वाभावात् अन्यथा संस्कारोपस्थितस्यैव फलपर्यन्तस्यापि व्यापा
रवत्त्वस्योपस्थितिसंभवेत्तन्मतसिद्धमपूर्ववाच्यत्वमपि दुर्घटं स्यात् विशिष्यापूर्वानुभवाभावेन तथाऽस्मर
णात् विशाब्दबोधं प्रति समानप्रकारकत्वेनैव पदार्थोपस्थितिर्हेतु तया सामान्यतः स्मरणेन गवादिपदा हेरंब· ११९

न्या

ब४

वात्रापि विशेषस्य शाब्दबोधविषयत्वसंभवात्। आकाशपदस्य तु शब्दाश्रयत्वविशिष्ट एव शक्त्यभ्युपगमात् नन्वा
दृष्टद्रव्यातिरिक्तद्रव्यत्वेनाप्याकाशस्याकाशपदादुपस्थिति सा[illegible]पत्तौपस्थितिकत्वाभावान्न शब्दाश्रयत्वविशिष्टे
शक्तिसंभव इति वाच्यं कदाचिद्गुरुधर्मविशिष्टस्य शक्तिभ्रमाद्बोधसंभवेपि लघुधर्मविशिष्ट एव शक्तिक
ल्पनाया उचितत्वात् अन्यथा कदाचिद्भुवया दृष्टादृष्टविशिष्टस्य शक्तिभ्रमाद्वादि पदेन बोधने गोत्वा [illegible]
दिविशिष्टे शक्तिविलोपापत्तेः शब्दाश्रय आकाशत्वादि सहप्रयोगस्तु आकाशपदस्याकाशपदवाच्या
दिपरतयोपपादनीयः। केचित्तु आकाशपदादाकाशस्य निर्विकल्पकस्मरणं शाब्दबोधस्तु इतरपदार्थ
प्रकारक एवेति न तस्य निर्विकल्पकत्वापत्तिरित्याहुः अन्ये तु आकाशांशे निर्धर्मितावच्छेदकतया आका
शोप्यमितिसादिवाक्यजन्यशाब्दबोधस्य संशयनिवर्त्तकत्वं न स्यात् स्याच्च तदंशे निर्विकल्पकात्मकोपस्थि
तिस्वीकारेतत्वमुक्तातिरिक्तकार्यकारणभावादिकल्पनागौरवमिति नोक्तमतं सम्यगित्याहुः। अथ साक्षा
त्स्वर्गसाधनताबोधसहकृतायाः स्वर्गसाधनत्वत्वेन स्वर्गसाधनत्वबोधसामान्यसामग्र्यास्तदितरपरत्वेन

ना. कौ. स्वर्गसाधनत्वत्वेन परंपरास्वर्गसाधनत्वप्रकारकबाधजनकत्वमनुभवसिद्धं इदंपरवचो यौक्तिकेच अन्यथा पर्वतीय
११२ वह्निबाधसहकृतावाष्पाद्यनुमितिसामग्र्या अपि पर्वतीयवह्नित्वेन पर्वतीयवह्निप्रकारकानुमितिजनने
३१३ तदनंतरं पर्वतः पर्वतीयवह्निमानवेति संशयापत्तेः इतरबाधस्थले नुमितौ व्यापकतानवच्छेदकत्वेवशा
ना द्रूपदानुपस्थितस्यापि भानात्तथा पूर्ववाच्यत्वंदुर्वीरमिति चेन्न साक्षात्साधनत्वबाधे साक्षात्स्वसाधन
नताखेन परंपरासाधनत्वबोधोपगमे नाशेषात् तस्मादपूर्ववाच्यतया कल्पत्वेन लिंङो पूर्व
बोधकतानास्तीति विस्तरेण अत्रं भवदाः यागंव्यापारतयास्वर्गपर्यंतस्यापि नोऽपूर्वस्य कल्पनम
पेक्ष्य यागादेरेवस्वर्गपर्यंतस्यापित्व कल्पनमुचितं धर्ममात्रकल्पनेलाघवात् तावतैव स्वर्गसा
धनत्वोपपत्तेश्च अथ विभुसमवेतयोग्यविशेषगुणनाशत्वावच्छिन्नं प्रति स्वाग्नेतरोत्पन्नस्वसमानाधिक
रणविशेषगुणत्वेन हेतुतायाज्ञानादिस्थले क्लृप्तत्वेच्छारूपयागस्यत्वतीयपूर्पाशावश्यंभावेन स्वर्गपर्य
तंस्यापित्वं न संभवतीति चैत्रत्वस्यान नुगमे तत्कारणतावच्छेदकस्य तत्तद्व्यक्तिविश्रांततया कार्यतावच्छेदकस्या हेरंके ११२

त्वयोग्यतात्वमुपेत्य स्वरूपसत्त्वस्यान्वयबोधे हेतुत्वौचित्यात् तत्स्वाचयोगेपि स्वर्गसाधनत्वबाधधीविरहेणासं
भवात् ॥ वस्तुतस्तु एकपदार्थेतात्पर्यविषयीभूतापरपदार्थसंसर्गवत्त्वमेव योग्यता लाघवात्तस्याश्च सं
शयसाधारणं ज्ञानमात्रमेव हेतुः तत्तु यागेपि स्वर्गसाधनत्वासंशयस्य तत्र सत्त्वात् अपूर्ववाच्यत्वा
दिनापि तथैव वाच्यत्वात् न च पूर्वे स्वर्गसाधनत्वस्य तद्योग्यतारूपस्य फलपर्यंतस्थायि व्यापारवत्त
स्य वापूर्वं निश्चयस्संभवति एवं चापूर्ववाच्यत्वं विनैव यागे स्वर्गसाधनत्वादिशाब्दबोधसंभवे पूर्ववाच्य
त्वे मानाभावः ननु सामान्यज्ञानजनकसामग्र्या एकविशेषबाधे तदितरविशेषप्रकारकज्ञानजन
कत्वनियमः अतएव घटे न जलमाहरेत्यादौ सच्छिद्रघटबाधे छिद्रेतरघटस्य सच्छिद्रेतरत्वेन भानं एवं च
यागे साक्षात्साधनत्वबाधे परंपरासाधनत्वेन भानमुपेयं तेन परंपरा घटकापूर्वोपस्थितिं विनान
संभवतीति तद्वाच्यत्वमावश्यकमिति चेन्न साक्षात्परंपरोदासीनसाधनत्वेनैव परंपरासाधनत्वभा
नोपगमात् घटे न जलमाहरेत्यादावपि घटत्वादिनैव छिद्रेतरघटादिभानं न तु सच्छिद्रेतरघटत्वादिना

या॰ कौ॰ नि॰ अपूर्वोप■गमे तु प्रधानस्यैकं परमापूर्वं हेतुत्वं फलेषु दश हेतुत्वानि परमापूर्वस्यापि फलेषु दश हेतुत्वानेव॰ प
११३ रमापूर्वप्रतिबंधांगानां शतं हेतुत्वानि शतं हेतुत्वानि चांगापूर्वाणां। अंगापूर्वेषु चांगानां शतं हेतुत्वानीति लाघ
वं स्फुटमेव॰ एतेन यागादिध्वंस एव यागादिना स्वर्गजनने व्यापारोऽस्तु किमपूर्वेण। न च प्रतियोगिकार्ये ध्वं
सस्य ध्वंसकार्ये च प्रतियोगिनोऽन्यथासिद्धतया न हेतुत्वं संभवतीति वाच्यं। तथान्यथासिद्धत्वे मानाभावात् तान्
चैवं यागादेः स्वर्गादिप्रतिबंधकतापत्तिः कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबंधकतारूपत्वादिति वा
च्यं॰ घटादिनाशजनकताशप्रतियोगिनः कपालादेर्घटादिनाशप्रतिबंधकतावारणाय संसर्गाभाव
त्वावच्छिन्नसत्ताभावत्वावच्छिन्नाधाराकरणतातद्द्राश्रयाभावप्रतियोगित्वस्यैव प्रतिबंधकतारू
पत्वेनादोषात्। यत्तु गंगास्नानस्य सर्वांगीणजलसंयोगरूपस्यापूर्वद्वारैव फलहेतुता पुण्यते
विनिगमनाविरहेण जलावयवविनाशद्रव्यवैश्वसंयोगादीनां फलात्तत्वेन एकस्य ध्वंसस्य व्यापा
रत्वायोगात्। बहूनां च तथात्वे गौरवप्रसंगादिति तन्न सत्। बहूनामपि ध्वंसानां ध्वंसत्वेनैकहेतुता हे॰ बं॰ ११३

ति॰

वांगोऽवानवकाशेनोक्तयुक्तेरप्रयोजकत्वात्। न च धर्मः क्षरति कीर्त्तनादिति श्रुतेरेवापूर्वप्रमाणं तस्य विहितक्रियाव्यापा
रविशेषो धर्मः क्षरति नश्यतीत्यर्थकतया तदर्थस्यापूर्वमंतरेणानिर्वाहात् ध्वंसस्य ध्वंसासंभवादिति वाच्यं। विहि
तक्रियाकर्तृत्वमात्रेण धार्मिकपदप्रयोगेण तस्याः स्मृतेः धार्मो विहितक्रियाक्षरति स्वकार्यजननात् च्यवति
फलं नोत्पादयतीत्यर्थकतया तदर्थस्य च फले कीर्तनस्य प्रतिबंधकतयैव निर्वाहेणापूर्वासिद्धेः। न च प्रधा
नफलाजनकत्वे सति तज्जनकापूर्वजनकस्यांगत्वात् तद्व्यवहार एवापूर्वे प्रमाणमिति वाच्यं। प्रधानक
र्यतापर्याप्तविधिविषयस्यैवांगत्वात्। न च यागध्वंसस्य व्यापारत्वे स्वर्गविच्छेदोऽनुपपन्नः अपूर्वस्य
व्यापारत्वे च तस्य चरमस्वर्गव्यक्तिनाश्यतया तदुपपत्तिरिति वाच्यं। कृतयागादेरिहलोके विफ
लवारणाय सहकारितया यावद्भोग्येयस्य वृत्तिः लाभात्मककालविशेषस्यैवोपफलोत्सादकतया तदुपप
त्तेः एवं निषिद्धकर्मणामपि ध्वंसद्वारा नरकजनकतोपपत्ता दुरितापूर्वेऽपि मानाभावः न च तस्मादेनसः
स्तो भवतीति श्रुतस्यात्। सिद्धिः तद्धुत्पादितस्य च तस्य दुरितापूर्वनाशप्रतिपादनात् सिद्धिरिति वाच्यं एनः पद

तं

स्य कों॰स्य तादृशकर्मपरतया श्रुतेः कृतप्रायश्चित्तस्य निषिद्धकर्मजन्यफलभागित्वाभावमात्रप्रतिपादकत्वादिसपिव
२३७ तत्संयागादिध्वंसस्य व्यापारतया मंगलानामपि प्रधानफलं प्रत्येव हेतुत्वस्योपगंतव्यतया क्त्वादिशागौरवाप्रसं
गादिति दिक्। किंचितु कीर्तनादिना नाशप्रतयैवापूर्वसिद्धिः। अन्यथा कीर्तनादेः फलाभावप्रयोजकत्वानुपप
त्तेः ध्वंसस्य तदनाश्यत्वाद्विरातीतेन कीर्तनादिना कालांतरभाविस्वर्गादिफलप्रतिबंधस्याप्ययोगात्॥
नच कीर्तनादिध्वंसस्य फलप्रतिबंधकत्वोपगमात्तदुपपत्तिरिति वाच्यं। तथासति कीर्तितैकाश्वमेध
स्य पुरुषस्य कीर्तनानंतरमाचरितेनाप्यश्वमेधेन फलानुत्पत्तिप्रसंगात्। अकीर्तितकार्यस्थलीनं च
तत्तत्कर्मव्यक्तिजन्यफलं प्रति तत्तत्कर्मकीर्तनध्वंसस्य विरोधित्वकल्पने प्रसंगइति वाच्यं। तादृशफलस्य न्नो?
प्रायशोऽप्रसिद्धत्वात्। गौरवात्। अकीर्तितकार्यस्थलीयसामान्यसामग्रीबलेन कीर्तितकर्मणाऽफल
जनकतायां तेदुर्वारत्वाच्च। एतेन तत्तत्कर्मजन्यं तत्तत्कर्तृगतं यत्फलं तदन्यफलं प्रति तत्तत्कर्मकीर्तनध्वं हे०खं०
सो विरोधी तस्य फलस्य पुरुषांतरे प्रसिद्धत्वादिसपि निरस्तं। यत्तु अश्वमेधादेः फलजनकतायां कीर्ति ११७

प्तित्सध्वक्तिविशिष्टत्वावश्यकतया यागादिनाशे स्वजन्यचरमस्वर्गप्राप्तेरेव तद्ध्वंसेन हेतुतापागमेन या
गस्य स्वर्गपर्यंतस्थायित्वसंभवात् नच यागस्य स्वर्गपर्यंतमवस्थाने चतुर्थादिक्षणेऽपि यज्ञोऽहमिति साक्षात्कारद्रया
गापत्तिरिति वाच्यं। विषयतासंबंधेनात्मविशेषगुणप्रत्यक्षे स्वाधिकरणक्षणोत्पत्तिकत्वसं
बंधेन स्वस्य हेतुत्वोपगमेनोक्तापत्त्यसंभवात् नचैतादृशहेतुताकल्पने गौरवमिति वाच्यं। अनंतातिरि
क्तापूर्वकल्पनापेक्षया तादृशहेतुतायामेव लाघवादिति वदंति अत्र नैयायिकधुरंधरान्याः यस्य
विशेषगुणस्योत्पत्तिर्योग्यतासंबंधेन नाशसावच्छिन्नं प्रति स्वपूर्ववृत्तिस्वसामानाधिकरण्योभयसंबंधेन विशेष
गुणत्वेन सामान्यत एव कारणताकल्पने बाधकाभावेन ज्ञानसुखादेरिव यागस्यापि तृतीयक्षणे नाशस्यद्ध
र्वारतया स्वर्गपर्यंतमवस्थानासंभवेन तावत्पर्यंतस्थाय्यपूर्वात्मकव्यापारकल्पनमावश्यकं॥ किंचापूर्व
स्वीकारे लाघवात्तदुपरंगम आवश्यकः। तथाहि अपूर्वानंगीकारे प्रधानफलहेतुत्वं मंगलानामपि त्यागेऽपित वाच्यं।
यावपस्य दशविधफलहेतोर्यागविशेषस्यांगानि दशतेनस्य फलं प्रतिहेतुत्वानि दश अंगानां च दशशतं हेतुत्वा

ना०कौ० अथसमवाये न तत्तदात्मीयाश्वमेधत्वादि स्वर्गादिकं प्रति तत्तदात्मत्वेन तादात्म्यप्रसाससाकारणत्वस्य नाशो
११५ त्पत्तिरिति चेन्न गौरवापत्तेः एवं प्रायश्चित्तादिनाश्यत्वेन दुरितापूर्वसिद्धिः ध्वंसस्य निषिद्धक्रियाव्याप्य
त्वे कृतप्रायश्चित्तस्यापि गोवधादिध्वंसत्वेन नरकोत्पादप्रसंगात् न च प्रायश्चित्तध्वंसस्य प्रतिबंधकत्वो
४ गो पगमान्नदोष इति प्रायश्चित्तानंतरं कृतस्यापि [illegible] वधादेर्नरकाजनकत्वप्रसंगात्। न च तत्तत्कर्मानंतरकृ
तप्रायश्चित्तध्वंसादेस्तत्तत्कर्मजन्यनरकप्रतिबंधकत्वोपगमान्नोक्तदोष इति वाच्यं उपदर्शितरीत्या सा
नंतादृशोपगमासंभवादित्याहुः अपरे तु तत्त्वज्ञाननाश्यतया दृष्टसिद्धिः ज्ञानाग्निः सर्वकर्माणि भस्म
सात्कुरुते ऽर्जुनेत्यादि स्मृतेः न च तत्त्वज्ञानस्य भोगप्रतिबंधकतया फलाजनकत्वपरा सा स्मृतिरि
ति वाच्यं सौभरिप्रभृतीनां तत्त्वज्ञानिनां भोगश्रवणेन तत्त्वज्ञानस्य भोगप्रतिबंधकत्वाभावात् किं
चापूर्वानंगीकारे तत्त्वज्ञानिनामपि विहितनिषिद्धाचरणे न भोगापत्तिः। तादृ…कारे तु वासनाविरहेण हेरंब०
पूर्वानुत्पत्तौ क्षत्यभावात् न च वासनीयाभोगनियामकत्वं संभवति तत्त्वज्ञानिनां भोगाप्रसंगात्। एव ११५

गीर

मपूर्वं तु एण्याप्तिश्च सद्यो मैत्रेयजायत इत्यादि स्मृतयोप्यपूर्वे प्रमाणमिति प्राहुः तच्चापूर्वं द्विविधं परमापूर्वं क
लिकापूर्वं च दर्शपूर्णमासाभ्यां यजेत स्वर्गकाम इति प्रधानविधिबोधितस्य दर्शपौर्णमासात्मावच्छिन्नस्य स्व
र्गसाधनत्वस्यानुपपत्त्या परमापूर्वकल्पनं तथैवाग्नेयोष्टाकपालो भवत्यमावास्यायां ऐंद्रं दधि भव
त्यमावास्यायां ऐंद्रं पयो भवत्यमावास्यायां आग्नेयोष्टाकपालो भवति पौर्णमास्यां अग्नीषोमीयमे
कादशकपालं पौर्णमासे प्राप्य च्छं तदुपांशु याजमंतरा यजतीति षड्विधद्रव्यदेवतासंबंधरूपयागस्य
प्रथमप्रतीतिरूपोत्पत्तिप्रत्यायकतयोत्पत्तिवाक्यैः प्रत्येकमाग्नेयत्वाद्यवच्छिन्नबोधितस्य परमापूर्व
द्वारकस्वर्गसाधनत्वस्यानुपपत्त्या षट्कलिकापूर्वाणां कल्पनस्यापि औचित्या वर्जितत्वेन युक्तत्वा
त्॥ अथ षडाग्नेयादिभिः कालिकापूर्वषट्कद्वारा स्वर्गजनने संभवे न परमापूर्वे मानाभावः षण्णां कलि
कापूर्वाणामेव स्वर्गपर्यंतावस्थानुसंभवात् न च षण्णां स्वर्गहेतुत्वे गौरवादेकमेव परमापूर्वं तद्धेतुतया सिध्य
तीति वाच्यं परमापूर्वोपगमे तत्रैव कलिकापूर्वाणां हेतुत्वस्य वाच्यतया तत्कल्पनाया मेव गौरवात् न चा

ख॰टी॰ धारादीनामंगानां षट्कलिकापूर्वेषु कारणत्वकल्पनायां गौरवात् जन्यत्वेन परमापूर्वे कल्प्यत इति वाच्यं॰ परमा
११६ पूर्वकल्पनापेक्षया लाघवेन कलिकापूर्वेष्वेव धारादिजन्यतावच्छेदकजातिकल्पनस्यौचित्यात्। न च चर
मांगहरिस्मरणादिजन्यस्यैवास्तु परमापूर्वत्वं तत्र हि हरिस्मरणं साक्षात् आग्नेयादियाग षट्कं च कलिकापू
र्वद्वारा कारणमिति वाच्यं॰ हरिस्मरणादिमात्रजन्यस्यापूर्वस्य षडाग्नेयादिजन्यत्वोपगमे गौरवात्।
किंच कलिकापूर्वाणां स्वर्गहेतुत्वे स्वर्गनाशकत्वे लाघवं परमापूर्वस्वीकारे च कलिकापूर्वाणां परमापूर्वनाश
कं परमापूर्वस्य च स्वर्गो नाशक इति नाश्यनाशकभावद्वयकल्पने गौरवात् इति चेन्नैवं प्रधानविधिप्रव
त्तिकाले दर्शपौर्णमासजन्यं स्वर्गसाधनमपूर्वं सिध्यत् लाघवादिकं सिध्यति तदेकं च परमापूर्वं पश्चात् षडाग्ने
यादीनां क्रमिकत्वज्ञानेन तदुपपादककलिकापूर्वकल्पनस्य फलमुखत्वेनादोषात्। यत्तु स्तु कुचंदनादि
विषयसंबंधाधीनपरस्परविजातीयसहस्रादिसंख्यस्वर्गादिफलजनकत्वेनैव परमापूर्वसिद्धिः क हेरंब॰ ११६
लिकापूर्वाणां स्वर्गादिफलजनकत्वे षडधिकसहस्रकार्यकारणभावस्थले बहुसहस्रकार्यकारणभावकल्प

नामत्वस्यावच्छेदकतया निवेशान्नोक्तदोष इति तदसत्। तथा सति समानकर्तृकत्वपूर्वकालीनत्वोभयसंबंधेन क
र्मनाश्यजलस्पर्शविशिष्टान्यत्वादीनामपि तत्र निवेशनीयतया विशेष्यविशेषणभावविनिगमनाविरहप्रयु
क्तगौरवापत्तेस्तादृशस्य स्वविषयजन्यत्वादिसंबंधेन कीर्त्तनादेरपूर्वनाशकत्वस्यैव युक्तत्वात् न च कर्म
नाश्यजलस्पर्शादिप्रयुक्तापूर्वनाशे व्यभिचार इति वाच्यं॰ उभयसंबंधेन कीर्त्तनादिविशिष्टयद्यदपूर्वत्व
वृत्तिप्रतियोगितायाः कार्यतावच्छेदकसंबंधतयाभ्युपगमेनोक्तव्यभिचाराभावात्। यद्यपि उपधायक
तासंबंधेन फले फली कीर्त्तितान्यत्वं हेतुत्वेनानतिप्रसंगः न वा गौरवमिति तदप्यसत्॥ अतीतयागादा
वुपधायकतासंबंधेन फलोत्पत्तेरसंभवात् कीर्त्तितयागादावुपधायकतासंबंधेन फलोत्पादस्योक्त
हेतुतया चरमेपि समवायेनासत्त्वे फलोत्पादापत्तेर्दुर्वारत्वाच्च। न चोपधायकतासंबंधेन फलोत्पादक
सामग्र्याः प्राक्क्षणसत्त्वेऽपि समवायेन फलोत्पादकसामग्र्याः प्राक्क्षणसत्त्वेऽपि समवायेन फलोत्पा
देयेति मूलेनोक्तदोष इति वाच्यं। अकीर्त्तितएव यागादौ तादृशसामग्र्याः सत्त्वेनोक्तापत्तेर्दुर्वारत्वात्॥

ऽन्त्व दर्शपौर्णमासयोः चाचरमकारणस्य साक्षादेव मध्यमसमुदायापूर्वजनकतासंभवेन तज्जन्यकलि
११७ कापूर्वे मानाभावात् सप्तापूर्वीपक्ष एव श्रेयानिति वाच्यं । तस्यापि उत्तरांगदक्षिणादिसमपर्यंतमनवस्थि
तात् जन्यकालिकापूर्वस्याप्यावश्यकत्वादिति वदंति न्यायस्तु मध्यमसमुदायापूर्वद्वये मानाभावात् षड्
दर्शादियागैः कलिकापूर्वषट्कद्वारेण परमापूर्वं जन्यत इति सप्तापूर्वीपक्षः नचु पंचभिः पंचापूर्वद्वाराष
ट्त्वेन च साक्षादेव परमापूर्वजन्यतामिति किं षट्त्वेन कालिकापूर्वेण तथाच षडपूर्वीपक्ष एव श्रेयानिति वा
च्यं षष्ठेनाप्युत्तरांगं दक्षिणादिसहकारिणैव परमापूर्वजननात् तावत्कालमनवस्थितस्यात्कालिकापूर्वजनना
त् । नचामावास्यायां यजेत पौर्णमास्यां पौर्णमास्यां यजेतेति विधिबोधितस्य दर्शत्वावच्छिन्नपौर्णमासत्वाव
मध्यम च्छिन्नकारणताद्वयस्य निर्वाहाय समुदायापूर्वद्वयमवश्यं कल्पनीयमिति वाच्यं । दर्शत्वादेः कारण
तावच्छेदकत्वपर्यंतस्याविध्यर्थतया कारणत्वैक्यलाघवेन अमावास्यायामित्यादिविधिभ्यामेकस्यैव द हेरंब०
र्शपौर्णमासत्वाभ्यां च कारणताद्वयमप्रामाणिकं । कारणतैक्यलाघवेनोभयसाधारणवैजात्यस्यैवावच्छेदक ११७

मासोभयसाधारणधर्मावच्छिन्नकारणत्वस्य बोधनात् दर्शत्वपौर्ण+१

तया कल्पनौचित्यात् । नच दर्शत्वपौर्णमासत्वयोः कारणतावच्छेदकत्वं विधिप्राप्तं प्रमाणाभावात् । नचैकरू
पेण दर्शपौर्णमासयोः कारणतायां महत्त्वदर्शस्यापि कृतपौर्णमासस्य स्वर्गोत्पादापत्तिरिति वाच्यं परमा
पूर्वाभावेन तदयोगादिति दिक् ॥ अथ यज्ञदेवयज्ञायामिति । शाब्दिकस्मृतिबलेन पूजायां गौरवितप्रीति
हेतुक्रियारूपतया यागस्य देवताप्रीतिहेतुत्वेन तद्द्वारैव यागस्य स्वर्गहेतुतास्तु किमपूर्वेणेन च देवताप्री
तेर्देवतानिष्ठसुखात्मकतया तस्य यागवत् क्षणिकत्वेन कथं स्वर्गजनकत्वमिति वाच्यं प्रीत्यनुभव
जनितसंस्कारद्वारा प्रीतेरपि स्वर्गहेतुतासंभवात् । नच संस्कारजन्यस्य स्मृतित्वनियमेन स्वर्गस्य सं
स्कारजन्यत्वे स्मृतित्वापत्तिरिति वाच्यं । तादृशनियमे मानाभावात् ॥ अन्यथा तत्तत्संस्कारस्य प्रत्यभिज्ञा
हेतुपक्षे तस्याः स्मृतित्वापत्तेः नच यागस्य देवताप्रीतिहेतुत्वेपि तस्याः स्वर्गहेतुत्वे मानाभावः नहि तस्याः
स्वर्गजनकत्वे विना यागजन्यतामात्रेण व्यापारत्वं संभवति तज्जन्यत्वे सति तज्जन्यजनकस्यैव व्यापार
त्वादिति वाच्यं । यावत्प्रीतिहेतुक्रियासात्त्वात् कर्तृनिष्ठफलजनिकेति व्याप्तेः अवधारिणेता चेयं राजयति

न्या॰कौ॰ हेतुभूतव्यापारजन्यत्वनाशनिरूपणायां । किं च स्वर्गकामो यजेतेति श्रुतिबलात् यागस्य स्वर्गसाधनत्वे सिद्धे तस्य सा
११८ क्षात्साधनत्वासंभवेन परंपरासाधनत्वं प्रामाणिकं तस्य च व्यापारं विनानुपपद्यमानतया व्यापारकल्पनावश्य
कत्वे स्थिरस्यादृष्टस्य व्यापारत्वकल्पनमपेक्ष्य लघुत्वाद्देवताप्रीतेरेव व्यापारत्वं कल्प्यते लाघवात् । न
च देवताप्रीतेस्तदनुभवजन्यसंस्कारस्य च स्वर्गव्यधिकरणतया स्वर्गहेतुत्वेन संभवतीति वाच्यं पूजके प्रीति
मान्देवदत्तादिवचनेन तस्याः पितृविलक्षणसंबंधेन स्वर्गसामानाधिकरण्यसंभवात् अन्यथा पूजकदत्तस्य
प्रस्य धर्मस्य दुर्वचत्वापत्तेः । एवं च तादृशसंबंधेन हेतुत्वं बोध्यमिति चेन्मैवं देवताप्रीतेस्तदनुभवजनि
तसंस्कारस्य च विलक्षणसंबंधेनोक्तपरंपरासंबंधेन च स्वर्गहेतुत्वे गौरवेण लाघवात्फलसमानाधिकरण्य
३ कत्वदृष्टस्यैव युक्तत्वात् । किं चोक्तसंस्कारस्य व्यापारत्वे लौकिकसंप्रहार्यमनुष्ठितेन यागादिना तत्वज्ञानाग्नि
नामपि भोगापत्तिः तत्वज्ञानिनो व्यक्तिशो भोगश्रवणेन भोगे मिथ्याज्ञानजन्यवासनात्मकदोषस्य हेतुत्वासं हेरंब॰
भवात् । अदृष्टस्य व्यापारत्वोपगमे तु वासनाया अदृष्टाकारणत्वेन तदभावे नादृष्टोत्पत्त्या भोगापत्तेः सं ११८

मु३ ना

दक बं१

नापत्तेः न च कलिकापूर्वेषु जनकतावच्छेदकतयैकजातिरेव कल्प्यत इति वाच्यं तादृशजातेराग्नेयादिजन्यतावच्छेदकजा
तिव्यापकत्वे षडंतर्गतकतिपयाननुष्ठानेपि फलप्राप्तिप्रसंगात् तदव्यापकत्वे जातिसंकरापातात् जन्य
तावच्छेदकतया नानाविधस्वर्गादिनिष्ठैकजातिकल्पनानयुज्यते चंदनसंयोगादिजन्यतावच्छेदकजा
तिभिः सांकर्यप्रसंगादिति तदसत् कलिकापूर्वसंबंधेन दर्शपौर्णमासत्वादिनैव नानाविधस्वर्गत्वाव
उ च्छिन्नहेतुत्वात् कलिकापूर्वाणां च धर्मत्वेनादृष्टत्वेन वा सुखत्वावच्छिन्ने कार्यत्वावच्छिन्ने वा हेतुत्वात् नन्वेवं द
र्शपौर्णमासादेरेकजातीयपरमापूर्वकर्माणां विशिष्य हेतुत्वं स्वर्गे परमापूर्वस्येति कल्पनामपेक्ष्य स्वर्गे एव
कर्मणां विशिष्य हेतुत्वे लाघवात् श्रुत्यनुग्रहश्चेति । अथ तथापि दर्शपौर्णमासस्थले कियंत्यपूर्वाणीति
चेदुच्यते दर्शत्रयेण प्रत्येकमाग्नेयादिषट्कैकापूर्वं जनयित्वा तत्र द्वारा एकं दर्शसमुदायापूर्वं जन्यते
एवं पौर्णमासत्रयेण प्रत्येकमाग्नेयादिषट्कैकापूर्वं जनयित्वा तत्त्रयद्वारैकं पौर्णमाससमुदायापूर्वं जन्य
ते ततः षड्भिरेव कलिकापूर्वैर्मध्यमसमुदायापूर्वद्वाराफलहेतुसंस्कारपूर्वं परमापूर्वं जन्यत इति नवापूर्वाणि

म॰

मा॰कौ॰ भोगजनकत्वादिति वाच्यं दृष्टत्वात्। नच श्राद्धादिजन्यादृष्टस्य कर्तृत्वेन युगपदेकोद्देश्यकानेककर्तृकश्रा
११९ द्धादिस्थले कर्तृभेदेनादृष्टभेदाद्गौरवमिति वाच्यं। भोक्तृगतत्वनियमेपि प्रतिपुरुषं श्राद्धादिजन्यतादृशस्य
च भोक्तृभेदेनादृष्टभेदेन गौरवस्य तुल्यत्वात्। नच फलस्य स्वसमानाधिकरणपुण्यजन्यतानियमे न कथं पुत्रादि
गता॰ दृष्टेन पित्रादेः फलमिति वाच्यं तादृशनियमे मानाभावादिति सर्पास्तं। गयाश्राद्धादिजन्यादृष्टस्य कर्तृ
गतत्वे तस्य पित्रादिगतफलं प्रति समवायसंबंधेन हेतुत्वासंभवात्। स्वजनककर्मोद्देश्यत्वा॰ संबंधेन हेतुत्वो
पगमे च गौरवात्। पित्रादिगता॰ दृष्टं प्रति तु गयाश्राद्धादेरुद्देश्यतासंबंधेन हेतुत्वं तस्य चोक्तपरंपरासं
बंधोपेक्षया लघुत्वेनास्मन्मते न किंचिदपि गौरवं किंच गयाश्राद्धादेः कर्तृमात्रगतादृष्टजनकत्वे पित्रा
द्युद्धाराय तत्तज्ज्ञानिनां तदनुष्ठानानुपपत्तिः कर्तुर्द्वेषाभावेनादृष्टानुत्पत्त्या फलासंभवात्। न चैवं श्येना
दिनोपि भोक्तृगतमेवादृष्टमुपेयतामिति वाच्यं इष्टत्वात्। किंच निष्ठगयाश्राद्धादिजन्यादृष्टेन पितुर्मुक्तस्या हेरंब॰
पि भोगाय जन्मोपगमे न स पुनरावर्तत इति श्रुतिविरोधः तुल्यन्याये न पुत्रकृतसर्पादिना मुक्तपितुर्नरका ११९

दिप्रसंगस्यापि दुर्वारतया दुःखेनात्यंतविमुक्तश्चरतीत्यादिश्रुतेरपि विरोधो दुर्वारः तस्माददृष्टस्य भोक्तृगतत्वं
नियतमेव फलस्य कर्तृगतत्वं चौत्सर्गिकं। अत एवोक्तं शास्त्रादेशितं फलमनुष्ठातरीत्युत्सर्ग इति। अत एव प
त्रस्वपरविशेषापुरस्कारेण फलं श्रूयमाणे तत्र परकीयस्वर्गादिकामनयापि पुष्करिणीयागाद्याचारः शिष्टानां संग
च्छते स्वर्गकाम इत्यादौ साधारणोक्त्या स्वपरसाधारणस्वर्गस्य फलत्वलाभात्। ननु स्वरितेत्त्वयजधातूत्त
रमात्मनेपदं यागरूपक्रियाफलस्य कर्तृगतत्वं बोधयति स्वरितञितः कर्त्रभिप्राये क्रियाफल इत्यनुशा
६ तीत सनात्। कर्तारमभिप्रैति संबध्नाति कर्त्रभिप्रायः कर्मोपपदादभिप्रेतः कर्तरि अण्प्रत्ययेन तत्संपद्धनिष्पत्तिः ए
वमात्मने क्रियाफले त्वास्य विषये सत्यात्मनेपदमित्यनुशासनार्थः तथा च यजेतेति विधिबोधितयागात् य
दि परगतं स्वर्गादि फलं तदा यजेतेत्यात्मनेपदं नैमसाध्वेव स्यादिति चेत् न चिंतामणिकृतः यजेतेत्यात्म
नेपदे क्रियाफलस्य कर्तृनिष्ठत्वेपि कर्त्रभिप्रेतत्वमात्रेणैव साधुः अभिप्रेते प्रसिद्धे ह्यर्थकत्वसंभवे नाभि
प्रेतत्वस्येच्छाविषयत्वरूपतादेसा[illegible] मिथ्यास्त एवं च परपुत्रा विशिष्येव पुत्रपविशेषस्य फलार्थय

न्या.कौ. पकर्मोक्तं तदपि पुरुषांतरगतफलकामनया कृते पुरुषांतरफलजनकमस्तु एवं च परपुत्रादिस्तत्वार्थम
१२० पि जातेष्ट्यादिकमस्तु दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्नित्यादावपि परपित्रादिलाभाय तिष्ठ आत्म
नेपदमपि फलस्य कर्तृगतत्व एव साधुः स्वरितञितः कर्त्रभिप्राये क्रियाफल इत्यत्र स्य कर्तारं चेत् क्रियाफलमभिप्रैति अभिसंबध्ना म३
तीति व्याख्यानात् फलस्य कर्तृनिष्ठत्व एवात्मनेपदस्य साधुत्वात्। अत एव कर्त्रभिप्रायक्रियाफलयोः सामाना
धिकरण्यमप्युपपद्यते अभिप्रायशब्दार्थस्येच्छार्थकत्वे सामानाधिकरण्यानुपपत्तिः न चाभिप्रायशब्दस्येच्छा
विषयलक्षणया तदुपपत्तिरिति वाच्यं गौरवात्। अत एव यजंते याजकाः पचंति पाचका इति प्रत्युदाहर
णं संगच्छते अन्यथा याजकादीनामपि क्रियाफलेऽभिप्रायसत्वादात्मनेपदापत्तेः न च तेषां वेतनमात्रे अभि
प्राय इति वाच्यं सांगफले सत्येव वेतनमिति फलाभिप्रायस्यापि वेतनोपरागेण तस्माद्यथा स्वसंबंधिक
पित्रादिपदस्य संबंधिवाचकपदासमभिव्याहारे स्वपितृत्वादिना बोधकतानियमस्तथा कर्तृविशेष
णकामनाविषयफलबोधकशब्दस्यापि तादृशपदासमभिव्याहारे स्वीयसंबंधेनैव फलबोधकता हेरंब० १२०

भवात्॥ न च तत्त्वज्ञानेन देवताप्रीत्यनुभवजन्यसंस्कारनाशान्मोक्षापत्तिरिति वाच्यं तन्नाशकतावच्छेदकलघुसंबंधे
न स्वसमानाधिकरणत्वेन जन्यकर्मार्हितप्रीतिविषयत्वादिरूपसंबंधस्यैव तन्नाशकतावच्छेदकत्वकल्पने गौर
वात् तत्त्वज्ञानस्योक्तसंस्कारनाशकत्वे तत्त्वज्ञानिकृतपित्रादिस्वर्गार्थकर्मणो निष्फलत्वप्रसंगाच्च। एतेन सर्वत्राद
ष्टं कर्तृगतमेव साक्षात्संबंधेन तत्र यागादेर्जनकत्वे लाघवात्। न च मातृश्राद्धादिजन्यं फलं पित्रादिगतमेव
न तु कर्तृगतं पत्न्याम्नायात् येभ्यः पिंडं तेभ्य एव ब्रह्मशाश्वतमित्यादिवचनादित्यदृष्टस्यापि पित्रादिगतत्वेन कथं
तस्य कर्तृगतत्वनियम इति वाच्यं तत्राप्यदृष्टस्य कर्तृगतत्वेन तन्नियमानपायात्। अन्यथा मुक्ते पितरि गया
श्राद्धजन्यादृष्टानुत्पत्त्या निष्फलत्वेन सांगस्यापि वैदिककर्मणः फलजनकत्वव्यभिचारेण विध्यासा
द्धिः परं तु शब्दानलक्षणाप्रामाण्यापातात्। न च फलावाप्तेः पूर्वमेव कर्तुर्मुक्तौ तत्कृतादृष्टनाशेन पितुः फलं
न स्यादिति वाच्यं गयाश्राद्धादिजन्यादृष्टस्य स्वसमानाधिकरणभोगाजनकत्वेन तत्त्वज्ञानदशायामपि स
त्वोपगमात्। न च पुत्रकृतगयाश्राद्धेन मुक्तस्यापि पितुर्ब्रह्मलोकावाप्तिः स्यात् ज्ञानिनो भोगोदयेन दोषस्य

सा०कौ० येन तीमतिव्यधिकरणफलं तोत्तरसस्याविषयार्थकत्वात्फलस्याभिप्रायविषयता लाभः अथवाभिप्रायते सा
१२१ क्षितिकर्मनु तस्या कर्त्रभिप्रेते क्रियाफल इत्यर्थलाभः नच क्रियाफलस्य कर्त्रनभिप्रेतत्वे कामनाविषयसा
धनत्वाभावान्न क्रियागोचरकृतेरेवानुपपत्त्या यजंतीति याजकाः पठंति पाठका इत्यादिप्रत्युदाहरणासंग
तिरिति वाच्यं ऋत्विगादेर्यजमानस्वर्गादिरूपयागादिजन्यफलकामनाविरहेपि परंपरया यागादिप्र
५ म योज्यदक्षिणालाभादिरूपफलगोचरकामनासहकृतफलप्रयोजकता ज्ञानाध्यागादिकृत्युपपत्तेस्तादृ
शप्रत्युदाहरणसंगतेः नहि स्वर्गादिवद्दक्षिणादिरपि तस्य यागादिजन्यं तथासति तादृशफलस्य क
र्तृसंबंधतया कर्त्रभिप्रायपदस्य कर्तृसंबंध्यर्थकत्वेपि तादृशप्रत्युदाहरणासंगतेः अत एव कर्तृ
कृत्स्नोपकारादेः फलभागित्वाभावान्न फलभागित्वघटितं कर्तृत्वमिति टीकाकृतः कर्त्रभिप्राय इत्यत्र
च फलभागित्वाविशेषितक्रियानुकूलकृतिमत्त्वमेव कर्तृत्वमभिमतं पित्रादिस्वर्गकामस्यापि कर्तृत्व हरंब०
याफलस्य तदनभिप्रेतत्वेनात्मनेपदनिर्वाहः अन्यथा कर्तुः क्रियाफलसंबंधनैयत्येन कर्त्रीरं चेत्क्रियाफ १२१

लसंबंधनैयत्येन कर्त्रीरं चेत्क्रियाफलमभिप्रैति संबध्नातीति व्याख्यायां नितरामसंगतापत्तेः अत एव दक्षि
णाद्युपरागेणापि यजमानस्वर्गादेः ऋत्विजां काम्यत्वे यजंते याजका इत्येवा स्वीयदक्षिणादिमात्रस्यैव तेषां का
म्यत्वे तु यजंतीति याजका इत्युभयमेव समर्थितं येथ कारैः अथ तु विमुंचंति सामर्थ्याल्लाकार्थेषु पदानि नतः युज्य
तंति हि काष्ठानि तत्किं पाकं न कुर्वन इत्यस्य चेतनस्थले कर्त्रनभिप्रायेप्यात्मनेपदस्य भट्टाचार्यैः प्रयुक्तत्वाद्दृष्ट्वा मि
दमेवं कमलवनोद्घाटनं कुर्वते ये ब्रध्नं परिवारयंते कंटकाद्यस्याद्यचेतनस्थले आत्मनेपदानुपपत्तिरिति चे
न्न एतद्दोषस्याभिप्रायशब्दस्य संबंधार्थकतापक्षेपि तुल्यत्वात् यदि च तत्रात्मनेपदार्थविवक्षणा
न्न दोषः अन्याभिप्रायविवक्षायामेवात्मनेपदस्यासाधुत्वात् अत एवोक्तं कर्त्रभिप्राय इति किं अन्याभिप्रा
ये मा भूदिति अत एव भट्टिः नाभिवध्यान कर्म कुरुते कामं कुरंगेक्षणा इत्यत्रात्मनेपदमनर्थकमित्येव का
व्यप्रकाशकृतोक्तं न तु असाध्विति विभाव्यते तथापि न क्षतिः अभिप्रायशब्दस्येच्छाविषयपरत्वेपि तत्समा
धानस्य तुल्यत्वात् युज्यते चाभिप्रायशब्दस्येच्छाविषयपरत्वमेव अन्यथा तरतिमस्तुं तरति ब्रह्महत्यां योश्वमे
त्म

व्या०कौ० धेनपजइत्यात्मनेपदश्रवणात्सितु दशरथस्यांधकमुनिपुत्रश्रवणवधजनितपापक्षयकामनया रामस्याश्वमे
१२२ धानुष्ठानानुपपत्तेः नचस्वकीयरावणवधजन्यपापक्षयकामनयैव तदनुष्ठानेऽन्धकपुत्रस्यशूद्रत्वेन त
द्वधजन्यपापक्षयार्थं ब्रह्मवधप्रायश्चित्तानुष्ठानानुपपत्तेरितिवाच्यं। रावणवधजन्यपापक्षयार्थं रामेश्व
रशिवस्थापनस्यपुराणादौ प्रसिद्धतया ब्रह्मवधप्रायश्चित्तस्यमुनिवधपापक्षयकारकतया तदनुष्ठानो
पपत्तेरितिसंक्षेपः। नव्यास्तु कर्तृगामिफलमेवात्मनेपदार्थो लाघवात् यजतेइत्यादावात्मनेपदस्यफ
लमात्रार्थकतयैव यागजन्यफलवान् कर्तेतिवाक्यार्थमर्यादया फलस्यकर्तृगामित्वलाभात् कर्त्रभिप्रे
तफले शक्तौ च गौरवं। आत्मनेपदार्थाविवक्षयैव च यजंते याजकाइत्यादिप्रयोगइति तत्र यजतीत्या
दौ परस्मैपदार्थस्य पराभिप्रेतफलजनकत्वस्य धात्वर्थविशेषणत्वेनान्वयात् आत्मनेपदार्थस्य क
र्त्रभिप्रेतफलजनकत्वस्यापि तथान्वयोचितत्वात्। अत्र वदंति आत्मनेपदस्य कर्तरि परस्मैपदस्य च क
र्त्रभिन्ने शक्तिः तयोर्यथापर्थं समवेतत्वसंबंधेन आख्यातसामान्यार्थे फलेन्वयः फलस्य च धात्वर्थेच हरेकृ० १२२

अतएव स्वारसिकसंकल्पवाक्ये पित्रादिगतस्वर्गकामनाभिलाषे स्वर्गादौ पित्रादिसंबंधवत् स्वगतस्वर्गादिकामना
भिलाषेपक्षांतरे एव स्वसंबंधोननिर्दिश्यते अपितु स्वर्गकामोहमित्यादेव प्रयुज्यते एवंच स्वगतस्वर्गादिकामन
यैव मातापितृगतस्वर्गादिकामनायामनया पिपुष्करिणीयागमहोदानदुर्गापाठादेः शिष्टैरविगानेनाच
रणात्। तत्र तत्फलबोधकप्रत्यक्षश्रुतिविरहेपि स्वपरसाधारणस्वर्गकामः पुष्करिणीयागादि
कंकुर्यादिति विशिष्टैव श्रुतिः कल्प्यतइत्याहुः। अत्रेदं विचार्यते चिंतामणिकारमतेमेव सम्यक् तथाहि। शि
ष्टाचारानुरोधेन विशिष्यश्रुतिकल्पनामपेक्ष्य स्वर्गकाम इतिप्रत्यक्षे विधेरेव शिष्टाचारबलेन सामान्यप
रतावधारणे नौत्सर्गिकस्वत्वपरताबाधो युक्तः पितृभ्यइत्यादौ च स्वपितृभ्यः पितादद्यादित्यादिवाक्यांतरे
कल्प्यतया शिष्टाचारेण च संबंधिशब्दत्वेनौत्सर्गिकस्वपितृपरत्वमेव युक्तं। नचाभिप्रायशब्दस्येच्छार्थक
त्वेपि अभिप्रेतार्थकतानोपपद्यते इति संबंधपरत्वेनैव युक्तेतिवाच्यं अभिप्रायशब्दस्य भावघञंतत्या
इच्छापरत्वेपि कर्तुरभिप्रायो मयास्मिञ्ज्ञाते व्युत्पत्तिविषयबोधकतासंभवात्। यद्वा क्रियाफले कर्त्रभिप्रा

+गौणाग्निहोत्रत्वेन व्यपदेशः ननु उपसद्भिरित्यादिवाक्येन यावज्जीवसाध्याग्निहोत्रएव मासस्तूप २

ना॰को॰ अत्रेदं बोध्यं । उपसद्भिश्चरित्वा मासमेकमग्निर्ध्याग्निहोत्रं भिन्नं स्तु होतीति श्रुतिबोधितं यावज्जीवमग्निहोत्रं जुहो
१२३ तीति श्रुतिबोधिताग्निहोत्रपदमुख्यार्थयावज्जीवसाध्याग्निहोत्रभिन्नं मासैकसाध्याग्निहोत्रं कर्मान्तरमेव तत्र
चयागविशेषे लक्षणया प्रयुक्तोऽग्निहोत्रशब्दो मुख्यार्थाग्निहोत्रधर्मप्राप्त्यर्थः । अतएव तस्य गौणत्वे लोपसद्भा
वेऽप्युत्तरत्र रूपगुणद्वयविधायकेन तु कर्मान्तरं तथा च तत्रापि अग्निहोत्रशब्दो मुख्य एव न तु गौण इ
ति नोक्तव्यपदेशसंगतिरिति चेन्न । प्राप्ताग्निहोत्रानुवादेन गुणद्वयविधाने विधेयभेदेन वाक्यभेदप्र
संगात्तादृशवाक्यस्य गुणद्वयविशिष्टकर्मान्तरविधायकत्वोपगमात् । तथा चोक्तं प्राप्ते कर्मणि नानेको वि
धातुं शक्यते गुणः । अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः इति । ननु विशिष्टविधानेऽपि गुणद्वयविधा
नमस्त्येव कर्मान्तरस्य चाधिकं विधानमिति तत्पक्षेऽपि विधेयभेदेन वाक्यभेदस्य दुष्परिहरत्वात् । न च विशि
ष्टस्यैकस्य विधेयस्यैक्यं विशिष्टस्य विशेषणविशेष्याभ्यामनतिरेके ऐक्यासंभवात् । अथ विधेयभे
देन न वाक्यभेदः अपि तु विधानभेदेन विशिष्टालिङ्गलत्वेनानेकेषामप्येकमेव विधानमिति न वाक्यभेदः हे॰वं॰ १२३

अप्राप्तिस्थिसादिना कर्मणोऽप्राप्तत्वे तस्य नानागुणोपरागेणाप्येकमेव विधानमित्युक्तं विधानं च न तानं प्रा
प्तेऽपि कर्मणि नानागुणानामेकत्वान संभवेन वाक्यभेदासंभवात् अपि तु विधेयतारव्यो विषयता विशेषणना
ना विशेषणविशेष्यघटिते विशिष्टे एकैव विषयतेति चेन्न विशिष्टान्तर्गतविशेषणानां विशेषणत्वेन
नानाधर्मावच्छिन्नानां मिथो विलक्षणाविषयतात्वाद्विशेष्यस्य च विशेष्यविधया अन्यादृशी विषयतातासां
च विषयतानामैक्यासंभवेन विधानैक्यकथनस्यायुक्तत्वात् अन्यथा प्राप्ते कर्मानुवादेन गुणद्वयविधाने
पि गुणद्वयरूपविधेयविशिष्टानुवाद्यकर्मणोऽपि विषयैतैक्यमुपगम्य वाक्यभेदपरिहारसंभवात् । मेवं वि
धेयविशेषणतानात्वेन विधेयविषयतायाः अभेदो वाक्यैकवाक्यप्रयोजकः इत्यनेकगुणविशिष्टस्य विधा
ने गुणानां विषयताभेदेऽपि नानागुणविशिष्टकर्मणो विधेयस्य विषयतैक्याद्वाक्यं विधेयंस्यैक्येऽपि उद्देश्य
भेदेन विधेय विषयताभेदाद् उद्देश्यभेदस्थले न विधेयैक्ये नैकवाक्यता अर्थैक्यादेकं वाक्यमिति जैमिनिसू
त्रेऽपि नयेऽपरानामेकवाक्यता तत्तत्पदार्थभेदपरं न तत्पदार्थानां मिथो भेदात् नापि तत्पदार्थविषयतानामभे

मा॰ कौ॰ इत्थं सर्वत्रैव वाक्यार्थप्रविष्टविशेषणविशेष्यसंसर्गविषयत्वानां प्रकारताविशेष्यतासंसर्गतारूपाणां विलक्ष
१२४ णतया भेदस्यावश्यकत्वादेकवाक्यविलयप्रसंगात् किंतु तावत्पदार्थविषयितानां साक्षात्परंपरया वा अ
वच्छेद्यावच्छेदकभावपरमेव अवच्छेद्यावच्छेदकभावापन्नविषयिताकूटस्यैकविषयितातुल्यत्वात् अतो
विशृंखलविषयिताएव वाक्यभेदव्यवहारमादध्यति। एवं च नानागुणविशिष्टस्य कर्मणो। विधेयत्वे ना
नागुणानां विधेयकर्मणि युगपद्विशेषणतया विधेयविषयनैक्यात्। तद्द्वारा नानागुणविषयितानामव
च्छेद्यावच्छेदकभावात् कर्मत्वगुणविशेषितमोश्च साक्षाद्देवावच्छेद्यावच्छेदकभावापन्नतया वाक्यार्थान्त
र्गतवस्तूनां न विशृंखलविषयता इति न वाक्यभेदः न चैवं प्राप्ते कर्मणि अनेकगुणविधानेपि कर्मणा एक
विषयिताविधेयतया भासमानगुणद्वयविषयताया अवच्छेद्यावच्छेदकभावे नैकवाक्यतोपपद्यत इति वा
च्यं। विधेयांतरविशेषणतया भासमानविधेयविषयिताभेदेऽप्युद्देश्यविषयिताभेदस्यावश्यकतया
तादृशविधेयविषयितयोः परंपरया अवच्छेद्यावच्छेदकभावविरहात्। अतएवाख्यातद्वयघटितत्वेनैवं वा हे॰ कृ॰ १२४

त्रि परत्वेवाक्यार्थमर्यादयैव कर्तृगामिनां फलाभाव। न च काम्यत्वसंबंधेनैव फले कर्तृवृत्तित्वयोरन्वयपादाय वाक्यार्थमर्याद
यैव कर्तृगामित्वेत्यादेरुपपत्ताभस्संभवत्येवेति वाच्यं। इच्छाविषयत्वरूपकाम्यत्वस्य समवायात्मकस्समवे
तत्वोपेक्षया गुरुत्वेन तन्मते काम्यत्वसंबंधेनान्वयबोधेनान्वयबोधत्वादेः कार्यतावच्छेदकत्वे गौरवात्॥
अस्मन्मते समवेतत्वसंबंधेनैवान्वयबोधत्वादेः कार्यतावच्छेदकत्वे न लाघवात्। अतएवाखंडार्थ
त्वेपि कर्तृत्वविशिष्टसमवेतफलजनकत्वमेवयथायथमात्मनेपदपरस्मैपदयोः शक्तिरिति हृत्तंपत्कृवेनस
चायं विधिः क्वचित्केवलकर्मविधायकत्वेन कर्ममात्रविधिरित्युच्यते यथाग्निहोत्रं जुहोतीत्यादिः क्वचिद्गुणवि
धिर्यथा दध्ना जुहोतीत्यादिः। तत्र वाक्यांतरप्राप्तहोमानुवादेन दध्याहिरूपगुणविधानात् क्वचिद्विशिष्टवि
धिः यथा सोमेन यजेतेत्यादिः तत्र यागस्य तदीयसोमेन यजेतेत्यादिः तत्र यागस्य तदीयसोमद्रव्यस्य चाप्राप्तत्वेन
सोमद्रव्यविशिष्टयागविधानात्। क्वचिद्गुणद्वयविशिष्टविधिः यथा उपसद्भिश्चरित्वा मासमेकमेक
मग्निहोत्रं जुहोतीत्यादिः तत्रोपसद्भिष्टुतरत्समासात्मककालरूपगुणद्वयविशिष्टस्य कर्मणो विधानात्

क
न्या॰कौ॰ णीयत्तयावाकारव्यतिरेकेण तादृशाकांक्षाविषयबोधासंभवात् आकांक्षाया अनिवृत्तेः तन्निवृत्तये एवं विधौ वा
१२५ कारकल्पनेन समभिव्याहृतव्रीह्यभावसाहित्यबोधकवाकारत्वलाभात् तद्भावसहितयवस्य करणत्वप्रतीतेः रव
श्यमुपगन्तव्यत्वात् । अत एवोभयकरणकयागात् फलानुत्पत्त्या विकल्पे तु भयोरशास्त्रार्थत्वप्रवादः अ
थोक्ताकांक्षायां व्रीह्यभावसहितद्रव्यान्तरस्य करणत्वं न विषयः किं तु व्रीहिसमबधानाभावाकाले यो
गे द्रव्यान्तरकरणकत्वमेवेति तत्रैव यवैर्यजेतेति वाक्यस्य तात्पर्यं कल्पनीयं न तु व्रीह्यभावस्य करणसहकारि
त्वे तात्पर्यकल्पकाभावाद्वाकारस्वरसेनापि तदर्थस्यालाभात् । वाकारस्य यवकरणकत्वान्वयिना योगे
व्रीहिकरणकत्वाभावमात्रबोधकत्वात् । व्रीह्यभावस्य कारणत्वाबोधकत्वात् ॥ दधि भुंक्ते पयो वा भुंक्ते
इत्यादिलौकिकवाक्ये वाकारोपव्यवहितपूर्वयादृशविभक्तिसहितपदेन यत्र स्वार्थोन्वयः प्रत्याय्यते तत्र पूर्व
वाक्ये स्यतादृशविभक्त्यंतसमुदायार्थव्यवच्छेदबोधकत्वाद्वाकारे व्युत्पन्नत्वात् अत एव तत्र दधिक हेरंब॰
र्मकत्वाद्यभाव एव पयःकर्मकत्वान्वयिनि भोजने प्रतीयते न तु दध्याद्यभावकर्मकत्वं एवं विकल्पकारण १२५

तस्यले यागे यवस्य व्रीह्यभावसहकृतस्य करणत्वलाभे पि उभयकरणकयागात् फलोत्पत्तौ बाधकाभावः ।
कले व्रीह्यभावकरणकत्वस्य कथंचिदप्यलाभात् । एवं यागाव्रीह्यभावस्य करणत्वमपि वाच्यं तं यागसामा
न्यस्य तद्व्यभिचारित्वात् यागविशेषे च तस्यान्यथासिद्धत्वात् एवमिच्छारूपे यागे तदंगपुरोडाशे निर्वाहक
व्रीह्यादेरपि न कारणत्वे इष्टसाधनताज्ञानादिघटितसामग्रीत एव तदुपपत्तेरिति परस्परभावसाहित्येनैका
रणत्वरूपविकल्पस्य व्रीहियवाद्यसंभव एव । यत्तु व्रीहियवयोरपूर्वविशेषे कारणत्वमेव विकल्पि
केन तु यागे व्रीहियवयोरिति नोक्तदोषः अपूर्वे यागस्य एककरणकजन्यापूर्वे परकरणकयागाभावस्य
च कारणताया अव्याहतत्वात् । विकल्पसुखीचाकांक्षितव्रीह्यभावे कथं याग इत्याकारिका अपि तु व्रीह्य
संपत्त्या व्रीहियागाभावे सति कथं फलमित्याकारिकैवेति । तद्वत्तौ वाच्यसत्ति विजृंभितं । प्रागुक्तन्न व्रीह्या
दियागस्य फलजनने सहकारित्वोऽनाकांक्षितत्वेन तत्र विधित्वासर्पकस्य काभावात् व्रीहिभिर्यजेतेत्या
दिष्कसेतर प्राप्तयागानुवादेन द्रव्यविधायकं तथा विकल्पि कयागविधित्वासंभवात् । तादृशस्थले यागविधा

न्या॰ कौ॰ यकत्वे प्रधानविधित्वेन परस्परसाकांक्षत्वाविरहात् विकल्पमुख्याकांक्षाया अर्थभेदेन वाकारकल्पकाभावाच्च।
१२६ अन्यथाश्वमेधवाजपेयादीनां विधिस्थलेऽपि वाकारकल्पनापत्तेः न च तत्र करणभेदान्न साकांक्षत्वमिति
तत्कल्पकाभाव इति वाच्यं तत्रैवात्रापि प्रधानयागभेदे ध्रौव्यात् यत्तूक्तमुख्यानुरोधेन व्रीह्यकरणकत्वा
न्वयि यागे यवकरणकत्वान्वय एव स्वीकरणीयः एवमपि व्रीहियवोभययागस्यैव फलसाधनत्वेऽप्यामालि
कं तस्य विध्यविषयत्वात्। तादृशान्वयबोधस्याकांक्षितोऽपि प्रथमं विधेर्यागत्वसामानाधिकरण्येन व्रीह्यन्व
यपरतया व्रीह्यकरणकयागस्यापि चेदिष्टसाधनत्वं तदा तादृशो यागः किं द्रव्यकरणक इत्याकांक्षायाः सु
लभत्वात् परस्परकरणकत्वाद्यभावात् यवान्वयिनि करणकत्वादि नानाकल्पविधिरेव वैकल्पिकः ...का
रणत्वाविधिः अश्वमेधादिविधिर्न तादृशः। तत्र फले वाजपेयादिफलकरणकत्वाद्यभाववोधकाभा
वादिति तदपि न तथा सत्यपि व्रीहिभिर्यजेतेति विधिजन्यबोधे यवकरणकत्वाद्यभावाभावाभाना
दुभयकरणकयागस्यापि तादृशविधिविषयतया फलजनकतायाः दुर्वारत्वात्। यवैर्यजेतेत्यत्रापवकर हेरंब॰ १२६

कां आख्यातार्थस्य विधेयांतरविशेषणतया विधेयत्वनियमेन तद्विषयितानिरूपितोद्देश्यविषयिताभेदस्यावश्यकत्वा
त्। एवं च ह्येतैः खडूर्कुंडलीसादो अयं विधेयकेनैकवाक्यतास्वीक्रियाते स्वीक्रियते तु खड्गी कुंडली चैत्रो दंडीसा
दावेकविधेयक एवेति दिक् अधिकमुक्तं प्राक्। क्वचित् द्विकल्पविधिः यथा व्रीहिभिर्यजेत यवैर्यजेतेत्यादिः स
ते चप्रसंगानंगत्वादेः संसृष्टेयेत्यौपधिकोक्तं। ये पुनः प्रसज्यते तत्र मिथो विरुद्धयोर्विधाने विकल्पविधिः य
था व्रीहियवयोर्द्वयोरेकत्र यागेऽकारणतया विरुद्धयोर्योगकरणतया विधानेन चैवमश्वमेधवाज
पेयादीनां स्वर्गादिरूपैकफलेऽकारणतया विरोधे फलसाधनतया तद्विधाने वैकल्पिकं स्यादिति वा
च्यं परस्पराभावसाहित्येन विधानस्य विवक्षितत्वात्। अश्वमेधादेर्वाजपेयाभावसाहित्यं उत्सृ
ष्टस्वर्गादिरूपफले कारणत्वेनाविधानात्। व्रीहियवविधौ च परस्पराभावसाहित्यं प्रतीयते प्रथम
तः प्रवृत्तविधिवाक्यं तत्र व्रीहिरूपद्रव्यसंबंधे पुरस्कारेण यागलाभात् द्रव्याकांक्षानुदयेन तत्र
यागे यवरूपद्रव्यान्वयासंभवात् व्रीह्यभावे कथं यागः इत्याकांक्षायां यवविधेरुत्थानस्य स्वीकार

न्या॰ कौ॰ करणकत्वाभावविशिष्टव्रीहियागस्य स्वर्गादिसाधनत्वाभावात्तस्यापि तादृशयागजन्यफलप्रयोजकतास्ति
१२९ द्धिरिति नोभयकरणकयागात्फलं। यदि चोत्तरवाक्ये वाकारार्थव्यवच्छेदस्याबाधितावच्छेदकावच्छेदेन व्रीहिक
रणकत्वव्यवच्छेदबोधेन तूभयकरणकयागे निष्फलत्वोपपत्तेः व्रीहिकरणकफलजनकयागे यवकरणक
त्वव्यवच्छेदस्यार्थलभ्यत्वे पि व्रीहिभिर्यजेतेत्यस्य तत्परत्वमव्याहतमेवेति विधेययोः परस्परस्यापि निपरस्य न्व ४
सं रसंबंधस्य व्यवच्छेदविधानरूपे वैकल्पिके विधाने तत्त्रनिर्वहति यागस्य व्रीह्यादिकरणकत्वे च व्रीह्याद्यवयवका
र्य्यपुरोडाशविषयविषयकत्वरूपमेव तत्तीयार्थः। अतद्रूपयागे व्रीह्यादेरनन्यथासिद्धनियमत
एर्ववर्त्तितारूपं कारणताविरहे पि नानुपपत्तिः व्रीह्यकरणकयवकरणकयागत्वाद्यवच्छिन्नस्य फलनिष्ठावं
तरवैजात्यसंजन्यतावच्छेदकमिति फलस्य तद्रूपावच्छिन्नव्यभिचारे पि नक्षतिः व्रीह्यकरणकयवकरणकत्वा
दिरूपकारणतावच्छेदकयोः परस्परं विशेष्यविशेषणभावे विनिगमनाविरहे पि नक्षतिः अगत्या कार्यका हेरंबं॰
रणभावाधिकस्यादोषत्वात्। केचित्तु व्रीह्यकरणकत्वादिकमनिवेश्य यवकरणकयागत्वादिनैव विजा १२९

तीयफलजनकता उभयकरणकयागादपूर्वानुत्पत्त्यनुरोधेन च साधारणरूपावच्छिन्नमपूर्वं प्रत्युभयकर
णकयागत्वेन प्रतिबंधकताच्चोभयकारणकयागानंतरं प्रत्येककारणकयागकर्त्तरि नापूर्वानुपपत्तिः पू
र्वं उभयकरणकनाशयागात्प्रवादिमात्रकरणकयागे नापूर्वं जननीयेतादृशयागस्य व्रीहिकरणकत्वाद्य
भावानुभयकरणकत्वविशिष्टयागाभावस्य निर्वाहइति तज्जन्यफले पर्याप्तिनिष्ठव्रीह्यादिकरणकत्वाद्यभाव
स्य प्रयोजकत्वमव्याहतमेवेति न विशिष्टयागस्य प्रयोजकत्वबाधइत्याहुः। उपधायकतासंबंधेन यवादिया
गजन्यतासंबंधेन व्रीह्यादेर्व्रीह्यादिजन्यतासंबंधेन व्रीह्यादेर्व्रीह्यादिजन्यत्वस्येव वासाधारणरूपावच्छिन्नफ
ले उभयत्वावच्छिन्नस्य वा प्रतिबंधकत्वद्वयस्य भावयोर्विकल्पे परस्परव्यवच्छेदबोधकवाकाराद्येशान्तत्वाति
रात्रे षोडशिनं गृह्णातिनातिरात्रे षोडशिनं गृह्णातीत्यादौ ग्रहणाग्रहणयोर्विकल्पे तत्रवाकाराद्येनैव परस्प
रव्यवच्छेदरूपयोः ग्रहणयोः प्रतीतेः नच षोडशिग्रहणे प्रत्यवायानुरोधेन तदंगकातिरात्रजन्यसातिशयफ
लतातज्जनकवैजात्यापूर्वेषोडशिग्रहणस्यानन्यथासिद्धत्वेन हेतुत्वे पि तादृशानिशपरहितफलस्य षोड

भा॰ कौ॰ शिग्रहणानेगकयागादतिशयप्रयोजनकाभावसहितादर्थत एवोपपत्तेः तज्जनकविजातीयापूर्वासिद्धाः अतिरा
१२८ त्रजन्यापूर्वे षोडशिग्रहणाभावो अन्यथासिद्ध इति नातिरात्रे षोडशिनं गृह्णातीत्यत्र विध्यर्थबाध इति वाच्यं
तद्ग्रहाभावानुरोधेनातिशयशून्यफलनिष्ठवैजात्यस्यापि कल्पनीयत्वादिति। अनुकल्पस्थले प्रथमकल्पा
...सामसहकारिनतु प्रथमकल्पस्याभावः कुशाद्युपादानसंभवे काशादिमात्रमुपादायानुष्ठितकर्मणो निष्फ
लत्वात्। प्रथमकल्पेऽननाम्नश्च वच्छेदापेक्षेति विकल्पानुकल्पयोर्भेद इति। यत्तु विकल्पस्थले परस्परोत्कर्षा
न पकर्षभावानाश्रयफलजनकत्वमभ्युपगम्यते प्रथकल्पानुकल्पस्थले परस्परोत्कर्षापकर्षभावाश्रय
फलजनकत्वमभ्युपगम्यत इति कल्पानुकल्पयोर्भेद इति तन्न व्यतिरेकतन्तदसत्त्वात् प्रथमकल्पानुकल्पस्थले
सोमेन यजेत सोमाभावे पूतिकपाभिषुणुयादित्यादौ परस्परोत्कर्षापकर्षभावाश्रयफलजनकत्वस्य स
र्वमीमांसकैरनभ्युपगमादिति दिक्। अधिकं विधिनिरूपणमाकरादवगन्तव्यम्। सिद्धार्थबोधकः हेरंब॰
शब्दोऽर्थवादः स च वायुर्वै क्षेपिष्ठा देवतेत्यादिस्तु सोऽर्थवादः सोऽरोदीदित्यादिर्निन्दार्थवादादिरूपः। अमीमां १२८

लकत्वान्वयिनि व्रीहिकरणकत्वाभावभावमानेऽपि लाघवात् व्रीहिकरणकत्वाभावाघटितधर्मस्यैव स्वर्गादिकारणे
तावच्छेदकत्वापाः कल्पनात्। तद्रूपावच्छिन्नतया उभयकरणकयागस्यापि फलसाधनताया दुर्वारत्वात् व्रीन
हिव्रीहिकरणकत्वाभावस्याकांक्षानुरोधात् यवविधिजन्यबोधविषयस्य कारणतावच्छेदकत्वेऽपि किमपि
प्रमाणमस्ति। एतेन दुग्धेऽपि विवृतिर्द्वयं वा द्व साधनप्रयोगात् वा कारघटितं यन्नोत्तरवाक्यं तत्र पूर्ववाक्यस्या
पि उत्तरवाक्यप्रतिपाद्यद्रव्यकर्मकत्वादिव्यवच्छेदबोधकत्वमावश्यकं तद्बोधश्च लक्षणादिना कथं
चिदुपपादनीयः एवं च व्रीहिभिर्यजेतेत्यादौ यवकरणकत्वाभावबोधो ध्रौव्यमित्यपि ~~[illegible]~~ निरस्ताः
एवं व्रीहियवयोर्योगे प्रतिकारणतानप्रामाणिकी इच्छारूपस्य यागस्य साधनतानिरूपणादिघटित
सामग्र्या एव निर्वाहात्। अत्राहुः। वेदस्थले विशिष्टान्वयपरता संभवे तदपरित्यागात् व्रीहिकर
णकत्वाभावस्य विशेषणतयैव यवकरणकयागधर्मिकस्वर्गसाधनत्वमाने तेन तादृशाभावस्य स्वर्गा
दिफलप्रयोजकत्वसिद्धिः एवमुक्तातिप्रसंगवारणाय कल्पनीयाः। स्तु सत्या व्रीहिभिर्यजेतेत्यत्रापि स्व

न्याद्यौ॰हारज्ञानमपि हेतुरेवं क्रमेण विधिसमभिव्याहारज्ञानस्य हेतुत्वे घटोऽस्तीतिवाक्यस्य तादृशशाब्दबोधं प्रति हेतुता कल्पने नापा
१२९ दकाभावः भवन्मते घटोऽस्तीत्यादिवाक्यस्य केवलघटमित्यादिपदज्ञानस्य च तत्तच्छाब्दबोधत्वावच्छिन्नं प्रति कार्यका
रणभावांतरकल्पने गौरवं घटमात्रमानयेत्यादिस्थलीयकारणभावकल्पनमुभयसिद्धमेव घटोऽस्तीतिवाक्या
नां लक्षणया कार्यत्वान्वितत्तच्छाब्दहेतुत्वाभ्युपगमे तु तत्स्थलीयकार्यकारणभावकल्पनमुभयसिद्धमेव घ
टोऽस्तीतिवाक्यानां लक्षणया कार्यत्वान्वितत्तच्छाब्दहेतुत्वाभ्युपगमे तु तत्स्थलीयकार्यकारणभावकल्पन
मुभयमते समानं लक्षणाज्ञानशून्यकाले तत्तत्पदजन्योपस्थितिकालीनासंसर्गाग्रहवशाद्विशिष्टव्यवहारः।
वस्तुतस्तु। तादृशलक्षणायां मानाभावः न च लक्षणामात्रोच्छेदापत्तिरिति वाच्यं घटमानयेतिवाक्यानां कार्य
त्वान्वितानयनान्वितकर्मत्वान्वितपरविषयकशाब्दनिर्वाहाय लक्षणास्वीकारात्। न च बालकेन पदकार्यतान्वि
तघटशाब्दं प्रति घटमानयेतिवाक्यस्य हेतुता गृहीता तदा फलानुरोधात् घटोऽस्तीतिवाक्यस्य यदा कदाचित् हे॰रं॰ख॰
कारणत्वग्रहेऽपि पूर्वकल्पनापात् अविरोधात् कथं सिद्धार्थकवाक्यस्य शाब्दहेतुत्वमिति वाच्यं। यत्र यदा कार्यता
न्वितघटशाब्दं प्रति हेतुता बालकेन गृहीता तदैव तन्निर्वाहाय शाब्दत्वावच्छिन्नं प्रयुक्तविषयताभिन्नकार्यत्वोप १२९

स्थापकपदज्ञानस्यापि हेतुत्वं गृहीते पस्थौ इति प्रसंगवारणाय विधिसमभिव्याहृतवाक्यस्य तत्तदर्थविषयकशा
ब्दबोधं प्रति हेतुत्वकल्पने पूर्वगृहीतसमानकारणतयाविरोधेन तद्विरोधि सिद्धार्थकवाक्यस्य हेतुत्वं न स्वी
क्रियते। न च कार्यत्वोपस्थापकपदज्ञानस्य हेतुत्वकल्पने कार्याभाव अस्तीतिवाक्यादपि शाब्दबोधापत्तिरिति
वाच्यं। कार्यपदभिन्नकार्यपदभिन्नकार्यत्वोपस्थापकपदज्ञानत्वेन हेतुत्वकल्पनात् किंच विशेषसामग्रीविरहे
ण तत्र शाब्दबोधापत्त्यभावः। वस्तुतस्तु। घटः कृतिसाध्यः इत्यादिवत् अत्रापि दुष्टापत्तिः न च तादृशसामान्यकारण
तायां मानाभाव इति वाच्यं। व्यभिचारदोषयोरितिव्यापात् तादृशकारणत्वकल्पनात्। अथ यदि कार्यत्वान्वित
घटज्ञाने शक्तिस्तदा तादृशशक्तिज्ञानात् घट इति स्मरणानुपपत्तिः शाब्दबोधे कार्यत्वान्वितस्य प्रकारतापत्तिरि
ति चेन्नैवं। द्विविधा हि पदशक्तिः आनुभाविकी स्मारिका च कार्यत्वान्वितघटविषयकशाब्दबोधनिरूपिता पदनि
ष्ठा शक्तिरानुभाविकी घटत्वनिरूपिता पदनिष्ठा शक्तिः स्मारिका। आनुभाविकीत्वस्वरूपसत्त्वेऽपि ज्ञातस्मारिकाया शक्
ज्ञानं तथा तादृशस्मारकशक्तिज्ञानादेव घट इति स्मरणोपपत्तिरिति संप्रदायः। वस्तुतस्तु कार्यतान्वितघटविषयकशा

[illegible] इति निरूपिताप्रायद्निष्ठायाऽनुभावकशक्तेरेवघटत्वीयत्वेनतानंकारणंतथाचयत्संबंधित्वेनतानंतस्यैवस्मरणात्प्र
१३० शक्तेःकल्पनेनाभावात्नशक्तिद्वयमितिसारंअतएवकेवलघटिस्तीति हतेघटत्वसंबंधिताद्यशाज्ञानात्घटत्व
स्यत्ताघटस्यत्विर्लभ्यतइतिज्ञातिनिरूपितस्मारकशक्तेःकल्पनेमानाभावात्नशक्तिद्वयमितिसारंअत एवकेवल
घटोस्तीतिवाक्यस्यापिघटत्वादिनास्मारकतामात्रेस्वरूपसंबंधेनकार्यत्वविशिष्टंप्रज्ञापनंनिरूपकतासंबं
धेनतदन्वितंयत्कर्मआधेयत्वसंबंधेनतदन्वितोपघटादिस्तत्त्वाद्भत्वेनकार्यतास्वीकारेणचघटमानयेत्यादौत्त
त्वसंसर्गकशाब्देद्वयःनत्वांतरवाक्यार्थबोधस्यमहत्वात्कार्यविशिष्टवैशिष्ट्यबोधहेतुत्वेनतद्गुरोधेनघटक
र्मतत्वबोधस्वीकारेकार्यत्वाविषयकशाब्दस्वीकारापत्तिरितिवाच्यं।युक्रमेणकार्यत्वान्वितानयनमित्यादित्र
मेणत्वांतरवाक्यार्थबोधस्यकार्यत्वविषयकस्यस्वीकारात्।नचनैयायिकमते घटपदजन्योपस्थितेःघटत्वप्रका
रकघटशाब्दत्वंभवन्मतेकार्यत्वान्वितार्थाचित्वघटशाब्दत्वंकार्यतावच्छेदकमितिगौरवमितिवाच्यंमन्मतेपि
घटशाब्दत्वमेवावच्छेदकंकिंतुघटइतिपदंआनयपदेनसहान्वयबोधतासर्यकमितिज्ञानस्यसहकारेणताद हे०ख०
शोपस्थितेर्हेतुत्वस्वीकारेणलाघवसंभवात्।एवंयोग्यताज्ञानादेरपि एतज्ज्ञानसहकारेणविशिष्टविषय १३०

सकाचरमात्रस्यकार्यान्वितएवशक्तत्वयार्थवादानाप्रामाण्यासंभवःतत्रकार्यतावाचकपदाभावात्।तथाहिलोके
घटमानयेतिवाक्यश्रवणानंतरंकस्यचिद्वृद्धस्यप्रवृत्तिमुपलभ्यमानेवालःप्रवृत्तेःकार्यताज्ञानजन्यत्वेनियमेनतज्ज्ञा
नजन्यत्वंगृहीत्वाऽपस्थितपदानांकार्यत्वान्वितज्ञानजनकत्वंप्रथमंगृह्णातितदनंतरंअपरस्यपटादौप्रवृत्तेरदर्शनाद्वा
योद्वापेन्कार्यताच्चितंस्मरानयनंतदन्वितंयत्कर्मत्वंतदन्वितंघटत्वानजकत्वंघटपदेगृह्णाति।एवंताद्दशकर्मत्वजन
कत्वेअंमपदस्येत्येवंक्रमेणशक्तियहइतितद्दत्वार्थशाब्दसामान्यप्रतिकार्यतावच्चेकपदज्ञानस्यहेतुत्वंस्वीकरणीयंअ
तएवहतिसाध्यत्वशक्तिकलिङ्पदघटितघटमानयेत्यादिवाक्यानामेवशाब्दबोधजनकत्वंप्रामाण्यंचनघटोस्ती
तिवाक्यानांतेषांकार्यतावाचकपदाघटितत्वात्अननुकार्यतावाचकपदज्ञानस्यकार्यतावच्छेदकंपदिशाब्दत्वंतदाघ
टमानयघटोस्तीतिवाक्यात्समूहालंबनताद्दशबोधापत्तिःयदिकार्यतावच्छिन्नशाब्दत्वंतदाव्यर्थविशेषणताप्रसा
व्याप्तिविरहेणतद्धर्मावच्छिन्ननिरूपितकारणतासंभवात्ताद्दशवाक्यात्समूहालंबनशाब्दबोधापत्तिश्चे
तिचेन्न।कार्यतान्वितानयनान्वितकर्मत्वान्वितघटविषयत्ताशालिशाब्दत्वावच्छिन्नंप्रतिघटमानयेतिसमभिव्या

ताशालिशाब्दं प्रति हेतुत्वं केवलं घटमिति शाब्दबोधे योग्यताज्ञानादेः शाब्दसामग्र्याः हेतुत्वाकल्पनेन चापरं लाघ
वं एवं यत्र चैत्रपुत्रस्तेन्द्रात इति वाक्यस्य पुत्रजन्मज्ञानजनकताग्रहीता तत्रापि पूर्वकल्पनाविरोधेन कार्यत्वबो
धकपदसहकारेण जनकताग्रहे तेला घवादि प्रतिसंधानादिवशात् एवं विध्येकवाक्यता यत्रार्थवादस्या
पि शाब्दबोधजनकत्वं विध्येकवाक्यतायत्र तज्ज्ञानसहकारिवशात् । न च कार्यत्ववाचकपदलभ्यत्वप्रतिसंधानोत्तरं प्र रं
वर्त्तकत्वकार्यताविलानयनान्वितकार्मत्वान्वितघटज्ञानजनकत्वज्ञानस्याप्रामाण्यग्रहस्वीकारात् अन्वितज्ञान
जनकत्वमेव कल्पनेतथा चापातं सिद्धार्थवाक्यस्यापि प्रामाण्यमिति वाच्यं । भ्रमत्वकल्पने गौरवात् । न चाध्यमेधी
देवे यथा स्वर्गत्वसामानाधिकरण्येन नत्वान्निरूपितजनकताग्रहे तेन च वच्छेदकत्वांशोपि तथा कार्यत्वान्वितत्वतदर्थग्रहे ज
नकताग्रहे तेन तत्त्ववच्छेदकत्वांशोपि तथा च कार्यत्ववाचकपदसमभिव्याहारेणैतादृशस्वरसलभ्यते इति सिद्धार्थ न
वाक्यस्याप्रामाण्यमिति वाच्यं । तद्वच्छिन्नजनकः स्येववाक्ये ग्रहात् न च तदा कार्यान्विततद्देशघटज्ञानत्वावच्छिन्नजनक
ताग्रहतदनुरोधे न घटांतर्भावेनापि सर्वत्र बोधकतापत्तिः अन्यलभ्यत्वशक्तिसंधानात् यदि घटांशसांगत्वतत्कार्यत्वांशोपी
ति वाच्यं । प्रथमं घटांतर्भावेनैव विशेषजनकताग्रहेण सामान्यजनकताया अग्रहात् घटांतर्भावेन सर्वत्र बोधतापत्तेरभावा

न्या०को० दितिवदंति॰ अन्वैस्याविकाः घटोस्तीतिवाक्यश्रवणानंतरंशाब्दवोधोदयेनानंतरंशाब्दयामीत्यनुव्यवसायेनचता
१३१ दृशवाक्यस्यशाब्दवोधजनकत्वेनप्रमाणत्वात् प्राकृतस्यशाब्दसामान्यंप्रतिकार्यत्ववाचकपदसमभिव्याहृतज्ञा
नकारणत्वग्रहस्यभ्रमत्वकल्पनात्। अन्यथाघटमानयेत्यादिवाक्यश्रवणात्तज्जन्योपस्थितिजन्यमानसवो
धेनैवव्यवहारोपपत्तौशब्दमात्रस्याप्रमाणत्वापत्तेः एवंविधिशेषामूलवाक्यस्वार्थप्रमाण्यनिर्वाहायविध्येकवाक्यत्वतानस्य
हेतुत्वकल्पनमपिनसंभवतितंविनापिस्वर्गपदशक्तिग्राहकवाक्यस्याप्रामाण्यादिति। अथतदाइतिरान्वितएवश
क्तिरुक्तशाब्दवोधविषयताचरत्निविषयताव्याप्येतिनियमात्। अन्यथाअन्वयस्यशाब्दबोधविषयतानस्यात्तनचा
न्वितघटत्वादिनाशक्यत्वेऽन्वितघटस्यघटान्वितकर्मत्वस्यचभानेघटमानयेतिशब्दाद्वाक्यार्थद्वयबोधःस्यान्नतुविशिष्टैक।
र्थबोधइतिवाच्यं तथासतिघटान्वयेघटपदस्यशक्तिःकर्मत्वान्वयेवाम्पदस्यशक्तिरस्तित्थैवंक्रमेणवाक्यार्थैक्यसंभवात्
नचैयत्रनीलघटइत्यादौघटस्यविशेष्यतयाभानंतच्चनकथंघटान्वयस्यविशेष्यतयाभानमितिवाच्यं। घटेऽन्वयेच हेरंब॰
खंडशक्तिस्वीकारेणोभयोपपत्तेः अन्वयस्यानन्वितेतरपदार्थएवान्वयेननतुतादृशेतरपदार्थाभावेनतस्यानन्वय
वा। अतएवघटमानयेत्यादावानयनान्वयस्यविशेष्यतयाभानापत्तिरपिनिरस्ता। वस्तुतस्तु। यथातदादिशब्देबुद्धिस्थत्वेनशक्तिस्तथा १३१

का॰कौ॰

तथा तथ्याः त्वमपि हरीतकीं मुंच्चेति फलितार्थः एवंचात्र मात्रादेरुपमानोपमेयभावेनान्वयेन तत्सूचकमात्रा
दृराजशादयोः अयमाररूपसमानविभक्तिकत्वसत्वात्केषिद्विशेषइतिकृतंपल्लवितेन। अथ यतथापिचंद्रेण तुल्यंमु
खमित्यादौ चंद्रमुखयोरुपमानोपमेयभावेनान्वयात् समानविभक्तिकत्वाभावाच्च क्व यमुक्तनियम इति चेन्न असति
विशेषानुशासने इत्यत्ताद्दशानियमोपगमेनातुल्यतुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति विशेषानुशासनमहे
नोक्तनियमेबाधकाभावात्। नचेवमप्यसमर्पविशेषणानांक्लीवत्वं भवतीत्यनुशासनस्त्रसत्वात् इवमुखमित्यादौ वा
र्यविशेषणस्य चंद्रादेः क्लीवत्वापत्तिर्दुर्वारैवेति चेन्न शब्दो नपुंसकमात्रशब्दीस्यमान्गीवचपलाम्लगचपलेत्यादिनः प्रका
रादिप्रयोगसामर्थ्याचाद्दशानुशासनस्य नियतलिंगविशेषशब्दपरत्वेनादोषात्। अतएव पार्थ एव धनुर्धर इत्यादा
वपि नानुपपत्तिरिति दिक्॥ ॥ शशशर्य्या नाम नंतत्वात् तस्य त्वम् लक्ष्म विशेषमनमयानोकं प्रमेयं पतयोऽव्यंतत्सुधीव
रैः॥ नानानिबंधानालोक्य विभाव्य च पुनः पुनः मया विलिखितं यद्यत्नेन तुष्यंतु तार्किकाः॥२ महालोशतो भावना तः अब
सम्यकृमया संगृहीतं प्रमेयं परिहियताम् अवधार्य सुधीभिस्तत् लोचनीयं प्रमादगुरुत्वे हि सर्वे ब्रह्मगनीयं॥३ यथा कृतानां म
शिष्याणां निष्कर्षबोधाय बहुकृत्रिपुंसः॥ अयं महादेवबुधेन यत्नात्कुलोद्भवेन रचितो निबंधः॥४ इतिश्रीमत्पदवाक्यप्र
माणपारावारीण श्रीमन्मुकुंदपंडिततनुजपुणतामकरोपनामकमहादेवपंडितविरचिते न्यायकौस्तुभे शब्दपरिच्छेदः समाप्तः॥

न्यायकौस्तुभेशाब्दखंडंसमाप्तिमगमत्। ।

रिविशेषाद्रूपेणावबोधस्तथा पदानामितरान्वितत्वेनान्वितत्वेन वा सामान्यरूपेणा शक्तिर्घटकर्मकानयनादिलाभस्तु प
रस्पराकांक्षादिवशादित्येव स्वारसिकमिति चेन्न । अन्वयसामान्यस्य शक्यत्वेपि अन्वयविशेषभानार्थमाकांक्षाज्ञानादेर्नि
यामकत्वकल्पनावश्यकत्वेन तत्र स्वतंत्रशक्त्यकल्पनात् । शाब्दविषयतायाः शक्तिविषयताव्याप्यत्वानंगीकारात् पदार्थ
द्वयसंसर्गभानं चाकांक्षावशात् पदार्थतावच्छेदकसंसर्गभाने तु शक्तिबलात् अन्यथान्वयेशक्तिस्वीकारे तत्संसर्गस्या
पि भाने भासमानवैशिष्ट्यप्रतियोगिनः प्रकारतापत्तेः । नचतदनुभवसिद्धं अन्यलभ्यत्वे शक्त्यकल्पनात् अत एवान्व
यस्य सांसर्गिकविषयताव्याप्यत्वानंगीकारात् पदार्थद्वयसंसर्गभानं चाकांक्षावशात् पदार्थतावच्छेदकसंसर्गभा
नं तु शक्तिबलात् अन्यथान्वयेशक्तिस्वीकारे तत्संसर्गस्यापि भाने भासमानवैशिष्ट्यप्रतियोगिनः प्रकारतापत्तेः न
चतदनुभवसिद्धं अन्यलभ्यत्वे शक्त्यकल्पनात् अत एवान्वयस्य सांसर्गिकविषयताव्याप्यत्वानंगीकारात् पदार्थद्वयसंस
र्गभानं चाकांक्षावशात् पदार्थतावच्छेदकसंसर्गभानं तु शक्तिबलात् अन्यथान्वयेशक्तिस्वीकारे तत्संसर्गस्यापि भा
ने भासमानवैशिष्ट्यप्रतियोगिनः प्रकारतापत्तेः नचतदनुभवसिद्धं अन्यलभ्यत्वे शक्त्यकल्पनात् । अत एवान्वयस्य

न्या॰ कौ॰

सांसर्गिकविषयताशालिशाब्दबोधे शब्दज्ञानस्य सहकारित्वकल्पनमेव तादृशाव्ययस्य प्रकारत्ववारकमिति परास्तं। आ
कांक्षावशादेव तादृशसांसर्गिकविषयताशालिशाब्दबोधे निर्वाहात् तदर्थमव्ययशक्तिकल्पनानौचित्यात् तत्र तत्र एव शा
ब्दबोधविषयतायाः वृत्तिविषयताव्याप्यत्वाभ्युपगमेऽव्ययांशस्य लक्षणातावच्छेदकविधया भानेप्युगपद्वृत्तिद्वयविरो
धानभ्युपगमात् सर्वपदस्य लाक्षणिकत्वेपि नबाधानुपपत्तिः लाक्षणिकपदस्याननुभावकत्वेपि तन्निरूपकल्पनात् इ
तिपरास्तं। आकांक्षावैलक्षण्यं लक्षणापात्रव्यकल्पनात् अत एव धूमोस्तीतिवाक्ये वह्निपरत्वस्यानुमानेन निर्वाहात्
न तदर्थं वह्न्यादौ धूमपदस्य वृत्तिकल्पना किं च घटपदस्य शक्तिलक्षणया निर्वाहार्थं शक्तिकल्पने घटातिरिक्तेपि शक्तिः
स्यात् मुख्यप्रयोगविरहस्योभयत्र तुल्यत्वात् अत एव पदार्थज्ञाने पदानां शक्तिः शक्तीभूतज्ञानविषयत्वं लक्षणा
शकत्वं त्वर्थे इत्यपि निरस्तं तस्यार्थस्मरणाजनकत्वात्। न च ज्ञानशक्तिरेव स्मारिका शक्तिरर्थे इति मते न दोषः ज्ञा
नशक्तिज्ञानस्य घटत्वस्य स्मृतिकार्यतावच्छेदकताभ्युपगमेन तादृशफलोपपत्तिरिति वाच्यं। ज्ञानशक्ति
स्वीकारे मानाभावात् अर्थशक्त्यैव तादृशफलोपपत्तिरिति। इत्थं च कार्यान्विते [illegible] वा न शक्तिः किंतु पदार्थमात्रे इति राम

न्विते

शक्तिमत्पदे ज्ञानं करणं पदार्थस्मृतिर्व्यापारः शाब्दबोधस्तु फलमिति न्यायसिद्धांतः अत्र महाः अर्थस्यैव करणत्व
मस्तु किं पदस्य करणत्वकल्पनेन न चार्थस्यातीतानागतत्वात् न तस्य शाब्दकारणत्वं स्मृतेर्विषयाजन्यत्वेन तस्या
व्यापारत्वाभावादिति वाच्यं तदापदार्थस्मृतेः कारणत्वमस्तु तद्दर्शने सर्वोपपत्तेरिति अतएव चिंतोपस्थित उप
नीत ज्ञानानंतरं कार्यनिर्वाहस्तथा च महन्मते सर्वपदस्यैव जन्य सर्वार्थोपस्थितिकाले च शाब्दबोधः शाब्दत्वं व्यापकं सर्व
पदजन्यपदार्थोपस्थितिजन्यतावच्छेदकं अपरं पदाजन्यपदार्थोपस्थितिजन्यतावच्छेदकं तेनैव यत्किंचि
त्पदसत्त्वे परपदाध्याहारेणैव शाब्दबोधः न चात्र पदजन्योपस्थितिः पदाजन्योपस्थितिश्च तत्रोभयजाती
यशाब्दापत्तिरिति वाच्यं पदजन्योपस्थितिघटितशाब्दसामग्री प्रतिबंधिकतयैवैकदा शाब्दद्वयजातीयानु
त्पादात् न च विषयमिश्रितत्ताद्दशशाब्दत्वस्य प्रतिबध्यतावच्छेदकत्वे महागौरवमिति वाच्यं। पदजन्योपस्थि
तिघटितशाब्दसामग्र्याः प्रतिबंधकत्वे लाघवेन तस्यैवोपगमात् भवन्मते पदाजन्यसर्वोपस्थितिघटित
सामग्र्याः स्वप्रतिबंधकत्वस्वीकारात् न च पत्रशक्तिज्ञानघटितसामग्री नास्ति केवलपदाजन्योपस्थितिः

तत्र तदर्थस्य मानसबोधवारणाय प्रतिबंधकत्वस्यावश्यकत्वेन तत्रैव पदाजन्योपस्थितिघटितत्वमावश्यकं स्यात्तज्ज्ञा
नीयान्यप्रतिप्रतिबंधकत्वाभ्युपगमेत्तु प्रेतेनैवोपपत्तेर्न प्रतिबध्यप्रतिबंधकभावांतरकल्पनमपीति वाच्यं· तत्र मान
सेच्छाया उत्तेजकत्वेन तादृशेच्छाकाले शाब्दोत्पत्तिवारणाय स्वतंत्रेण प्रतिबंधकताया आवश्यकत्वादिति तत्र
पदाजन्यसर्वपदार्थोपस्थितिकाले मानसबोधस्वीकारेण तादृशव्यवहारोपपत्तौ तस्य शाब्दत्वे मानाभावात् तस्मा
त्पदज्ञानं करणं पदार्थोपस्थितिर्व्यापारः संबंधप्रसंगागतेन न तस्मात्कार्यान्वितशक्तिर्विरहात्किं च समर्थो वा
दीनां प्रामाण्यापेक्षत एव यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमिति
थवादात्सुखविशेषे स्वर्गपदशक्तिग्रहोप्युपपन्नः न न्वदुःखासंभिन्नत्वं यदि दुःखानवच्छेदकावच्छिन्नत्वमर्थस्तदा ता
दृशाचैत्रत्वादिजातिसत्वात्तो क्लान्तिप्रसंग इति वाच्यं तथा सति स्वर्गात्मकसुखावच्छेदकशरीरेपि तादृशसत्त्वद्रव्य
त्वादिजातिमत्त्वेनासंभवप्रसंगादिति चेन्न दुःखावच्छेदकवृत्त्यैककालीनद्वयावृत्तिजात्यनाश्रयावच्छिन्नसुख शिव
त्वस्यैव तदर्थत्वात्तस्यैव स्वर्गपदशक्यतावच्छेदकत्वात् सत्त्वगुणत्वादेरेककालीनद्वयवृत्तित्वाच्चैत्रत्वादेश्चैकदे

अथशरीरात्यन्तनिवृत्तित्वाच्चमोक्ते दोषः । नव्याप्तदुःखावच्छेदकावृत्तिजात्याश्रयावच्छिन्नत्वं तदर्थः स्वर्गावच्छेदकवृत्तिचे
न्नत्वादिजातेर्दुःखावच्छेदकावृत्तित्वात् । तं संग्रहः नो चतत्रापिपापत्वमपजन्यदुःखसहानदुःखावच्छेदकावृत्तित्वंता
दृशजातेरितिवाच्यं स्वर्गेपिपापत्वभीतस्य कुपित्सो नैव निर्वृत्तिरित्यादिश्रुतेः स्वर्गस्य हेयत्वप्रतिपादकत्वेन तादृशा
र्थे तस्य तात्पर्याभावात् । पापत्वमपा[illegible] जन्यत्वे वा दुःखे विशेषणं देयमित्याहुः अथ तादृशस्वर्गिशरीरनाशानंतरंदु
ःखानुपपत्तिः तत्र दुःखसत्वेन तच्चाशविरहादिति चेन्न मुक्तिं प्रति ब्राह्मणशरीरादेर्हेतुत्वेन तत्र तदभावादेव मुक्ति
विरहात् स्वर्गिशरीरे ब्राह्मणत्वप्रयोजकादृष्टाभावेन तच्छरीरे ब्राह्मणत्वाभावात् । यदि च श्रवणादिजन्यमुक्तौ ब्रा
ह्मणशरीरापेक्षा नतु प्रकारान्तरेण मुक्तौ काशीमरणादिजन्यायां तदपेक्षेति विभाव्यते तथापि नेष्टसिद्धिः तादृशश
रीरनाशानंतरदुःखावच्छेदकशरीरोत्पत्तिमुपेत्य चरमदुःखोत्पत्त्यनंगीकारेण तादृशदुःखध्वंसस्यैव मुक्तित्वसंभ
वात् । नच ग्रस्तमेनंतरमिति न चैतदपि राजचक्रवर्त्तिसुखकामिकर्त्तव्यं उशरीरावच्छिन्नेऽसिद्धमस्तु मितिवाच्यं दृग
दृयात्मककाऽोपाध्यवच्छेदेन सुखाभावावच्छेदकावृत्तिजात्याश्रयावच्छिन्नसुखत्वस्य तदर्थत्वात्तत्र मिलापोपनीत

मितिन चात्राभिलाषविषयसुखत्वं जन्यखंड शरीरावच्छिन्नेशाजन्यवर्त्तिसुखेप्रसक्तमिति वाच्यं॰ तन्न तद्विषयसंबंधगोचरे
च्छाव्यवहितोत्तरक्षणावच्छेदेन तत्तद्विषयसंबंधत्वावच्छिन्नाभावावच्छेदकीभूतजात्याश्रयावच्छिन्नसुखत्वस्य तदर्थत्वा
तोत्र तच्चमत्स्यैकमेव स्वर्गपदशक्यतावच्छेदकं एतद्धर्मत्रयं तावत्सर्वेषां देवकदाचित्कस्य चिद्धानमिति तत्तस्य न तदर्थत्वं।
अन्ये केचित्तु इन्द्रादीनां सुखविच्छेदस्य श्रुतः श्रवणात् न च मृत्येत्यादिप्रतिपाद्यस्य न स्वर्गपदशक्यतावच्छेदकत्वं।
स्वर्गसुखस्यापि विषयजन्यत्वाच्च न निरुक्ताभिलाषोपनीतत्वस्यापि॰ अविलंबेन विषयप्राप्तिरव्यवहितेषामभिला
षमात्रात्। अविलंबश्रवकृपाद्यनपेक्षत्वमिति तस्माद्यत्र दुःखेत्यादिप्रतिपाद्यस्याद्यधर्मस्यैव स्वर्गपदशक्यतावच्छे
दकत्वमित्याहुस्तदसत् देवानां सुखविच्छेदश्रवणात्स्वरामादिदुःखश्रवणस्य तत्संसारनिंदापरत्वात्। स्वर्गसुख
स्वर्गपदशक्यतावच्छेदकमस्तु उक्तधर्मत्रयं तत्प्रत्येकमेवेति वाच्यं। तस्याननुगमेन शक्यतावच्छेदकत्वासं
भवात्। ननु तस्याननुगमेन शक्यतावच्छेदकत्वसंभवेप्यग्निष्टोमगंगास्नानादिरूपविभिन्नजातीयकारणाज शिद
न्यसकलस्वर्गनिष्ठस्वरूपविलक्षणजातिरेव स्वर्गपदशक्यतावच्छेदिकास्तु न च स्वर्गत्वजातौ मानाभावः तन्न

पे २

द्वेजात्यैवाग्निष्टोमादिजन्यतावच्छेदकतावश्यकत्वेनतोविनाकार्यकारणभावाद्यनिर्वाहविरहादितिवाच्यं।
अग्निष्टोमादीनांविशेषरूपेणयाकारणतातन्निरूपितयौगिककार्यतापत्तेस्तदवान्तरवैजात्यनावच्छिन्नत्वेपिविहितक
र्मत्वेनयासामान्यकारणतातन्निरूपितयौगिककार्यतावच्छेदकतयाव्यापकस्वर्गत्वजातेरवश्यकल्पनीयत्वात्। नचका
र्यतावच्छेदकाननुगमस्यादोषत्वयाततदवान्तरवैजात्यानामवतादृशकार्यतायाअप्यवच्छेदकत्वमास्तामितिवा
च्यं।यद्विशेषयोरितिन्यायेनसामान्यरूपेणकारणतायाआवश्यकत्वात्कार्यकारणभावैकरूप्यलाघवेना
पिसकलस्वर्गसाधारणैककार्यतावच्छेदकस्यजातिरूपस्यसिद्धेर्निष्प्रत्यूहत्वाच्चेतिचेन्मैवं।सकलस्वर्गोपायसा
धारणस्यविहितकर्मत्वस्यदुर्वचत्वात्तेनरूपेणकारणत्वस्याप्रामाणिकत्वात्प्रामाणिकत्वेपिलघुत्वस्यैवंत
त्र्यतावच्छेदकत्वात्लौकिकापकृष्टसुखस्यापिविनापुरापमनुष्यस्याव्यभिचारात्नवकाशादितिदिक्।।एव
मिंद्रमुपासीतेत्यादावपींद्रपदस्यलोकेपृथ्वींद्रादावपिप्रयोगादिंद्रपदार्थानिश्चयेनइंद्रःसहस्राक्षोदावि
द्रादिपदशक्तिग्रहः अतएवदेवताचैतन्यसिद्धिः पित्र्यमीमांसकाः देवताचैतन्यमानाभावः तथाहि देवता
वाचकेंद्रादिपदानांइंद्रायस्वाहेत्यादिमंत्रात्मकचेतनरूपशक्तिःतस्यैवदेवतात्वात्।नतुसहस्राक्षेंद्रःसहस्राक्ष

भा·कौ· इत्यर्थवादस्याप्रवर्त्तकत्वेनाप्रमाणत्वात्।अथशिवायगांदद्यादित्यादौत्यागजन्यफलभागित्वरूपदेवतात्वनिष्ठं
संप्रदानत्वसंभक्तेः वरदानत्वभक्तेश्चाचेतनमंत्रस्यकथं।शिवादिपदशक्यत्वंतस्याचेतनरूपतयातोद्देशसंप्रदान
त्वविरहात्।अपिचमंत्रस्यशिवादिपदशक्यत्वेततन्मंत्रानुपूर्वीविशेषणाभिव्यक्ततावच्छेदकाभावात्शिवा
दिसहस्रनाम्नांपर्यायत्वव्याघातापत्तेः।एवंवाजपेययागसैंद्रपदफलकत्वात्तद्विरोधापत्तेश्चेतिचेदस्त्वेता
वता।पिइंद्रादिपदानांमहत्वाहृत्वाततद्विदैशपत्वंचवेदबोधितंचतुर्थ्यंततत्पोद्धार्यत्वं।नचरूपादेशनयाइंद्रा
दिपदासवेतुर्थ्यंततत्पोद्धार्यत्वंबोध्यतइतिवाच्यं।ऐंद्रंदधिभवत्यमावास्यायोग्रान्तेयंहत्वंनिर्वपेदित्यादौदेवतार्थे
विहितेनतद्धितेनचतुर्थ्यंततत्पोद्धार्यस्वरूपदेवतात्वस्यैंद्राग्निदिपदेबोधनात्।तैर्नेद्रादिपदस्यस्वरतत्पाचतुर्थ्यंत न
पोद्धार्यद्रूपदकारणाकामिन्नंदधीत्यत्रचावेयबोधात्।अतएवेंद्राग्नेयस्यादिपदमेवदेवतात्वशक्तिपेत्याद्विपदंशक्तप
देचतुर्थ्यंततत्पोद्धार्यत्वस्यदैवोधितत्वात्।नचेंद्रायस्वाहेतिस्वाहांतसमुदायस्यैवमंत्रत्वेनतस्यकथंदेवतात्वंच शिव
तुर्थ्यंततत्पोद्धार्यनतादृशमंत्रस्यवेदेनाबोधनादितिवाच्यं।स्वाहादेस्त्यागमात्रबोधकत्वेनदेवतानंतर्गतत्वा
त्।नचचतुर्थ्यंततत्पोद्धार्यत्वमात्रेणदेवतात्वग्रहेवेदबोधितत्वेग्नाहामित्यस्योन्याश्रयपात्रस्यकारांतरेणातद्ग्रहेतत्त्व

स्त्रमूलकत्वात्। पूर्वपूर्ववेदजज्ञानमूलकोत्तरोत्तरतादृशज्ञाननिर्वाहेपि प्रथमतस्तादृशवेदजन्यशाब्दबोधेतद्
संभवादिति वाच्यं। विशेष्यमात्रस्यैव तथा च देशनादेशिताया चतुर्थ्यंततानद्विशिष्टपरत्वस्यैव देवतात्वे यूटाये
स्वादि चतुर्थ्यंततानवेदद्वोधितेति तन्निरासः केवलेंद्रपदस्य चतुर्थ्यंतत्वाभावादेवप्युदासः ऐंद्रं दधीत्यादौ तद्धि
तेनापि चतुर्थ्यंतत्वेबोध्यते चतुर्थ्यंतेंद्रपदकरणकामिंद्रं दधीत्येवाद्युपबोधात् न चोभयत्रैव षष्ठि तिः स्वाहेतिम
न्त्रांतर्घटितपदे देवतात्वाभावप्रसंग इति वाच्यं। चतुर्थीपदेन चतुर्थ्यर्थकस्योक्तत्वात्। तत्र चतुर्थीविधे
नप्रथमो यागएव तस्यैवाभिषिक्तनया चतुर्थ्याः घतत्स्यात्रपुरोडाशपतार्थकत्वात् सर्वेत्वानिरूढा चतुर्थ्यंतत्वेनि
वेशंप्रवृत्तेपि चतुर्थ्यंतत्वज्ञानात् तत्रैतदेव खलु मच चतुर्थी केपि भूः स्वाहेत्यादौ नानुपपत्तिरिति। न चा वेतन
स्यैव देवतात्वे इंद्रो देवतो समेस्यद्वयानुपपत्तिरिति वाच्यं। इंद्रपदस्येंद्रापेतिपद्परत्वादिति संप्रदायः। इदक्तात
क्तेचेतनस्य देवतात्वमतेपि प्रतिपाद्यतास्त्वधेनेंद्राय स्वाहेत्यादिमंत्रविशिष्टस्यैव देवतात्वमस्वरूपस्वीक

त्या॰ दौ॰ रणीयं ग्रन्थस्य पर्यायान्तरेणापि त्यागापत्तेः तथा च विनिगमनाविरहात् प्रतिपाद्यतासंबंधेन मंत्रविशिष्टोऽर्थः प्र
तिपादकतात्वमवश्यं संबंधेनार्थविशिष्टो मंत्रो वेत्युभयमेव देवता केवलस्यार्थस्य देवतात्वे पर्यायान्तरेणापि
त्यागप्रसंगात् केवलपदस्य तत्त्वे लक्षणादिनार्थान्तरबोधकतादृशपदस्य देवतात्वप्रसंगात् तत्राद्येऽपि वेदबो
धितायाश्चतुर्थ्यन्ततायास्तद्विशिष्टपदप्रतिपाद्यत्वमेव देवतात्वं अन्त्ये च तादृशचतुर्थ्यन्ततावशिष्टत्वमेव न च केन
नैवेदेन तादृशचातुर्थ्यन्ततो बोध्यत इति वाच्यं। ऐन्द्रं दधीत्यनेनैव तद्बोधनात् तथा हि पदविशिष्टस्यार्थस्य दे
वतात्वपक्षे इन्द्रपदस्येन्द्र एवार्थः तद्धितप्रत्ययस्य च चतुर्थ्यन्तपदप्रतिपाद्यत्वविशिष्टः तथा चेन्द्राभिन्नचतुर्थ्यन्त
पदप्रतिपाद्यकर्तृकांगकत्यागकर्माभिन्नं दधीत्यन्वयबोधः अर्थविशिष्टपदस्य देवतात्वकल्पे च तद्धितप्रत्ययस्य
चतुर्थ्यन्तेन्द्रादिपदमेवार्थः तथा च प्रतिपादकतासंबंधेनेन्द्रविशिष्टचतुर्थ्यन्तपदांगकत्यागकर्माभिन्नं दधी शिव
त्यन्वयबोधः इन्द्रपदसमभिव्याहृततद्धितपदेन च पदत्वरूपेणैन्द्रादिपदमेव बोध्यते तुल्यत्वे रितिनानुपप

स्य मूलकत्वात् पूर्वपूर्ववेदजज्ञानमूलकोत्तरोत्तरतादृशज्ञाननिर्वाहेऽपि प्रथमतस्तादृशवेदजन्यशाब्दबोधे तद्
संभवादिति वाच्यं। विशेष्यमात्रस्यैव तथा च देशनादेशिताया चतुर्थ्यंततानतद्विशिष्टपदत्वमेव देवतात्वे घटाये
त्यादि चतुर्थ्यंततानवेदबोधितेति तन्निरासः केवलेंद्रपदस्य चतुर्थ्यंततत्वाभावादेवप्युदासः ऐंद्रं दधीत्यादौ तद्धि
तेनापि चतुर्थ्यंतत्वे बोध्यते चतुर्थ्यंतेंद्रपदकरणकामिन्नं दधीत्येवाद्यपबोधात् न चोभयत्रेव घटितिः स्वाहेतिम
थ्यमांतघटितपदे देवतात्वाभावप्रसंग इति वाच्यं। चतुर्थीपदेन चतुर्थ्यर्थकस्योक्तत्वात्। तत्र च तुर्थी निवेधे
न प्रयमो पाएव तत्स्य जामिषिक्तत्पा चतुर्थ्यां इष्टतस्यास्त्रप्युद्देश्यतार्थकत्वात्सवे त्वानिकं वा चतुर्थ्यंततत्वं नि
वेशं प्रकृतेऽपि चतुर्थ्यंतत्वज्ञानात् अत एव खलु स च तुर्थी केऽपि मतः स्वाहेत्यादौ नानुपपत्तिरिति। न चाद्वेतन
स्यैव देवतात्वे इंद्रो देवतेत्यस्य स्वापानुपपत्तिरिति वाच्यं। इंद्रपदस्यैंद्रापातिपदपरत्वादिति संप्रदायः। केचित्तु
त्केचेतनस्य देवतात्वमतेऽपि मतिपाद्यतासंबंधेनेंद्राय स्वाहेत्यादिमंत्रविशिष्टस्यैव देवतात्वमध्वरूपस्वीक

त

त्तिः इत्थं च पदद्वये पर्य्यांतरेणान्तसागोपत्स्यादोषस्याप्येवं तद्धितार्थोऽपि पः चतुर्थ्यंतत्वेन वा पत्पदं बोध्यते नैव
स्यागइतिनियमात् । न च वेदबोधितचतुर्थ्यंतपदस्य देवतात्वरूपत्वे इंद्रो स्य देवतोऽस्य मेद्यात्स्वपबोधो न स्यादिति वाच्यं । वे
दबोधितचतुर्थ्यंतेतावस्य दप्रतिपाद्यत्वरूपदेवतात्वस्यैव देवतापदशक्यतावच्छेदकत्वात् तथा चैतन्मेकत्यागां
गीभूतचतुर्थ्यंतपदप्रतिपाद्याभिन्न इंद्र इत्स्वपबोधः व्युत्पत्तिवैचित्र्यानुरोधात् । व्युत्पत्तिवैचित्र्याद्देवतापदा
र्थैकदेशे चतुर्थ्यंतपदेऽपि षष्ठ्यर्थान्वयस्वीकारादित्याहुः । अत्र नैयायिकाः अचेतनमंत्रादीनां नेंद्रादिपदवाच्यत्वं
नवा देवतापदवाच्यत्वं अत्र पितृसहस्राक्षस्यैवेंद्रः सहस्राक्ष इत्यादिप्रसिद्धपदसामानाधिकरण्यस्थले इंद्रपदार्थे सहस्रा
क्षस्यैवेंद्रः सहस्राक्ष इत्यादिप्रसिद्धपदसामानाधिकरण्यस्थले इंद्रपदार्थे सहस्राक्षाभेदानुभवसिद्धत्वात् इंद्रमुपासी
तेत्यादौ इंद्रपदार्थे उपासनान्वयासंभवाच्च अचेतने उपास्यत्वविरहात् । एवं शिवादिपदानामप्यचेतनमवाचकत्वे शिवा
पगांदद्यादित्यादौ तन्निष्ठफलोद्देशेन त्रिपमाणात्वरूपसंप्रदानकत्वस्य त्यागादावन्वयासंभवः अचेतने सफलाभावा
त् । एवं शिवादिसहस्रनाम्नां देवतावाचकत्वेन प्रसिद्धानां पर्य्यायत्वमपि न स्यात् मंत्रे स्य देवतात्वे अनुगतैकशक्यतावच्छे

न्या॰कौ॰ दकाभावात्। एवं देवतानां वरदातृत्वश्रुतिरपि विग्रहद्रास्यात्। अचेतनस्य वरदातृत्वासंभवात्। तस्मान्मंत्रकरणक
हविस्त्यागोद्देश्यत्वस्यैव देवतात्वरूपतयास्वेतनेंद्रादिर्देवतेति। न च हविस्त्यागोद्देश्यत्वस्य देवतात्वरूपत्वे इंद्रद्रव्यांत
रत्यागोद्देश्ये देवतात्वाभावापत्तिरिति वाच्यं। हविःपदस्य द्रव्यसामान्यपरत्वात् प्रयोजनविरहेणानुपादेयत्वाच्च नच ता
दृशोद्देश्यतायाः देवतात्वरूपत्वे तादृशोद्देश्यताभ्रंश्यकालेऽदेवतात्वप्रसंग इति वाच्यं। यदाकदाचित्तादृशोद्देश्य
तावत्त्वस्यैव तथात्वात्। न च यदाकदाचिदुद्देश्यत्वस्य तथात्वे इंद्रियशरीरामवच्छेद्यतादृशापामपि इंद्रीयात्मनोर्दे
वतात्वापत्तिरिति वाच्यं। इंद्रियादिशरीरस्यैव त्यागोद्देश्यत्वात्। न च शरीरस्यैव देवतात्वे आत्मन्यतिव्याप्तिः तत्रापि
त्यागोद्देश्यतासत्वादिति वाच्यं। आत्मव्यावृत्तोद्देश्यताया एव लक्षणाघटकत्वात्। न च शरीरस्य देवतात्वे देवता
यां अचेतनत्वापत्तिरिति वाच्यं। त्यागस्य मंत्रकरणकत्वाभावात् इंद्राय स्वाहेत्यादेरेव मंत्रत्वात्। अत एव प्रेतो
द्देश्यकत्यागस्यापि मंत्रकरणकत्वाभावात् प्रेतस्य देवतात्वं न च तथापि कन्यात्यागोद्देश्यत्वात् जामात्रादौ देव राम
तात्वापत्तिः न तत्यागस्य कोदादित्यादिमंत्रकरणकत्वादिति वाच्यं। तन्मंत्रस्य प्रतिग्रहीतृपंचमीपत्वेन करण

ऽतस्य देवतात्वापत्तिरिति भावः॥ तत्स्थलीय नमः पदस्य मंत्रत्वानंगीकारात् तच्छक्तिसंबंधेन मंत्रपदघटकत्वस्यैव मंत्रत्वरूपत्वात्
न तु मंत्रकरणक हविर्भागित्वमेव देवतात्वम् अतः किमुद्देश्य २

त्वाभावात्। भद्रादेस्तु नमः पदस्य मंत्रत्वात्। तत्करणक पार्वणोद्देश्यत्वस्य पित्रादेर्देवतात्वमेव न च नमः पदस्य मंत्रत्वे त
त्करणक प्रेतश्राद्धोद्देश्यप्रेतस्य मंत्रनिवेशेन। नचैवमुक्तस्य पित्रादेः श्राद्धे आकाशाय स्वाहेत्यादावाकाशादेश्चासंग्र
हः तस्य हविर्भागित्वाभावात् तदुद्देश्यतायाश्च विसंवादी छागमादाय तत्रैव संभवादिति वाच्यम्। एवं सति इंद्राद्युद्देश्यक सा
गे मंत्रस्य करणत्वे मानाभावेनासंभवे सत्यदुर्वारत्वादिति चेदत्राहुः। मंत्रोच्चारणपूर्वकत्वया विधिबोधितो यस्त्यागस्तन्नि
हविस्संबंधिन्या विषयत्वे तासप्र्यतिनिको पिट्टोपः आकाशादेरपि तत्र सेह विः स्वामित्वेन हादृशत्यागविषयत्वोक्तेः तदुद्दे
श्यकत्यागस्याकाशाय स्वाहेत्यादिमंत्रपूर्वकत्वेनैव दानस्यापि तुभ्यं संप्रददे इत्यादिवाक्योच्चारणपूर्वकत्वेन शास्त्रबोधि
तत्वात् मंत्रपर्यंतनिवेशः इदं तादेरपि देवतासर्वथा दृशिकाणत्यागविषयत्वोतत्रातिव्याप्तिवारणाय हविः संबंधितयेति
कोदाद्युत्यादि मंत्रपाठपूर्वकत्वेन विधिबोधिते प्रतिग्रहे द्रव्यसंबंधितया प्रतिग्रहीतुर्विषयत्वात् तत्रातिप्रसंगवारणाय त्या
गत्वनिवेश इति संक्षेपः। न चैवं पदानां कार्यतावच्छेदकत्वे वा शक्ति विरहे कुत्र गवादिपदानां शक्तिरिति चेत् अत्राहुः गवा
दिपदानां गोत्वादिविशिष्टगवादिव्यक्तौ शक्तिः। जात्याकृतिव्यक्तयः पदार्थ इति सूत्रे चाकृतिपदं वैशिष्ट्यपरं। सामान्य

न्या॰कौ॰ जन्यगुणोपगमेनयास्तदेवत्रगादिशक्तिग्रहसंभवात्तदनुपगमेचसमानप्रकारकत्वेनैवहेतुमद्भावोपगममात्रेदोषःपिष्टमप्योगाव
दित्यादौचगवादिपदंगोसंस्थानसदृशसंस्थानवनिलाकृतिरोकमतोनतत्रानुपपत्तिरितिदीधितिकारादयस्तुगवादिपदानां
व्यक्त्यादेवशक्तिनतुगोत्वाद्यंशेपिनचैवंशाब्दबोधप्रयोजकशक्त्यभावाद्गोत्वादीनांशाब्दबोधेप्रकारतयाभानानुपपत्तिरितिवाच्यं
पदार्थैकदेशेगोत्वादिधर्मस्यशाब्दबोधप्रकारतायांतदंशेतत्पदशक्यतावच्छेदकत्वस्यैवप्रयोजकत्वात्शक्यतावच्छेदकत्वंचसंकेती
यतत्पदजन्यशाब्दबोधविषयत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वंनतुबोधविषयतावच्छेदकतयासंकेतविशेषणविषय्या
वाच्यत्वेनयथाचैतद्धर्मप्रकारताकशाब्दबोधेतद्धर्मावच्छिन्नविशिष्टादृशविशेष्यतासंसर्गकशक्तिज्ञानस्यैवकारणत्वमितिनो
क्तानुपपत्तिःएतत्त्वेवंसतिशक्तिज्ञानाधुनिकसंकेतज्ञानयोरेकरूपेणैवहेतुतयायत्रद्रव्यपदाद्गुणवत्त्वादिनाद्रव्यबोधेच्छा
भिप्रायकःकस्यचित्संकेतःद्रव्यत्वाद्यवच्छिन्नतादृशविशेष्यतासंबंधेनगृहीतस्तत्रतादृशसंकेतग्रहात्द्रव्यत्वेनद्रव्यबो
धापत्तिर्गुणवत्त्वादिप्रकारकबोधानुपपत्तिश्चेतिदूषणोद्भवेनंतदसत्द्रव्यपदाद्गुणवत्त्वादिनाद्रव्यबोधेच्छाभिप्रायेनतादृशसंकेतेद्र राम
व्यांशेद्रव्यत्वस्यप्रकारत्वेपिविशेष्यतावच्छेदकानांयागुणवत्त्वस्यैवस्वीकारेणोक्तानुपपत्त्यभावादितिप्राहुःप्राभाकरास्तुगवा

दिपदानां गोत्वादिविशिष्टशक्तिकल्पने गौरवात्रागृहीतविशेषणान्यायेन गोत्वादौ शक्तिकल्पनस्यावश्यकत्वा
त्तेनाद्यवेन केवलगोत्वाद्यवेव शक्तिः। न चैवं गवादिपदाद्गोत्वादिविशिष्टान्वयबोधानुपपत्तिः विशिष्टशक्तिविरहादि
ति वाच्यं। गोत्वादिविशिष्टशाब्दत्वस्यैव गोत्वादिशक्तिज्ञानकार्यतावच्छेदकत्वोपगमेन केवलगोत्वादिशक्तिज्ञानादेव
विशिष्टान्वयबोधसंभवात्। अन्यथैवं पश्वादिपदस्थलेपि पशुत्वाद्युपाधिशक्तिज्ञानस्यैव पशुत्वादिविशिष्टशाब्दबोधत्वस
कार्यतावच्छेदकत्वोपगमेन पशुत्वादिशक्तिज्ञानादेव पशुत्वादिविशिष्टबोधोपपत्तौ तत्रापि विशिष्टशक्त्युच्छेदः। न
चेष्टापत्तिः उपाधिप्रवृत्तिनिमित्तकस्थले विशिष्टएव शक्तिरिति तान्त्रिकोक्तविरोधादिति चेन्न। जातिर्व्यक्तिवेद्यत्वनियमेन
जातिप्रवृत्तिनिमित्तस्थले उक्तरीत्या संभवेपि उपाधेर्व्यक्तिवेद्यत्वनियमाभावेन तत्रोक्तरीतेरसंभवेन तत्र विशिष्टशक्त्यं
गीकारस्यावश्यकत्वात्। न च गोत्वादौ शक्त्युपगमे गोत्वं गोपदशक्यमिति शक्तिज्ञानहेतुतायां गोत्वत्वादेर्वि
शेष्यतावच्छेदकतायां निवेशो गौरवं विशिष्टशक्तिस्वीकारे च गौर्गोपदशक्येति शक्तिज्ञानहेतुतायां गोत्वादे
र्विशेष्यतावच्छेदकतया निवेशो लाघवमिति विशिष्टशक्तिस्वीकार एवोचित इति वाच्यं। गोत्वादौ शक्तिस्वी

२

न्या॰ कौ कारे पितादाविव नगोत्वादेरेव विशेष्यतावच्छेदकतया निवेशेन गौरवाभावादिति वदंति। तदसत् केवलजातिश
क्तिस्वीकारे गवादिपदात् कदाचित् समवायेन गोत्वादिविशिष्टस्य बोधः कदाचित्कालिकसंबंधेन गोत्वादिविशिष्ट
स्य बोध इत्यत्र नियामकाभावप्रसंगात्। विशिष्टशक्तिस्वीकारे च यदा समवायेन गोत्वादिविशिष्टे शक्तिज्ञानं तदा
समवायेन गोत्वादिविशिष्टस्य शाब्दबोधः यदा च कालिकसंबंधेन गोत्वादिविशिष्टे शक्तिज्ञानं तदा कालिकसंबं
धेन गोत्वादिविशिष्टस्य शाब्दबोध इति नियमसंभवात्। न च केवलगोत्वादिशक्तिज्ञानादेव तात्पर्यवशात्तत्तत्सं
बंधेन गोत्वादिविशिष्टशाब्दबोधनियमसंभव इति वाच्यं। तत्तात्पर्यज्ञानेष्टशक्तिज्ञानं विना शाब्दबोधानुदया
त्। किंच प्रत्यक्षे ज्ञाते व्यक्तिवेद्यत्वनियमेपि शाब्दबोधे तथा नियमाभावेनोक्तरीत्या केवलजातिशक्तिज्ञाना
द्विशिष्टान्वयबोधो दुरुपपाद इति विशिष्टशक्तिस्वीकारस्यावश्यकत्वमिति दिक्। रूढत्वं विशिष्टवाचकत्वेन व्यवस्थि शिव
तेषु शब्देषु केचन शब्दाः केवलयौगिकाः यथा पाचकपाठकादयः। केचन केवलरूढाः यथा गवादिशब्दाः। केचन
योगरूढाः पंकजादिशब्दाः। केचन यौगिकरूढाः यथोद्भिदादिशब्दाः। ननु पंकजादिशब्दस्य यौगिकत्वमेवास्तु

किं रूढेति चेन्न पंकजादिशब्दात् योगशक्त्या कुमुदादिशाब्दबोधापत्तिवारणाय तत्र रूढिस्वीकारस्यावश्यकत्वा
त् । न च रूढिस्वीकारेऽप्युक्तापत्तिर्दुर्वारैवेति वाच्यं । रूढिज्ञानस्य प्रतिबंधकत्वोपगमेनोक्तापत्तिवारणात् । तदुक्तं रूढ्यै
र्योगापहारितेति । ननु पद्मान्यविशेष्यकपंकजनिकर्तृत्वप्रकारकशाब्दत्वावच्छिन्नं प्रति पंकजपदे पद्मे शक्तिमत्ताप्रका
रकरूढिज्ञानत्वेन प्रतिबंधकत्वासंभवः । तादृशरूढिज्ञानकाले कर्दमजादिपदात् ताद्रूप्येण कुमुदादिबोधानुदयप्रस
ङ्गात् । न च पंकजपदजन्यतादृशशाब्दत्वावच्छिन्नं प्रति उक्तरूपेण रूढिज्ञानस्य प्रतिबंधकत्वोपगमान्नोक्तदोष इति
वाच्यं । तथा सत्यप्युक्तरूढिज्ञानकाले समुदायजन्द्रुणापंकजपदात् पंकजनिकर्तृत्वेन कुमुदादिबोधानुप
पत्तेर्लक्षणाग्रहस्योक्तरूढिज्ञानप्रतिबंधकताया मुत्तेजकत्वकल्पने गौरवादिति चेन्नावयवशक्त्या पंकज
पदजन्यपद्मान्यविशेष्यकपंकजनिकर्तृत्वप्रकारकशाब्दत्वावच्छिन्नं प्रति उक्तरूढिज्ञानत्वेन प्रतिबंधकत्वा
त् । न चैवं कुमुदादावेव पद्मत्वेन भ्रमात्मकरूढिज्ञानकाले ताद्रूप्येण कुमुदादिबोधानुपपत्तिः उक्तरूढि
ज्ञानरूपप्रतिबंधकसत्त्वादिति वाच्यं । पद्मान्यविशेष्यकेत्यनेन पद्मत्वानवच्छिन्नविशेष्यताकत्वस्य विवक्षि
तत्वात् । न चैवमुक्तरूढिज्ञानसत्त्वे पंकजपदं कुमुदे शक्तमिति रूढिज्ञानकाले पद्मस्येव कुमुदादेरपि अवयव

न्या॰ कौ॰ शक्तत्वायंकजनिकर्तृ कुमुदमित्यादिवोधो न स्यादिति वाच्यं। इष्टापत्तेः। पंकजपदविशेष्यककुमुदादिशक्त
त्वप्रकारकज्ञानाजन्यत्वस्यापि प्रतिवध्यतावच्छेदककोटौ निवेशनीयत्वाद्वा वस्तुतस्तु स्वसामानाधिकर
ण्यस्वाव्यवहितोत्तरोत्पत्तिकत्वोभयसंबंधेनोक्तरूढिज्ञानविशिष्टान्यशाब्दत्वमेवोक्तरूढिज्ञानप्रतिवध्यता
वच्छेदकं लाघवात्तावतैवोक्तदोषवारणसंभवाच्चेति सारं। ननु योग्यताज्ञानस्य धर्मितावच्छेदकभेदेन विभिन्नहेतुता
कतया कुमुदत्वादिधर्मितावच्छेदककपंकजनिकर्तृत्वप्रकारकशाब्दत्वावच्छिन्नं प्रति तादृशयोग्यताज्ञानस्य हेतु
त्वाकल्पनेनापादकाभावादेव तादृशशाब्दवारणे रूढिज्ञानस्य प्रतिवंधकत्वे मानाभावः। न च योग्यताज्ञानस्य धर्मिता
वच्छेदकभेदेन हेतुत्वे गौरवात् धर्मितावच्छेदकानिष्ठप्रत्यासत्त्यैव हेतुत्वं कल्प्यत इति पंकजनिकर्तृत्वप्रकारतानिरूपि
तविशेष्यतावच्छेदकतासंबंधेन कुमुदत्वादौ शाब्दत्वावच्छिन्नापत्तौ क्रियमाणायां फलतः पंकजं कुमुदमित्यादिशा
ब्दापत्तिर्दुर्वारैवेति वाच्यं। तथापि कुमुदं कुमुदमित्यादौ शाब्दवारणाय कुमुदत्वभिन्नवृत्तिविषयतासंबंधेन शाब्द शिव
त्वावच्छिन्नं प्रति कुमुदत्वादिभेदस्य हेतुत्वावश्यकतया योग्यताज्ञानेन शाब्दत्वावच्छिन्ने जननीये कुमुदत्वादिभेद
स्य सहकारित्वकल्पनेनैवोक्तशाब्दापत्त्यभावात्। पंकजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशिष्यतावच्छेदके

तासंबंधेन शाब्दत्वावच्छिन्नस्य कुमुदत्वादिभिन्न एव जायमानत्वात् कुमुदत्वादावजायमानत्वाच्चेति चेन्नैवं इ
च्छाविशिष्टविरोधिसामग्र्यभावस्य भिन्नविषयकानुमितिसामग्र्यभावस्य च विनाधर्मितावच्छेदकनिवेशनं कार्य
कारणभावासंभवेन तद्वत्त्वादुक्तशाब्दस्यातिप्रसक्त्यापत्तिवारणाय रूढिज्ञानस्य प्रतिबंधकताया आवश्यकत्वात्तत्
द्वारणाया पंकजादिपदात्संकं कुमुदमित्यादिशाब्दस्य जायमानत्वेन कुमुदत्वादिभेदस्योक्तरीत्या सहकारित्व
कल्पनानावश्यकत्वं भवेत्वाद्य । मारीतिरुक्तनियमतो रूढ्याप्यलं न पद्ममेव व्यक्तिवाचकत्वप्रत्ययेन पंकजनिकर्तृत्वयानुभाव्य
त्वेव्यक्तिवृत्तिनां संनिहितविशेषपरत्वनियमादिति रूढिज्ञानस्य प्रतिबंधकत्वे मानाभावे इत्याहुस्तदसत् । उक्तरीत्या
पद्मेनैव सह प्रथमं योगार्थस्यान्वयबोधे पि कुमुदादितात्पर्यग्रहवशात्पुनः पंकजपदानुसंधानेन योगादेव कुमु
दादिशाब्दधीवारणाय रूढिज्ञानस्य प्रतिबंधकताया आवश्यकत्वात् । मीमांसकास्तु पद्मत्वस्य बुप्रयोगोपाधिता
भ्युपगमेनैवोक्तापत्तिवारणे रूढिज्ञानस्य प्रतिबंधकतायां मानाभावः तथा हि पंकजनिकर्तृत्वनिष्ठप्रकारता
निरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दत्वावच्छिन्नं प्रति तादात्म्येन पद्मत्वस्य हेतुत्वकल्पनान्नोक्तापत्तिः पद्म

त्वं प्रयोगोपाधिरिति प्राचीनप्रवादस्याप्युक्त एवार्थः। यत्तु पंकजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधे
न शाद्वलत्वावच्छिन्ने समवायेन पद्मत्वं हेतुरिति न स्वार्थ इति तदसत्। अतीतानागतपद्मादावपि तादृशसंबंधेन शा
द्वलस्य सत्वात्तत्र तत्प्राक्काले समवायेन पद्मत्वस्याभावेन व्यभिचारात्। अतीतानागतादौ सत्वविषयकस्यैव हेतुत्वेऽतए
व जातः संबद्धश्चेत्येकः काल इति प्रवादोऽपि साधु संगच्छते। यदपि तादृशसंबंधेन शाद्वलत्वावच्छिन्ने पद्मत्वाभावः प्रति
बंधकस्तेनोक्तप्रवादार्थस्तन्न वचनोक्तव्यभिचारः अतीतानागतादौ पद्मत्वस्यैव पद्मत्वाभावस्याप्यसत्वादिति तदप्यस
त् तथासति यद्देशावच्छेदेन यदा कार्योत्पत्तिस्तद्देशावच्छेदेन तत्प्राक्काले तत्सामग्री सा कारकसामग्री व्याभिवि
लयप्रसंगात्। न च यद्देशवृत्तिसामग्री यदा तदव्यवहितोत्तरकाले तद्देशवृत्तिकार्योत्पत्तिरिति सा कारिका यास्व
सामग्र्या व्याप्तेरुपगमान्न दोषः अतीतानागतपद्मलक्षणादेशवृत्तिपद्मत्वस्येदानींसत्वेन तद्देशवृत्तिकार्योत्पत्तिसंभ
वादिति वाच्यं तथासति मरणादिप्रतिकालेऽपि दाहाद्यापत्तिः तद्देशवृत्तिमणाद्यभावस्य तत्कालावच्छेदेन तत्काले
सत्वेन तद्देशवृत्तिदाहादिरूपकार्योत्पत्तिसंभवात्। नचैवं केवलपंकजपदात् निर्धर्मितावच्छेदकरूपेक जनिकर्तृत्वप्रका

शिव

ता3 प3

रककुमुदादिबोधोपिस्यादितिवाच्यं इष्टापत्तेः।कुमुदत्वादिपधर्म्मितावच्छेदकपंकजनिकर्त्तृत्वप्रकारक
शाब्दस्यैवानभ्युपगमात्।वस्तुतस्तु पंकजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनशाब्दत्वावच्छिन्नेप
द्मवृत्तित्वविशिष्टविषयतासंबंधेनज्ञानत्वेनैवरूढिज्ञानस्यहेतुत्वमतोनकोपिदोषः।उक्तप्रवादस्याप्यत्रैवतात्पर्यमित्या
हुस्तदसत्।लक्षणाजन्यकुमुदादिशाब्दबोधेव्यभिचारात्।शक्तिजन्यत्वस्यजन्यतावच्छेदकेनिवेशेनोक्तव्यभिचारवारणेपि
समुदायरूढिशक्त्यग्रहदशायांपंकजपदात्पंकजनिकर्तृत्वेनकुमुदादिशाब्दबोधानुदयप्रसंगस्यदुर्वारत्वात्।स्वस
मानाधिकरणस्वाव्यवहितोत्तरत्वस्वोत्पत्तिकत्वोभयसंबंधेनरूढिज्ञानवत्त्वस्यजन्यतावच्छेदकेनिवेशेरूढिज्ञानकालेयो
ग्यतादिज्ञानरूपस्यसामान्यसामग्रीवेलायांपंकजनिकर्तृत्वेनकुमुदादिबोधापत्तेर्दुर्वारत्वात्रूढिज्ञानवदन्यतादृशबोधेरू
ढिज्ञानाभावस्यातिरिक्तहेतुत्वोपगमेचातिगौरवापत्त्यारूढिज्ञानप्रतिबंधकत्वस्यैवसमर्थकात्।वैयाकरणास्तुरूढिज्ञा
नस्यप्रतिबंधकतयातादृशायांपंकजनिकर्तृत्वेनपद्मस्यापिनबोधः किंतुपद्मत्वेनैवेतिपंकजादिपदंरूढमेवेतियोगरू
रूढःशब्दोनास्त्येवतदुक्तं॥जहत्स्वार्थातुतत्रैवयत्ररूढिविरोधिनी।पंकजंयमुनादेवीपद्मनाभोयुधिष्ठिरइतीत्याहुः।तदस

न्या॰कौ॰ तापंकजमस्तीत्यादिवाक्यात्संकुजनिकर्तृपद्ममस्तीत्याद्याकारकबोधस्य सर्वानुभवसिद्धत्वात्प्रामाणिकगौरवं स्यादे
वत्वात्तावस्त्वतस्त्वित्याद्युपदर्शितरीत्या स्मात्कर्मापिपद्मान्यधर्मिकत्वस्यानिवेशाद्वेति दिक्॥ अत्रेदं बोध्यं धेनुपदं गोत्ववि
शिष्टधानकर्मणि रूढमेव न तु योगरूढं न च दाधाम्यंशानुपूर्वेट इच्चेत्यनुशासनात्योगशक्तिरीर्वीरेतिवाच्यं तत्सौरा
दिसत्त्वेन कथंचिद्धेसादनपरत्वात्तत्र लवं वदतीत्यलवता तेऽतिक्लिपतीत्यलवेतु इत्यादिवत् उणादिसत्त्वेपि शक्तिकल्पने मा
नाभावात्समुदायशक्तौ लाघवाच्च अतएव पाणिनिः पंचपादिकाविहितानुणादिप्रत्ययानुणादयो बहुलमित्यके नैवसू
त्रेणाविहितवान्यत्र च प्रत्यये शक्तिस्तत्र प्रत्येकमेवास्तु यत्र पत्त्वधेनुपदस्य गोत्वं न शक्यं किंतु पल्लकर्तृगामी भयशक्या
नुगमकशक्त्युपाधिः गोत्ववत्सु धानकर्मसु धेनुपदशक्तेः गोत्वांशे तु न शक्तिः स्पर्शोपितस्य शक्तिग्रहाहितसंस्कारादेवो
पस्थितस्य शाब्दधीविषयत्वसंभवात् तावन्नचलाघवाद्गोत्वं शक्यं धानकर्मत्वं शक्त्युपाधिरित्येवास्तु विनिगमनाविरहादि   शिव
तिवाच्यं गोत्वजातेः शक्यत्वे तु स्यविनिवेश्य तत्पाव्यक्तिलाभसंभवे व्यक्तेरशक्यत्वापत्तेः तथा च धानकर्मत्वस्य गोत्ववि
शिष्टशक्त्युपाधित्वासंभवे धानकर्मत्वभानेन स्यात् तद्रूपभानादि बोधः स्यादित्यस्यैव विनिगमकत्वा धानकर्मत्वरूपोपाधि

विशिष्टे धर्मिण्येव शक्तिरिति तत्रघानकमत्वस्याननुगतत्वेनातिप्रसक्तत्वाच्च शक्यतावच्छेदकत्वासंभवादिति। अथ यौ
गिकरूढस्य योगरूढादेर्वैलक्षण्ये कथं पार्थक्येनोक्तिरिति चेन्न योगरूढस्य पंकजादिपदादेकदैकस्य धर्मिण्योपो
गरूढिभ्यां बोधः यौगिकरूढस्य तूद्भिदादिपदात्कदाचिद्योगशक्त्या तरुगुल्मादीनां बोधः कदाचिदुद्भिदा यजेते
त्यत्र रूढिशक्त्या यागविशेषस्य बोध इति वैलक्षण्यस्य स्फुटत्वात् एवमन्यत्रापि दृष्टं शक्तिश्चेश्वरसंकेतः स चास्माच्छब्दा
दयमर्थो बोद्धव्य इत्याकारकेश्वरेच्छारूपः तद्विषयत्वरूपाबाधस्तदाशयं नैव शक्तिः पदार्थान्तरमितियुक्तिनैयायानां विषय
त्वस्य पदार्थान्तरत्वात् विवृतिं चेदमस्माभिर्भवानन्दीप्रकाशे। न चैवं वाच्यवाचकभावस्यानुपपत्तिस्तस्यास्तवेत्रादिषो
बादिनिर्वाच्यबोध्यत्वेन बोधनिष्ठजन्यतानिरूपकत्वेन च विषयतापायथाक्रमं वाच्यवाचकव्यवस्थोपपादकत्वसं
भवात्। न चेश्वरज्ञानादिकमादाय विनिगमनाविरह इति वाच्यं। इच्छात्वस्याविवक्षणेन तस्यापि शक्तित्वस्येष्टता
त्। आधुनिकसंकेतस्येच्छात्वदर्शनेनेच्छाया एव तथात्वसंभवाच्च अत्र प्रांचः बोधति गो मगामइत्यादिष्वसाधुशब्दा
च्छाद्बोधवारणाय साधुत्वज्ञानेशाद्बोधजनकं तद्विषयसाधुत्वमपि निरुक्तशक्तिमत्त्वमेव तथा हि साधुत्वं नेमति

न्या॰को॰ पादकत्वंच्चसाधोरपिप्रतिपादकत्वात्नाप्यनादित्वंहेरयोहेलयइतिवदंतोऽसुराःपराबभूवुरितिवेदेश्रवणेनाना
दिनपालिशब्दस्यसाधुत्वापत्तेः लौकिकगोशब्दस्याकृशिकपोशब्दस्याधुनिकसंकेतितत्वेनाचासाधुतापत्तेः नापिसाधुत्वंजाति
र्व्याकरणाध्येतृपुरुषवेद्याकत्वादिनासांकर्यात् तातापिपुराप जनुकृशब्दत्वंपरोपकारहेतावसाधावतिप्रसंगात् अ
पकारहेतौसंस्कृतेऽप्रसंगाच्च तस्माच्छक्तिमत्वमेवसाधुत्वं एतेवंसत्यपभ्रंशस्यापिसाधुतापत्तिः तस्मान्नियमे
नार्थप्रतीत्याव्यवहाराधीनव्युत्पत्तिसंभवेनतत्रशक्तिसंभवात् नचायमपभ्रंशेनस्मारितात्साधुशब्दादेवार्थप्रती
तिरितिवाच्यं अपभ्रंशानांसाधुशब्दाप्रतिसंधानेपिततोर्थप्रत्ययात् तदर्थकसंस्कृतेनप्रत्ययाच्च नचतत्रशक्तिभ्रमा
द्बोधइतिवाच्यं बाधकंविनाभ्रमत्वासंभवात् अन्यथाऽपभ्रंशेषुशक्तिः साधुशब्दस्यतदारोपइत्येवकिंनस्यात् ताव
चैतस्यसाधुत्वेयज्ञेप्रयोगापत्तिरितिवाच्यं नापभ्रंशितवैनम्लेच्छितवैइत्यनेनयज्ञेनिषेधादेवतदनापत्तेः पुंस्त्व
नेचैतत् अन्यथासाधुभिर्भाषितव्यमितिविधेरेवापभ्रंशस्याप्रयोगसंभवेनापभ्रंशितवैइतिनिषेधस्यव्यर्थ शिव
त्वापत्तेः नचापभ्रंशस्यकोषादावव्युत्पादनाद्भेदमितिवाच्यं कोषादौधर्मविशेषजनकशब्दानामेवव्युत्पादनादि

त्तितदसत्।अपभ्रंशस्यशक्तिमत्त्वांगीकारेअर्थवदधातुरित्यादिसूत्रेणप्रातिपदिकसंज्ञापत्तौतदुत्तरंस्वाद्याप्त्याप्रातिप
दिकादितिसूत्रेणाद्विभक्त्यापत्त्यात्तस्यशक्तिमत्त्वानंगीकारात्।नचैवंतस्यसाधुत्वाभावादेवपदेप्रयोगासंभवेनापभ्रं
शितवैइतिनिषेधवैयर्थ्यापत्तिर्दुर्वारेतिवाच्यं।अपज्ञिपाठेमाषारितिवत्तस्यविधिप्राप्तानुवादत्वेनादोषात्।नचैवमप
भ्रंशात्शाब्दबोधानुपपत्तिस्साधुत्वज्ञानाभावादितिवाच्यं।व्युत्पन्नानांसाधुशब्दस्मरणेनाव्युत्पन्नानांचशक्तिभ्रमेणा
तत्संभवात्।नचगवादिशब्दघटितायाःशक्तेःकथमपभ्रंशेभ्रमसंभवइतिवाच्यं।वक्ष्यमाणरीत्यातत्संभवात्तथाहि
केनचिद्गोशब्देप्रयोक्तव्येप्रमादाद्गावीशब्देप्रयुक्तेव्युत्पन्नस्तेनशब्देनगोशब्दमुन्नीयततोगांप्रतीत्यव्यवहरतेतदान्
समीपस्थाव्युत्पित्सुर्गावीशब्दादेवायंगांप्रतीतवानित्यवगतस्यगावीशब्दमेवगोशक्तत्वेनप्रतीत्यव्युत्पादयती
त्तिपत्तुरेवमपिभ्रमानुपपत्तिस्त्वयाहितत्तत्पदपदार्थघटितेभ्रमेछायागवादिपदवृत्तितयागावीशब्दस्यबोध्य
त्वप्रकारकत्वावच्छिन्नेच्छानशक्तिः।किंतुगोशब्दस्यतत्त्वेनगृहीत्वापामरस्यगावीशब्दात्स्वकापभ्रंशेनसंभवति
विभिन्नानुपूर्वीकत्वरूपविशेषदर्शनसत्वात्साधारणधर्मदर्शनाभावाच्चनचगावीशब्दघटितच्छायामीश्वरी

यत्वभ्रमस्यवशक्तिभ्रमस्तिवाच्यं॰ ईश्वरमजानतामपि शाब्दबोधादिति वैयाकरणादिभिरुक्तं तदसत् मीमांसकनैया
यिकादिसाधारणस्य शक्तित्वस्यैक्याभावेन शक्तित्वेन शक्तिज्ञानस्य हेतुत्वासंभवेनानुभवजनकतावच्छेदकधर्मत्वेन तज्ज्ञा
नस्य हेतुत्वस्य यात्तादृशधर्मवदिति भ्रमस्य संभवात् किंच गौर्गोपदशक्येत्यादिशक्तिप्रकारकं ज्ञानं न हेतुः किंतु शक्तिसं
बंधेन गोपदादिप्रकारकं गोपदवती गौरित्याद्याकारकं लाघवात्॰ एवंच व्याप्तिकरणासंयोगादिसंबंधेन घटादौ रू
पस्येव गवादिपदघटितराकेः प्रसिद्ध्या तेन संबंधेन गव्यादिपदप्रकारको गवी पदवती गौरित्याद्याकारकभ्रमस्य
पपद एवं यद्वा गवादिविशेष्यकं शक्तिसंबंधेन गवादिपदप्रकारकं शक्तिज्ञानं न हेतुस्तथा सति गौरवापत्तेः किंतु ला
घवाद्गोपदादिविशेष्यकशक्तिसंबंधेन गवादिप्रकारकज्ञानमेव हेतुः तथा हि गोपदत्वं नाम गकाराव्यवहितोत्त
रौत्वं तत्राव्यवहितोत्तरत्वांशे संशयात्मकज्ञानवारणाय तदंशे गकाराव्यवहितोत्तरत्वत्वावच्छिन्नाभावाप्रकारकत्वस
तिगकाराव्यवहितोत्तरत्वत्वावच्छिन्नप्रकारकत्वरूपं निश्चयत्वं निवेशनीयं गवादिविशेष्यकपदप्रकारकज्ञान
हेतुतामते॰ गवादिपदविशेष्यकगवादिप्रकारकज्ञानहेतुतामते च गवादिपदत्वरूपधर्मितावच्छेदकांशे संशया

भावेन तदंशे निश्चयत्वानिवेशेन लाघवं । न चैतन्मतेपि गवादिप्रकारांशे निश्चयत्वनिवेशात्साम्यमिति वाच्यं तत्स्थानी
यस्य गवादिविषयकस्वरूपप्रकारांशे निश्चयत्वनिवेशस्य तन्मतेपि सत्वात् । अव्यवहितोत्तरत्वांशे निश्चयत्वनिवेशस्य पुन
रधिकत्वात् । इत्थं च गवादिपदं गवादिपदघटितशक्तिसंबंधेन गवादिमदिति भ्रमस्सूपपन्न एवेति सारं । वस्तुतस्तु
ईश्वरेच्छारूपशक्तेस्तत्वेन न शाब्दबोधोपयोगित्वं ईश्वरमविदुषां शाब्दबोधानापत्तेः किंतु संकेतत्वेनैव एवं चापभ्रंशाद्बुधे
विनैव शाब्दबोधस्वरूपपादकत्वाद्धुनिकसंकेतस्यापि सत्वात् । न चापभ्रंशस्यापि पुरुषीयशाब्दबोधजनकत्वेन तन्मात्रविषयके
श्वरेच्छाविषयत्वस्य तत्र सत्वात्तस्य शक्तिमत्वं दुर्वारं अन्यथा भगवदिच्छायाः तन्मात्रविषयकत्वोच्छेदापत्तेः एवं नादे
शिकगंगादिपदस्यापि पुरुषीयतात्पर्यादिशक्तत्वं दुर्वारमिति चेन्न तत्पदजन्यबोधविषयतावच्छिन्नप्रकारतानिरूपितवि
शेष्यतासंबंधेनेश्वरेच्छावत्वस्येश्वरेच्छानिरूपिततादृशविशेष्यतावत्वस्य वा तत्पदशक्यतारूपत्वात् तस्य संस्कृतनिरूपितत्वे
व प्रवाहादावेव च स्वीकारेणापभ्रंशादेश्शक्तत्वस्य वारयितुं शक्यत्वात् । न च विनिगमकाभावो तत्रापि तत्स्वीकारोस्त्विति वा
च्यं तत्र शक्तिभ्रमादिना लक्षणया वा निर्वाहे पदार्थस्मृत्यनुरोधेन कल्प्यमानसंबंधनाकस्य निरूढत्वात्तस्य संस्कृते

न्या॰कौ॰ रएवस्वीकारात्फलत्वबलेनतत्थैवकल्पनात्अन्यथापभ्रंशस्यसाधुतापत्तौपङ्कजप्रयोगापत्तेः एतेनईश्वरेच्छायाः
कत्वेनसर्वविषयकत्वेनवशक्यार्थत्ववस्यानुपपत्तिरित्यपिसमाहितं।फलत्वबलेननिरुक्तातत्तत्पदशक्यत्वस्यतत्तत्पदा
थेरवांगीकारात्तापत्तेप्रसिद्ध्यादिकंसर्वदेशीयशिष्टपरिगृहीतत्वादिकंचविनिगमकमितिंतदसत्।प्रसिद्धेरनिपातत्वा टि
त्।लाक्षणिकेषुसर्वदेशीयशिष्टपरिगृहीतत्वस्यसत्वाच्चात्तत्तद्देशनिपतसंस्कृतेषुसर्वदेशीशिष्टपरिगृहीत
त्वात्।लाक्षणिकेषुसर्वदेशीयशिष्टपरिगृहीतत्वस्यसत्वाच्चात्तत्तद्देशनिपतसंस्कृतेषुसर्वदेशशिष्टपरिगृहीत
त्वाभावेनशक्तिसिद्ध्यापत्तेश्चेतिवदंति।नव्यास्तु।व्याकरणव्युत्पादितत्वमेवसाधुत्वमितिवदंति।तेषामयमाशयः
यः॰साधुत्वंनशक्तिमत्त्वंलाक्षणिकादेरसाधुतापत्तेः नचतस्यापिकञ्चित्शक्तिसत्वात्साधुत्वसंभवइतिवाच्यं।घटा
दिपदस्यपटाद्यर्थेसाधुतावारणायतत्तदर्थेशक्तस्यतत्तदर्थेसाधुत्वरूपतायाश्चवक्तव्यत्वात्।केवलपोःप्र शिव
कृतिप्रत्ययोःसाधुत्वापत्तेश्च॰प्रकृतिप्रत्ययसमुदायेसमासादौशक्त्यभावेनासाधुत्वापत्तेश्च॰नचतस्यप्रत्येकघटक
शक्तिमादायसाधुत्वमुपपादनीयमितिवाच्यं।तथासतिवाधतिमामागामइत्यादेरपिसाधुत्वापत्तेः एतेनवृत्तिमत्त्वमेव

साधु

साधुत्वमित्यपि परास्तं । तस्माद्व्याकरणव्युत्पाद्यत्वमेव साधुत्वं यः शब्दो यस्मिन्नर्थे व्याकरणव्युत्पादितः स तत्र साधुः

न चैवं गावीशब्दोपि गारणापत्तिः अवितुं शीलमस्येत्यर्थे साधुः स्यादिति वाच्यं दुष्टत्वात् तस्य गवाद्यर्थ एवासाधुत्वात् त

दर्थे तस्य व्याकरणाव्युत्पाद्यत्वा[illegible]त् । चेद्वा आधुनिकसंकेतितडित्थादिशब्दानां विशिष्य व्याकरणेन व्युत्पादनं नास्ति

तेषामपि उणादयो बहुलमित्यादिना व्युत्पादनान्न दोषः एतज्ज्ञानं च न शाब्दबोधे कारणं व्याकरणाव्युत्पाद्यतो

स्महेपि शाब्दबोधात् किं तु व्याकरणाव्युत्पाद्यत्वरूपासाधुत्वनिश्चयः प्रतिबंधकस्तदभावः कारणं अत एव साधुश

ब्देऽसाधुत्वनिश्चये ततो न शाब्दबोधः न चापभ्रंशात् व्युत्पन्नानां कथं शाब्दबोधः अत्र साधुत्वनिश्चयस्य प्रतिबंधकस्य

तेषां सत्त्वादिति वाच्यं । तेषां साधुशब्दानुमानेन साधुशब्दस्मरणेन वा शाब्दबोधात् न चाव्युत्पन्नानां साधुत्वनि

श्चये कथं तस्मात् शाब्दबोधः तेषां साधुशब्दानुमानस्य साधुशब्दस्मरणस्य चाऽसंभवादिति वाच्यं व्युत्पन्नपुरुषीयशा

ब्दबोध एव साधुत्वनिश्चयस्य प्रतिबंधकत्वात् न चैवं व्युत्पन्नानामसाधुशब्दात् सामान्यसामग्रीबलात् शाब्दबोधा

पत्तिर्दुर्वारेति वाच्यं । अव्युत्पन्नपुरुषीयशाब्दबोधे व्युत्पन्नभावस्यापि हेतुतया तादृशसामग्र्याः फलाजननात् । साधु

सा.कौ. त्वनिश्चयाभावप्रयुक्तत्वाभावान्ममपरस्य सहकारित्वोपगमेनोक्तापत्त्यसंभवात्। एतेन व्युत्पन्नानां साधुशब्दानुमानेन
साधुशब्दस्मरणेन वा शाब्दबोधोपपादनं न सम्यक्तत्रानुमानस्य व्याप्तिग्रहविलंबेन स्मरणस्य चोद्बोधकविलंबेना
निपतत्वात्तस्य अनुमानस्मरणं विनापि व्युत्पन्नानां बोधानुभवाच्च। यदुक्तं संस्कृतैरपभ्रंशैर्नबुद्धः किं त्वेतदुक्तं भा २३
षयेति व्युत्पन्नव्यवहाराश्चेति तदसत् फलबलेनानुमानस्मरणस्य वा सामग्र्यां निवेशेन कल्पनात्। उक्तबोधानु
भवे मानाभावाच्च कारणं विनाकोपीनुभवस्य कार्यस्यासिद्धेः। भवदुक्तेसादिव्यवहारोप्यसिद्धः। अस्तु तत्र भवदुक्तसं
स्कृतादेतदुक्तभाषात्वव्याप्यमर्थाववगतः। गवादिशब्दैर्वक्तव्ये गाव्यादिशब्दोनेनोक्त इत्यादिव्यवहारस्यैव सर्वसिद्धत्वा
त्। अत एव वाक्यार्थदीपिकाहरिताप्युक्तं तेनासाधुत्वानुमानेन प्रत्यवायोत्पत्तिहेतवः। तदज्ञानमुपगम्य वशाब्दस्य प्रकाशकाः।
न शिष्टैरनुमन्यन्ते पर्यायास्त्वथ साधवः। न पतन्त्यशिष्टाः स्त्रीशूद्रास्तस्मात्ताल्लृक्रादयो वदेकाः। अस्मान्येतिपदो बालः शि
श्यमाणः प्रभाषते। अव्यक्तं भहिद्दीतं तत्र व्यक्ते भवति निर्णयः। एवं साधौ प्रयोक्तव्ये योपभ्रंशः प्रयुज्यते। तेन साधुव्य शिव
वहितः कश्चिदर्थोभिधीयते इति। अथ यो लक्षणहीनं प्रेनाप्यपभ्रंशस्य लेसाधुशब्दानुमानेन साधुशब्दस्मरणेन वा रौ

शाब्दबोधोपपादनात्तत्संगत्यापत्तेः । न च व्याकरणव्युत्पाद्यत्वं साधुत्वं व्याकरणत्वस्य शब्दव्युत्पादकत्वरूपतया
गोत्माक्षपादिति वाच्यं । पाणिन्यादिसंकेतसंबंधेन व्याकरणपदवत्त्वस्यैव व्याकरणत्वरूपत्वात् न च व्युत्पन्नानां
शास्त्रकारसंकेतितास्तद्धातादिपदादश्वादिषु संकेतितानां घटादिशब्दानां कथं तत्तदर्थप्रत्ययः तेषां तत्तदर्थे ऽसा
धुत्वनिश्चयादिति वाच्यं । तत्प्रतिबध्यतावच्छेदककोटौ तत्तदर्थशक्तिप्रयोजकत्वस्याविशेषात् न चैवमपि तेषां य
ज्ञे प्रयोगो न स्यादसाधुत्वादिति वाच्यं इष्टापत्तेः न च लाक्षणिकानां तत्तदर्थे व्युत्पादनविरहेण तदर्थे तेषामसाधुत्वा
पत्तेरिति वाच्यं । वेदस्थलाक्षणिकानां निरूढलाक्षणिकानां च तत्तदर्थे व्युत्पाद्यत्वस्य सत्त्वात् । आधुनिकलाक्षणिका
नामसाधुत्वे चेष्टापत्तेरिति दिक् । वैयाकरणानां शाब्दबोधे न साधुत्वज्ञानं कारणं न वा ऽसाधुत्वनिश्चयः प्रतिबंधकः न
चैवमसाधुशब्दाद्बाधती स्यादेः शाब्दबोधापत्तिरिति वाच्यं । इष्टत्वात् न चैवं च्युतसंस्कृते दोषत्वानुपपत्तिः तद्बीजस्य
शाब्दबोधासंभवस्य संभवन्मतेः भावादिति वाच्यं । साधुशब्दभ्रमोत्कर्षे ऽसाधुशब्दः किमिति प्रयुक्त इत्यनुसंधानेन मह
दृष्टो दृष्टस्यैव तद्बीजत्वात् । न चैवं साधुत्वस्यैकोपयोगः न ज्ञाने शाब्दबोध हेतुतापास्तदभावनिश्चये वा शाब्दबोध

मा॰कौ॰

प्रतिबंधकतायामव द्विरनंगीकारादितिवाच्यं। एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतिसाध
नैव प्रयुंजीतेत्यादि बोधितपुण्यजनने तेन उपयोगात्। साधुत्वं च व्याकरणव्यंग्यः शब्दनिष्ठः पुण्यजनकतावच्छेद
कोजातिविशेषः न च ककत्वादिना संस्कारेणैवमिति वाच्यं दृष्टकतावीजाभावेन सांकर्यस्यादोषत्वात्। एवं चासा
धुशब्दस्य गावी वाचकत्वादेर्भ्रामापभ्रंशस्य च बोधजनकत्वेन तेषामपि शक्तत्वमेव बोधकत्वं बोधकत्वस्यैव शक्तित्वात्
पुरुषते चेतत् (मी)मांसकनैयायिकादीनां शक्तित्वस्यैक्याभावेन बोधजनकतावच्छेदकधर्मत्वेन ज्ञानस्येहे लत्ववाच्यं।
तथा च बोधजनकत्वज्ञानस्यैव लाघवेन शाब्दबोधहेतुत्वमुचितं किं चेश्वरेच्छारूपसंकेतस्य शक्तित्वमते तस्या अ
स्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकत्वस्यैव अपभ्रंशे एतदर्थबोधक इत्याकारकत्वस्यापि विनिगमना विरहे
णामुकं चेत्तथा बोधजनकत्वप्रकारकेच्छायाः शक्तित्वापेक्षया बोधजनकत्वस्य शक्तित्वे लाघवं स्पष्टमेव। अथ गा शिव
व्यादिनिष्ठकर्मताघटबोधे गवादिपदे तथा ज्ञाते पदसमभिव्याहृतविभक्तिजन्यकर्मत्वाद्युपस्थितेर्हे
तुत्वमतो विनापभ्रंशात्कथं शाब्दबोधः नचनाम्नातिरिक्ते जन्यकर्मत्वाद्युपस्थितिरेवकारणानामत्वं च स्तुवेत

त्वेन हेदृश्यापभ्रंशेपीति वाच्यं। एवं सति निराकांक्षापभ्रंशादपि शाब्दबोधप्रसंगादिति चेन्न गवादिहृन्नित्यपाज्ञात
२ पदसमभिव्याहृतकर्मत्वोपस्थापकपदज्ञानविशिष्टकर्मत्वाद्युपस्थितेरेव शाब्दबोधजनकत्वात् यथाहृशपदज्ञान
जन्यकर्मत्वाद्युपस्थिति सत्त्वे शाब्दबोधस्तत्तज्जन्यता सकर्मगैरावैशिष्ट्यं वाच्यं तेन नातिप्रसंगः। एवं धान
नुगमस्यादोषत्वात्। ओतः। ओदनः पक्वो भुज्यत इत्यादौ जोनामिसीता जनकप्रसक्तेस्तादोषवत्तन्निर्वीहः।
न च बोधकत्वस्य शक्तित्वे गंगादिपदे तीरादिबोधकतापात्तः अपि सत्त्वे नष्टे तथोपपत्तौ लक्षणाद्युच्छेद इ
ति वाच्यं। तत्र गंगादिपदनिष्ठापास्ती रादिबोधकत्वप्रकारकेच्छापा इव मम [redacted] दपदनिष्ठस्य तीरादि [redacted]
[redacted] स्यापि शक्तित्वा [redacted] गंगापदादिनिष्ठतीरादिबोधकत्वस्यापि शक्तित्वाभावात् गंगापदादिनिष्ठतीरा
दिबोधकत्वमेव लक्षणा कोषादिसिद्धसंबंधतापन्नबोधकत्वस्यैव शक्तित्वमिति व्यवस्थापास्तं भवाञ्च
यद्वा शक्तिलक्षणयोरभेद एव परं त्वप्रसिद्धशक्यसंबंधित्वेन गृहीतार्थविषयकबोधजनकत्वं लक्षणा
प्रसिद्धार्थविषयकबोधजनकत्वे तच्छक्तित्वेन व्यवह्रियते प्रसिद्धत्वं च प्रकृष्टतरप्रयोगविषयत्वं तथा

न्या॰ कौ

दिनिष्पामकतया प्रसिद्ध्यादेस्तत्राप्यावश्यकत्वात्। न चापभ्रंशस्यार्थवत्वात्प्रातिपदिकत्वे सुबुत्पत्तौ
व्याकरणात्सुबुत्पाद्यत्वात्साधुत्वप्रसंग इति वाच्यं अनभिधानादेवानभिधानात भाषाशब्देभ्यः सुबुत्पत्तौ भा
षात्वस्यैव भंगापत्तेश्च तस्माद्बोधकत्वस्यैव शक्तित्वं निष्प्रत्यूहमित्याहुस्तदसत्। असाधुशब्दस्य स्वरूपायोग्यतया तस्मा
त् शाब्दबोधस्यानुभवविरुद्धत्वात्। तत्र अन्यथा साधुशब्दस्येव निराकांक्षघटः कर्मत्वमित्यादेरपि शाब्दबोधजनकत्वस्य
स्वीकर्तव्यताकांक्षादिज्ञानस्यापि शाब्दबोधहेतुताविलयापत्तेः साधुत्वं जातिरित्यप्ययुक्तं शब्दानुमानपरिच्छेदे भवानं
दीप्रकाशे चास्माभिस्तत्करद्वापकताव्यवस्थापनेन कत्वादिना संकरस्य दोषत्वात्। बोधकत्वं शक्तिरित्यप्यसमंजसं
सामान्यतो बोधकत्वस्य तत्तद्घटादिपदेऽपि पटादिशक्तत्वापत्त्या तत्तत्पदनिष्ठतत्तदर्थबोधजनकत्वमेव तत्तत्पदे तत्त
दर्थशक्तत्वमित्युभिमिस्येव वाच्यं तथा चाधुनिकसंकेतितचैत्रादिपदे शाब्दबोधात्प्राक्तत्तदर्थबोधजनकत्वाग्रहेणातं विना
पि तत्प्रकारकसंकेतज्ञानमात्रात् शाब्दबोधोदयेन बोधजनकत्वज्ञानस्य हेतुत्वासंभवात्। न चात्र तादृशि मति न्याये शिव
न बोधकत्वज्ञानसंकेतज्ञानयोर्वैकल्पिककारणत्वाभ्युपगमान्न दोष इति वाच्यं संकेतज्ञानस्य हेतुतावश्यकत्वे सर्वत्र त

हेतुतयैव निर्वाहे बोधकत्वज्ञानसंकेतज्ञानयोर्वैकल्पिककारणतांगीकारे गौरवापत्तेः नच संकेतज्ञानेन बोधकत्वमनुमा
प्याधुनिकसंकेतितचैत्रादिपदे बोधकत्वज्ञानादेव शाब्दबोधसंभवेन सर्वत्र बोधकत्वज्ञानस्यैव हेतुत्वोपगमान्न गौरवमिति
वाच्यं। व्याप्त्यादिप्रतिसंधानाभावेपि शाब्दबोधात्। फलोपधायकत्वरूपबोधकत्वज्ञानस्य हेतुत्वे शाब्दबोधात्पूर्वं तदसंभवा
त् गौरवात्। तस्य कादाचित्कत्वेन शक्तेः शब्दार्थयोर्नित्यसंबंधत्वानुपपत्तेश्च। नच स्वरूपयोग्यतारूपबोधकत्वज्ञानस्यैव हे
तुत्वोपगमान्न दोष इति वाच्यं स्वरूपयोग्यताया जनकतावच्छेदकरूपतया बोधकत्वस्य तत्त्वे आत्माश्रयापत्तेः सं
केतस्यैव तत्त्वं वाच्यमिति सर्वत्र संकेतज्ञानस्यैव जनकत्वमावश्यकमिति अस्मदभिमतसिद्धेर्ब्रह्मरोगापि दुर्वारत्वात्। अथ जनकत्वमतिरि
क्तं पदार्थांतरमेव न तु जनकतावच्छेदकरूपं तच्च जनकतावच्छेदकरूपग्रहं विनाप्यनुमानादिना सुग्रहमप्यक्तेः राजनक
ताग्रह एव जनकतावच्छेदकरूपग्रहापेक्षणादिति बोधजनकत्वज्ञानमेव सर्वत्र कारणमस्तु लाघवात् अपभ्रंशादिसा
धारणेप आधुनिकसंकेतितसादिपदे पि संकेतज्ञानाद्बोधकत्वमनुमेयं तत्र वानादिपदे तदर्थबोधकत्वज्ञानात्तत्संकेतवदि
ति चेन्मैवं तद्धीजनकत्वं नानाव्यक्तिगर्भत्वाद्गुरुः संकेतस्तु एकत्वाल्लघुरिति सर्वपदपदार्थयोः संबंधः किंच तद्धीजन

श॰ द्यो॰ कत्वार्थमेवसंबंधापेक्षेतिनतदेवसंबंधः आत्माश्रयापातात्। अतएवप्रत्याय्यप्रसंगपातात्वाचकत्वसंबंधज्ञानं सहकारीतिप्र
त्यायकत्वोपपादकतयावाचकत्वोपयोगः तत्तुकर्महारार्थेपिनचतद्धीजनकत्वेनज्ञातत्वसंबंधइतिनात्माश्रयइति
१३ वाच्यं। तज्ज्ञानस्यस्वरूपतोनुपयोगात् तत्संबंधितावच्छेदकज्ञानस्यैवतथात्वात् प्राकृसत्वानियमाच्च। एतेनशब्दत्वसमाना
धिकरणतत्तज्ज्ञानकतासंबंधेनबोधस्यैवशक्तित्वमितिमतमप्येकस्यैवलघोःसंबंधत्वमितिनवीनवैयाकरणोक्तमपिप
रास्तं। किंचतद्धीजनकत्वज्ञानमात्रस्यहेतुत्वेपदमात्रस्यात्मकाकाशधीजनकमितिज्ञानादाकाशशाब्दबोधप्रसंगः नच
तच्छाब्दबोधजनकत्वज्ञानस्यमतत्वादिपदेपिसत्वेनातिप्रसंगतादवस्थ्यात्। अपिचघटपदात्शक्तिभ्रमेणपटशाब्द
बोधेपटशक्तत्वाभावनिश्चयदशायामपिपटशाब्दबोधजनकत्वज्ञानात्शाब्दधीप्रसंगः। एवंघटपदंपटेआधुनिकसंके
तितंनतुशाक्तमितिज्ञानेपिनशाब्दधीरितिईश्वरसंकेतज्ञानमेवकारणमितिसिद्धं। एवमनभिधानादेवानभिधानमि
त्यपास्तं। तस्यदुर्वचत्वात्। तस्यपूर्वंएवंप्रयोगाभावादेवाप्रयोगइत्यत्रपर्यवसानेनएवंप्रयोगाभावएवकिंबीजमितिप्रश्ने शिव
उत्तराभावाच्च। गत्यंतराभावस्यलएवतदंगीकारात्र तथासकलव्युत्पत्तिनामुच्छेदएवस्यात् किंबहुनाव्याकरणस्यैवनै

रर्थस्य प्रसंगः पूर्वपूर्वप्रयोगेणैवोपपत्तेः भामात्वमंगापत्तिरपि पतिभंगे प्रवृत्तस्यैतस्मादिस्यापमनुसरतीति न किंचिदेत
तत्रत एव अपभ्रंशो पशब्दः स्याच्छास्त्रे शब्दस्तु वाचक इति अमरकोशानुशासनमपि स्वरसत एव संगच्छते बोधकत्वस्य श
क्तित्वेतदसंगतेरिति दिक् ॥ शक्तिग्रहस्य व्यवहारात् ॥ व्याकरणादितश्चेत्तदुक्तं शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्य
वहारतश्च ॥ वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा इति ॥ तत्र व्याकरणात् शक्तिग्रहो यथा कर्त्तरि कृदित्यादिव्या
करणात् कृदादीनां कर्त्रादौ ॥ लः कर्मणि च भावे चाकर्मकेभ्य इति लस्य कर्त्तरि कृदिति सूत्रस्य कर्त्तरि लस्यानुवृत्त्या कर्त्तरि
लकारविधानेनैवाख्यातस्यापि कर्त्तरि शक्तिः स्यात् तथाचाख्यातस्य कृतौ शक्तिरिति नैयायिकसिद्धांतो दत्तजलांजलिः स्यादि
ति चेन्न ॥ असति बाधके एव व्याकरणस्य शक्तिग्राहकत्वोपगमेन कर्त्तरि शक्त्यावन्नेतकृतीनां शक्यतावच्छेदकत्वकल्पने रूपगौ
रवात्मकबाधकसत्त्वेन कृतित्वरूपजातेरवच्छिन्ने शक्तिकल्पने लाघवेनाख्यातस्य कृतावेव शक्तिस्वीकारात् ॥ न चैवमपि कृत्ये लाघ
वेन कृतौ पि कृति शक्यास्यात् ॥ न तु कर्त्तरि शक्य इति वाच्यं ॥ चैत्रः पचतीत्यादौ पाकानुकूलकृतेर्नामार्थत्वेन चैत्रेणाभार्थ्ये भेदेनाव
यासंभवेनाभेदान्वयस्य बाधादसंभवेनानापत्त्या कर्त्तरि शक्तिस्वीकारात् ॥ न च कर्तृकारणयोरिति सूत्रेणानभिहिते कर्त्तरि तृतीया

न्या॰ कौ॰ विधानेन तंडुलं पचति चैत्र इत्यादौ तृतीयापत्त्याख्यातस्य कर्तृत्वैकवशक्तिप्रयुक्तेति वाच्यं। कृत्यनभिधानस्यैव तृतीयानियामकत्वोप
गमे नोक्तापत्त्यभावात्। न चैवं चैत्रेण पच्यते तंडुल इत्यादावपि तृतीयानुपपत्तिस्तत्राप्याख्यातेन कृदनभिधानादिति वाच्यं क
र्माख्यातस्य कर्मत्वाभिधायकत्वेन कृत्यनभिधायकत्वात्। न चैवं चैत्रो ग्राम इत्यादिकं दत्तसूत्रेपि तृतीयापत्तिः कृताक
र्तुरभिधाने न कृत्यनभिधानादिति वाच्यं। विशेषणतया विशेष्यतया वा कृत्यनभिधानस्यैव तृतीयानियामकतया कृता
पत्र ५ विशेष्यतया कृत्यनभिधानेपि विशेषणतया तदभिधानेनोक्तापत्त्यभावात्। एवं विशेषणतया विशेष्यतया वा कर्मत्वानभि
धानं द्वितीयानियामकं। एतेन कर्मानभिधानस्य द्वितीयानियामकत्वे चैत्रेण पच्यते तंडुल इत्यत्र तंडुलपदोत्तरं द्वितीया
पत्तिः कर्माख्यातस्य कर्मत्वाभिधायकतया कर्मानभिधायकत्वात् कर्मत्वानभिधानस्य द्वितीयानियामकत्वे चैत्रेण गतो ग्राम इ
त्यत्र ग्रामपदोत्तरं द्वितीयापत्तिः कृतः कर्माभिधायकत्वेन कर्मत्वानभिधायकत्वादित्याशंका निराकृता कर्माख्यातस्य विशे
ष्यतया कर्मत्वाभिधायकतया कृतश्च विशेषणतया कर्मत्वाभिधायकतयोभयत्रापि द्वितीयाभावोपपत्तेः नन्वे [illegible]
वमपि कृतं पूर्वी कटमित्यत्र कृतः प्रत्ययेन कर्माभिधानात् कटमिति द्वितीयानुपपत्तिः अन्यथा कटः कृतः पूर्व इत्यत्रापि द्वितीयाप

त्तेः पूर्वं कटोऽनेनेति कृतपूर्वी देवदत्तः सपूर्वाच्चेति सूत्रेण सोपपदात् एवं शाब्दात् कर्त्रर्थे इति प्रत्यये कृतपूर्वीति सिद्धं पश्चात्कृतं पू
र्वमनेनेति कृतपूर्वी तत्र कृतमिति भावक्तान्तमविवक्षितकर्मकमेव पूर्वशब्देन समासं समासात्साधकत्वेरितादित्ते जनविचारा कृ
तपूर्वीति शाब्दं साधयन्ति तच्च प्राक्कालिककटरूपकर्तृतिबोधसमर्थो वतिष्ठते पश्चात्तामावक्तान्तकृजर्थे च कटकर्मकत्वाद्व्य
इति शाब्दिकैः कृतं तदसत् कर्मयोगे निष्ठाप्रत्ययस्यानुपपत्तेः कृप्रत्ययस्य भावार्थकत्वे कृञोऽविवक्षितकर्मतया पश्चाद
पि कर्मान्वयानुपपत्तेश्च अन्यथा भावप्रत्ययान्तगम्यर्थे ग्रामकर्मकत्वस्याप्युपसंभवेन गतं गमनं तेन ग्राममिति प्रयो
गापत्तेः अत एव पूर्वं कृतशब्दः कर्मविशेषरूपकटाद्युपस्थितिपद्यमान एवं कर्मसामान्यवाचककृप्रत्ययान्ततयाप्युत्पा
२ दितेः पूर्वपदेन समस्यते पश्चात्कटं कृतवानिति विव~~कटं कृतवानिति विवक्ष कटं कृतवानिति विव~~क्षायां कटं कृतपूर्वी स्यात् । पि द्विती
यां तत्सहकृतोऽर्थोऽन्वयः कृप्रत्ययेन तस्यानभिधानाच्च द्वितीयोपपत्तिरिति न व्यशाब्दिकमतमपि परास्तं तथा सत्युक्तरीत्या
चैत्रेणोपकृते तंदुलं इत्यादावपि द्वितीयापत्तेर्दुर्वारत्वात् तादृशप्रयोगानुरोधेनैव विवक्षायाः सत्वात् दोषइति वाच्यं प्रयो
गानुरोधस्य प्रयोगान्यथानुपपत्तिरूपत्वात् तदन्यथोपपत्तेर्वक्ष्यमाणत्वात् तदन्यथानुपपत्त्यभावात् पदपिकारकरणं

न्या॰कौ॰

प्रत्ययार्थभावनायामेवान्वयः न तु धात्वर्थे गुणानां च परार्थत्वादसंबंधः समत्वात् स्यादिति न्यायात् कृतपूर्वीत्यत्र च भावनात द्वि
तार्थः स्वकृतिरेव तत्सामेव द्वितीयोपात्तकर्मत्वाद्व्यपः कृतिवाचककृतद्धितेन कर्मकारकस्यानुक्तत्वाद्द्वितीयोपपत्तिरिति
मीमांसकैकदेशिकृतदप्यसत् । क्रियाभेदस्यैव कर्मभेदनियामकत्वात् पदभेदेन तदभावात् तेनमित्यत्रापि कृत्प्रत्ययेन तद्धितार्थ
भावनाकर्मणएवाभिधानेन द्वितीयानुपपत्तितादवस्थ्यात् । नहि तद्धितार्थस्य कृदर्थस्य वा कृतिरूपस्य भेदः । तथा सति नेन
कृतमित्यत्र कर्तृत्वाद्यपानुपपत्तेः । किंच तद्धितार्थभावनायां कारकान्वयस्वीकारे कृतपूर्वीत्यादाविव पूर्वीत्यत्रापि कर्मान्व
यप्रसंगः पूर्वीदिनिरितिसूत्रे नैयायिककर्तृपदेवरने विधानात् । तस्मात् कृतपूर्वी कटमित्यत्र द्वितीयानुपपत्तिर्दुरुद्धरैव । तेन चेद
न्त्रमाचीनानुयायिनो नैयायिकाः कृतपूर्वी कटमित्यत्र तत्प्रत्ययेन कर्मणोऽभिधानेपि कटे कर्मतादात्म्येन प्रतिपादयि
तुं शक्यते कृतकर्मवद्धार्थयोस्तादात्म्येनान्वयेतं त्रस्य समानविभक्तिकत्वस्याभावात् तस्य विशेषणस्य कृतशब्दस्य कृत्यनु
वेशानुपपत्तेश्च विशेषणानां वृत्तिनैस्त्यनुशासनात् । अतः कटत्वावच्छेदेन कृतताद्रूप्यान्वयबोधस्य कर्मार्थकेनापि कृ शिव
तपदेनानुपपादनात् कटपदसमभिव्याहारेणाद्वितीयोत्पत्तौ बाधकाभावः । तथा च कृतपूर्वी कटमित्यत्रान्वय इतिरूपतद्धि

तार्थः तत्र कृञ्धात्वर्थस्य प्रयत्नस्यान्वयः तत्र च क्तप्रत्ययवाच्यं कर्मद्वितीयावाच्यं कर्मत्वं विशेषणतयान्वेति कृत्यनुप्रविष्टस्य कृ
तोक्षात्वथि विशेषणस्वार्थबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् अत एव मा ग्रोदको ग्राम इत्यत्र दुक्तं ता दात्म्येन कर्त्तरि कर्त्तृत्वं प्राप्नो
त्याच बहुव्रीहि-वरमावयवल्लक्षणे कर्मणाप्तत्वेतीसुदककते कमामिन्याम इत्यत्र पवीधः श्यं च कृतपूर्वी कटमित्यत्र प्राक्काल
ककटकर्मककृतविषयक कृत्यस्याभ्रमोदेवदत्त इति शाब्दबोधस्यापत्तेः न व्याप्तत्वा कृतपूर्वी कटमित्यत्र कृत्यस्य प्रत्ययः कर्त्तृ
इति रूपतद्धितस्यैवार्थः कृतपदं च तद्धितार्थेशक्तिमित्याह केनत्योपपुरुषं न न कृतिकर्मार्थिकं एवं च कृप्रत्ययेन कर्मानभिधा
नान्न द्वितीयानुपपत्तिः तद्धितार्थ कृते कृधात्वर्थकृतेश्चोकारी साभेदाभावेन तद्धितार्थे कृतौ कटकर्मकत्वान्वये पि
नकारकाणां धात्वर्थान्वयनियमभंगः क्तांत कृधातोस्तास्यर्थं इत्याह कृतपा तद्धितार्थकृतेर्धात्वर्थयोज्यापस्थितिवि
या २ षयत्वरूपधात्वर्थत्वस्याप्यनपायाद् इति प्राहुः वस्तुतस्तु कस्यानभिधानपदार्थ ... जो ... कृतपूर्वी मा दौ न द्वितीया
यानुपपत्तिशंकापि तथा हि । यथा कृतस्यैककर्मत्वानभिधानस्य द्वितीयानियामकत्वे ओदनः पक्ता भुज्यते इत्यादौ कृतौ
कर्मत्वानभिधानात् द्वितीयापत्तिः न च कृदाख्यातद्धितसमासान्यतमाभिहितत्वसामान्याभावस्य द्वितीयानियामक

 त्यान्न दोषः तत्र कृता कर्मत्वानभिधानेप्याख्यातेन तदभिधानादिति वाच्यं तथा सति भोक्तव्यमोदनं पचतीत्यादौ द्विती
यानुपपत्तेः कृता कर्मत्वाभिधानात् न च तत्र कृता भोजनकर्मत्वाभिधानेपि पाककर्मत्वानभिधानान्न दोष इति वाच्यं अत्रौद
नः पक्व इत्यादावपि तदनभिधानात् द्वितीयापत्तेरपरिहारात् न च प्रधानक्रियानिरूपितकर्मत्वानभिधानमेव द्विती
यानियामकमिति वाच्यं तथापि चैत्रेणादृश्यमानं घटं चैत्रः पश्यतीत्यादौ द्वितीयानुपपत्तेः ज्ञानभेदेन विषय
ताभेदे मानाभावेन चैत्रदर्शनमैत्रदर्शनोभयनिरूपितविषयत्वरूपस्य कृताभिधानात् तस्मात्प्रधानीभूतकृदाख्या
ताद्यन्यतमेनानभिधानमेवानभिधानपदार्थ इति वक्तव्यं अत्र यथावा तत्तत्प्रातिपदिकार्थविशेषणतामात्रेण कर्मत्वाद्यवि
वक्षायामेव तदनभिधानपदार्थः तत्तत्प्रातिपदिकार्थविशेष्यतया कर्मत्वादिविवक्षायां द्वितीयादेः साधुत्वमिति पर्यव
सितं इयं च प्रधानीभूततद्धितेन कर्मत्वानभिधानात् कटविशेष्यकेन कर्मत्वस्य विवक्षितत्वाच्च न द्वितीयानुपपत्तिशंकालेशो
पि कृद्भेदेनान्वयबोधे षष्ठीमिति न्याये नैकस्यैव कर्मत्वस्य बोधनात् न कृता द्वितीयान्तरस्यैव षष्ठीनिममसापेकृताच्च न सविशे शिव
षणा कृतशब्दस्य तत्रानुप्रवेशानुपपत्तिरपि प्रतिसारं एतेन कर्तृकर्मणोः कृतीति सूत्रे कृद्ग्रहणेन प्राप्यते कृतपूर्वी कटमि

सादावभिहितेपि कर्मणि तद्बोधिका विभक्तिर्भवतीति तेन न द्वितीयानुपपत्तिः तथाहि उक्तज्ञापनानंगीकारे सूत्रे कृद्ग्रह
णीयर्थे तद्धिततिङादियोगे षष्ठीव्यावृत्त्यर्थं न लोकाव्ययेति सूत्रे लादेशरूपतिङादियोगे षष्ठीनिषेधो न परिशेषादेव
कृद्योगे षष्ठीविधिप्राप्तेनापि कृत्तद्वीकरमित्यादौ तद्धितयोगे षष्ठीव्यावृत्त्यर्थं कृद्योगषष्ठ्या अप्यनभिहिताधिकारी
यत्वेन तत्र कर्मणः क्तप्रत्ययेनाभिहिततया षष्ठ्या अप्रसक्तत्वेन तद्व्यावृत्त्यर्थं कृद्ग्रहणासंभवात् उक्तज्ञापनांगीकारे तु
कृताकर्माभिधानेपि तद्धितयोगे न षष्ठ्याः प्रसक्त्या तद्व्यावृत्त्यर्थं कृद्ग्रहणसार्थक्यमिति केषांचित्प्रलपितमपास्तं उ
क्तरीत्या ज्ञापनं विनैव द्वितीयोपपत्तौ कृद्ग्रहणस्य ज्ञापकताकल्पकत्वे मानाभावात् उपदर्शितरीत्या कर्मणोनभिधानमु
क्त्वेनानभिहिताधिकारीयषष्ठ्याः प्रसक्त्या तद्वारणाय कृद्ग्रहणस्यावश्यकत्वेन यावत्पर्य्याभावेन ज्ञापकतासंभवाद्व्यर्थं
सज्ज्ञापयतीति न्यायेन स्वार्थस्यैव ज्ञापकतया प्रकृते कृद्ग्रहणस्योक्तरीत्या सार्थक्यादिति प्रसंगागतविचारबाहुल्येनात्र
थाख्यातस्य कृतो शक्तिस्वीकारे संख्यावाचकत्वमफलं चैत्रः पचतीत्यादौ संख्याबोधस्य सुप एव संभवात् तत्कृते शक्तौ तु प
चतीत्यादौ संख्याबोधानुरोधेन तत्सफलमिति चेन्न लकाराप्राकट्ये बोधके पचतीत्यादौ संख्याबोधानुरोधेन कृतिश

त्वावपितत्वाफल्यात् । न च संख्याविशिष्टवैतर्थ्यैवलक्षणगत्विति वाच्यं विशिष्टलक्षणाप्रतिसंधानेऽपि नापिता
दृशाब्दबोधात् । न चैकतिशक्तौ कृतिरिवचतीति वाक्यप्रयोगापत्तिः कृतावभेदेन पाकानुकूलकृतिप्रकारकशा
ब्दस्य तद्वाक्यजन्यस्य संभवादिति वाच्यं । आख्यातार्थकृतेर्भेदेनान्वयबोधस्य साकांक्षत्वोपगमात् । एवं च चैत्रः पच
तीत्यादौ पाकानुकूलकृतिमांश्चैत्र इत्याद्याकारकः प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः रथो गच्छतीत्यादौ गमना
श्रयत्वमात्रप्रतीत्या आश्रयत्वे घटो नश्यतीत्यादौ प्रतियोगित्वप्रतीत्या तत्राख्यातस्य निरूढलक्षणामनोभवत्र प्रयोगाद्दे
परीत्यमेव किं न स्यादिति वाच्यं । तथा सति चैत्रो जानातीतिवद्धटो जानातीति प्रयोगवारणाय रथो गच्छतीत्यादिव[illegible]महा
कालो गच्छतीत्यादिप्रयोगवारणाय तत्तत्संबंधावच्छिन्नाश्रयतात्वेन कृतितदन्यवस्तुमात्रवृत्तिप्रतियोगित्वे च शक्तिक
ल्पने गौरवापत्त्या कृतिशक्तिराश्रयत्वादौ लक्षणोचितैव सम्यक्त्वात् । न च विकृत्यादिफलानुकूलव्यापारमात्रस्य धा
त्वर्थतया कृतेरपि तदेकतत्त्वेन कथमाख्यातार्थत्वमनन्यलभ्यस्यैव शक्यार्थत्वादिति वाच्यं । कृतित्वेनानन्यलभ्यतया शिव
भावात् विक्लित्त्यनुकूलव्यापारानुकूलकृतेरनन्यलभ्यत्वात् रूपादिपरावृत्तिफलकतेजःसंयोगादेरेव पच्धा

र्थं तथा कृतेर्धात्वर्थानंतर्गतत्वात् ॥ अत एव स्वतंत्राः परमाणवः स्पंदंते इति प्रयोगः । पचतु । तथा सति । तेजःसंयो
गानुकूलकृत्यभाववति प्रस्तावरणानुकूलकृतिमति पचतीति प्रयोगानापत्तिरिति तदसत् तदानीं प्रस्तावयती
त्येव प्रयोगेण पचतीति प्रयोगाभावे इष्टापत्तेः प्रस्तावरणानंतरं स्मादिपराहत्यर्थमंगारेषु पुनःस्थापनेन प्रस्ता
वरणानुकूलकृतेरपि स्मादिपराहतिफलकतेजःसंयोगानुकूलकृतित्वाभ्युपगमेन पचतीति प्रयोगोपपत्तेश्च
पचधातोः प्रस्तावरणोत्तरकृत्यभावे तदानीं पचतीति प्रयोगनिर्वाहाच्च ॥ वैयाकरणास्तु आख्यातार्थ आश्रयः आ
श्रयत्वं चाखंडोपाधिरूपं शक्यतावच्छेदकं न चाश्रयस्य चैत्रादिपदेनैवोक्ततया कथं तत्राख्यातशक्तिरिति वाच्यं
आश्रयत्वेन तदलाभात् एवं च चैत्रः पचतीत्यादौ एककर्तृचैत्राभिन्नाश्रयिका पचिक्रिया इत्याद्याकारकः शाब्दबोधः
आख्यातस्थले सर्वत्र क्रियाविशेष्यकशाब्दबोधस्यैवाभ्युपगमात् तथैवानुभवात् अत एव मृगो धावतीत्यादौ मृ ग
गाभिन्नो कोप्याश्रयिका धावनक्रियेत्याकारकः क्रियामुख्यविशेष्यकबोधः । साधु । पश्य मृगो धावतीत्यादौ मृगक
र्तृकधावनक्रियाया एव दृशिक्रियायां कर्मतासंबंधेनान्वयः एवमेव वाक्यार्थकर्मतोपपद्यते । मृगो धावतीत्यादौ

धावनानुकूलकृतिमान् मृगः इत्याकारको नैयायिकसम्मतः प्रथमान्तार्थमुख्यविशेष्यको बोधस्तेन साधुः पश्य मृगो धाव
तीत्यादौ वाक्यार्थकर्मतानुपपत्तेः। तथा हि पश्य मृगो धावतीत्यादौ धावनानुकूलकृतिविशिष्टमृगस्य दृशिक्रियायां क
र्मत्वापत्तौ द्वितीयापत्तिः। न चैवमप्रथमासामानाधिकरण्यात् तत्र न प्रसंगः तथो च धावन्तं मृगं पश्येति वाक्यप्रयोगः स्यात्
एवमपि द्वितीयाया दुर्वारत्वेन पश्य मृगो धावतीति वाक्यासंभवापत्तिः न च पश्येत्यत्र तमिति कर्मणोऽध्याहारः एवं वाक्यभे
दप्रसंगात्। उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वादध्याहारेऽनन्वयापत्तेरित्या
हुः। अत्रेदं प्रतिभाति पश्य मृगो धावतीत्यादौ वाक्यार्थभूतस्य धावनानुकूलकृतिविशिष्टमृगस्य कर्मतासंबन्धेनान्वयः
न चैवं मृगपदोत्तरं द्वितीयापत्तिरिति वाच्यम्। अत्र तु वाक्यार्थस्य कर्मत्वेन मृगपदोत्तरं द्वितीयापादनासंभवात्। यत्र तु केवलमृ
गपदार्थस्य कर्मत्वे तात्पर्यं तत्र मृगपदोत्तरं द्वितीयायाः साधुत्वात्। न च तथापि धावनानुकूलकृतिविशिष्टस्य मृगस्य नामा
र्थस्य धात्वर्थे दर्शने कथं भेदेनान्वयः। अत्र यथा तण्डुलः पचन्तीत्यादौ तण्डुलादेरपि कर्मतासंबन्धेन पाकेऽन्वयापत्तेरिति वा शिव
च्यं केवलनामार्थस्य धात्वर्थे भेदेनान्वयानङ्गीकारात्। वाक्यार्थस्य धात्वर्थे भेदेनान्वयाङ्गीकारे क्षतिविरहात्। अत एवोक्तं

मम मैतन्माहात्म्यं तथा चोत्पत्तय: भुमा: पराक्रमं च पुंस्त्वे पुं जायते निर्भय: पुमानित्यत्र प्रथमांतपदोपस्थापितानां भुमत्व
विशिष्टोत्पत्तीनां भेदेनश्रवरोऽन्वय: संगच्छते।एवं च तंडुल: पचतीत्यादौ तंडुलपदार्थस्य तंडुलपदरूपनामार्थत्वेन धात्वर्थेन
सह तस्य न तस्माकांक्षादन्वयबोध:। भुक्तं तंडुल: पचतीत्यादौ च भुक्ताभिन्नं तंडुलरूपवाच्यार्थस्य नामार्थत्वाभावेनान्वयबोधो निरा
बाध एवेति। न च तंडुल: पचतीत्यादौ तंडुलस्य कर्मतासंबंधेन पाकादावन्वयबोधवारणाय विशेष्यतासंबंधेन तंडुलपदज
न्यतंडुलप्रकारकशाब्दबोधं प्रति तंडुलपदोत्तरविभक्तिजन्योपस्थिते: कारणत्वकल्पनात्तत्कृप्ते तां विना भुक्तं तंडुल: पचती
त्यादौ तंडुलपदजन्यान्वयबोध:। न च भुक्तं तंडुलत्वरूपेण तंडुलान्वयबोध एव तादृशोपस्थिते: कारणत्वमिति वाच्यं। भुक्त
स्तंडुल: कर्मत्वमित्यादौ विभक्तिजन्योपस्थितिं विनापि कर्मत्वे भुक्ताभिन्नतंडुलत्वरूपेण तंडुलान्वयबोधापत्ते:। भुक्तं तंडुल
त्वप्रकारकं तंडुलबोध एव विभक्तिजन्योपस्थितेः कारणत्वकल्पनादिति विशेष्यतासंबंधेन तंडुलपदजन्यतंडुल
प्रकारकशाब्दबोधे विभक्तिजन्योपस्थिति: प्रथमांतभुक्तादिपदसमभिव्याहृतप्रथमांततंडुलपदोत्तरपच्यादिधातु
जन्योपस्थितेस्समस्तरस्य कारणत्वकल्पनात्तर्के चिनुप श्यम गोधावत्ीत्यादिवाक्योत्तरं कर्मत्वोपस्थापकमिति पदमे

व्या॰को॰ धाहृतत्समर्वेत्रेवास्वार्थकर्मस्थलेऽन्वयबोधः निपातातिरिक्तनामार्थयोरेवान्वयबोधस्याव्युत्पन्नत्वेन निपातीभूतेतिप
दोपस्थापितकर्मत्वे मगोधावतीत्याद्यर्थस्याभावनकर्मगादेरन्वयबोधे बाधकाभावात् एवं निपातातिरिक्तनामार्थस्येव
धात्वर्थे साक्षादन्वयबोधस्याव्युत्पन्नतया इतिपदोपस्थापितकर्मत्वस्य धात्वर्थदर्शनादौ साक्षादन्वयबोधस्यापि निराबाध
ताः नञ्घटो नत्रं इइवेत्यादौ नञ्पदे वा पदाद्युपस्थापितार्थे घटपदेनदूपदार्थयोर्भेदेनान्वयबोधदर्शनेन नामार्थयोर
भेदेनान्वयाबोधव्युत्पत्तौ नाम्नि निपातातिरिक्तत्वविशेषणस्यावश्यकत्वेपि नामार्थधात्वर्थयोर्भेदेनान्वयाबोधव्यु
त्पत्तौ नाम्नि तादृशविशेषणं किमर्थमिति वाच्यं नातिरात्रे षोडशिनं गृह्णातीत्यादौ निपातीभूतनञर्थेन सहधात्वर्थ
न्वयबोधस्य सर्वसंमततया तेन तत्रापि तद्विशेषणस्यावश्यकत्वात् अतएवाव्ययोत्तरं कर्मत्वाद्युपस्थापिकाप्रथमान्यविभक्तिः प्रा
चो न स्वीकुर्वन्ति धात्वर्थे तेषां कर्मत्वादिसंबंधेनैवान्वयबोधोपपत्तेः न चैवं पश्य चैत्रः पचतीत्यादौ वा स्वार्थकर्मस्थले व्याहृ
तेतिपदोपस्थापितकर्मताया माख्यातार्थविशिष्टचैत्रादेर्विधेयत्वेनान्वयबोधे कर्मतादौ नामार्थस्योद्देश्यतयैवान्वय इति शिव
घटमानयेत्यादिस्थलेऽक्लृप्तव्युत्पत्तिभंगप्रसंग इति वाच्यं इतिपदसमभिव्याहारे तादृशव्युत्पत्तिसंकोचस्वीकारादित्याहुः अ

मेतुच्च व्याहतेतिपदेनैवतादृशवाक्यार्थोपस्थितिस्तादृशवाक्यंचतात्पर्यग्राहकं इतिपदोत्तरद्वितीयायाभ्रकैर्मत्वमर्थस्ता
वत्तैवविभक्त्यर्थद्वाराधात्वर्थनामार्थान्वयबोधसंभवादिग्राहुस्तदुभयमप्यसत् वाक्यार्थकर्मस्थलेइतिपदमध्याहृत्या
न्वयबोधस्वीकारेतंदुलःपचतीत्यादावपि इतिपदमध्याहृत्यान्वयबोधसंभवेतंदुलःपचतिमुक्तेस्तंदुलःपचतीत्या
दौमवंत्रनामार्थधात्वर्थयोःसाक्षादन्वयबोधस्यैवस्वीकर्तुमुचितत्वात् तस्मात्केवलनामार्थस्यभेदेनधात्वर्थेन्वयस्या
व्युत्पन्नत्वापिवाक्यार्थस्यापिनामार्थतयातस्यधात्वर्थेभेदेनान्वयासंभवाद्दुक्करीतिनेसम्यगितितदसत्विशिष्टस्यानतिरि
क्तत्वेपिविशिष्टकेवलप्रकारतयोर्भेदात् ।यद्वादृशधातोरेवधावनकर्तृमृगकर्मकदर्शनेलक्षणा ।निरूक्तवाक्यंतात्पर्य
ग्राहकमनवनिरूक्तदर्शनेदृशधातोर्वालक्षणा पदांतरस्यवेत्यत्र किंनियामकमितिवाच्यंदृशिधातोर्निरुक्तदर्शनेल
क्षणायांतादात्म्यस्यशक्यसंबंधस्यलघुत्वात्पदांतरस्यलक्षणायांशक्यसंबंधस्यगुरुत्वात् ।अथवादृशधातोर्मृगकर्तृ
कोत्कटधावनकर्मकदर्शनेलक्षणा घटोधावतीतिवाक्यंतात्पर्यग्राहकमितिपुन्नतेचैतत्तत्रयथाजानामिमीता
जनकप्रसक्तेत्यादौवैयाकरणानामप्यनिर्वाहात् यत्तु पचतीतिकर्तृपुरुषाइत्यादिप्रयोगस्यसर्वसिद्धत्वात्तत्राचा

मा॰कौ॰ पंकल्पादिजाइतिवत्पवंतिकल्पाःपुरुषाइतिप्रयोगप्रसंगः प्रकृत्यर्थस्येषदपरिसमाप्तप्रकारकत्वेलिंगसंख्यान्वययोग्य
तयाति ङपात्तायाइव पुंवुपात्तायाअपिबहुत्वसंख्यायाःस्तु बुपात्तलिंगस्यचतत्रान्वयसंभवादितिप्रथमांतविशेष्यकबो
त३ धोपगमेननप्रसंजसः क्रियाविशेष्यकबोधोपगमेतुस्यालिंगसंख्यान्वयायोग्यत्वान्नदोषइतितत्रस्यात्पंकल्पाख्यातार्थे
तावादिनोदोषभावनात्तुधात्वर्थात्तेवति ङपात्तापिनसंख्यान्वययोग्येतिसाधुत्वापत्तिप्रकृवुचनस्येष्याप्यत्वात्।पत्रमा
वप्रधानमाख्यातमितिनिरुक्तेर्भावशब्दार्थक्रियाप्राधान्येनाख्यातद्विशेष्यकबोधएवोपपत्तेनतुप्रथमांतार्थविशेष्य ३५
कः उक्तनिरुक्तविरोधादितितदपिनभावपदस्यभावपत्तीतिव्युत्पत्त्याकृतिरूपभावनापरतयोक्तनिरुक्तेनाख्याता
र्थेषुसंख्यावर्तमानत्वादिकेषुभावनारूपाख्यातार्थस्यैवधात्वर्थप्रतिप्राधान्यप्रतिपादनात्।सत्वप्रधानानिनामा
नीत्युत्तराखावाक्यगतप्रधानशब्दस्यवाचकपरतयाभावप्रधानमाख्यातमितिनिरुक्तस्यकृतिवाचकमाख्यातमित्यर्थप्र
तिपादकतयाविरोधास्पर्शात्केचित्तुभावप्रधानमाख्यातमितिनिरुक्तेर्नाख्यातार्थस्यधात्वर्थरूपभावविशेष्यत्वं शिव
बोध्यतेसत्वप्रधानानिनामानि इतिनिरुक्तेनचनामार्थस्यलिंगसंख्यारूपसत्वविशेष्यत्वंबोध्यतइत्याहुःतन्मा

स्थ्यमानतार्थमुख्यविशेष्यकबोधांगीकारेनकोपिदोषः प्रस्तुतवैयाकरणाभिमतक्रियामुख्यविशेष्यकबोधस्यैवा
समंजसत्वाहि। क्रियाविशेष्यकबोधोपगमे चैत्रः पचतीत्यादौ चैत्रभावनयोस्स्वजनसिद्ध्योद्देश्यविधेयभावस्यभं
गापत्तिः एवं चैत्रः पाकभावनावानत्र वेति संशयानुसादस्यानिर्वाहः एवं प्रकृतिप्रत्ययोः सहार्थं बूतस्तयोः प्रत्ययार्थस्य प्रा
धान्यमितुत्सर्गलभ्यस्य प्रत्ययार्थमहत्त्वस्यार्थविशेषणात्वस्य भंगापत्तिः तस्याहि गतौ प्रत्ययार्थप्रकृत्यर्थो विशेषणाभि
त्यस्योत्सर्गस्याप्यनुग्रहस्यैव साध्यतयातत्परित्यागानौचित्यात्। किंच क्रियाविशेष्यकबोधोपगमे कर्तृकर्मलकार
योर्बोधवैलक्षण्यानुपपत्तिः उभयत्रैव क्रियाया विशेष्यत्वात्तायदिष कर्तृलकारे व्यापारविशेष्यकः कर्मल
कारे च फलविशेष्यको बोधः प्रकृत्तं दुलक्ष्यसाधनुरोधेन विशेषणाविशेष्यभावविपर्यासस्यावश्यकत्वात् फला
नुकूलव्यापारस्य क्रियात्वेन फलस्यापि क्रियात्वात् क्रियाविशे~~ष्यता विशेष्यभावविपर्यासस्यावश्यकत्वात्~~ष्यक
बोधनियमोपीति विभाव्यतेतथापि क्रियाविशेष्यकबोधांगीकारे क्रियाया माख्यातार्थाश्रयस्याधेयतासंबंधेनैवान्वयो
वाच्यस्तत्र च न संभवति चैत्रोन पचतीत्यादावन्वयापत्तेः आधेयतासंबंधस्य वृत्त्यनियामकत्वात् भावप्रतियोगितावच्छेद

कर्तृत्वासंभवेन तत्संबंधावच्छिन्नप्रतियोगिताकाभावबोधासंभवात्। अपि च चैत्रः पचतीत्यादौ पाकत्वावच्छेदेन चैत्राश्रयकत्व
स्य बाधेन पाकत्वसामानाधिकरण्येनैव तद्द्वयोर्वाच्यस्तथा च चैत्रादौ पक्वस्यापि चैत्रेण पचतीत्यादेः प्रयोगत्वप्रसंगः। पा
कत्वसामानाधिकरण्येन चैत्राश्रयकत्वाभावसत्वात्। न च नञ्समभिव्याहाराभावे पाकत्वसामानाधिकरण्येन बो
धोभ्युपेयते तत्समभिव्याहारे तु पाकत्वावच्छेदेन बोधाभ्युपगमान्नोक्तदोष इति वाच्यं प्रतियोग्यभावान्वयस्य तुल्ययोग
क्षेमतापापत्ववस्थापनेन नञ्सत्वासत्वयोः प्रकारभेदाश्रयणासंभवात्। एतेन नञ्समभिव्याहारे चैत्राश्रयकः पाकाभा
वः चैत्राश्रयकपाकाभाव इति बोधोपगमोपि निरस्तः क्रियामुख्यविशेष्यकबोधनियमभंगापत्तेश्च। अंशे अधिकरणा
कांक्षापत्तेश्च। अथ भवन्मतेपि भूतले घट इत्यादौ भूतलत्वनिरूपिताभाव इति बोधाङ्गीकारात् प्रतियोग्यभावान्वयो न तुल्ययोग
क्षेमत्वं जातौ न सत्तेत्यादौ सत्ताया भेदकार्थसमवायेन जातिनिरूपिततया जातिसमवेतत्वस्य चाप्रसिद्ध्या प्रथमान्तमुख्य
विशेष्यकबोधासंभवादिति चेत्तत्र न समवेतत्वीयस्वरूपसंबंधरूपव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकजातिनिरूपितत्वा राम
भावबोधोपगमेनास्मन्मतेऽदोषात्। मैथिलास्तु क्रियाप्राधान्यमते प्रयाति पुरुषस्तस्य चरणावभिवादयेत्यादौ अन्वयबो

धानुपपत्तेः। सर्वनाम्नां प्रधानपरामर्शकत्वमात्रच्छेदेन प्रधानीभूतप्रथमान्तादिक्रियापरामर्शिता। अत्र अस्मन्मते
तु प्रधानीभूतपुरुषादिपरामर्शे नानुपपत्त्यभावादित्याहुः। नव्यास्तु वैयाकरणैरपि अत्र अनभिहिते कर्तरि तृतीयेत्य
नुशासनस्य कर्तृविशेष्यकतया प्रातिपदिकार्थे विवक्षिते सति प्रातिपदिकान्तं तृतीये पि वार्थो वाच्यः। अत्र यथा
चैत्रेण पच्यते इत्यादौ कर्तुरनभिधानं स्यादेव चत्वापत्तेः तथाहि न तावद् वाचकत्वमनभिधानं लकारसामान्यस्यैव कर्तृवाच
कत्वेन कर्मलकारस्य तद्वाचकत्वासम्भवात् कर्तरि पक्षेऽसाधुत्वादेव चैत्रः पच्यत इत्यादिप्रयोगवारणायोपगमादनुक्तत्व
स्य कर्तृत्वावाचकतावच्छेदके गौरवेणानिवेशात्। नाप्यबोधकत्वं चैत्रेण पच्यत इति वाक्यस्य कर्तृविषयकत्वजन्यबो
धजनकत्वे तद्बुद्धेः सकलपदानामेव जनकत्वेन लकारस्यापि तद्बोधकत्वानपायात्। एवञ्च क्रियाविशेष्यकबोधो
पगमेन चैत्रः पचतीत्यादौ चैत्रस्य कर्तृविशेष्यतयाऽविवक्षिततया चैत्रपदोत्तरं तृतीयापत्तेः। प्रथमानुपपत्तिश्च प्रथमान्त
विशेष्यकबोधोपगमे चैत्रस्य कर्तृविशेष्यतया विवक्षितेन ~~चैत्रपदोत्तरं तृतीयापत्तेः प्रथमानुपपत्तिश्च प्रथ~~
~~मान्तविशेष्यकबोधोपगमे~~ तृतीयानापत्तिरिति सर्वोचितो न तु क्रियाविशेष्यकबोध इति प्राहुः। एतेन चैत्रः पच

न्या० कौ० तीत्यादौ चैत्रनिष्ठपाकभावनेत्याद्याकारको भावनामुख्यविशेष्यको बोधः भावनाया आख्यातार्थत्वादिति मीमां
सकमतमपि परास्तं तन्मते पूर्वोक्तदोषावारणात् तत्र प्रथमान्तार्थस्यैव विशेष्यत्वं। वस्तुतस्तु नैयायिकमते सर्वत्र
प्रथमान्तार्थविशेष्यक एव बोध इति न नियमः कैरप्यभ्युपेतः तथा च लिखनाद निर्वाहो ह्य। किंतु यथासंभवं त
त्तद्विशेष्यकः अत एव पचतीत्यादौ प्रथमान्तपदासमभिव्याहारे भावनाविशेष्यको भावाख्यातस्थले क्रियाविशे
ष्यक एव बोधो नैयायिकानां लीलावतीप्रकाशविवरणे लिखितं दीधितिकृता पद्यप्यतत्रभवनैमैत्रेणौवपक्ष्यते
त्रेमनमित्यादिना नेमनकर्मके एनन्तृग्लाधिकरणाकपाकत्वावच्छेदेन मैत्रान्यकर्तृकत्वाभाव एवकारेण बोध
यितुमशक्यः। शाब्दत्वाच्छ्रूपेण पाकस्यानुपस्थितेरिति शंका च संगच्छते एवं न कलंजं भक्षयेदित्यादौ कलंजभ
क्षणं बलवदनिष्टाननुबंधित्वाभाववदित्यादिबोधांगीकरणं मासि कृतां संगच्छते। परं तु न कलंजमित्यादौ बलवदनि
ष्टाननुबंधित्वाभाववत्कलंजभक्षणमुक्तं लक्षणत्रिमानिति प्रथमान्तार्थविशेष्यकबोध लिखनं तदसंगतं तत्र प्रथ शिव
मान्तपदस्यैवाभावात् अध्याहारे प्रमाणाभावात् किंच न कलंजमित्यादिवाक्यस्य कलंजभक्षणे बलवदनिष्टानुब

धित्वबोधद्वारा निवर्त्तकत्वस्य सर्वसिद्धस्यानुपपत्तिः भवन्मते कलंजभक्षणाकर्त्तुः पुनर्निवर्त्तकत्वोपपत्तावपि कदा
पि येन कलंजभक्षणं न कृतं तं प्रति निवर्त्तकत्वासंभवात् तस्य कलंजभक्षणानुकूलकृतेरप्रसिद्धेः अत एव बोध आकां
शानपस्यातिरित्यादिप्रयोगाणामप्युपपत्तिः अंधहन्तित्वाकाशविषयकत्वोभयाभावप्रकारकदर्शनविशेष्यकबोध
संभवात् आकाशविषयकदर्शनाभाववानंध इति प्रथमांतार्थविशेष्यकबोधस्याप्रसिद्ध्याऽसंभवात् इत्थं च चैत्रः
पचतीत्यादौ प्रथमांतार्थविशेष्यकबोधेपि रूपम्लगोधावतीत्यादौ म्लगकर्तृकधावनस्य विषयतया दर्शनाच्चैत्येन
क्रियाविशेष्यकबोधांगीकारेपि बाधकाभावः विशेषणविशेष्यभावस्य तात्पर्यग्रहमात्राधीनतया क्वचिद्धात्वर्थवि
शेष्यकान्वयबोधांगीकारे क्षतिविरहात् अत एव पचति भवतीत्यादिप्रयोगानुपपत्तिरपि समाहिता तत्र पाकानुकूल
कृतिर्भवतीत्यादिभावनाविशेष्यकान्वयबोधांगीकारादिति सारं। एतेन प्रथमांतार्थविशेष्यकत्वनियमे भवदीः स्तूय
तेत्र केति प्रश्ने स्तोत्रं भगेतत्र क्रियते इत्युत्तरस्य स्तोत्रविशेष्यकबोधजनकस्य प्रश्ननिवर्त्तकत्वानुपपत्तिः स ने मा न
विशेष्यकबोधजनकोत्तरस्यैव प्रश्ननिवर्त्तकत्वात् एवं ब्राह्मो विवाह आहूय यत्कन्या दीयते स्वयमिति स्मृतिवा

न्या॰कौ॰ स्यात्। आह्वानपूर्वकस्वपं कंन्यादानं ब्राह्मो विवाह इत्यर्थलाभानुपपत्तेः। क्रियाविशेष्यकबोधनियमे तूक्तस्थले नु
पपत्त्यभावेपि प्रथमान्तपुरुषस्तत्स्वपादयोरभिवादयेत्यादौ तच्छब्दस्य पुरुषपरामर्शकत्वानुपपत्तेः तच्छब्दे गुणी
भूतार्थपरामर्शकत्वस्यौत्सर्गिकत्वात्। अन्यथा दशैते राज[illegible]मातंगास्तस्यैवामी तुरंगमाः। चैत्रो गजा मगानत्तत्र मे
त्रैः किं कुरुतेधुना चैत्रप्रजावती यं मत्वं तत्सर्वे देहि कंबलमित्यादौ तच्छब्दस्य यथाक्रमं राजगजामभ्यान्तपरामर्शकत्वा
पत्तेः। अतएवानुमानं निरूप्य तदनुपक्रम्य तन्नानुमितिरिति तच्छब्देन निरूपणापरामर्शस्य संभवात्तन्न निरूपणीयेनु
मानइति व्याख्यानमभियुक्तैरिति तदस्यानांशं कापि निराकृतौ यथासंभवमुक्तरीत्या। क्रियाप्रथमान्तार्थविशे
ष्यकबोधयोरुपगमेनोक्तानुपपत्त्यभावात्। अथवा प्रथमान्तपदासमभिव्याहारे ऽकारीतिरेवतत्समभिव्याहारे चु
सदेवप्रथमान्तार्थविशेष्यकबोधनियमः एवं नचोक्तदोषः कुःकुलीनइतिप्रश्ने पस्यधनमिति भिन्नविशेष्यकबो
धकादप्युत्तरात्प्रश्ननिवृत्त्या समानविशेष्यकबोधजनकोत्तरस्यैव प्रश्ननिवर्तकत्वमिति नियमाभावात्। अन्यथा राम
कस्येत्र इति प्रश्ने पःपाचकइति वत्पचती सुतारस्यापि समानविशेष्यकबोधजनकत्वेनैव प्रश्ननिवर्तकत्वे क्रियावि

शेष्यकबोधनियमांगीकर्तृमतेप्यगतेः एवंब्राह्मोविवाहइत्यादिस्थलेविवाहस्यतादृशकन्यादानंब्राह्मोविवाहइ
तिनार्थः। गांधर्वादिविवाहसाधारणापवहमापरा इति धात्वनुसारेणाचवरनिष्ठकन्याप्राप्त्यनुकूलविलक्षणव्यापारस्यैव
विवाहतयाकन्यादानस्यविवाहत्वाभावात् अत एव स्मृतौ विवाहस्याष्टधाविभागः संगच्छते सामान्यधर्माक्रांतानां विशेष
रूपेणप्रतिपादनस्यैवविभागत्वात् किंतुयनुपदर्थपादृशविवाहात्मकेव्यापारेयाहूयैस्वयंदीयतेकन्यासव्यापारोब्रा
ह्मोविवाहइत्येवार्थइतिनकोपिदोषः इहभवते मैत्रेरोचते मतंपक्ष्यतइत्यादावपिएवकारार्थव्यवच्छेद्यस्य भयत्वाव
च्छिन्नप्रतियोगिताकतत्याभानोपगमेनैतद्रूवनाक्षिकरसाकपाकुक मैत्वमैत्रान्यकर्तृकत्वाभयाभाववद्धेत्वेमनमिति प्र
यमोतार्थविशेष्यकएवबोधः अंधस्त्राकाशंनपश्यतीत्यादावपिनञर्थस्यवारदवंभानोपगमेनाकाशादिविषयक
त्वाभाववद्दर्शनाभाववदान्धइतिप्रथमांतार्थविशेष्यकएवबोधः चैत्रआकाशंनपश्यतीत्यादौचाकाशविषयकत्वाभा
ववद्दर्शनवान्चैत्रइत्याद्याकारकएवबोधइतिनकोपिदोषः पश्यमृगोधावतीत्यादौतुशतितृक्तेर्वेतिपुक्तमुक्त
स्यापिः एवमुपमानादिना दिनाशक्तिग्रहोप्यसतिबाधकएव अत एव पचतिपाककर्तेति आख्यातेनकर्तुर्विवरणोपिना

ख्यातस्य विवरणात्कर्तरि शक्तिग्रहः तत्राप्यजन्यत्वस्यैव बाधकत्वात् । प्रथमं तु चैत्रादिपदादेव कृत्साध्वप्रस्य चैत्रादेर्बो
धात्तदुपमानादिना शक्तिग्रहप्रकारश्चाप्यत्र विस्तरेणास्तीति तत्रैवानुसंधेय इति ग्रंथगौरवभिया नात्र प्रपंचितः
शक्तिश्च मुख्या वृत्तिः लक्षणापि वृत्त्यंतरं तेन गंगायां घोष इत्यादौ गंगापदादेर्गंगातीरादौ शक्तिविरहेपि गंगाती
रवृत्तिर्घोष इत्यादिशाब्दबोधस्य नानुपपत्तिः लक्षणयैव गंगापदादिना गंगातीरादेरुपस्थितिसंभवात्तादृशबोधोपप
त्तेः सा च स्वशक्यसंबंधः स्वपदं लाक्षणिकगंगापदादिपरं । अत्रेदं विचार्यते । गंगापदादेस्तीरादौ शक्तिरेवास्तां वृत्त्यं
तरकल्पने गौरवात् । शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारणत्वात् लाघवेन गंगापदादिनिरूपितशक्तिज्ञान
जन्योपस्थितेरेव शाब्दधीहेतुत्वाच्च । पत्नु गंगादिपदस्य लक्षणीयतीरादिसहस्रार्थेषु प्रत्येकं शक्तिः कल्प्या तद्ग्रहा
र्थं वृद्धव्यवहारापेक्षा चेल्लक्षणाकल्पनमेव युक्तं । न च लक्षणाग्रहार्थमपि वृद्धव्यवहारापेक्षावश्यकीति वाच्यं ।
गंगायां घोष इत्यत्र घोषपदाकांक्षितत्वात्स्य प्रामाण्योपपादनार्थमेव स्वार्थसंबंधेनोपस्थिततीरबोधकत्वस्य कल्पना शिव
त् । न च तीरादि सह स्वेषु संयोगसमवायादिना नासंबंधानां शाब्दबोधप्रयोजकत्वे गौरवमिति वाच्यं । अतिरिक्तायाः श

क्तेस्तज्जन्यस्मृतेस्तत्रशाब्दहेतुत्वस्यचकल्पनापेक्षयालक्षणानांसंबंधानांलक्षणायास्तदधीनस्मृतेश्चशाब्दधीहेतुत्व
कल्पनेगौरवंलाघवादितितदसत् गंगापदादेस्तीरादौलक्षणांगीकर्तृमतेगंगायांघोषइत्यादौप्रत्येकंगंगातीरादिविषयभेदे
नोपस्थितेःकार्यकारणभावद्वयकल्पनापत्त्यामहागौरवात् तथाहियत्रगंगायांघोषइत्यादौगंगापदादेस्तीरादौश
क्तिभ्रमात्शाब्दबोधस्तत्रतदनुरोधेनगंगापदादिजन्यतीरशाब्दबोधंप्रतितीरादिविशेष्यकगंगादिशक्तिविषयकज्ञा
नजन्योपस्थितेरेकःकार्यकारणभावः एवंयत्रतादृशशक्तिज्ञानाभावदशायांगंगादिपदादेस्तीरादौलक्षणाज्ञानात्
शाब्दबोधस्तत्रतादृशशाब्दबोधंप्रतितीरादिविशेष्यकगंगापदादिलक्षणाविषयकज्ञानजन्योपस्थितेरपरःकार्यका
रणभावइतितीरादिविषयभेदेनकार्यकारणभावद्वयकल्पनेगौरवं· गंगापदादेस्तीरादौशक्तिमेवोपगम्यलक्षणानं
गीकर्तृमतेचप्रथमकार्यकारणभावेनैवनिर्वाहइतिलाघवंस्फुटमेव यत्रकेचित्· लक्षणांगीकर्तृमतेपिप्रथमकार्यका
रणभावेनैवनिर्वाहइतिनतन्मतेगौरवंस्वशक्यसंबंधात्मकलक्षणाज्ञानस्याप्याधिक्यंत्वितिन्यायेनशक्तिविषयकतया
तज्जन्योपस्थितेरपितादृशशक्तिविषयकज्ञानजन्योपस्थितित्वरूपकारणतावच्छेदकाक्रांतत्वात् अथयत्रगंगापद

न्या॰ कौ॰ जन्यतीरादिशाब्दबोधवारणाय तीरत्वावच्छिन्नविशेष्यतानिरूपितगंगापदादिशक्तिप्रकारताशालिज्ञानत्वावच्छिन्नजन
कतानिरूपितजन्यताश्रयोपस्थितित्वेनैव कारणत्वं वाच्यं तथा च गंगापदशक्यसंबंधितीरमित्याकारकलक्षणाज्ञान
स्य तीरत्वावच्छिन्नविशेष्यतानिरूपितशक्तिप्रकारताशालित्वाभावेन न तज्जन्योपस्थितेरुक्तकारणतावच्छेदकानो
क्रांततया कथमेककारणतया लक्षणांगीकर्तृमते निर्वाह इति चेन्नैवं शक्तिप्रकारतायां तीरत्वावच्छिन्नविशेष्यतानि
रूपितत्वस्यानिवेशे पज्ञाने तीरत्वावच्छिन्नविशेष्यकत्वं निवेश्यैवोक्तकारणत्वांगीकारान्न न चोक्तदोषः यतस्तादृशोपस्थि
तेर्गंगापदादिजन्यतीरादिविषयकशाब्दबोधत्वेन कार्यतावच्छेदकमपि तु तादृशोपस्थितिविशिष्टशाब्दत्वमेव एवं चो
क्तस्थले उपदर्शितधर्माक्रांतः प्रवाहादिशाब्दबोधो जायते एव तीरादिशाब्दबोधत्वावच्छिन्नस्य तु त्वापादकाभावात् तस्य का
र्यतानवच्छेदकत्वादित्याहुस्तदसत् तथापि गंगापदशक्यभाववति गंगापदशक्तिप्रकारकं गंगापदशक्यसंबंधा
भाववति गंगापदशक्यसंबंधप्रकारकमिदं ज्ञानमित्याद्याकारकानेकाप्रामाण्यज्ञानाभावनिवेशानुरोधेन गंगा शिव
पदशक्यभावाप्रकारकत्वगंगापदशक्यसंबंधाभावाप्रकारकत्वादिरूपनिवेशानुरोधेन च शक्तिज्ञानजन्योप

स्थित्योः कार्यकारणभावद्वयस्यावश्यकत्वात्। एतेन वृत्तिसंसर्गकपदप्रकारकार्थविशेष्यकज्ञानजन्योपस्थितेरे
वशाब्दबोधजनकत्वोपगमेनोपस्थितिद्वयस्याप्येकरूपेणाकारणत्वं संभवत्येव तथा हि शक्तित्वावच्छिन्नसांसर्गिक
विषयतानिरूपितगंगापदादिनिष्ठप्रकारतानिरूपिततीरादिविशेष्यताशालिग्रहत्वेन गंगापदादिजन्यतीरादिविशेष्यक
शाब्दबोधत्वावच्छिन्नं प्रति हेतुत्वं कल्प्यते शक्तिनिष्ठावच्छेदकतायाः पर्याप्तिः परं न निर्वहते। इत्थं च शक्तिसंबंधेन पदप्रका
रकार्थविशेष्यकज्ञानस्यैव शक्यसंबंधेन पदप्रकारकार्थविशेष्यकज्ञानस्यापि त्र्यधिके त्रितिन्यायेन शक्तिसंसर्गकता
विशेषात् द्वयोरप्युक्तधर्माक्रांतत्वात् संग्रहः सुलभः संसर्गतावच्छेदकोपविषयतायामपि सांसर्गिकविषयतात्वस्य स
त्वात् ननु शक्यसंबंधेन पदप्रकारकज्ञानस्य न शक्तित्वावच्छिन्नसांसर्गिकविषयताशालित्वं तथा सति शक्तिसंबंधाव
च्छिन्नपदप्रतियोगिताकाभाववानर्थ इति बाधनिश्चयोत्तरमपि शक्यसंबंधेन संबंधावच्छिन्नपदप्रकारकार्थविशेष्य
कबोधस्यापत्तेर्दुर्वारत्वात् तत्संबंधावच्छिन्नप्रतियोगितासंबंधावच्छिन्नयत्पदप्रकारतानिरूपिताभावप्रकारतानि
रूपितपदार्थनिष्ठविशेष्यताशालिग्रहस्तिष्ठति तादृशसंबंधावच्छिन्नतत्पदनिष्ठप्रकारतानिरूपिततदर्थनिष्ठ

विशेष्यतानिरूपितताद्दशसंबंधनिष्ठसांसर्गिकविषयताशालीग्रहो न जायते इत्थं च तदनुसारेण प्रतिबंधकत्वस्य कल्प
नीयतया पदनिष्ठप्रकारतानिरूपिताया अर्थनिष्ठविशेष्यतानिरूपितायाः शक्तिनिष्ठसांसर्गिकविषयतायास्तच्छालिज्ञा
नेप्रतिशक्तिसंबंधावच्छिन्नप्रतियोगिताकपदाभावप्रकारतानिरूपितार्थनिष्ठविशेष्यताशालिनिश्चयस्यप्रतिबंधकतया
शक्तिसंबंधावच्छिन्नप्रतियोगिताकपदाभावप्रकारताशालिनिश्चयसत्वे शक्यसंबंधावच्छिन्नपदप्रकारताशालिज्ञान
स्यतानुपपत्तिः तन्न शक्तिनिष्ठायाः सांसर्गिकीविषयतातस्याः पदनिष्ठप्रकारतानिरूपितत्वे सत्यर्थनिष्ठविशेष्यतानि
रूपितत्वाभावात् शक्तिनिष्ठसांसर्गिकविषयतायाः पदनिष्ठप्रकारतानिरूपितत्वे ऽर्थनिष्ठविशेष्यतानिरूपितत्वाभा
वात् न चोक्तरीत्यैककार्यकारणभावकल्पने शक्त्यभाववृसंबंधेन पदप्रकारकार्थविशेष्यकज्ञानजन्योपस्थितिः शक्य
संबंधाभाववृसंबंधेनपदप्रकारकार्थविशेष्यकज्ञानजन्योपस्थितिः तच्च शाब्दबोधापत्तिर्दुर्वारेतिवाच्यं शक्तित्वावच्छिन्न
सांसर्गिकविषयतायाः प्रतियोगितावच्छेदकतानवच्छिन्नत्वस्यापि निवेशनीयत्वादित्यपि परास्तं शक्तिकालीनत्वशक्तिता शिव
दात्म्यादिसंसर्गकपदप्रकारकज्ञानंजन्योपस्थितिवारणाय पदप्रकारतार्थविशेष्यतोभयनिरूपितत्वस्य शक्तित्वावच्छिन्न

गि

सांसर्गिकविषयतापर्यन्तनिवेशस्यावश्यकतया लक्षणाज्ञानजन्योपस्थितेः। संसर्गांशे भवाच्छात्रत्वोच्यते तीरत्वावच्छिन्नविशे
ष्यतानिरूपितायाः सांसर्गिकविषयतायास्तन्निरूपितायाः निरूपितत्वसंबन्धावच्छिन्नाश्रयनिष्ठसांसर्गिकविषयतातद्भिन्नसांसर्गि
कविषयतायाश्च निरूपितायाः शक्तित्वावच्छिन्नसांसर्गिकविषयतातन्निरूपितायाः गंगादिपदनिष्ठप्रकारतातन्निरूपितेती
रत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन शक्तिज्ञानशक्तिसंबंधात्मकलक्षणाज्ञानेऽनुगम्यते तज्जन्योपस्थितित्वेन गंगादि
पदजन्यतीरत्वावच्छिन्नविषयकशाब्दबोधत्वावच्छिन्नं प्रत्येकविषयत्वशक्तिज्ञानलक्षणाज्ञानजन्योपस्थित्योः कार्यकारणभा
वः कल्प्यत इति लक्षणांगीकर्तृमतेन गौरवादकाशः शक्तिकालीनत्वशक्तितादात्म्यादिसंसर्गकपदप्रकारकज्ञानीयशक्ति
त्वावच्छिन्नसांसर्गिकविषयतायास्तादृशविषयताभिन्नकालीनत्वादिविषयतानिरूपितनिरूपितत्वेन तादृशज्ञानस्योपद
र्शितानुगमकरूपानाक्रान्ततत्वात्तज्जन्योपस्थितेर्गौरवं न चोपदर्शितरीत्या द्विविधप्रामाण्यमहाभावनिवेशोनुरोधेनो
पस्थितेः कारणतायामुपस्थावश्यकमिति वाच्यं शक्तिसंबंधावच्छिन्नप्रतियोगिताकगंगादिपदाभाववद्विशेष्यतानिरूपितत्व
प्रकारतानिरूपितशक्तिसंबंधावच्छिन्नगंगादिपदप्रकारतानिष्ठविशेष्यतासंबंधावच्छिन्नप्रतियोगिताकस्वलक्षणासंबंधावच्छि

ग३

न्या॰ कौ॰ न्नप्रतियोगिताकगंगादिपदाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितलक्षणासंबंधावच्छिन्नगंगादिपदप्रकारतानि
ष्ठविशेष्यताकसंबंधावच्छिन्नप्रतियोगिताकस्य चाप्रामाण्यज्ञानाभावस्य गंगादिपदनिष्ठप्रकारतायां निवेशेनानुपपत्त्यभा
वात् । न च तथा विशिष्टसंबंधावच्छिन्नगंगादिपदप्रतियोगिताकाभावाप्रकारकत्वलक्षणासंबंधावच्छिन्नगंगादिपदप्रतियो
गिताकाभावाप्रकारकत्वरूपाद्विविधनिश्चयत्वनिवेशानुरोधेन कारणताद्वयमावश्यकमिति वाच्यं । संशयसमुच्चयकोटौ
लक्षणानुरोधेन संशयेनुभयप्रकारतानिरूपितैकविशेष्यतास्वीकारेणाभावप्रकारत्वानिरूपितायास्तन्निष्ठप्रकारतानिरू
पितविशेष्यतायास्तच्छालित्वस्यैव निश्चयत्वरूपतया तीरत्वाद्यवच्छिन्नविशेष्यतायामभावप्रकारत्वानिरूपितत्वनिवेशेनै
करूपद्विविधनिश्चयत्वानिवेशात् । न चैवमपि शक्यानिरूपितपरंपरासंबंधरूपलक्षणासंबंधेन गंगादिपदप्रकारकज्ञानस्य
संग्रहो न तज्जन्योपस्थितेरसंग्रह इति वाच्यं । तादृशज्ञानजन्योपस्थितेः स्वातंत्र्येण शाब्दकारणत्वोपगमात् । न चैवं लक्षणांगी
कारे मते एतत्प्रयुक्तं गौरवं दुर्वारमिति वाच्यं । अनंतविषयेषु अतिरिक्तशक्त्यादिकल्पनापेक्षया कतिपयेतादृशकारणता
कल्पनेपि लाघवान्नापापाता । वस्तुतस्तु मुख्यामुख्यार्थव्यवहारानुरोधेन लक्षणांगीकारस्यावश्यकतः शक्यत्वलक्ष्यत्वातिरि शिव

क्तयोर्मुख्यत्वामुख्यत्वयोर्दुर्वचत्वात्। किंच मुख्यार्थान्वयानुपपत्तिमनपेक्ष्यैव गंगादिपदात्प्रवाहादिबोधस्तामपेक्ष्यैव तु तस्मा
त्तीरादिबोध इति वैरूप्यनिर्वाहाय लक्षणांगीकार आवश्यकः। तदंगीकारे शक्यार्थबोधे तात्पर्यानुपपत्तेरनपेक्षणाल्लक्ष्यार्थबो
धे तस्या अपेक्षेति सुवचत्वात्। अपि च तीरादीनां तीरादिशब्दैः प्रतिपादनेन शैत्यपावनत्वादिप्रतीतिर्गंगादिशब्दैः प्रतिपादनेन तु
भवतीति तत्प्रतीतिरिति सर्वजनसिद्धस्यानुभवस्य लक्षणानंगीकारे न निर्वाहः। तदंगीकारे तु स्वाप्यत्तेश ह्यप्रयोगे किमिति वाच
कं प्रयुंजामह इत्याशयेन तीरादिवाचकतीरादिशब्दं विहायावाचकगंगादिपदप्रयोगस्य किं प्रयोजनमिति प्रतिसंधाने न ता
दृशप्रयोगप्रयोजनानुपपत्त्या गंगादिशब्दैस्तीरादिप्रतिपादने भवति शैत्यपावनत्वादिप्रतीत्युपपत्तिः। इत्थं चानापत्त्या
शक्तिज्ञानलक्षणाज्ञानजन्योपस्थितौ कारणताद्वयमुपेयं प्रामाणिकगौरवस्यादोषत्वात्। न चैवं परस्परजन्यबोधे पर
स्परव्यभिचार इति वाच्यं स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्य सामानाधिकरण्योभयसंबंधेन तदुपस्थितित्वे विशिष्य स
न्तदुपस्थितिजन्यतावच्छेदककोटौ निवेशेन व्यभिचाराभावादिति संक्षेपः। अनन्मावः। लक्षितलक्षणापि वृत्त्यंतरं
तथा हि। द्विरेफो गुंजतीत्यादौ द्विरेफपदाद्भ्रमरबोधस्सर्वसिद्धस्स च न द्विरेफपदशक्त्या तस्यैव हुव्रीहिसमासात्मक

न्या॰ कौ॰ तथाशक्यभावात्तत्र एव लक्षणाप्युपितस्मात् तात्पर्यग्राहकद्विरेफशब्दसमभिव्याहृतरेफशब्देन द्विरेफीयपत्रे
तिष्ठतस्य रेफद्वयसंबंधित्वेन भ्रमरपदे लक्ष्यते लक्षितेन च भ्रमरपदेन तादात्म्यरूपस्वशक्यसंबंधेन भ्रमरह
पार्थो लक्ष्यत इति द्विरेफपदस्य भ्रमरे लक्षितलक्षणा हपहस्तेतरां अथ द्विरेफपदलक्ष्यभ्रमरपदेन शक्यैव
भ्रमरबोधसंभवे भ्रमरपदस्य न भ्रमरे लक्षणा न च रेफद्वयसंबंधित्वेन भ्रमरपदज्ञानेपि भ्रमोत्र स्वेरूपभ्र
मरपदत्वावच्छिन्नाज्ञानात्कथं शक्यबोधः शक्ततावच्छेदकप्रकारकज्ञानाभावादिति वाच्यं भ्रमरपदत्वावच्छे
त्रे रेफद्वयसंबंधित्वमहे भ्रमरपदत्वावच्छिन्नज्ञानसत्त्वादिति चेन्न अप्रत्यायनात् प्रकृतस्वार्थान्वितस्वार्थबोधकत्व
मिपमेन भ्रमरस्य भ्रमरपदार्थतया द्विरेफपदार्थत्वाभावेन तत्र विभक्त्यर्थान्वयानुपपत्तेः यत्रैतेच द्विरेफपद
स्येव लक्षितलक्षणा यत्रेति तथा भ्रमरस्य द्विरेफपदार्थत्वात्रानुपपत्तिः न च शक्यादृश्येन रूपेण ज्ञाते भव प्रकृते
तिलक्षणेति भ्रमरपदशक्यतावच्छेदकस्य भ्रमरत्वस्य भ्रमरपदलक्ष्यतावच्छेदकत्वं शक्तेरेव तद्बोधसंभ राम
वादिति वाच्यं शक्येन रूपेण लक्षणानंगीकारे शक्यैव तद्बोधसंभवे लक्षणाकल्पनमफलमित्यस्येव बीजत

पाभ्रहतेभ्रमरपदशक्यभ्रमरत्वविशिष्टस्यबोधस्वीकारेभ्रमरस्य द्विरेफपदार्थत्वाभावेनैवविभक्त्यर्थान्वयानुपप
त्त्याशक्यसापिलक्षणायैवमानमुपेयते। एवंचलक्षितस्यद्विरेफपदेनलक्षितस्यभ्रमरपदस्यलक्षणालक्षितलक्षणा
साच द्विरेफपदस्यवृत्तिरितिवदंतितदसत्। द्विरेफपदलक्ष्यभ्रमरपदेनशक्त्यैवभ्रमरबोधसंभवेतस्यलक्षणाया
असंभवेतल्लक्षितशक्तेरेववृत्तित्वौचित्यात्। भवन्मतेलक्षितलक्षणायाइवमन्मतेलक्षितशक्तेरपि द्विरेफपदस्य
वृत्तितयाभ्रमरस्य द्विरेफपदार्थत्वसंभवेनतत्रविभक्त्यर्थान्वयानुपपत्तेरभावात्। अथैवंतु द्विरेफपदलक्ष्यभ्र
मरपदेनशक्त्याभ्रमरबोधेपिलक्षितलक्षणायावृत्तित्वमिवहतिलक्षितेनलक्षणांबोधनंतादात्म्येनपस्थामिति
चेत्तस्याद्विरेफपदलक्षितेनभ्रमरपदेनशक्त्याबोधस्येवलक्षितलक्षणात्वादिसाहः। मिश्रास्तुशक्यसंबंधो
हिलक्षणानतुशक्यस्यसाक्षात्संबंधएवगौरवात्। एवंचपरंपरासंबंधेनलक्षणैवलक्षितलक्षणास्वलक्ष्यप
दघटितलक्षणासेतिनुपावेतत्तथाचपरंपरासंबंधेनलक्षणायाएवतथात्वेनद्विरेफपदस्यस्वलक्ष्यभ्रमर
पदोपदोपस्थाप्यत्वरूपेणस्वलक्ष्यभ्रमरपदघटितपरंपरासंबंधेनभ्रमरत्वरूपेणाभ्रमररूपार्थोप
स्थापकत्वसंभवात्द्विरेफपदलक्षणायैवोपपत्तेर्नातिरिक्तवृत्तिकल्पनेनहीयत्रद्विरेफपदस्यभ्रमरेउ

पदर्शितपरंपरासंबंधेन गृहीतः किं तु द्विरेफपदलक्षणायोपस्थितस्य भ्रमरपदस्यैव तादात्म्यरूपः स्वशक्यसं
बंधो गृहीतस्तत्र द्विरेफपदलक्षणाया भ्रमरशाब्दबोधासंभवेन लक्षितलक्षणारूपत्वं तस्यावश्यकमिति वा
च्यं। तत्र द्विरेफपदलक्षणायोपस्थितस्य भ्रमरपदस्य भ्रमरे तादात्म्यरूपस्वशक्यसंबंधग्रहे द्विरेफपदस्य भ्रमरे उ
पदर्शितपरंपरारूपस्वशक्यसंबंधग्रहेपि बाधकाभावात्। न च यत्र भ्रमरो द्विरेफपदस्योपदर्शितपरंपरासंबंधेन बाध
निश्चयस्तत्र तादृशग्रहो न भवतीति वाच्यं। लक्षणासंबंधेन बाधनिश्चयस्य लक्षणाप्रकारकज्ञाने ऽविरोधित्वात्। न च यत्र लक्षणा
या एव बाधनिश्चयस्तत्र लक्षणाप्रकारकज्ञानमपि न संभवतीति वाच्यं। तत्रापि लक्षणाया बाधग्रहस्य लक्षणासंसर्गकज्ञानावि
रोधितया लक्षणासंसर्गकज्ञाने बाधकाभावात्। न च वृत्तिप्रकारकज्ञानस्यैव शाब्दबोधहेतुतया तदकिंचित्करमिति वाच्यं॥
वृत्तिप्रकारकज्ञानस्येव वृत्तिसंसर्गकज्ञानस्यापि शाब्दबोधहेतुतया तदकिंचित्करमिति वाच्यं। वृत्तिप्रकारकज्ञानस्येव वृत्तिसंस
र्गकज्ञानस्यापि शाब्दबोधहेतुत्वोपगमादिति प्राहुः। नवीनास्तु। द्विरेफपदात्तु पदर्शितपरंपरासंबंधेन भ्रमरत्व[illegible]वैरत्व
स्वत्तरत्वभ्रस्तरत्वघटत्वादिना ऽनियतोपस्थितौ तस्य भ्रमरपर्यायत्वमनुपपन्नं तस्मात् रेफपदस्य रेफघटितपरंपरासंबंधि रीव
त्वेन लक्षणा रेफे एकदेशे द्विपदार्थस्याभेदान्वयोत्तु वा द्विपदस्य तात्पर्यग्राहकतयोक्तलक्षणायैव द्विरेफसंबंधी लक्ष्यः स च

योगार्थस्य यौगिकत्वमुत्पत्तिप्रयोज्यत्वात् स च प्रस्तरादावतिप्रसक्त इति भ्रमरत्वविशिष्टे रूढिः तथा च द्विरेफपदं योग
रूढमेव पंकजलंबकरादिपदवदिति प्राहुरित्ति दिक्॥ लक्षणा च द्विविधा जहत्स्वार्था ऽजहत्स्वार्था च तत्र जहत्स्वार्थे
यामिति व्युत्पत्त्या स्वार्था। विशेष्यकान्वयबोधप्रयोजिका जहत्स्वार्था तदन्या त्वजहत्स्वार्था गंगायां घोष इत्यादावा
द्यातत्र गंगातीरत्वेन तीरत्वेन वा गंगातीरलक्षणा तत्र तेन तत्र गंगांशभाने युगपद्वृत्तिद्वयविरोधापत्तिरिति परास्तं। गंगां
शस्य लक्ष्यतावच्छेदकविधया तीरत्ववद्भानात् युगपद्वृत्तिद्वयविरोधे मानाभावाच्च अत्र लक्ष्यतावच्छेदके न लक्षणा गंगाती
रत्वादिविशिष्टे गंगापदलक्षणाग्रहोऽतस्तद्धर्मप्रकारकोपस्थितिः शाब्दबोधश्चेति संप्रदायः नव्यास्तु लक्ष्यतावच्छेदकेपि ल
क्षणास्त्येव अन्यथा शक्यतावच्छेदके विशिष्य शक्तिर्न स्यात् लक्ष्यतावच्छेदकस्येव शक्तिं विनापि भानसंभवात् न चैवं तेन शक्या
नुगमासंभव इति वाच्यं कार्यकारणघटत्वादिना कार्याननुगमवत् दशकेनापि शक्यानुगमे बाधकाभावादित्याहुः। काकेभ्यो
दधि रक्ष्यतामित्यादौ द्वितीया जहल्लक्षणा पुनर्द्विविधा प्रयोजनवती निरूढा च। आद्या गंगायां घोष इत्यादौ तत्र शैत्यपा
वनत्वादिविशेषादिबोधस्य प्रयोजनस्य सत्त्वात् नीलो घट इत्यादौ नीलरूपादिशक्तस्य नीलपदादेर्नीलादिरूपवतीद्वि

मा॰कौ॰ तीयार्थे लक्षणा बीजं तत्तात्पर्यविषयान्वयानुपपत्तिर्न तु मुख्यार्थान्वयायोग्यत्वं यष्टीः प्रवेशयेत्यादौ काकेभ्यो दधि रक्ष्यतामि
त्यादौ च तदभावात् तात्पर्यविषयस्य यष्टिधरप्रवेशनस्य सर्वतो दधिरक्षणस्य चान्वयानुपपत्तिस्तत्राप्यस्त्येवेति संप्रदायः
चिंतामणिकृतस्तु मुख्यार्थान्वयायोग्यत्वमेव लक्षणाबीजं तात्पर्यग्राहकतया वश्यकत्वाद्द्वारा गंगायां घोष इत्याद्यामवाक्य
स्य प्रामाण्योपपादनार्थमेव विनापि तात्पर्यग्रहं मुख्यार्थान्वयायोग्यत्वज्ञानेनैव लक्षणाकल्पनाद्वा यष्टीः प्रवेशयेत्यादौ
च तात्पर्यज्ञानविषयभोक्तृप्रवेशनादौ यष्ट्याद्यन्वयानुपपत्तिरस्त्येवेति प्राहुः। अत्रेदं बोध्यं गामुच्चारयेत्यादौ गोपदादेः स्वपर
त्वे लक्षणैव गोपदादेर्गवादावेव शक्यत्वेन गोपदादेरशक्यतया शाब्दबोधविषयत्वासंभवात्। पदान्तु गामुच्चारयेत्यादौ त्वर्थोच्चा
रणासंभवेन विना शब्दविषयकत्वं शाब्दबोधानुपपत्तेश्च गोपदादेर्गवादिपदमपि शक्यमेव च लक्षणाया निर्वाहः। जवगड
दशमाहेत्यादौ स्वशक्याभावेन लक्षणापाअसंभवात् लक्षणाग्रहं विनापि शाब्दबोधाच्चेति शाच्छिद्धिकेहस्तं तदसत् हद्दामर
इत्यादिस्थायेन जादिमस्त्वे केवलानामेव द्वितीयार्थे चान्वयेन तेषां चैकाकारकोपरिंग स्वस्वार्थे शक्तिमत्वेन ततस्तु वंचे न स्वस्मि शिव
न लक्षणासंभवात् लक्षणाया अस्महे च शक्तिभ्रमादेव स्वतः स्वस्योपस्थित्या शाब्दबोधसंभवात्। पदापि पदानामो

त्सर्गिकमर्थपरत्वमेव तदभावे च स्वपरत्वं गामुच्चारयेत्यादौ वाच्यान्वये बाधेन स्वपरत्वे चनन्वयापेक्षातादात्म्यसंबंधादेव स्व
स्य। स्वस्योपस्थितिसंभवादिति तैरुक्तं तदपि न प्रत्यक्षोपस्थितघटादेरात्मवृत्तासंबंधेनोपस्थितगगनादेश्च शाब्दबोधवारणा
य वृत्तिज्ञानजन्योपस्थितेरेव शाब्दबोधहेतुत्वेन वृत्त्यपेक्षाया आवश्यकत्वात्। एतेन श्रोत्रप्रत्यक्षोपस्थितस्वपरत्वमेव पक्षा
न्तं उपस्थितार्थबोधकत्वस्यैव लाघवेन ~ उक्तत्वात् वृत्तेस्तत्स्वगौरवेणाम्भेशादिरूपितेषां प्रत्यपितमपास्तं प्रत्ययानां
प्रकृत्यर्थान्वितस्वार्थपरत्वव्युत्पत्त्या गोपदादेर्गोपदार्थत्वाभावेन तत्र विभक्त्यर्थस्योच्चारणकर्मत्वादेरनन्वयप्रसंगाच्च। अ
न्यथा कथं चित् स्मृततीरादेरन्वयसंभवेऽलक्षणोच्छेदापत्तेः। किंच गामुच्चारयेत्यादौ विकृतं गोपदमेवोच्चारणकर्मस्यान्न
त्वविकृतं गोपदं विकृतस्यैव श्रोत्रप्रत्यक्षोपस्थितत्वात्। अपि च एकं पदमुच्चारयेत्यादौ पदांतरं नोच्चारणकर्म स्या
त् किं तु श्रोत्रप्रत्यक्षोपस्थितं एकमित्यादिपदमेव अपि तु वृत्तिज्ञानजन्यपदार्थोपस्थितेः शाब्दबोधहेतुत्वेपि न गामुच्चा
रयेत्यादौ गोपदादिशाब्दबोधानुपपत्तिः निरूपकताश्रयतान्यतरसंबंधेन वृत्तिज्ञानजन्यत्वस्यैव पदार्थोपस्थितावपे
क्षितत्वेनाश्रयतासंबंधेन गोपदादिशक्तस्यैव गोपदादेरुपस्थितिसंभवात्। गवादौ वृत्तिसत्त्वेपि तात्पर्यविरहान्न शाब्दबो

ना॰कौ॰

ध॰ उच्चारयेत्यादि समभिव्याहारेण गोपदादौ स्वपरत्वनिर्णयात्। एतेन गामुच्चारयेत्युक्ते विकृतस्यैवोच्चारणापत्तिः तादृ
शस्यैव श्रोत्रेणोपस्थितेः शब्दस्याप्रकृत्यर्थतयात्र द्वितीयार्थान्वयापत्तिः स्वस्यैव प्रत्यक्षेण शीघ्रमुपस्थित्या गौरस्ती
त्यादावपि स्वपरत्वापत्तिश्चेत्यादि परास्तं तात्पर्यवशाच्छब्दस्याऽविकृतस्यैव शब्दादुपस्थितेः न चैवं तात्पर्ये गौरवं तदेभिर्वाहेवृत्ति
मात्रोच्छेद इति वाच्यं तस्य शाब्दसामान्ये ऽहेतुतया क्वचिच्छाब्दबोधस्य प्रमात्वनियामकत्वे न वृत्तिं विनाऽनिर्वाहादिति तदप्य
सत्। तथा सतीश्वरस्य शक्त्याश्रयत्वसंबंधेन पदमात्रात् स्मृतौ शाब्दबोधप्रसंगात्। तात्पर्यस्योपस्थितौ प्रमात्वे चानियाम
कत्वात्प्रमात्वे विषयाबाधस्यैव नियामकत्वाच्च नवीनशाब्दिकास्तु यथा संसर्गे वृत्तिविरहेप्याकांक्षादिवशात् संसर्ग
स्य शाब्दबोधे भानं तथा शाब्दज्ञानसामान्यसामग्र्यैव संसर्गवत् शाब्दबोधे शब्दभानं शाब्दसामान्यसामग्र्या एव शब्दभानेक
त कल्पनादिति गामुच्चारयेत्यादौ वृत्तिं विनैव शब्दभाने स्वं च प्रकारता विशेष्यतान्यतरसंबंधेन पदभिन्नविषयकशाब्दबो
धं प्रत्येव वृत्त्या पदजन्यपदार्थोपस्थितेः कारणत्वं कल्प्यते प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तौ शिव
प्रकृत्यर्थत्वं च प्रकृतिजन्यबोधविषयत्वमिति गामुच्चारयेत्यादौ न कर्मत्वान्वयानुपपत्तिः न च घटपदजन्यबोधे स

कल्पपर्याप्तानां भानापत्तेर्विनिगमकाभावादिति वाच्यं । तत्तत्पदबोधेन तत्पदसत्तानघटितशाब्दसामग्र्या हेतुत्वेना
दोषादित्याहुस्तदसत् । शाब्दसामग्र्यां शाब्दभासकत्वकल्पने मानाभावात् उपस्थितेर्जन्यतावच्छेदके पदभिन्नवि
षयकत्वानिवेशे गौरवात् शाब्दबोधे प्रकृतित्वेनाजनकतया प्रकृतित्वेन प्रकृतिजन्यत्वाविवक्षणात् संभवेन प्रकृति
जन्यबोधविषयत्वस्यातिप्रसक्तत्वाच्च वस्तुतस्तु सर्वत्र शाब्दबोधे शाब्दभानं न संभवति । पक्षभिन्नविषयकानुमिति
सामग्रीकाले घटादिशाब्देच्छया शाब्दबोधः तत्र घटशाब्दादिशाब्देच्छाविरहे विशिष्टभिन्नविषयकानुमितिसामग्रीरू
पप्रतिबंधकसत्त्वेन घटशाब्दादिशाब्दबोधानुपपत्तेः न च तादृशसामग्रीप्रतिबंधकतायां घटशाब्दादिशाब्देच्छावद्घटादि
शाब्देच्छाया अप्युत्तेजकत्वोपगमान्नोक्तानुपपत्तिरिति वाच्यं । तथा सति तादृशानुमितिसामग्रीसत्त्वे घटादिशाब्देच्छा
सत्त्वे घटादिशाब्दसामग्र्यसत्त्वे घटशाब्दादिशाब्दबोधापत्तेः तादृशेच्छाविषयसिद्धेः संभवेनेष्टापत्तेरसंभवात् तत्तदि
च्छाभावकूटस्योत्तेजके निवेशे मिथो विशेष्यविशेषणभावे विनिगमनाविरहेणानंतकार्यकारणभावकल्पनापत्तेश्चे
तिन किंचिदेतत् । ननु शाब्दबोधे शाब्दसामान्ये पर्याप्त्यादिप्रकारकभंगस्य दोषत्वानुपपत्तिः भिन्नप्रकारकप्रतीतिजन
नस्य तद्रूपकताबीजत्वेनाभेदस्य तत्पर्याप्त्यादिस्थले तदसंभवादिति चेन्न येन शब्देनोपक्रमस्तच्छब्देनोपसंहार

सा० कौ०

स्यैव रसापकर्षकतया चमत्काराभावप्रयोजकतया तत्तद्दूषकताबीजत्वात् अत एव नैकं पदं द्विः प्रयोज्यं प्रायेणेति वा
मनसूत्रे प्रायेणेत्युक्तं उदेति सविता ताम्रस्ताम्र एवास्तमेति चेत्यादावुद्देश्यप्रतिनिर्देश्यस्य लेश एवान्तरोपादाने चमत्का
राभावादिति तदाशयात् अधिकमन्यत्रानुव्यक्तं नन्वशाब्दिकमते शाब्दबोधे शब्दभानोपगमेन घटत्वादिरूपेणाविशि
ष्य गृहीतशक्तिकेभ्यो घटादिपदेभ्यः पदजानुभवप्रकारको बोधः विशिष्याज्ञातार्थकनलरामादिपदेभ्यस्तत्तन्नलत्वादि
धर्मानुपस्थितेर्विशिष्यशक्तिग्रहासंभवेन सामान्यरूपेणोपस्थितस्य तस्य तौ नलादिपदं हि चायं तं साधुपदत्वादिति
सामान्यतो दृष्टानुमानेन नलादिपदवाच्यः कश्चिदर्थोऽस्तीत्याकारकात् शक्तिग्रहात् केवलान्वयिविशेष्यकाल्केवलपद
प्रकारको नलादिपदवाच्यः कश्चिदर्थ इत्याकारको बोध इति वक्तुं शक्यते तत्र मतमुपदर्शितदोषदुष्टमिति नलरामादि
पदेभ्यः कथं शाब्दबोधः परं तु बुद्धिविषयतावच्छेदकत्वेनानुगतधर्मेण निखिलधर्मविषयकसंस्कारस्य सामान्यप्रत्यास
त्त्यधीनानुभवमूलकस्य सत्त्वेन बुद्धिविषयतावच्छेदकत्वांशे मोषदशायां स्वरूपतो नलत्वादिप्रकारकस्मरणं निराबा
धमेवेति तज्जनकशक्तिग्रहमूलकमेव स्वरूपतो नलत्वादिप्रकारकशाब्दज्ञानं भविष्यतीति किमनुपपन्नं । न च स्वरूप शि ३
तस्तत्प्रकारकस्मरणे तत्प्रकारकानुभवसंस्कारयोर्हेतुत्वादनुपपत्तिरस्त्येवेति वाच्यं जन्यताजनकतावच्छेदकको

को॰ ३

टोऽस्वरूपत इत्यस्यानिवेशात्। नचैवं कदाचिज्जातिमानित्याकारकं कदाचिद्घट इत्याकारकं कदाचिज्जातिमान्
घट इत्याकारकं विलक्षणस्मरणमिति विषमानुपपत्तिरिति वाच्यं उद्बोधकवैचित्र्यादेव तदुपपत्तेः स्वरूपतो घ
टत्वादिप्रकारकानुभवजनितसंस्कारवतो जातित्वादिना घटत्वादिप्रकारकानुभवसंस्कारात् कदाचित्स्वरूपतो घट
त्वाद्यप्रकारकस्य जातिमानित्याकारकस्मरणस्योदयेन स्वरूपतस्तत्प्रकारकस्मृतौ तादृशानुभवसंस्कारयोर्विशि
ष्य हेतुत्वेपि उद्बोधकविशेषविरहस्य तादृशस्मृतिविरहप्रयोजकतया आवश्यकत्वे स्वरूपत इत्यंतर्भावे व्यर्थतादृशहेतु
तायाश्च प्रामाणिकत्वात्। अथैवमुद्बोधकवैचित्र्यस्य नियामकत्वमुपेत्य तादृशहेतुतायाः अनुपगमे विशेष्यवि
शेषणभावांशे उद्बोधकविशेषस्य नियामकत्वमुपेत्य प्रकारताविशेष्यत्वानंतर्भावेणाप्युपपत्तेस्तद्विषयकस्मृ
तौ तद्विषयकत्वेनैव संस्कारानुभवयोर्हेतुतापत्तिरिति चेन्न अनुगतोद्बोधकस्य लेः स्वरूपतस्तत्प्रकारकज्ञाना
द्यसत्वे स्वरूपतस्तत्प्रकारकस्मरणापत्त्या तादृशहेतुत्वस्यावश्यकत्वादिति केचिद्वदन्ति तदसत् एवं हि घटवति
चैत्रेपि चैत्रत्वजातीयेशक्तिग्रहसंभवेन तमेव चैत्रत्वेन पश्यन्पुरुषः तत्र चैत्रो नामाभितिप्रतारकवाक्येन चैत्र
भेदं न गृह्णीयात् प्रमात्वदशाधानात् चैत्रे दृष्टा घटचैत्रशाहं नियमतः स्मरेत् पदप्रवृत्तिनिमित्तविशिष्टपिंडप्रसङ्ग

न्या॰ कौ॰ संज्ञासंस्कारानिवर्तकोद्बोधकत्वात्। अतएव हरिरामोक्तं यत्तत्संज्ञास्मरणं तत्र न तदप्यनहेतुकं पिंड एव हि दृष्टस्तन्न सं
ज्ञासंस्कारपितुं क्रमहति। एतेन नलत्वादिसंसर्गकबोधानंतरमुपनीतनलत्वादिविशिष्टे शक्तिग्रहः शाब्दबोधोदय ऽ
पपद्यते पदार्थानलत्वादिविशिष्टगोचरानादपसंस्कारपरंपरास्तत्तदुद्बोधकवशादुद्बुध्यंते इति नलत्वादिवि
शिष्टशक्तिग्रहाद्युपपत्तिरित्यपि परास्तमिति केचित्। नलादिपदं किंचिद्वाचकं साधुपदत्वादित्तिसामा
न्यतो दृष्टानुमानेन जायमानानुमितिः प्रकृष्टधर्मतावच्छेदकनलादिवाचकत्वं विषयीकरोति विशिष्टप्रत्यक्षे विशेष
णज्ञानहेतुत्वेपि अनुमित्यादौ परामर्शादेरेव नियामकत्वोपगमात् तेन न नलत्वादिरूपेण शाब्दबोधानुपपत्तिरि
त्याहुः। अन्ये तु औत्सर्गिके किंचित्करादीनां ख्यादिके च ज्ञाने सर्वे धामन्नुभूतेयजाते स्वरूपैतो नु भवस्यास्तीति नु
सं४ भवमानिकत्वादुपनेयस्य संसर्गीभूत जातिप्रकारकमुपनीतमानं कांचिदुपगम्यते तथा नलादिपदादपि वाक्या
र्थबोधः संभवतीत्याहुः वक्ष्यते तत्त्वं। नलरामादिपदान्नलरामादिपदार्थत्वादिप्रकारकशाब्दबोधो लक्षणाया
संभवति न च नलत्वादिविशिष्टे शक्तिग्रहात्स्वशक्यसंबंधरूपलक्षणाग्रहोपि न संभवतीति वाच्यं लाक्षणिकरू
पेण तत्रापि शक्तिग्रहसत्वात् वृत्तिसंसर्गकज्ञानस्यापि हेतुतोपादत्तत्वेन लक्षणासंसर्गकबोधे शक्तिग्रहस्यो सम

नपेक्षणीयत्वाच्चेति सारं एवं राजपुरुष इत्यादिसमासे पि राजादिपदलक्षणायैव शाब्दबोधः राजपुरुष इत्यादौ
राजकीयः पुरुष इत्यादिशाब्दबोधवारणाय नामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वेन राजपुरुष इत्या त्यादिस
मासे लक्षणां विना राजकीयः पुरुष इत्यादिशाब्दबोधासंभवात एवं च राजादिपदस्य राजसंबंध्यादौ लक्षणा तस्य
चाभेदेन पुरुषादावन्वय इति यत्तु समर्थः पदविधिरिति सूत्रेणैकार्थीभावरूपसामर्थ्ये समासविधानेन राजपुरुषादि
समुदायस्यैव राजकीयपुरुषादौ शक्तिरावश्यकीति समासशक्तिवादिभिः शाब्दिकैरुक्तं तदसत् तेन सूत्रेणाकांक्षादि
वशामरस्यान्वयबोधकत्वात्मकव्यपेक्षारूपसामर्थ्ये एव समासविधानेन समुदायशक्तौ मानाभावात् । अत्रैकार्थी
भावरूपसामर्थ्यवादिनो न सर्वैयाकरणाः समासे एकार्थीभावरूपसामर्थ्याभ्युपगमे राजपुरुष इत्यादिसमासे
कदेशराजादिपदार्थविशेषणत्वानुपपत्तिः तथा च सुंदरस्य राजपुरुष इत्यादि प्रयोगाप्रसंगः तथाहि राजपदोपस्थापि
पितो राजा स्वस्वामिभावसंसर्गेणाभेदेनापि पुरुषे चेति निपातेतरसमासाद्यपदस्यार्थोभेदेन प्रातिपदिकार्थे चे
ति व्युत्पत्तिवैचित्र्यात् प्रह्लालुप्तषष्ठीकस्य राजन्सपदार्थे पस्थितेः सहकारेण विग्रहवाक्यादिवत्समासादपि वाक्या
र्थबोध इति हि व्यपेक्षावादिनां नैयायिकानां मतं तथा च विग्रहे लुप्त विभक्तिकदध्यादिपदार्थस्य दध्यादेरिव समास

घट्करणजादिपदार्थस्यापि विशेषणायोगो दुर्हरः । अथ न विशेषणानां हि निर्नष्टत्तस्य वा विशेषणयोगो नेति वा
ति कातन्त्रं दरस्यराजपुरुषइत्यादिप्रयोगो न साधुरिति चेत् पदार्थैकदेशे पदार्थान्तरस्यान्वयो वाक्यमसाधु यथा गोनि
स्रुस्यादावितिस्यापसेव वानिकमनुवादकं न तु विधायकमत एव चैत्रस्य नप्तेत्यादौ विवदेवदत्तस्य गुरुकुलमित्यादावपि
पिपदार्थैकदेशान्वये पि वाक्यसाधुतां स्यापयितुं ज्ञापयितुं भवति वै नित्यसापेक्षस्य समास इति वार्तिकमप्यनुवादकमेवाय
दाहुः वहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महान्गौरवं तस्मादेकार्थीभावरूपा शक्तिरेव इति । संबंधिशब्दः सापेक्षो नित्यं स
र्वः समस्यते । वाक्यवत्सा व्यपेक्षामप्यवृत्तावपि न हीयत इति च । यत्तु चैत्रस्य नप्तेत्यादावपि प्रकारीभूतजन्यजनकत्वादिसंबंधे
नन्वयरिचैत्रादेरन्वयः न तु पदार्थैकदेशे पुत्रादौ पदार्थान्तरस्य समुदायेन संबंधो येषां गुरुकुलादीनां ते समस्यपापवाद उक्त
स्तु प्रयुज्यते न हतामहे । तिवर्णियंतितन्मते देवदत्तस्य गुरुकुलमित्यादावपि कुलस्यैव देवदत्तादेरन्वयः न तु गुरावित्यपि स्तुवचं । अन्वे
कार्थीभावाभ्युपगमेपि हंहोपात्तस्यैकदेशतया भावात्तत्र पदार्थान्तरान्वयो दुर्वारस्तथा चोक्तं च पश्यन्नेपि हंहमसंगइति
चेत्तु प्युवंतादिपद्दोपात्ते वैदेमस्ति शोत्यान्वयेन तु प्यवंतो शीता वित्यस्य साधुतावारणाय धर्मद्वयावच्छिन्नैकशश ‸ क्तिम टम
मतः पदस्य स्वार्थैकदेशान्वये सत्य साधुत्वावधारणात् । अथ राजपुरुषइत्यादौ राजपदराजसंबंधिलाक्षणिकं त्वन्यथा

राजपदार्थस्य पुरुषे भेदेनान्वयो न स्यात्। नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात्। न च निपातस्य लक्ष्य इव समासे लोपिता इ
त्यव्युत्पत्तेः संकोचान्न दोष इति वाच्यं। दृष्टांतासिद्ध्या संकोचे मानाभावात्। न चैवं घटो न पटः चंद्र इव मुखमित्यादौ नञर्थे
भेदे इवार्थसादृश्ये च घटचंद्रादेर्भेदेनान्वयो न स्यात् नसमासान्नञाद्यर्थे स्वपदार्थेतरस्यापरिशिष्टान्वयात्। तत्रापि घटप्रदादे
र्घटप्रतियोगिकात्यंताभावादेर्भेदादिमति लक्षणोपगमात्। नापि लुप्तषष्ठ्याः स्मरणेन निर्वाहः। षष्ठ्या लोपमजानतोपि
बोधात्। अत एव तत्पुरुषस्य पूर्वपदलाक्षणिकत्वात् कर्मधारयस्य च सर्वशक्तत्वात् तदभावेन तत्पुरुषात् कर्मधारयो लघी
यानिति शापेन निषादस्थपत्यधिकरणसिद्धांतोपि संगच्छते। एवं च समासपूर्वकदेशान्वयाभिप्रायेणाभेदे राजपुरुष इ
ति प्रयोगः। इति तु विशेषणानामित्यादिवार्तिकं विनैव निर्वाहः। यत्तु राजपुरुष इत्यादौ एवं पदे राजसंबंधिनि लक्षणा
स्वीकारे तस्य कर्मधारयत्वापत्तिः समानाधिकरणतत्पुरुषस्यैव कर्मधारयत्वात्। न च यत्र समासपूर्वदशायामभेदा
न्वयस्तत्र कर्मधारयः यत्र च तादृशायां भेदेनान्वयस्तत्र तत्पुरुष इति वाच्यं। नित्यसमासे विग्रहाभावात्वेन तादृशतत्पु
रुषकर्मधारययोर्व्याप्तेः। अलौकिकविग्रहस्य समस्तेपि तस्याव्ययबोधे स्वरूपायोग्यत्वात्। न च समासात्पूर्वं यत्र तुल्यवि
भक्तित्वं तत्रैव कर्मधारयत्वमतो न तत्पुरुषस्य कर्मधारयत्वं तत्र समासात्पूर्वं विरुद्धविभक्तित्वादिति वाच्यं एवं व्यवस्था।

न्या॰ कौ॰

याः समासार्थविवक्षानुसारेणैव कल्प्यत इति तत्र समासवाक्ये बोधाविशेषेण तद्वैलक्षण्यकल्पनायाः अप्यसंभ
वादिति तद्र्दमत। यत्र समासघटकपदार्थस्य विशेष्यत्वे सति तद्घटकीभूतपदान्तरस्योत्तरमुत्पन्नविभक्त्यर्थे व
दं तभावे सामानाधिकरण्यं विना सामा [illegible] नाधिकरण्ये तत्र कर्मधारयत्वं तदं तभावे सामानाधिकरण्याभावात् सामानाधिक
रणे तु तत्पुरुषत्वमिति विभागसंभवात् तत्पंतेन च पंचमन्तोत्सादिव्यावृत्तिरिति चेन्न तथापि समासस्थले समुदाय
शक्तत्वेनांगीकारे तत्रैकार्थीभावस्वरूपार्थवत्त्वाभावेन प्रातिपदिकसंज्ञाप्राचीनविभक्तिलोपविभक्त्यन्तरोत्पत्त्यादि
कं न स्यात् न च समासस्य विशिष्टैकार्थकत्वाभावेनार्थवदादिसूत्रेण प्रातिपदिकसंज्ञाया असंभवेपि कृ
त्तद्धितसमासाश्चेति सूत्रान्तरेणैव प्रातिपदिकसंज्ञायाः संभवान्न दोष इति वाच्यं कृदादिसूत्रेऽप्यर्थवद्ग्रहणानु
वृत्त्या तेनापि सूत्रेण तत्संज्ञाया असंभवात्। अन्यथार्थवदादिसूत्रेऽर्थवशौंदीतो धातुप्रत्ययानां पूर्वसूत्रादर्थवदादे
वार्थ~~दिसूत्रेण तत्संज्ञाया असंभवात् अन्यथार्थवदादिसूत्रे~~वत्त्वे लब्धेऽर्थवद्ग्रहणस्यानर्थक्यप्रसंगात् तेन कृ शिव
दादिसूत्रेऽनुवृत्तसामर्थ्यमेव तदुपादानात् कृत्तद्धितान्ताभ्याम् कृत्तद्धितयोरर्थवद्ग्रहणानुवृत्तेरावश्यकत्वाच्च। न च
तस्मात्। कृदादिसूत्रेण विधायकं तथा सति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति न्यायेन मूलके नोपदंश

मिसंतवाक्यग्रहणापत्तिः तद्धितग्रहणेन तद्धितांतमात्रे प्रातिपदिकसंज्ञाविधौ वहुगुड इत्यादौ तदभावप्रसंगश्च
न च तद्धितग्रहणेन तद्धितविशिष्टमेव गृह्यते न तद्धितांतमिति वाच्यं तथा । सति पचतकीत्यादिमध्यस्थितत तद्धितकेऽपि
प्रातिपदिकसंज्ञापत्तेः इत्थं चार्थवदादिसूत्रमेव प्रातिपदिकसंज्ञाविधायकं कृदादिसूत्रं तु प्रपंचमात्रं अथैकार्थीभावाभ्यु
पगमपक्षे हन्तिमातृस्योपसंग्रहात् सुवंतति उः तयोश्चाव्यावर्तनात् प्रत्ययांतपर्युदासः कृदादिसूत्रप्रपंचाभ्रापुक्तः स्यात
अतोऽर्थवत्त्वमर्थस्मारकवृत्तिमत्त्वमात्रं व्यपेक्षासाधारणं निर्वाच्यं वृत्तिमद्विषयकप्रतीत्यविषयत्वस्वरूपं तद्धितेवृत्ति
मदवयवके समुदायेपीत्यतः प्रकृतिप्रत्यययोर्थवत्त्वादेनौ पाहृदेनादेरर्थवत्तासिद्धौ प्रातिपदिकसंज्ञासिद्धौ च सुवं
ततिः इंतयोरप्यर्थवत्त्वात् तयोर्वाक्यस्य च प्रातिपदिकसंज्ञावारणाय कृत्तद्धितेत्यादिनियमसूत्रं प्रकृतिप्रत्ययसमु
दायस्य चेत् प्रातिपदिकसंज्ञा कृत्तद्धितांतयोरेव वाक्यस्य चेत् समासस्यैवेति प्रत्ययांतपर्युदासस्तु न कर्तव्य एव प्र
योजनाभावात् न च धातोरेव पर्युदासात् तद्धिकंत धातोः प्रातिपदिकसंज्ञानुपपन्नेति कृत्तद्धितेत्यादिसूत्रं विधाय
कमेवेति वाच्यं काल्पनिकविभक्त्यादिविशिष्टे राजन् ङस् पुरुष सु इत्यलौकिकप्रक्रियावाक्ये समाससंज्ञेव

न्या॰को॰ काल्पनिकक्लृप्तिवादिविशिष्टे प्रातिपदिकसंज्ञेत्यभ्युपगमात्। अन्यथा कृत्तद्धितेति सूत्रेंणापितद्ग्रहणानुपपत्तेः। न
चैवं धनेवनमित्यादौ प्रत्येकवर्णानां प्रातिपदिकसंज्ञा तत्प्रयुक्तो नकारलोपश्च स्यादिति वाच्यं वर्णानां समुदाय
हस्यापि वृत्तं प्रत्येकवर्णवृत्त्यावानाद्यः इति मद्बुद्धितत्वस्वरूपस्यार्थवत्वस्य तदवयवेष्वभावात् नोक्तसं॰ शा॰ ह्वीधजन
कपदार्थेऽपि स्थितिजनकवृत्तेरधिकरणायत्तसमुदायस्तद्विषयकप्रतीतिविषयत्वमर्थवत्त्वं न हि समुदायावयवेष्व
प्येकवर्णोऽविद्यमानापि वा। भक्तिः पदार्थैकस्मायेरयतितज्ज्ञानितानास्यूतिः॰ शा॰ दुर्बोधमजेयतिमवल्लभाः स्वेडद्वृत्तिमत्त
मुदायावयवानामनर्थकत्वमेव स्वीक्रियते। अत एव पङ्कजादिपदे पङ्कजनिकर्तृत्वपर्याप्त्यवच्छिन्ने विशिष्टे रूढिः न हि
तावता केवलयौगिके समासे रूढिसिद्धिरिति चेत्तथापि बहुव्रीहौ शक्तिकल्पनं विना चित्रगुरित्यादौ चित्रगोस्वामि
नो बोधोपपादानमशक्यमेव। न च गोपदस्य गोस्वामिनि लक्षणया तल्लाभः पदार्थैकदेशेन चित्रादेरन्वयप
प्रसङ्गात्। नापि गोपदस्यैव चित्राभिन्नगोस्वामिनि लक्षणा चित्रापदं तात्पर्यग्राहकमिति युक्तं। चित्रगोप शिव
दयोर्व्यपेक्षास्वरूपसामर्थ्यस्याभावे समासानुपपत्तेः न च गोपदात् शक्त्या गोः लक्षणया स्वामिनः उपस्थि

नौ लक्ष्यार्थविशेषणीभूतापांगवि चित्राया स्तादात्म्येनान्वया च्चित्रगो स्वामीत्यन्वयबोधोपपत्तिः एकपदोपा
त्तयोरपि कृत्तिवर्त्तमानत्वयोः परस्परान्वयबोधादर्शनेन प्रकृतेप्यनुपपत्त्यभावादिति वाच्यं प्रातिपदिकार्थयोर्गोस्वा
मिनोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् नव चित्रापदगोपदयोरुभयोरपि चित्राभिन्नगोस्वामीलक्ष्यः परस्परं तादात्म्येना
न्वयाद्यपेक्षाप्यस्त्येव अत एव तत्पुरुषापेक्षायापि बहुव्रीहिर्जघन्य इति प्रवादः बहुव्रीहावुभयपदस्यैव लाक्षणिकत्वा
दिति वाच्यं बहुव्रीहावेकशेषद्वंद्वान्यतरप्रसंगात् समानरूपावच्छिन्नयोरभेदान्वयबोधस्याव्युत्पन्नत्वाच्च यदि च बह्वौ चित्रेकदे
शान्वयस्वीकृतया गोसंबंधिलाक्षणिकगोपदार्थैकदेश गवि चित्रापदार्थान्वयो नानुपपन्नः भिन्नाभ्यां प्रातिपदिकाभ्यामुपस्थि
तयोरेव न भेदेनान्वयबोधः एकप्रातिपदिकोपस्थितयोस्तु भवत्येवेति गोपदलक्ष्ये स्वामिनि गोपदशक्यस्याभेदेनान्वयबो
धोपगमे क्षतिविरहादिति विभाव्यते तथाप्यषष्ठ्यर्थबहुव्रीहौ प्राप्तोदकोग्राम इत्यादौ व्यपेक्षारूपसामर्थ्योपगमेक
थमपि नाभिमतान्वयबोधनिर्वाहः तथा हि प्राप्तोदको ग्राम इत्यत्र प्राप्तेति क्तप्रत्ययस्य कर्त्रर्थः तेन प्राप्तिकर्तृप्राप्तपदार्थः
उदकपदं च तन्मते जलसंबंधिनि लाक्षणिकं तदेकदेशे जले प्राप्तस्य तादात्म्येनान्वयः न ह्येतावताप्युदककर्तृकप्राप्तिकर्मग्रामप्र
त्ययबोधनिर्वाहः अभिमतश्च तादृश एवान्वयबोधः तस्माद्व्यपेक्षारूपसामर्थ्योपगमेनानिर्वाहादेकार्थीभावरूपसामर्थ्यमुपेयं

मा॰को॰ तत्र समुदायशक्तिं विना नार्निर्वहतीति समासे शक्तिसिद्धिरिति वदंति। अत्रोच्यते यो मोदकोग्यामङ्स्यादावषष्ठ्यर्थे बहुव्री
हौ समुदायशक्तिं विनाप्यभिमतबोधसंभवदर्शनात् तथाहि तत्र प्राप्तिप्रकृतिकप्रत्ययस्य कर्त्तृकर्मत्वार्थः उदकं ताद्रात्म्येन क
र्त्तरि स निरूपकतया प्राप्तौ सा च कर्मणीति एवं विशेषणविशेष्यभावव्युत्पत्त्या समासे नारूढपदार्थैरेवोदककर्तृकप्राप्तिकर्म
त्वाद्यभिमतबोधो निर्वाहयितुं शक्यते॰ न च विशेषणविशेष्यभावव्युत्पत्तिकल्पने गौरवमिति वाच्यं॰ समुदाये तिरिक्तश
क्तिकल्पनमपेक्ष्य तत्कल्पन एव लाघवात् किंच समासस्थले समुदायशक्तिकल्पने शशशृंगं नास्तीत्यादौ शशशृंगपदे
समासानुपपत्तिः तत्र शशशृंगस्यालीकतयाविशिष्टार्थे समुदायशक्तेरसंभवात्। अपि च यदि समासस्थले खंडस्य शक्तिस्त
दा तस्याग्रगृहीताया नोपयोग इति गृहीतायाश्चोपयोगितं वाच्यं। न हि शशशृंगादिशब्दानामपदार्थेस्ति ग्रहशक्तिरूपसं
बंधग्रहेस्तिं भवति। तथा हि परबुद्धिविषयतया विशेषतउपस्थितेऽलीके शक्तिग्रहः सामान्यतउपस्थितेतत्र शशशक्तिग्र
हः परबुद्धिविषयतया विशेषतउपस्थितिरपि परबुद्धिनिरूपकतया परबुद्धिनिरूपणेनावश्यवेद्यत्वात् व्यवहारवि
२ बुधा शेषणतया परबुद्धीपमानाद्यं बुद्धिविशेषणत्वेनोपस्थितत्वाद्वा। तत्र माधवः परबुद्धेरुल्लेखो यदि प्रसरूपः स्यात्तदा तस्मि शिव
न्नुल्लेखे विषयोप्युल्लिख्येत न सहो वं॰ परबुद्धेरनुल्लेखवात् न द्वितीयः न हि कश्चिदलीके व्यवहारोस्तीति येनोन्नीयमानायां बु

द्धौविशेषणात्तत्पाविशेषतःशशशृंगादिभीसेत्तानवशाद्वांतरोपस्थितेःशशशृंगादौशशशृंगादिपदसंकेतग्रहइतिवाच्यं।
पदांतरस्याग्रहीतसंगतिकत्वेनाप्रतिपादकत्वात्नचशशशृंगादिशब्दःउच्चारयितृतात्पर्यपूर्वकःबालशुकादिभिन्नोच्चा
रितशब्दत्वादित्यनुमानेनसिद्धेतात्पर्येततात्पर्यस्यविषयकमित्यनुमित्याग्रहीतेतात्पर्यविषयेशशशृंगादिशब्दसंकेत
ग्रहइतिसामान्यतउपस्थितिपक्षोयुक्तइतिवाच्यं।एतादृशस्यग्रहसंभवेपितस्यशाब्दबोधानुपयोगित्वात्नहिता
त्पर्यविषयत्वोपलक्षितेधर्मिणिशक्तिग्रहःशाब्दबोधोपयोगीकिंतुगोत्वादिविशिष्टेऽन्यथागांबधानेतिवाक्यात्ता
त्पर्यविषयेसामान्यतोगृहीतसंकेतैःपदैरगृहीतविशेषसंगतिकानांशाब्दबुद्धिप्रसंगात् ननुविशेषांतरीभूतप्रवृत्तिनि
मित्तगोत्वादिधर्मविशिष्टेगवादौगवादिपदशक्तिग्रहोगोत्वादिविशिष्टमेवबोधयतिशशशृंगादीनांतुनिर्धर्मका
णांशाब्दबोधेबुद्धिविषयत्वस्वरूपोपलक्षणधर्ममात्रंपुरस्कृत्यशक्तिग्रहमपेक्षतेतदुक्तंविशेषांतरंविनाकृतःक
स्यनामात्रविषयोसवाच्यइतीतिचेन्नएवंसतिकूर्मरोमशशशृंगविकल्पयोरविशेषप्रसंगात्।नहिप्रवृत्तिनिमि
त्तस्याभावेकूर्मरोमनशशशृंगपदार्थइतिवक्तुंशक्यंकिमपरंघटोपिभवतांमतेऽलीकइतिसर्वेपिशब्दाःस्वल्पमेव
विकल्पेजनयेयुःयत्तुसर्वेपिप्रतिपत्तारःस्वस्ववासनातोगृहीतशशशृंगशब्दादिसंगतिकाइतितदसत्।अतिप्रसं

गात्। अनुभवं विना संस्कारापरपर्यायवासनाया असंभवाच्च। एतेन तत्तदर्थे समासं विदधता व्याकरणेन तेषु तेष्वर्थेषु स-
मासस्य शक्तिरेव प्रतिपाद्यते। अन्यथा क्वचिदपि व्याकरणाच्छक्तिनिर्णयासंभवः। तथा च शशशृंगाद्यखंडशब्दप्रतिपाद्यं
किंचिदवश्यमेषितव्यं। न च व्याकरणेन तत्तत्समासानां साधुत्वानुशासनमित्यपि परास्तं। उक्तरीत्या शशशृंगादिशब्दे
शक्तिग्रहासंभवात्। अत एव पंडितो ब्राह्मणः पाचकः पाठकः इतिवत् पंडितब्राह्मणः पाचकपाठकः इत्यादावुद्देश्यवि-
धेयभावेनान्वयपुरस्सरं वा समुदायशक्तिमूलकमेकार्थीभावसामर्थ्यरूपकः। सन्निहितेऽस्मिन् द्वारपदाहृतद्वारत्वेऽपि वै-
तरसंसृष्टस्वार्थस्यैव समासादुपस्थित्या उद्देश्यविधेयभावेनान्वयनियामिकायाः पर्युपस्थितेरभावाच्च दोषः।
अत एव च षट्कर्तुः प्रथममभक्षस्य तव षट्कर्तृविशिष्टभक्षानुवादेन प्राथम्यविधानायत्तिमाशंक्य प्रथममभक्षस्य इति स-
मस्तमेकपदं तत्रैकप्रसरत्वान्नैकांशेन षट्कर्तृविशिष्टभक्षणमुद्दिश्यापरांशेन प्राथम्यविधानं युक्तं। तथा सति प्र-
सरभेदात् सामर्थ्यविघातेन समासो न स्यात्। एतेन केवलभक्षानुवादेन प्राथम्यं विधीयतामित्यपास्तं। न च समविशे- शिव
षणात्वोद्दित्रिर्न स्यात्। प्रधानस्य तत्त्वेनैकस्याभावात्। तस्मात्प्राथम्यविशिष्टभक्षांतविधिरिति मीमांसकाः। तस्मात्तथा
न्वयबोधे उद्देश्यवाचकपदसमभिव्याहृततत्तदसंसृष्टार्थबोधकविधेयवाचकपदजन्योपस्थितिरेव तंत्रं। न च तथा

शाब्दबोधे प्रति उद्देश्यविधेयवाचकघटितैकसमस्तपदभिन्नपदजन्योपस्थितिर्हेतुरिति पूर्वोक्ते पीतवासाश्चतुर्भुज इत्या
दौ च न दोष इति वाच्यं। सकलेऽह्नि भेदघटितगुरुतरकार्यकारणभावकल्पनापेक्षया एकार्थीभावस्वीकार एव लाघवात् न चैवं स
प्तदशारत्निर्वाजपेययूपो भवति लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यादावपि सप्तदशारत्निवत्त्वीयजमानः पंचावत्तैव वपाका
र्येत्यादौ वाजपेययूपारत्निमुष्णीषमववत्तं वा सप्तदशत्वलोहितस्पर्शवत्त्वानां विधानं न स्यादिति वाच्यं। अत्र यूपार
त्निऋत्विग्वपावत्तानामनतिदेशप्राप्ततया तिदेशाद्युपदेशेष्ववलात्वेन तत्प्रहृतेः एवमेतैर्विशिष्टविध्यंगीकारे सा
ऽकृतेः तस्य पीतलोचनानां तु सा प्रदश्यलोहितस्पर्शत्वमात्रेषु तात्पर्यं गम्यते इति तावन्मात्रविधित्वव्यपदेशः न चैवमन
पारीत्याप्रथमभक्षणत्वस्यापि प्राप्यस्य विशिष्टभक्षान्तरविधिः स्यादिति वाच्यं। तत्रोभयोरप्युपदेशेन तथा वक्तुमशक्य
त्वादित्याधुनिकशाब्दिकोक्तिरपि परास्ता पंडित आत्रेयराज इत्यादौ उद्देश्यविधेयभावेनान्वयबोधाभावस्यानुभविकत्वे विवा
दे संभवेन तादृशशाब्दबोधे बाधकाभावेन तत्र दारासाध्यनिरुक्तैकार्थीभावस्यानावश्यकत्वात् घटरूपदे घटपटत्वयोः पृ
थगुपस्थित्यभावेन तथान्वयबोधाभावेऽपि पंडित आत्रेयराज इत्यादौ समुदायशक्तिजन्यविशिष्टोपस्थितेरपृथगुप
त्वेऽपि समासघटकपंडितपदआत्रेयराजपदजन्योपस्थित्योः पृथगुपस्थितया तथान्वयबोधसंभवतामपि दुर्वारत्वात्॥

अतएवेत्यादिकमपिमंदंमीमांसकैस्तादृशैकार्थीभावानभ्युपगमेनतेषांतन्मूलकभक्त्यंतरविध्युपगमस्यासंगतत्वात।न
चतदेकदेशिभिस्तादृशैकार्थीभावोभ्युपेयतइतिवाच्यं।तदनभ्युपगंतॄणांमीमांसकानामपिभक्त्यंतरविध्युपगमेनतदुप
पादनवत्त्वेनैवसर्वेषांभक्त्यंतरविध्युपगमसंभवात।किंचभवतांसमासेसमुदायशक्तौएतथैवनिषादस्थपतिंयाजयेदि
त्यत्रनिषादस्थपतिपदेकर्मधारयएवनतुतत्पुरुषःतत्पुरुषात्कर्मधारयस्यलघुत्वादितिनिषादस्थपत्यधिकरणीयमी
मांसासिद्धांतविरोधोदुष्परिहारःसर्वत्रसमासेएकार्थीभावानुरोधेनसमुदायशक्तेरावश्यकत्वेनकर्मधारयतत्पुरुष
योर्विशेषेणलाघवाभावात।अथोक्तसिद्धांतोनोक्तलाघवमूलकोयेनोक्तानुपपत्तिःस्यात।किंतुवैदिकसमासस्यकर्म
धारयतत्पुरुषान्यतरत्वसंदेहेकर्मधारयत्वमेवनतुतत्पुरुषत्वमित्यनादितात्पर्यमूलकनियममूलकएवेतिनतद्विरोधःय
द्वासमासस्यविशिष्टार्थशक्तौनिषादरूपःस्थपतिःसमासार्थोनिषादानांस्थपतिस्त्वेतरीकोनिषादभिन्नःसमासार्थो
वेतिसंदेहेनिषादभिन्नोपस्थितिकल्पनप्रयुक्तलाघवेननिषादरूपस्थपतिरेवसमासार्थइतिलाघवमूलकस्योक्तसिद्धां
तइतिनतद्विरोधइतिचेत्तुल्यंममापितथाहिवषट्कर्तुःप्रथमभक्षइत्यत्रविशिष्टोद्देश्यकत्वविशिष्टविधायकत्वयोरितिसंदेहेवैदि द्विव
कवाक्यस्यविशिष्टविधेयकत्वमेवनतुविशिष्टोद्देश्यकत्वमित्यनादितात्पर्यमूलकनियममूलकएवविशिष्टविधिरिति

भक्षांतरविधिसिद्धांतविरोधः यद्वा विशिष्टोद्देश्यकत्वे भक्षानुवादेन प्राथम्यवषट्कर्त्रोर्विधायकत्वे वा वौक्त्येवाभेदसंपृक्तगो
रवेणाप्राप्तसेवानुवादेन वचनांतरमाप्यनुसंधानसंपृक्तगौरवेण चन विशिष्टोद्देश्यकत्वं नवा भक्षानुवादेन प्राथम्यवषट्क
र्त्रोर्विधायकत्वं किंतु विशिष्टविधायकत्वे लाघवादिति लाघवमूलकमेव भक्षांतरविधिरिति न ते सिद्धांतविरोधः नचैव
मेकवाक्यत्वाय भक्षांतरविधिरिति पर्यवसितां तथाचागतं ताद्दशैकार्थीभावेनेतिवाच्यं। ताद्दशैकार्थीभावानभ्युपगंतृमि
रपि मीमांसकैरन्येष्वसमासादिष्वत्तौ तद्भिन्नवाक्ये चैकवाक्यताया अभ्युपगमेनैकवाक्यत्वस्य ताद्दशैकार्थीभावस्वरूप
ताभावात् नच ताद्दशैकार्थीभावस्वरूपमेकवाक्यत्वं समासादिवृत्तिमात्रस्यलीयमन्यदेवास्माभिरुपगम्यत इति वा
च्यं वृत्तिभिन्नस्थलीयस्यैकवाक्यतायैव निर्वाहे वृत्तिमात्रस्यलीयातिरिक्तैकवाक्यत्वकल्पने प्रमाणाभावात् नचस
मर्थः पदविधिरित्यनुशासनमेव तत्र प्रमाणमितिवाच्यं। तत्र सामर्थ्यस्य व्यपेक्षारूपस्यैवोपगमेपि निर्वाहात् तस्माद्वष
ट्कर्तुरित्यादौ भक्षोद्देश्यकप्राथम्यविधेयकबोधे सति वषट्कर्त्रुद्देश्यकप्राथम्यविशिष्टभक्षांतरविधेयकशाब्दबोधे वा
धकाभावेन समासेनोद्देश्यविधेयभावेनान्वय इति स्ववासनामात्रविजृंभितमेव। प्रयुज्यते चैतत् महावाक्यार्थबोधे

न्या॰कौ॰ वांतरवाक्यार्थबोधस्य हेतुतया मङ्गोद्देश्यकप्राथम्यबोधं विना पदकृतुद्देश्यकप्राथम्याशिष्य मङ्क्तांतरविधेयकबोधस्यानुप
पपत्तेरितिमात्तस्य मपहाय सुधीभिरालोचनीयं। यत्तु समासे उद्देश्यविधेयभावेनान्वयबोधे नीलघटो घटो नील इति स
मासस्य समयोरविशेषणबोधादालंकारिकाणामविमृष्टविधेयांशस्य समासे दोषत्वोक्तिरसंगतास्यादिति घटो नील
इत्यत्रैव नीलविधेयकबोधोन समासमाहु। निर्दिष्टस्यैवोद्देश्यत्वं चरमनिर्दिष्टस्यैव विधेयत्वमिति नियमादिति तदसत्। त
न्नियमस्य समासे तैरप्यननुपगमात् तथा अन्यथा विधेयस्याप्यन्नान्युपसर्जनत्वे सति उद्देश्यानंतरं निर्देशाभावो दोषताम
योजकः समासे विधेयस्योपसर्जनत्वात् दोषत्वं वाक्ये तु उद्देश्यानन्तर्याभावान्नत्वमिति तदुक्तेरसंगते उद्देश्यानंतर
निर्देशाभावस्यैव दोषतामयोजकत्वोक्तेरुचिततात्। एवं चाविमृष्टविधेयांशस्योद्देश्यविधेयभावेन बोधाजनक
त्वे तद्दूषकतावीजं किंतु एकपदेन स्वार्थे सिद्धत्वस्यान्यपदेन साध्यत्वस्याभिव्यक्त्यापकर्षात्। दिमतीति। मिथ्यामहिम्ना
मित्यादौ मिथ्यात्वस्योपसर्जनत्वेन सिद्धत्वबुद्ध्या मर्द्दनेऽपकर्षाभिव्यक्तेः मङ्क्ता रोहयमित्यादावपि स्फुकारस्य सिद्ध
त्वाभिव्यक्त्या। भिमानिनो रावणस्यापकर्षप्रतीतेस्तत्समासे वाक्ये च दोषत्वं। वस्तुतस्तु उक्तस्य दोषता प्रयोज शिव

कत्वेउपसर्जनत्वं समासेउद्देश्यानं तर्कभावभ्रवाक्येतत्प्रयोजकं एवं च समासे विधेयस्यपवात्यत्रोपसर्जनत्वं
तत्रयथातथास्तु यत्रतुतस्मिनात्यत्रोपसर्जनता तत्रसमासेउद्देश्यविधेयभावेनान्वयेन किमपि बाधकं पश्याम
किं चाविमृष्टविधेयांशस्थलेउद्देश्यविधेयभावेनान्वयेनबोधाभावे बोधानुपपत्तिस्तस्या विमृष्ट विमृष्ट विधेयां
शत्वमेवानुपपन्नं विधेयांशस्यैवाभावात् अपि च रसायकर्षेत्याच मत्कोराभावस्यैव रोषता प्रयोजकत्वेन रसवत्सि
कास्येत्रविमृष्टविधेयांशस्थलेउद्देश्यविधेयभावेनबोधाभावे प्युनञ्समासेनत्वं गीकारेबाधकाभावइत्याद्यत्रप
त्रहोयत्रभिभिदिक्रा (व्यक्तानत्का)। समासेएकार्थीभावाभ्युपगमेपि नसमुदायशक्तिसिद्धिः तथाहि एकार्थी
भावोनविशिष्टैकार्थप्रतिपादकत्व (ब्बि) विशिष्टस्यविशेष्यविशेषणाभ्यामनतिरिक्तत्वेन ऐक्यासंभवात् किंतु
विशिष्टविषयताकबोधप्रयोजकत्वरूपमेकवाक्यत्वमेव तत्र समुदायशक्तिं विना व्याकांक्षादिसाचिव्यात्ता
दृशविषयताशालिबोधजनकत्वादेरुपपन्नेनचैवं धवखदिराविस्तादौ समासानुपपत्तिः स्वार्थवत्वाद्यवच्छिन्न
नानाविषयताकबोधजनकत्वादिनिवाह्यत्वं तत्प्रयोज्यविषयतयासाकांक्षत्वात् परस्परपा वा निरूपितावा विधे
यतातत्प्रयोजकत्वात्मकतद्देशवाक्यत्वस्यैवनिरुक्तप्रयोजकत्वरूपत्वात् धवखदिराविस्तादौ च धव

व्या॰कौ॰ त्वाघवाच्छिन्ननानाविशेष्यतानिरूपितैकद्वित्वादिप्रकारताशालिबोधोदयान्नानुपपत्तिः। इत्थं चायमेति पु
त्रो राज्ञः पुरुषोपसर्पतामित्यादौ राजपुरुषपदादीनां समासवारणाय समर्थपदयोरेव समासानुशासनात् तेन
सामर्थ्यं निरुक्तैकवाक्यतारूपमेव। तदेव चैकार्थीभावशब्देनोच्यते व्यपेक्षापि निरुक्तैकवाक्यतापर्यवसितैवेति
व्यपेक्षैकार्थीभावयोरविनार्थतो भेदः किंतु शब्दभेदमात्रमेवेति व्यपेक्षैकार्थीभावयोर्भेदाभिमानवतां परस्प
रं कलहोऽज्ञानमूलक एवेति पुरुषोत्तमशर्मणः। एतेन समासे समुदायशक्त्यंगीकारे राजपुरुष इत्यादिशब्दसाम
र्थ्याश्रयेन तद्घटपदादिप्रत्यक्षप्रतिबंधकतायां सामर्थ्यघटकतया विशिष्टविषयकोपस्थितिरेकैव निवेश्येत इ
ति लाघवं तदनंगीकारे तु समासघटकपदार्थोपस्थितिद्वयादिकं निवेशनीयमिति गौरवमिति समुदायशक्तिस्वी
कारस्यैवोचितत्वमिति निरस्तं। उक्तरीत्या समुदायशक्त्यंगीकारासंभवेन प्राप्तशक्तिकगौरवस्यादोषत्वात्। वस्तुत
स्तु। एकार्थीभावांगीकर्तृवैयाकरणामते एकार्थीभावो नाम समासादिरूपसमुदायशक्तिः राजपुरुषादिस
मुदायस्य राजसंबंधिपुरुषादिरूपविशिष्टार्थे शक्तिरिति तन्नार्थः। तथा सति राजादिपदे सर्वथा स्वार्थस्य राजादे शिव
स्त्यागोन तद्व्रात्मानुपपत्तेः पुरुषमात्रस्यानयने च स्यात् किं वा राजपदार्थः पुरुषे विशेषणतामिति व्यवहारो न स्यात् तावदि

च समुदायेनैव राजसंबंधिपुरुषोपस्थापनेन राजादिमानोपपत्त्या बाधदोषो न संभवति किं चेत्यादि द्वितीया
दौ घोपि न समंजसः। निष्कौशाम्ब्यादिमुख्यमनस्तु आमोदाव्ययमात्रेण चंपकपुष्पमादिव्यवहारवत्तत्र स्वहृशार्थी
व्ययमात्रेण तद्दारोपेण तथाव्यवहारोपपत्तेरिति भावः तेन तथापि समुदायस्य विशिष्टार्थे शक्तिर्नियुक्तोन्यवयवानांल्क
मार्थवत्त्वत्यागेनारोपितत्वस्वीकारेण च गौरवापत्तेः। किंतु एकार्थीभावो नाम एकार्थत्वं न चैकोपस्थितिविषयार्थक
त्वं तथा चावयवार्थाश य पथाबाधके पृथक्पदैः पदार्थानामुपस्थितावाकांक्षादिवशाद्विशेष्यविशेषणभावापन्नविशि
ष्टार्थप्रतीतिर्नैवं समासादिरूपवृत्तौ किं त्ववयवशक्तिभ्यां समुदायशक्तिसहकृताभ्यां जायमानोपदार्थोपस्थितिरेव
विशेष्यविशेषणभावापन्नविशिष्टार्थविषयिण्येव समर्थत्वं भवति। न चैवं वैयाकरणानये राजपुरुषादिपदं राजसंबंध
वत्पुरुषे शक्तमित्याद्याकारक एव समुदायस्य शक्तिग्रहस्तत्र च प्रामाप्रामविवेके न विशिष्टशक्तिः संबंधांश एव पर्यवस्यती
ति संसर्गांशे समुदायशक्तिस्वीकारेण वाक्यवृत्त्योः को विशेष इति वाच्यं वाक्ये हि फलबलात्पदार्थोपस्थितिसमयनियमतः
संसर्गांशे उद्बोधकासमवधानकल्पनेनन्यथागुपस्थितयोः पदार्थयोः पश्चात्संसर्गबोधः। वृत्तौ च पदार्थोपस्थिति
समयएव नियमतः संसर्गांशेपुद्बोधककल्पनेन विशिष्टैवोपस्थितिरिति विशेषात्। अत एव मासोदकइत्या

द्दौ विशेष्यविशेषणभाववैपरीत्येन बोधः तत्राप्रयुज्यमानषष्ठ्यर्थः संसर्गश्चेत्तु मयमेव समुदायशक्तिसाध्यं अनन्यलभ्यत्वा
त् कृतस्तत्र राजादेरुपस्थितिसंभवे तत्र समुदायस्यापि शक्तिः कल्प्यते गौरवाच्च नामार्थयोरभेदान्वयादिव्युत्पत्तेः प्रपञ्चः प्रत्ययमु
पस्थितनामार्थादिविषयाः अत एव राजपुरुषैकदेशे राज्ञि वाक्य इव ऋद्धस्येत्यादिविशेषणान्वयो न ततः सपदार्थैकदेश
त्वादिति इदमेव वैयाकरणनवीनैरेकार्थीभावपक्षे समुदायशक्तिसिद्धिनिष्कर्षः कृतः एवं च नैयायिकमते प्रत्येकं राजपद
पुरुषपदजन्योपस्थितिद्वयघटिता शाब्दसामग्री वैयाकरणमते च राजपदपुरुषपदसमुदायेन त्वितप्रजन्यैक विशि
ष्टोपस्थितिघटिता शाब्दसामग्रीति एवं कक्षत्रितयजन्यत्वनिवेशे विशेष्यविशेषणभावे विनिगमनाविरहेणाकारणता
वृद्धिरवच्छेदकगौरवं च वैयाकरणमते नैयायिकमते च लाघवमिति स्पष्टमेव तस्माद्राजपुरुष इत्यादिसमासे राजादि
पदलक्षणायैव शाब्दबोध इति सिद्धं नवीनास्तु राजपुरुष इत्यादिसमासे न राजादिपदस्य राजसंबन्धी लक्षणा न वा समुदा
ये शक्तिः किंतु स्वत्वसंबंधेन राजादेः पुरुषादावन्वये न राजकीयः पुरुष इत्यादिरेवान्वयबोधः न च नामार्थयोर्भेदान्वयस्य
व्युत्पत्त्या कथमुक्तरीत्यान्वयबोध इति वाच्यम् घटः पटो नेत्याद्यनुरोधेन समासानुरोधेनापि तादृशव्युत्पत्तेः संकोच शिव
कल्पनात् वस्तुतस्तु तादृशव्युत्पत्तौ मानाभावः न च तादृशव्युत्पत्त्यनङ्गीकारे राजपुरुष इत्यादावपि पुरुषादिविशेष्यकरा

जादिप्रकारत्वसंसर्गकबोधापत्तिरितिवाच्यं।तादृशबोधस्याप्रसिद्धेर्वापत्त्यसंभवात्।नचराजइत्यादौयत्रषष्ठ्यादिविभ
क्तेरेवस्वारसिकलक्षणयाशक्तिभ्रमेणवापुरुषाद्युपस्थितिस्तत्रतद्विशेष्यकराजादिपदार्थप्रकारकस्वत्वसंसर्गकान्वयबो
धस्यप्रसिद्धौकापत्तिस्संभवतीतिवाच्यं।तत्रतादृशप्रकृतिप्रत्ययानुपूर्वीविशेषरूपाकांक्षाज्ञानसहकृतात्तद्विभक्तिजन्य
पुरुषाद्युपस्थितिघटितसामग्र्याएवतादृशबोधोत्पत्तिनियामकत्वात्तदभावादेवोक्तापत्त्यसंभवात्।अतएवस्वत्वसंबंधेनरा
जादिविशिष्टपुरुषादितात्पर्यकतदादिपदघटितात्सुंदरइत्यादिवाक्यात्पुरुषादिविशेष्यकस्वत्वसंसर्गकराजादिप्रका
रकबोधस्यप्रसिद्धौराजापुरुषःसुंदरइत्यादौतादृशबोधापत्तिस्संभवतीतितादृशव्युत्पत्तिकल्पनमावश्यकमित्यपिपरास्तं।
सुंदरइत्यादिवाक्याधीनशाब्दबोधसामग्र्यास्तत्सदत्ताघवच्छिन्नविशेष्यकसुंदरादिपदसमभिव्याहारज्ञानसहकृत
नदादिपदजन्यतादृशविशिष्टार्थोपस्थितिघटिततयातदभावादेवराजापुरुषःसुंदरइत्यादौतादृशान्वयबोधापत्तिवार
णासंभवात्।समासघटकपदोपस्थाप्येनसमासाघटकपदार्थस्यचनान्वयः।आकांक्षाविरहात्।अतएवऋद्धस्यराजमा
तंगइत्यादौऋद्धादिपदार्थस्यराजादौयोग्यतासत्त्वेपिनान्वयः।यद्यपिसमभिव्याहाररूपाकांक्षासंभवतितथापिसमभिव्या
हारमात्रंनाकांक्षाअपितन्वयबोधविशेषेपदविशेषयोःसमभिव्याहारः।नामार्थयोरभेदान्वयबोधेचसमानविभक्तिकयो

र्थोन्योः समभिव्याहारश्चाकांक्षा उक्तस्थले च राजपदस्य निर्विभक्तिकतयानन्तसमभिव्याहारश्च द्वयोरभेदान्वयबो-
धौपयिकाकांक्षा। राजपदोत्तरं पदि लुप्तषष्ठीप्रतिसंधीय तेन तदा शोभनं दधीत्यादाविव तत्रापि तादृशाकांक्षावत्त्वेन एव
अन्वयबोधोपि भवति पदं तत्साधुतया न तथा प्रयुज्यते अत एव शोभनेव वनेव वने चर इत्यादौ विरूपाभ्यादास्याः पुत्र इत्यादौ वनदास्या-
दौ शोभन विरूपाद्यभेदान्वयबोधौपयिकाकांक्षासत्वे नान्वयबोधसंभवेपि न तथा प्रयुज्यते। असाधुता च तत्र सामर्थ्या-
तिदेशात्। सापेक्षमसमर्थवद्भवती। तिस्मृतेः सापेक्षत्वं च प्रकृतसमासानिविष्टपदार्थाद्वित्त्वार्थपरत्वं प्रधानार्थबोधक-
पदस्य सापेक्षत्वेपि समासः साधुः राजपुरुषो दर्शनीय इत्यादौ उत्तरपदस्य दर्शनीयादिसापेक्षत्वेपि समाससाधुत्वा-
त्प्रधानत्वं चार्थस्य समासजन्यबोधे मुख्यविशेष्यत्वं राजपुरुषमानयेत्यादौ पुरुषादेः कर्मतादिविशेषणतया भानेपि
समासजन्ये अवांतरवाक्यार्थबोधे मुख्यविशेष्यतयादर्शनीयं राजपुरुषमानयेत्यादौ समासः साधुः न चैवं चित्रगु-
रित्यत्र गोपदस्य लक्षणया गोस्वामिबोधकतया समासजन्यबोधे च तस्य मुख्यविशेष्यतया गौपदं प्रधानार्थकमे-
व तदुपस्थाप्यापांगे विसमासानिविष्टशोभनादिपदार्थान्वयविवक्षायामपि समासाधुतास्यादिति वाच्यं। प्रधानार्थे
इतरान्वय एव समासस्यासाधुत्वात्। उक्तस्थले च स्वामिविशेषणतया गोरप्रधानत्वात्। अथ सापेक्षपदे समासस्यासाधु-

त्वे चैत्रस्य दासभार्याशरैः शातितपत्रो वृक्ष इत्यादौ दासशातितादिपदस्य चैत्रशरादिपदसापेक्षत्वात् समासो न साधुः स्या
त्तद्भेदेनैतराद्यन्वयितायाः सापेक्षताघटकत्वे चैत्रस्य गोरूपमित्यादेरपि गवि चैत्रादिसंबंधान्वयविवक्षायां प्रयोगापत्तेः
एवं चैत्रस्य सख्युर्धनमित्यर्थे चैत्रसखिधनमिति समासो न स्यात् पदत्रयस्योक्तेतत्पुरुषाभावात् सख्युर्धनं सखिधनमित्या प३
दिसमासानंतरं चैत्रस्य सखिधनं चैत्रसखिधनमिति समासस्यैवादरणीयत्वात् तत्र चैत्रसंबंधिन एव प्रह्वत्समास
निविष्टचैत्रपदस्य मुख्यार्थस्याभेदेन सखिपदार्थान्वयित्वात् एतेन कारकप्रतियोगिपदातिरिक्तपदसापेक्षपदेनैव स
मासः तदुक्तं कातंत्रपरिशिष्टकृता। कारकप्रतियोगिभ्यामित्यादि चैत्रस्य दासभार्येत्यादौ दासस्य संप्रतियोगिक
मिति चैत्रपदस्य दासपदार्थप्रतियोगिबोधकत्वात् शरैः शातितपत्र इत्यादौ शरादिपदस्य शातनादिक्रियायां का
रकबोधकत्वात् समासः साधुरित्यपि परास्तं चैत्रसखिधनमित्यादौ चैत्रादिसंबंध्यर्थकचैत्रादिपदस्य प्रतियोगिपद
त्वाभावात् चैत्रसंबंधिनः सखित्वाद्यप्रतियोगित्वात् अभेदे। यत्र हि समस्यमानपदार्थे विशेषणान्यपेरतराद्यन्वयविवक्षात
त्र समासो न भवति यत्र तादृशपदार्थावच्छेदकेतराद्यन्वयस्तत्र भवत्येव चैत्रस्य दासभार्येत्यत्र दासत्वे चैत्रादिसंबंध
स्यान्वये न तु दासपदार्थे दासे शरैः शातितपत्र इत्यादौ शातने शरकरणकत्वादेरन्वयः न तु शातितपदार्थे शातनक

व्या॰ कौ॰ मेरित्यत्र तोमवत्सेव समासः चैत्रस्य रविधनमित्यत्रापि सवित्व एव चैत्रसंबंधिनोऽन्वयः न तु सविपदार्थे सत्त्वादिति नानुपप
त्तिः न चैवं दासत्वादौ प्रमेयादिपदार्थान्वयविवक्षायां प्रमेयं दासभार्येति प्रयोगापत्तिरिति वाच्यं प्रमेयो दास इत्यादावपि पदा
र्थैकदेशे दासत्वादौ प्रमेयाद्यभेदान्वयविरहात् तत्रैकदेशान्वयस्य तु सत्त्वात्तथा प्रयोगविरहात् षष्ठ्याद्युपस्थितप्रति
योगित्वस्य न हि तस्या समुपस्थाप्यत्वे तत्संसर्गितयोपि कर्तावच्छिन्नस्य भेदाभेदाभ्यां संबंधि कृदासत्वावच्छेद्योऽपि तु सत्त्व वि
हद एव चैत्रस्य दासस्त्रेत्र दासरूपादौ तादृशान्वयबोधोदयात् अत एव चैत्रस्य दासभार्या इत्यादौ निर्वाहः अथैवं पितुः स्व
र्गकाम इत्यादिसमासानुपपत्तिः दानादिवाक्ये नस्माधुस्यात् तत्र समस्यमानस्वर्गादिपदार्थे स्वर्गादावपि पित्रादिसंबंधान्व
यात् इति चेन्न कामनापामेव पित्रादिसंबंधस्य स्वर्गभागित्वेन विषयता विशेषरूपस्यान्वयो न तु स्वर्गादावित्युपगमेन
सामंजस्यात् अतो मुक्तं पितरमुद्दिश्य दानादिस्थले पितरि स्वर्गस्य वाधे विनतादृशवाक्यस्यायोग्यता न चैवमपि कामना
बोधकपदस्यैव समासाघटकपदसापेक्षतया न समासः स्यात् तत्पदस्य प्रधानार्थकत्वेपि प्रधानार्थकपदस्यापि प्रधा
नार्थे मुख्यविशेष्ये इतरान्वये न सापेक्षत्वात् समासविरहात् अन्यथा शोभनचित्रगुरित्यादिप्रयोगप्रसंगरूपपूर्वोक्त शिव
दोषापत्तिरिति वाच्यं क्रियाभिन्नप्रधानार्थकपदोपस्थाप्यविशेष्यतांशे इतरान्वये नैव प्रधानार्थकपदसापेक्षत्वात् ॥

प्रकृते च कामनायाः क्रियात्वात् चैत्रस्य कृतोपकारोपमित्यादिप्रयोगापत्तेः अत एव क्रियाभिन्नत्ववत्सप्रतियोगिकाम्यत्व
मन्विच्छार्थे विशेषणं देयं अन्यथा चैत्रस्य सुंदरपुत्रोपमित्यादौ पुत्रत्वादौ चैत्रसंबंधावच्छेदेपि न समासानुपपत्तिः। न चैवं चैत्रस्य ह
ष्टपुत्रो मैत्रस्यापि स्यादिति वाच्यं। इष्टत्वादित्ति दिक् इति प्राहुः। अथ गंगायां घोष इत्यादौ कथं तीरे शैत्यपावनत्वादिविशेष
स्य बोधः तत्र गंगापदशक्तिलक्षणयोरभावादिति चेन्न व्यंजनयैव तस्य बोधात् व्यंजना च वृत्त्यंतरमित्यालंकारिकाः। न त्व
त्र गंगायां घोष इत्यादौ शैत्यपावनत्वादिविशेषविशिष्टस्य लक्षणयैव प्रतीतिसंभवे न व्यंजनायां मानाभावात् न
च शैत्यविशेषादिविशिष्टस्य व्यंग्यस्य पूर्वमनुपस्थितौ तत्र शक्यसंबंधाग्रहान्न लक्षणया निर्वाह इति वाच्यं। विशिष्टस्या
नुपस्थितौ व्यंजनायामपि नदीपदेनाग्रहाद्बोधकत्वापत्तेः। न च सा स्वरूपसती तद्बोधिका। तर्हि अर्थांतराणाम
पि बोधापत्तेः गंगापदेन कदाचिदर्थांतराणामपि व्यंजनयावबोधनात्। तत्र व्यंजनास्त्वात्। अथ गंगापदेन लक्ष
णया गंगात्वेन तदुपस्थितौ तत्सहितेन गंगापदेन शैत्यपावनत्वादिविशेषविशिष्टस्य स्मृतिस्तदा तदीयत्वेन व्यंज
नाग्रहात् इदं मे विशिष्टशाब्दधीः यदि च तद्धर्मविशिष्टे लक्षणाग्रहादेव तद्धीस्तदा लक्षणया गंगात्वेन तटप्रती
तिजेनितत्वात् तथा पुनर्बोधजननमिति चिंत्यं। सैंधवेनस्थीयतामित्यादौ उभयपरत्वे शक्त्या एकबोधजनितेपि

४०

न्या·कौ·

च्छाहकस्याशक्त्यैव बोधांतरजननवत्त्वईमे विशिष्टस्याहृषिपदउपपत्तेः अथ स्वज्ञाप्यसंबंध एव व्यंजनापत्तेः शक्तेः शक्तेर्य
द्वसंबंधस्य वानपदार्थयोः संबंधमेकीदृश्याभाने किंतु स्वज्ञाप्यसंबंधस्यैव संसर्गतात त्र व्यंजनपैवशाब्दधीः अत एवा
पभ्रंशादावपि व्यंजनास्वज्ञाप्यसंबंधस्य सत्त्वादिति चेन्न शक्तेः शक्यसंबंधस्य वाऽभाने शाब्दप्रतीतेरसिद्धेः अथ गौर्वा
हीक इति पदाद्वृत्तिजाड्यविशेषविशिष्टप्रतीतिरानुभविकी सा च न शक्यधीः जडो पेजडत मोषमित्यादितत्ताहृश
प्रतीत्यनुत्पत्तेः न वा लक्षणया तद्धीः पदांतरेण लक्षणयापि तथा प्रतीतेरनुदयाद्दतो व्यंजनाधीनैव सा प्रतीतिः न
क्षणया ताहृशप्रतीतौ चेल्लक्षणाधीनलाक्षणिकप्रतीतौ लाक्षणिकप्रतीतेर्हेतुत्वापातादिति चेन्न लाक्षणिकप्र
तीतिसामान्ये हेतुत्वेपि लक्षणया गोपदाधीनायां जाड्यविशेषविशिष्टस्य प्रतीतौ लक्षणया गोत्वेन वाहीकप्रती
तेर्हेतुत्वस्वीकारात् तत्पदांतरकल्पनापेक्षया ईदृशहेतुत्वकल्पनाया एव लघीयस्त्वात् अथ सत्यपि बाधग्रहे क्वचिदर्थ
विशेषाणां प्रतीतिरस्ति सा च व्यंजनयैवेन तु लक्षणया लाक्षणिकबोधे बाधग्रहे क्वचिदर्थविशेषाणां प्रतीतिर
स्ति सा च व्यंजनयैव न तु लक्षणया लाक्षणिकबोधे बाधग्रहस्य विरोधित्वात् व्यंजनिकबोधे तु न तस्य विरोधित्वं दो शिव
षविशेषाजन्यत्वस्यैव व्यंजनाः अन्यत्वस्यापि प्रतिबध्यतावच्छेदककोटौ प्रवेशादिति चेन्न लक्षणादिविशेषाजन्यत्वे

सेवदोषविशेषाजन्यत्ववत्प्रतिवध्येप्रवेशयितुमुचितत्वाद्दृष्टांतरकल्पनेगौरवादितिसंक्षेपइतिनैयायिकसिद्धांता
नुसारिणीसरणिः ॥ अत्रालंकारिकधुरंधराः ॥ काव्यंयशसेर्थकृतेव्यवहारविदेशिवेतरक्षतये। सद्यःपरनिर्वृतयेकां
तासंमिततयोपदेशयुजे इतिकाव्यप्रकाशकारोक्तेः अदोषगुणवत्काव्यमलंकारैरलंकृतं। रसान्वितंकविःकुर्व
न्कीर्तिंप्रीतिंचविंदतीतिव्यासोक्तेश्चानेकप्रयोजनवत्त्वेपिनीरसोहिनिवंधोयः सोपशब्दोमहाकवेः सतेनाकविरे
वस्यादन्येनास्मृतलक्षणाइतिध्वनिकारोक्तेः स्वादुपाकेप्यनास्वाद्यंभोज्यंनिर्लवणंयथा तथैवनीरसंकाव्यंस्या
द्रसिकतुष्टयइतिचोक्तेःरसप्रीतिर्मुख्यंप्रयोजनंदोषाभावगुणालंकारवच्छब्दार्थोभयरूपस्यकाव्यस्यस्व
गम्यतेरसश्चरसोवैसइत्यादिश्रुतिप्रतिपादितंविभावानुभावादिसंवलितंआनंदांशेभग्नावरणंमनोवृत्तिविशे
षरूपंरत्याद्यवच्छिन्नचैतन्यंतत्प्रतिपत्तिश्चब्रह्मप्रतिपत्तिवदवश्यमपेक्षितासहृदयानांसाचकाव्यादितिकाव्यस्य
तस्यचसंबंधमंतरातिप्रसंगसंभवभावादवश्यमेषितव्योव्याख्यापारंकश्चित्तसचशक्तिलक्षणातिरिक्तःस्वेतिव्यंज
नाख्यएवभवतीतिमहामुनिभरतसिद्धांतः अत्रकेचिदाहुः शक्तेरेवतत्प्रतिसंभवेव्यंजनाख्यवृत्त्यंतरकल्पनम
युक्तमितितन्न अस्माच्छब्दादयमर्थोबोद्धव्यइतीश्वरेच्छारूपसंकेतःशक्तिरितितार्किकमतेईश्वरेच्छायाःसर्वविषय

५१

न्या·कौ·

कत्वेन सर्वशब्दानामेकैव शक्तिः स्यात् उपाधिभेदाद्भेद इति यदि तदा प्रतिशब्दं शक्तिभेदापत्तिः शक्यतावच्छेदकैक्यादनुगमे
पर्यायशब्दानां शक्यतावच्छेदकैक्येपि शक्यतावच्छेदकभेदाच्छक्तिभेदस्वीकारे न सामंजस्यमावहेत् किं चेश्वरेच्छायाः श
ब्दावृत्तिताच्छक्तेः शब्दनिष्ठत्वेन स्यात् विषयत्वरूपसंबंधस्य तु अर्थादावतिप्रसक्तत्वात् लाक्षणिकशब्दस्यापीश्वरेच्छ
विषयत्वेन शक्तत्वसंभवेन लक्षणोच्छेदप्रसंगाच्चेति अत्रोच्यते कस्य शब्देनार्थस्य संबंध इति पारमर्षसूत्रानुरोधेन स्वा
भाविक एव शब्दार्थप्रतीतिजननसामर्थ्यरूपः शब्दसंबंधः शक्तिः न च घटपदे गृहीतैतादृशशक्तिकस्य कलशपदस्य श्रव
णोत्तरमर्थबोधः स्यात् शक्तेरैकत्वादिति वाच्यं कलशपदनिष्ठत्वेनाग्रहात् न चैतादृशसंबंधरूपशक्तेर्लाक्षणिके
पि सत्त्वाल्लक्षणोच्छेद इति वाच्यं अन्वितशक्तिवादे लाक्षणिके अन्वितानुभवजननसामर्थ्यानंगीकारादन्वितानु
भवजननसामर्थ्यरूपशक्तेस्तत्राभावात् लक्षणायास्तु पदार्थस्मरणमात्रहेतुत्वात् अत एव लाक्षणिकं ना
नुभावकमिति प्रसिद्धिः अभिहितान्वयवादे तु पदशक्तौ परिस्थितेषु पदार्थेष्वन्वयायोग्यताप्रतिसंधानेन तात्पर्यानु
पपत्तिप्रतिसंधानेन वा पदार्थेनैव स्वसंबंधिपदार्थांतरं वा स्वार्थान्वययोग्यमुपस्थाप्यते नेतत्र पदार्थनिष्ठैव लक्ष
णा न पदनिष्ठा पदार्थैरेव स्ववाक्यार्थोपजन्यते न तु पदैरिति नालाक्षणिके शक्तत्वप्रसंगः पदे लाक्षणिकत्व

शिव

व्यवहारस्तु परंपरयेति स्थिते विभावानुभावादिपदानां विभावाद्यर्थविषये वशक्तेः सत्वात्पदांतराध्याहृते श्च न रसस्य
स्वावाच्यत्वं न च विभावादिशक्तिरेव तच्छक्तिरिति वाच्यं रसस्य विभावादिमात्ररूपत्वाभावात् अत एव भरतेनाभिहित
स्य सूत्रे: सतेर्विभावाद्यैः स्थायीभावो रसः स्यादित्यस्य सहार्थतृतीयया विभावादिसहितैस्तैर्व्यक्तः स्थायी रसइ
त्यर्थो भिहितो भियुक्तैः अन्यथा तेरैतावतैव विभावाद्यर्थलाभे विभावाद्यैरित्यस्य वैयर्थ्यापत्तेः । विभावतादिरू
पेण शक्तिविरहाच्च अथ यथा बलवता प्रेर्यमाणो बाणः एकेनैव वेगाख्यव्यापारेण वर्मभेदमुरोभेदं प्राणा
पहरणं च करोति तथैकः एव शब्दः एकेनैव शक्त्याख्यव्यापारेण पदार्थस्मृतिं वाक्यार्थानुभवं रसादिप्रतीतिं च कु
र्यादिति चेन्न न हि शब्दश्रवणानंतरं प्रतीयमानो व्यवानर्थस्तत्र शब्दशक्तिस्तथात्वे ब्राह्मण पुत्रस्ते जातः कन्या ते
गर्भिणीत्यादिवचः श्रवणोत्तरं प्रतीयमानं हर्षशोकादिकमपि तद्वचसो वाच्यं स्यात् । यदि च तद्वचः प्रतिपाद्यं सर्वत्र
शक्तिरेव हर्षशोकादिकं तद्वदनप्रसादमालिन्यादिप्रत्यायमितितद्दोषजन्यत्वाज्जनकीयमप्यर्थः शक्तितएव प्रतीपादिति
लक्षणोच्छेदः । किं च श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षादिति सूत्रोदीरि
तपूर्वपूर्वबलीयस्त्वाभिधानमनर्थकमेव भवेत्सर्वत्रैवाभ्यासार्थप्रसंगे नोत्तरोत्तरदौर्बल्यबीजाभावात्तादि

५२

न्या॰ कौ॰

षमप्युपायमिषुदृष्टांतः तन्त्रवेगारव्यव्यापारस्य स्वरूपसत एव जनकत्वे न दीर्घदीर्घत्वप्रसंगसंभवात् शक्तेरुक्त
ज्ञाततायाएवोपयोगित्वात् तथ्यग्रनिष्ठत्वेन तत्तज्ज्ञानमपेक्षितं न च न तु संकेतग्रहाभावात् यदपि संसर्गमर्यादये
व रसबोधो भविष्यतीति तदतिमंदं । संसर्गमर्यादया च श्रुतत्वात् तत्तत्पदोपस्थापितानां विभावादीनां परस्परसंसर्ग
मात्रबोधकत्वे न तु रसस्य तस्या संसर्गरूपत्वात् किंचाविभावादिनवादिनयेक्षुपसामान्येशक्तावप्युच्चपाविशेषवि
वरूपमेव पितर्वव्यापारांतरे न चैवं निर्विशेषं सामान्यमिति सामान्यरूपेण विशेषपरत्वशक्तिरिति वाच्यं एवं सत्य
पि विशेषरूपेणाशक्यत्वात् तत्तद्रूपेण तद्बोधे व्यंजनमेव व्यापारः विशेषरूपेणापि शक्तत्वेगामानयेत्यत्रगवादिवि
तानयनत्वरूपेणानर्थपदस्य शक्तत्वेऽश्रवणानन्तरं तदर्थस्तत्त्वेनार्थभेदात्पदभेदइतिनयेऽर्थभेदात्पदभेदे
न देवदत्त मानयम पूर्वमिति भिन्नज्ञानस्यात्तस्य च गवादिवितानयनस्योपस्थापकांतराभावेन तस्मात् शब्दा
देवोपस्थितिर्वाच्या सा च संकेतग्रहसाध्या सा तिचान तस्मिन् शब्दात्तदुपस्थितिः तादृक्तदुपस्थितौ च संकेतग्र
हस्य न्योन्याश्रयः अत एव शब्दाभ्यासानंतरं पाचानर्थप्रतीयते तत्र सर्वत्र शब्दस्य निमित्तं यत्तैर्नैमित्तिकानु
सारेणानिमित्तानि कल्प्यंते इति न इत्युक्तेपत्तन्निरस्तमार्यां । तन्मध्ये ह्रस्वकारकत्वरूपं निमित्तत्वमसंभवे वार्यस

शिव

शाब्दाजनकत्वात् ज्ञापकत्वं वाच्यं। तद्धि संकेतवत्वेन ज्ञातस्य वा ज्ञातस्य स्वरूपमात्रेण ज्ञातस्य वा ज्ञापकत्वे इति प्रसं
गात्। न चैवं अन्यविशेषेच संकेतः तत्रापि संकेत इति पदितदापूर्वोक्तान्योन्याश्रयइत्यादिदोषात् पञ्चोक्तं पसरः श
ब्दः स शाब्दार्थः इति तदपि न। तद्वाक्यवर्त्तिपदोपस्थापित एव विषये तस्य तात्पर्यं न तु प्रतीतिमात्रइत्यपिकत्वात् तस्यय
थासिद्धसाध्यसमभिव्याहारे सिद्धसाध्यापोपदिश्यतइति न्यायेन दध्ना जुहोतीति वाक्ये न हवनस्यान्यवाक्यात्सिद्धेर्द
धिविधीयवते तस्याप्यन्यतः सिद्धेः करणत्वमात्रं विधीयते तस्यान्तरीयकाप्युपस्थापितत्वात् प्रथातद्वाक्यवर्त्तिपदोप
स्थापितत्वेन तस्य तथात्वं न त्वंग्यार्थस्येतदर्थिततद्वाक्यार्थाननभिज्ञत्वात्। न च तद्वाक्यवर्त्तिपदोपस्थापित एवार्थे तात्पर्य
मिति न नियमः विषं भुंक्ष्व मा चास्य गृहे भुंक्थाः इत्यत्र विषं भुंक्ष्वेत्यस्य मा चास्येत्याद्यर्थे तात्पर्यादिति वाच्यं एकवाक्य
तास्त्वं चकारसत्वादिदमेकमेव वाक्यं एवं च गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादिति न्यायादाख्यातयोश्च
क्रियोः परस्परमन्वयाभावेन विषं भुंक्ष्वेत्यस्य गृहे तद्वाक्यतया विषभोजनोपदेशासंभवे नाद्यपसिद्ध्यर्थं वि
षमकर्त्तृणादप्येतद्गृहभोजनमनिष्टसाधनमतः सर्वथास्य गृहे मा भुंक्थाः इति वाक्यार्थे तद्वाक्यस्य शब्दोपस्थापि
तएव तात्पर्यसिद्धेः एतेन लक्षणामूलकाव्यंजनात्यत्वेतात्पर्यवशादेवशेषोपपन्नत्वादिप्रतीतिरिति परास्तं। तस्य

तीतौ छप्योच्चरितत्वेन प्रयुःव्यंजनावादता तात्पर्यग्रहस्तत्प्रतीतिर्यदि तत्वेनतत्प्रतीतिप्रतीतौ तात्पर्यप्रतीतेर्हेतुत्वतात्पर्यप्रतीतेर्हे
तुत्वेऽसिद्धे तत्प्रतीतिरित्यन्योन्याश्रयापत्तात्पर्यज्ञानस्य हेतुत्वमेव नेत्यप्यवधेयं तेनैव लक्ष्यार्थबोधसंभवे लक्षणोच्छेद इत्यादि। नन्व
स्तु तर्हि लक्षणायैव प्रभवदभिमतव्यंग्यप्रतीतिः किं व्यंजनयेति चेन्न मुख्यार्थबाधाद्यभावात्। न च काकेभ्यो दधि रक्ष्यतामित्यादा
विव तात्पर्यानुपपत्त्या सेति वाच्यं लक्षणायाः प्रकृते प्रयोजनान्तरवत्त्वनियमेन व्यंग्ये प्रयोगप्राचुर्याभावान्नहि। किंतु
प्रयोजनवतीवाच्या तत्र चास्य प्रयोजनस्याभावात्। न च लक्ष्यप्रतीतिरेव प्रयोजनं लक्षणायाः प्रयोजनवत्त्वनियमो न तु
लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वनियमो गौरवात् अप्रयोजकत्वाच्चेति वाच्यं। लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वा एवा
दुष्टलक्षणात्वं तदतिरिक्तायास्तु दुष्टत्वमिति विभागाभावप्रसंगात्। लक्ष्यप्रतीतिरूपप्रयोजनस्य सर्वत्र संभवात्। यद्यस्य दे
व किंचित्प्रयोजनमुच्येत तदा तदपि लक्षणायैव साऽपि प्रयोजनवती स्यादनवस्था स्यात्। अत एव विशिष्टे लक्षणेत्यपास्तं॥
तथा हि ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतमित्युक्तदिशा ज्ञानजनकविषयस्य यथा ज्ञानादन्यत्वं तथा फलस्यापि ततो
न्यत्वं वाच्यं कारणस्यैव कार्यस्यापि भिन्नकालत्वेन भिन्नत्वात्। लक्ष्यज्ञानमेव यदि व्यंग्यज्ञानं तदा व्यंग्यज्ञानं प्रयोजनं न
स्यात्। किंच गंगापदार्थस्य तीरे संयोगसंबंधस्य सत्त्वाच्छैत्यपावनत्वादेश्च तदभावस्य सत्त्वाच्छक्यसंबंधरूपा लक्षणैव का न स्या

शिव

तात्पर्यं चनेकविधशक्यसंबंधानां प्रयोजकत्वमपेक्ष्यैकस्या व्यंजनाया एव प्रयोजकत्वमुचितं। न चैतेषां तत्त्वं सिद्धमिति वाच्यं।
तदंतःपातित्वामेव प्रयोजनां ~~[illegible]~~ेतरसहितानां लक्षणासंज्ञा प्रयोजनांतररहितानां व्यंजनेति संज्ञास्त्वरि
प्रयोगाभावीयलक्षणायाः प्रयोजनवत्त्वस्योक्तत्वात्। किंच विशिष्टं लक्ष्यं तदा स्याद्यदि लक्ष्यतावच्छेदकं विशिष्टत्वं स्वर्वेप्रती
तं स्यात्। न च तत्तथा। पावनत्वादिविशेषवैशिष्ट्यस्य प्रमाणांतरेणातटे: विषयाकरणात् तत्र तदसत्वात्। न च पावनत्वादि
समान्यं। वैशिष्ट्यमेव लक्ष्यतावच्छेदकमस्तु एवं प्रतीतत्वात् तत्र सत्त्वाच्चेति वाच्यं· विवक्षितपावनत्वविशेषप्रतीत्यनापत्तेः
तटनिष्ठशैत्यपावनत्वादेर्गंगातटे घोषः इत्यतोपि सिद्धिसंभवात् गंगायां घोषः इति प्रयोगानापत्तेश्च। किंच शक्तिलक्षणयोर्ज्ञा
ने प्रयोजके लक्षणानुस्वरूपसत्ती। न चातिप्रसंगः वक्त्राद्यौचित्यज्ञानस्य सहकारित्वाभ्युपगमात्। नचैवमलं व्यंजनयेति
वाच्यं। तस्यप्यौचित्यज्ञाने वीरवाक्यनिष्ठमाधुर्यादिघटनात् त्रौजःप्रभृतेः विरक्तवाक्यस्य कमलादिपदात् तदाप्यसौरभादेरव्य
क्तेः अन्यथाप्रतिकूलवर्णादेरदोषत्वापत्तेः। नच संबंधज्ञानाभावे कथं संबंध्यंतरं स्फूर्तिः तदभावे चार्थं तस्य शाब्दबोधविषय
त्वमिति वाच्यं। व्यंजनाभिन्नस्थल एवैतादृशनियमांगीकारात्। प्रकारांतरेणोपस्थितार्थस्यैव व्यंजनायाः शाब्दबोधनि
यामकत्वात्। अस्तु वा शक्यसंबंधो लक्षणा बोध्यसंबंधो व्यंजनेति। नच बोध्यसंबंध एव लक्षणेति वाच्यं। अपभ्रंशस्यापि

न्या॰ कौ॰ साधुत्वं स्यात् तस्य शक्तिलक्षणान्यतरवत्त्वप्रयोज्यत्वानियमात्। अथवा साधुशब्दमात्रनिष्ठो बोधकत्वविशेषः शक्तिर्मुख्यार्थेवा
दप्रयोज्यस्तादृशबोधकत्वविशेषो लक्षणा व्यंजनातु अपभ्रंशपदतदेकदेशार्थचेष्टादिसाधारणबोधकत्वविशेष
इत्येवास्तु न चापभ्रंशे लक्षणाभ्युपेरौ वृत्तिद्वीहेव्यंजनाकल्पने गौरवमिति वाच्यं लक्षणाया मस्य शक्तिभ्रमस्य साधुश
ब्दस्मरणस्य वा कल्प्यनमिति विनिगमनाविरहात्। वस्तुतो शक्तिभ्रमादपभ्रंशादेशाद्बोधांगीकारे तत एव घोषो घि
करणतो बोधोपपत्तेर्लक्षणोच्छेदापत्तिः न च पदार्थादीनां न व्यंजकत्वं किंतु पदस्यैवेति वाच्यं। तत्तदर्थादिप्रतीतस्तत्र मपि
व्यग्यप्रतीतिः न च पदादृत्तिरुचिता गौरवात् व्यंजनया लक्षणास्यथासिद्धिप्रसंगाच्च। वस्तुतस्तु इदं पदमेतदर्थस्य न वाचकं
न वा लाक्षणिकं किंतु व्यंजकमिति प्रामाणिकव्यवहारादेव व्यंजनासिद्धिः अन्यथाभिधयार्थेसिद्धौ लक्षणापि विलो
ये तत्किं च शक्तिलक्षणाज्ञानविधुराणामपि पामराणामपि चेष्टातः पदार्थज्ञानस्य सकलसंमततया व्यंजनमवश्य
मेषितव्यं न च चेष्टावार्थज्ञाने हेतुरस्त्विति वाच्यं अतिप्रसंगभंगापत्तेः बधिरविधृयाचेष्टानिष्ठव्यंजनांगीकारस्या
वश्यकत्वात् ननु विभावादिप्रतीतेरस्यादिप्रतीतिकारणत्वोक्तं तु पठवान्तंतुसंयोगादितिवत्तदपरत्यादिज्ञान शिव
रूपरसवान्नविभावादिज्ञानवत्वादिस्यनुमितारसप्रतीतिः तथा मम धर्मिन्यविसद्धो सो सुराधोचान्यमारिणो देश ॥

गेणुणाणाई कुछ कुडंगवासिणा दरिअसिंहेनेपा दोसंकेतनिकेतनीभूतगोदावरीपरिसरनिकुंजे पुष्पाद्यवचयार्थं
परिभ्रमतो धार्मिकस्य तद्भ्रमननिवारणाभाविनयववस्तास्तावद्गुनौ निकुंजनिवासि सिंहसंपादितपासदननिवा
सिसारमेयनिवृत्तिलक्षसदनपरिभ्रमणविधिर्वाच्यः स एव गोदावरीतीरनिकुंजे भ्रमणायोग्यतामनुमापयति
इदं गोदावरीतीरनिकुंजं भीरुभ्रमणायोग्यं सिंहवत्वात् यन्नैवं तन्नैवं यथा गृहमित्येवमाद्यनुमानेनैव वक्ष्यमाणार्थबोधसं
भवेतिरिक्तव्यंजनांगीकरणमयुक्तमिति चेन्न शब्दसमर्पितविभावादिप्रतीत्यनुमितरामादिरत्यादिज्ञानस्य रसत्वा
भावात् किंतु शब्दादिसमर्पितविभावादिभावनया भाव्यमानस्य स्वानंदांशे भग्नावरणाकरसाघवच्छिन्नस्वप्रकाशानंद
स्य रसरूपत्वात् तत्र च व्याप्तिग्रहासंभवात् न च यत्र विभावादिप्रतीतिस्तत्र तत्र रसरतिर्व्याप्तिग्रहः सुगम इति वाच्यं एवंविध
व्याप्तिज्ञानजन्यप्रतीतिरास्वादजनकत्वाभावात् पर्वतो वह्निमान् धूमादित्याद्यनुमानजन्यवह्निप्रतीतिवत् किंतु स्व
प्रकाशमात्रविश्रांतसांद्रानंदप्रतीतेस्तथा चैतादृशासिसाधयिषितार्थातिरिक्तार्थसाधने हेत्वाभासत्वात् भ्रमध
र्म्मिक्रियाविसिद्धस्यत्रानुमाने तु भ्रमणकवीरस्य भीरुभ्रमणायोग्यत्वे साध्ये मतवीरस्याहोस्विद्विशेषोदासीन्येन न तत्ताभा
न्यसैव वाच्या धीरभीरुरेवात्निर्देशेन प्रियानुरागेण निःशिलाभशंकमावाता हे रास्मापि पुंसः सिंहवन्निकुंजभ्रमण

न्या·टी·

दर्शनेनव्यभिचारात् । नच प्रभुनिदेशाद्यनुपाधिकत्वस्यान्नमरणाविशेषणात्तानुसरतीति वाच्यं · एतादृशसाध्यस्य पद्याद्यनु
पस्थितत्वात् तदुपस्थितस्य च व्यभिचारित्वात् । अत एव नांत्यः न मध्यमः ध्वस्मशो दिविशं कृपापुरुषार्थीभावनपाचसार
मेपाद्भ्रमतोऽपि मज्जपादरेणावीतयावासिंहवति प्रदेशो वीरस्यान्नमरणाद्व्यभिचारः किंचनिकुंजे सिंहसऊ दोनमा
नांतराद्‌वधृतः किंतु अ सति वचनान्नवततत्रिश्रायके ऽत्र अर्थे न सत्यं ससंबंधानियमादनिश्चयरूपासिद्धिः । एतेना दृष्टिं
हेमति देशिनि स्कुणामि हाप्यस्य हेतेदास्यमिप्रायेणास्या शिषाः पितान्वेविरमाः कौपीरथः पापसमिरकाक्षिसविया
मिहूरमपितत्त्वात्तस्त मांसाकुलेनीरं । वास्तन मुहित्रे खं तु जरवच्छेदानलग्नं यथ पञ्चमस्त्रेनलग्नापि स्तनमुहित्रि खंतु
जरवच्छेदानलग्नं यपञ्चस्त्रेनलग्नापि स्तनलिखनादिलिंगेनपरकामुकोपभोगानुमितिरिति परास्तं पतिव्रता हेवा
पितत्वे भवेव्यभिचारात् । एवं निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः
मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमा वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यांतिकं । इत्यत्र निषेधो ५३
वाच्यः । विधिर्व्यंग्यः इत्यत्र चंदनच्यवनादिभिर्विधिरनुमियत इति यत्तदपि तेषां स्नानकार्यत्वसंभवाद्व्यभिचारादसमं शिव
जसं । नच व्यंजनाद्यादिमतेऽप्युक्तहेतूनामनैकांत्यात्कथं व्यंजनयापि तत्प्रतीतिरिति वाच्यं । अधमपदसाहचर्य्या

तच्च धर्मत्वं ज्ञात्वा कर्मणा वा तन्नोन्नमन्नापि कानायकस्य ज्ञाप्यपकर्षरूपेण वक्ति किं तु कर्मणा तन्न चैतत्तर्ह्येवं तद्भावः
स्वचेद्दूतीप्रेषणान्यथानुपपत्त्यैव सिद्धं तत्स्याद्दूतीसंभोगकारित्वमेव नादिति तत्साहाय्यात्संभोगव्यंजनायां बाधका
भावात्। न चानुमितिवादिमतेपि तत्साहित्यान्यथात्वमिति वाच्यं॥ अधमत्वस्य प्रमाणांतरानवधृततत्वात्संदिग्धासिद्धेः।
न चैतद्व्यंजनांगीकारेपि सममिति वाच्यं। व्यंजनावादिमते व्याप्त्यादिनिश्चयादेरप्रयोजकतया संभावितार्थमात्रा
देव बोधकत्वस्वीकारात्। किंचैकविशेषो होक्तिमात्रनिष्पन्नकाव्यादौ प्रामाण्यानावश्यकतया संदिग्धासिद्ध्यानुमाना
संभवेनावश्यं व्यंजना स्वीकार्या। अपि चानुमानेन व्यंजनान्यथासिद्धौ शब्दान्यथासिद्धिरपि स्यात्। तथाहि धूमा
नयेत्युक्ते कर्मत्वं घटत्वान्वितत्वनिरूपिताकांक्षायोग्यतासत्तिमत्वादि साध्यानुमानेन शाब्दबोधसमानज्ञानसंभवा
त्। न च योग्यताज्ञानस्य ज्ञानत्वेन शाब्दबोधहेतुत्वादनुमितौ तु लिंगनिश्चयत्वेन हेतुत्वाद्योग्यतादिलिंगविशेषणा
निति वाच्यं। हेतुत्वस्यैक्यस्याभावादनुमितित्वावच्छिन्नं प्रति लिंगनिश्चयत्वेनाकारणत्वात् किंतु धूमादिनिश्चय
त्वेन कारणतायामपि योग्यताज्ञानस्य ज्ञानत्वेनैव कारणतायां दोषाभावात्। पदविशेषस्थले व्याप्त्यादिप्रतिसं
धाने विनाप्यन्वयबोधदर्शनान्नानुमानेन शाब्दान्यथासिद्धिरिति तदा प्रकृतेपि तुल्यं। वस्तुतस्तु। तत्तद्वीजन

न्या॰कौ

कत्वमेव व्यंजना सैव सर्वत्र वृत्तिर्नन्या किं लक्षणा वा शक्तिग्रहकत्वेपि तस्याः स्वैरव्यंगीकरणीयत्वात् न च शक्तिलक्ष
णाभिधानं तांत्रिकाणां कथमिति वाच्यं यदा तदेव व्याकरणादिभिरनुशिष्यते तदा ऽभिधाव्यवहारः यदा च बाधं
तात्पर्यानुपपत्तिप्रतिसंधानोत्तरमन्यार्थबोधकं तदा लक्षणेति व्यवहारः यदा च तदबाधितार्थादिबोधकं तदा व्यं
जनाव्यवहार इत्येक एव व्यापाहारः अनु तद्धीजनकत्वं फलोपहितत्वं स्वरूपयोग्यत्वं तु बाधः तस्य पूर्वं ज्ञातुमशक्य
त्वात्तान्न द्वितीयः तथा सति स्वरूपयोग्यतावच्छेदकस्य कस्यचिद्दुकव्यत्वेन शक्त्यादिरंगीकरणीय एवेति चेन्न जन
कत्वस्य पदार्थान्तरस्यैवांगीकारात् अत्र नवीनास्तु व्यंजनं पर्येवानुमानान्यथासिद्धिः पुज्यते वा एवं हि लाघवमपि
भवति। हेतुज्ञानादीनां ज्ञानत्वेनैव हेतुत्वांगीकारात् व्यंजनायास्तु यथाकथंचित्संभावनामात्रादेव व्यंजकत्वादि
ति वदंति एवमर्थापत्तिरपि परास्ता तस्या अपि प्राक्सिद्धव्याप्तिग्रहाद्योपजीवनेन प्रवृत्तत्वात् अन्ये तु वर्णतद्गतसौ
कुमार्यादिविशेषस्वनाविशेषचेष्टादीनामर्थविशेषबोधकत्वस्य सकलजनसहृदयसिद्धतया अपलापानर्हत्वेन तत् शिव
त्रे शक्तिलक्षणयोरसंभवेनातिरिक्तव्यंजनाख्यव्यापारस्यावश्यमंगीकरणीयत्वात् यत्र शब्दस्यापि विशेषबोधं प्रति
तद्धेतुत्वेन को विकृतिः कचित्कदाचिद्दृग्दुर्गणादिकमपि चेन्नेत्तदा कापि न क्षतिरित्याहुः किंच काव्यशरीरस्यापि

मा द्वात्मनो दुरधिरोहतनोर्विशालैर्वंशोन्नतेः कृतशिलीमुखसंग्रहस्य। यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः स
ततं करोऽभूत्‌। ताम्रसान्द्रदयमाह हठं कान्तिमानरकुपंडलः राजा हरति लोकस्य हृदयं मृदुभिः करैरित्यादौ मकरणादीनां द्वि
तीयार्थाभिधायाः प्रतिबंधकत्वेनान्यतरमात्रार्थस्य प्रतिहेतुत्वस्याभिहितत्वात्साकरणिकबोधोत्तरं जायमानो द्वितीया
र्थबोधो न शक्त्या कुंठनात्तस्याः तस्मान्न व्यञ्जनव्यापारजन्य इति व्यञ्जनासिद्धिः। न च द्वितीयार्थबोधे [illegible] लक्ष
णायेति वाच्यं मुख्यार्थबाधतात्पर्यग्राहकयोरभावात्। नवाभिधामूलव्यंजनाया अनुमानेनान्यथासिद्धौ जगति पञ्चरामपि नकुत इति वाच्ये अनु
भवविरोधात्। तदुक्तं यथा सुगन्धिमांसभोजनप्रकरणे सुरभिमांसं भवान् भुंक्ते इत्यभिधाने गोमांसाज्ञानेन तु रसस्य जुगुप्सा ना
नापत्तेः व्यञ्जनायास्तत्प्रकरणाद्यतिक्रम्यापि बोधकत्वस्य अभिग्राहकप्रमाणसिद्धत्वात्। अत एव काव्यानां गतिस्तत्प्राकर
णिकैकार्थनियन्त्राभिधावृत्तेः पदस्यासम्पार्थान्तरप्रत्ययकारकस्य हेयत्वं न्याय्यं यस्मात्तेन यो निह दारवाचां यो निरो
धोऽभ्यारहः। जैमिनीयमतेऽधम्मेरसनायामध्यद्विजइत्यादेरश्लीलत्वेन स्यात्। न च नानार्थस्थले अभिधाप्रसरणमेवकल्प
यं न तु व्यञ्जनाधर्मिकल्पनातो धर्मिकल्पना लघीयसी इति वाच्यं। तन्निरोधकस्यानयायात्। अपि चैतादृशस्य ले
कविनिबद्धनानार्थशब्दघटनानुरोधात्तत्तोऽभयार्थप्रतीतावपि वरीनीपार्थस्य स्फोटत्वाभावेन हि विप्रयामानर्थ

व्या॰कौ॰ केन चार्थद्वयसांगांगिभावार्थमुपमानोपमेयभावः स्वीकार्यः स च न कदापि व्यंजनां विनेति तत्स्वीकारस्यावश्य-
कत्वेव्या स्यादिप्रतिसंधाननियमाद्यंगीकारस्यानौचित्यात्। एवं सहृदुःश्रवितं पदं संसदर्थप्रत्यायकमिति नियमःश्रु-
ष्टस विरम्यव्यापारकत्वाभावादिकमपि साधु संगच्छते। अत्र च व्यंजनानंगीकारे कष्टत्वादीनामनित्यदोषत्वस्य साधु-
त्वादीनां नित्यदोषत्वमिति विभागो न स्यात्। शब्दार्थस्यैकरूपत्वपाकष्टत्वादीनां नित्यदोषत्वमसाधुत्वादीनां नित्यदो-
षत्वे दुष्टत्वमदुष्टत्वं वा स्यात्। तदभ्युपगमे तु व्यंजनीयार्थस्य वहुविधतया रौद्रादिव्यंग्येष्वर्थः दुष्टत्वं शृंगारादौ तु दुष्टत्व-
मिति घटते विभागः। एवं पर्यायेष्वपि कुत्रचिद्देवकस्यचिद्देवकाव्यानुगुणत्वमिति व्यवस्था न स्यात्। वाच्यार्थस्यैकरूप्या-
त्। दूषयंगते संप्रतिशोचनीयतां समागमप्रार्थनया कपालिनः इत्यादौ जुगुप्साव्यंजकत्वेन कपालादिपदस्यैवानु-
गुणत्वे न तु शोभादिव्यंजकपिनाकादिपदस्य तयोरप्यर्थकपालपिनाकमात्रप्रत्यायकत्वात्। किं च गतोऽस्तमर्क इत्युदासीनवा-
क्यस्य वक्तृश्रोत्रादिभेदेनावगमनीयाः सांध्यविधिरूपाः सजातीयसमभिसारसमयः कर्मकरस्वाविनवर्तेऽधुना तिहरगम-
न मुचितं निरोधबोधनीयाः संतापोऽधुना निवृत्तस्य इत्यनेकार्थप्रत्ययो जायते सर्वानुभवसिद्धः सचशब्दान्वयव्यतिरेकानुवि- १२८
धानात् कथं व्यंजनाख्या हृदय एवत्त्वचशक्तिस्वरूपायोग्यभावाद्व्यंजनाख्याहात्सांतरमवश्यमेषितव्यं न चैवं वाक्यभेद इति वाच्ये शक्य त

क्षार्थभेदादेवतदंगीकारात्। अत एव नार्थापत्त्यनुमानेऽन्वयव्यतिरेकाभ्यां शब्दस्यैवात्र कारणत्वावधारणात् तथा च प्रत्याद्य
प्रतिसंधानानां च। इदमत्राकूतं गजज्ञानोत्तराश्वस्मरणाज्ञानवत् गतोऽस्तमर्क इति वाक्यात् स्मृत्यनंतरं ज्ञानोत्तरं स्मर्यमाणसंबंधित्वादेक
सम्बन्धो न कुतः सर्वज्ञानमिति हि वाच्यं गजसंबंधिपदार्थबाहुल्यैकदा चित्कस्यचिदेवोद्बुद्धादृष्टवशोपस्थितास्मृतिरुद्बुद्धप
त्तेः न चैकसंबंधिमत्त्वं स्मृतेर्वा परसंबंधिस्मारकमिति वाच्यं एवंविधनियमे प्रमाणाभावात् तत्र तु अनुभवविरोधाच्च अपि च व्या
जनिकोऽर्थः शब्दार्थभिन्नः स्वरूपादिभेदात् तथाहि निःशेषच्युतचंदनमित्यादौ निषेधो वाच्यः विधिर्व्यंग्यः एवं मात्सर्य
मुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरंतु। सेव्या नितंबाः किमु भूधराणामुत स्मरस्मेरविलासिनीनामित्यत्र वाच्या
र्थः संशयरूपः व्यंग्यस्तु शांतशृंगारिणोर्यथायथमन्यतरनिश्चयरूपः कथमवनिपदर्पो यन्निशातासिधारादलनगलि
तमूर्द्धां विद्विषां स्वीकृता श्रीः ननु तव निहतारेरप्यसौ किं न नीता त्रिदिवमपगतांगैर्वल्लभा कीर्तिरेभिरित्यादौ वाच्या
निंदारूपः व्यंग्यस्तु स्तुतिरूप इति स्वरूपभेदः वाच्यार्थस्य प्रथमं प्रतीतिरनंतरं व्यंग्यस्येति कालभेदः वाच्यस्य शब्द एवाश्र
तिपादेकृतपाश्रयः व्यंग्यस्य तु शब्दैस्तदेकदेशात् तदर्थवर्णघटनाचेष्टाद्याश्रयत्वात् आश्रयभेदः वाच्यस्य शब्दानुशासन
नज्ञानेन भिन्नं व्यंग्यस्य तु प्रतिविशेषज्ञानमिति निमित्तभेदः कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरं सभ्रमर

२सं ध्यावंदनादिकरणं पदार्थज्ञानोपपत्तौ किमर्थं तदर्थबोधेऽयं न तत्स्वीकारः न २
च सर्वार्थस्य स्मर्यमाणसंबंधि २

(दा)
पघ्राणशीले वारितवामे सहस्वेदानीमिति इत्यत्र वाच्यार्थस्य नायिकाविषयः स्वव्यंग्यस्य तु भ्रमरेणास्या अधरो दष्टो
न जारेणेति तत्पतिरिदानीं तन्मे तन्मया कथं चित्समाहितं दन्तक्षतायतः परं त्वयैव विधेयमित्युपपादितः प्रियाया एव
हि एवं विधदर्शिने प्रियस्य कोपो नाप्रियायाः इति सपत्नीसखीत्र्यहमेवं समाधाननिपुणानां मध्ये व विश्वासिहीतिय
ति वेशिनीति विषयभेदः ५ ततोत्तमकृतेरपत्रदर्शितनयेन संख्याभेदः एवं सत्यपि शक्यव्यंग्ययोरभेदे नीलपीतादेर
पि भेदो न स्यादिति तस्माद्रूपादर्शितरीत्या काव्याद्रसादिप्रतिपत्त्यर्थं व्यंजनाख्यं वृत्त्यंतरमावश्यकं । ता~~देरपि भेदोन~~
~~स्यादिति तस्माद्रूप~~प्रतिपत्तिभ्येत्य काव्यादौ दर्शनीयत्वरामहिम्ना सीतात्वादिविशेषत्यागेन साधारण्येन स्त्रीत्वादि
नाप्रतीतैर्विभावाद्यैर्व्यंजितस्त्रिरूपरत्याद्यवच्छिन्नं चैतन्यं स्वप्रकाशमानंदांशोभग्नावरणं विभावादिसंभिन्नं अभि
व्यक्तं रसः स्यादभिव्यक्तिः काव्यादौ शब्दे नाप्यपरोक्षरूपैव यत्साक्षात्कारदृपरोक्षा दुःख इति शक्तेरिति वदंति। अत्र नैया
यिकानुयायिनो वदंति। स्रात्वेव मापाततः प्रसिद्धियोगतथापि चैतन्यस्यातिप्रसक्तेन तथाह त्रिरूपस्यान्यस्य वारस्या
देरेव रसत्वं पर्यवस्यति एवं चोक्तरीत्या विभावाद्युपस्थितत्वस्य रत्यादेर्मानसमेव रसाभिव्यक्तिरित्युक्तिर्व्यंजनया शिव
रसाभिव्यक्तौ काव्यादिजन्यत्वप्रवादोपि रत्याद्युपस्थापकविभावाद्युपस्थितेः काव्यादिजन्यत्वेन काव्यादिप्रयो

ज्ञत्वपर एव। एवं रसाभिव्यक्तेरुक्तरूपाया आनंदजनकत्वादेवानंदविषयकत्वोपचारः एतेन काव्येनाघे च कविना
नटेन च प्रकाशितेषु विभावादिषु व्यंजनाव्यापारेण दुष्यंतादौ शकुंतलादिरतौ गृहीतायामनंतरं च सहृदयतोल्ला
सितस्वभाववशात् विशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यंतत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशक
लखंड इवः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यः शकुंतलादिविषयकरत्यादिरेव रसः। अयं च कार्यो दोषविशेषस्य ना
श्यश्च तन्नाशस्यैव। नरभाविना लौकिकेन तेनानंदेनमेदाग्नहादानंदपदव्यवहार्यो भवति स्वप्नवोपस्थितेररत्यादिनो तद्
न्महांतद्गतित्वेनैकत्वाध्यवसानाद्वा व्यपदेश्यो वर्णनीयश्चोच्यते। त्ववच्छादकं दुष्यंतत्वमप्यनिर्वचनीयमेवत्त्ववच्छाद
कत्वं च रत्यादिविशिष्टबोधे विशेष्यतावच्छेदकत्वं चात एव दुष्यंतादिनिष्ठरत्यादेरनास्वाद्यतापत्तिरतस्तत्स्वनि
ष्ठस्य तु न स्वशकुंतलादिभिरतत्संबंधिभिः कथमभिव्यक्तिः स्वस्मिन् दुष्यंताद्यभेदबुद्धिस्तु बाधबुद्धिपराहतेत्या
दिशंकापास्ता अयं नवकाशः रत्यादिकं प्रागुक्तं व्यंजनाव्यापारस्यानिर्वचनीयरत्यादेश्चानुपगमेपि प्रागुक्तदोषम
हिम्ना स्वात्मनि दुष्यंताद्यभेदावगाहिनो शकुंतलादिविषयकरत्यादिमदभेदबोधस्य काव्यार्थचिंतनाजन्यस्यावि
लेहृदयविषयताशालिनो रसत्वाभ्युपगमे बाधकाभावात् स्वात्मादितादृशबोधस्य काव्यार्थचिंतनाजन्यतयानर

मा॰ दो॰ सत्वं अत एव नततन्तादृशानंदोपि अथैवमपि तस्मिन् अविद्यमानस्य रसादेः कथं स्वस्यानुभवस्यादि इति चेन्नैवं न ह्ययं लौकि
कः साक्षात्कारो रस्यादेर्येन लौकिकसाक्षात्कारे विषयस्य हेतुतया वर्तमानविषयसत्तापेक्षा स्यात् । अपि तु भ्रमात्मको ऽलौ
किकः । तत्र च न विषयापेक्षा आस्वादस्य रसविषयकत्वव्यवहारस्तु रसादिविषयत्वावलंबेनैव एवं चेष्टादिस्थलेपि चेष्टा
द्युपस्थापिततद्दर्शनीमानस एव बोधः पुज्यते चैतत् अस्मथा च नोः पदव्यापारत्वनियमेन व्यंजनायाः पारिभाषिकत्वं
त्रितोपगमायत्नैः तदुपगमे प्रमाणाभावाच्च अत एवैतात्पर्यविषयीभूतस्याप्यर्थस्य काव्यादितो बोध उपपद्यते मानस
बोधितात्पर्यज्ञानस्याहेतुत्वात् । न च बाधितार्थस्य कथं मानसो बोधः व्यंजनायास्तु तद्बोधकत्वेन धर्मिग्राहकमानसिद्ध
तया न दोष इति वाच्यं तत्रोक्तदोषमहिम्ना बाधप्रतिसंधानात् तद्धर्मिकल्पनात इति न्यायेन व्यंजनाकल्पनमपेक्ष्यतादृ
शदोषाजन्यत्वस्यैव बाधप्रतिबुध्यतावच्छेदकत्वकल्पनौचित्यादित्यसंक्षेपः आहार्यस्यापीच्छापात्रैनैपत्येनासंभवेन
केचित्तु दाधुनिकालंकारिकास्तु योगरूढिस्थले रूढिशक्तेरेव योगशक्तिप्रतिबंधकत्वस्य सर्वतांत्रिकसंप्रतिपन्नतया रू शिव
ढ्यविषयस्य योगालिंगितार्थांतरस्य विना व्यंजनां प्रतीतिर्दुरुपपादा । तथाहि अत्रैव ज्यांघ्रिपं हृत्वा वारिवाहैः सहानिशं
प्रातिष्ठंति चपला यत्र स कालः समुपागतः । अत्राशंकानोद्भव्यमपहृत्य जलवाहकैः पुरुषैः सह पुंश्चल्यो रमंत इत्यर्थांतरं

नतावदवलावारिवाहचपलाशब्दैर्योगरूढ्याशक्यतेबोधयितुंविद्युत्वावच्छिन्नस्यैवतस्यार्थस्याप्रतीतेः। अन्यथाचमत्कारोन
स्यात्। एतादृशार्थप्रतीतिरेवनास्तीतितुवक्तुमयुक्तंशब्दार्थयुक्तिमद्भिःसद्भिः। नापिकेवलयाशक्त्या। योगरूढिस्थलेपंक
जादिपदेषुपद्मत्वप्रकारकबोधविषयस्यैवपंकजनिकर्तृत्वान्वयस्यसर्वसंमतत्वात्। चपलादिपदात्तुश्यामलीत्वबोधस्य
योगादसंभवात्। तदयंसंग्रहश्लोकः। योगरूढस्यशब्दस्ययोगेरूढ्यानियंत्रिते। धियंयोगस्पृशोर्थस्ययासूतेव्यंजनै
वसेत्याहुस्तदेतदालोचनीयं। अवलानामित्यादिवद्योतथाविधश्लिष्टपदोपादानकविसंरंभ~~वैयर्थ्यापत्तेःएवंतु~~
भोग्नीतकवितास्वयंसहितयोगशक्त्यैवतादृशबोधोदयांगीकारस्यवक्तुमुचितत्वात्। अन्यथातादृशकविसंरंभवैय
र्थ्यापत्तेः एवंचयत्नेनतथाकविसंरंभः। कंजादिपदेतन्नमाचोहरूढियोगमपहरतीत्युक्तिः। वस्तुतस्तुसमुदायावयवश
क्त्योर्थत्रविरोधस्तत्राश्ववालमंडपगजकर्णादिपदेषुसमुदायशक्तियोगशक्तिप्रतिबंधिकानान्यत्र। अन्यथाचेद्रू
ढार्थोमपदात्सहस्रमयावर्तेतइतियोगात्सदाशिवस्यापिविहेर्मोतथाविषासुरुपोन्तमपदात्पयूरूवविशेषस्यप्रतिपत्तिर्नस्या
त्सर्वसंमता। चपलापदात्तुश्यामलीत्वबोधस्यासंभवाच्चेत्युक्तिरपिचपेरवौपध्यायाइतिसूत्रेचोपतिमंदंगच्छतिजारान्
प्रतीतिश्चपलेत्युक्त्वाचपलाकमलाविद्युत्पुंश्चलीपिप्पलीषुचेतिविश्वमेदिनीकोशावुदाहरद्भिरुशादिदृशितिहृद्भिः। प्रसा

न्या·द्वौ· ख्याताप्यज्ञाम्यधापि रूढिशक्तिरवयवशक्तिप्रतिबंधकत्वसमर्वर्णानां त्रिकसंप्रतिपन्नत्येति तदपि पंकजादिपदेन समुदायश
क्तिमीमांसाभावात् पंकजनिकर्त्तृत्वाश्रयत्वेनैव बोधः न तु पद्मत्वेन। ननु तर्हि कुमुदादौ प्रयोगापत्तिरिति चेन्न। इष्टत्वात्। पद्म
त्वस्य तत्पदप्रयोगोपाधित्वादिति मीमांसका निरवनादर्शननिर्बंधभ्रमेवेत्यास्तां विस्तरः। ननु प्रादिशक्तिलक्षणा एवं हि ती
तदा प्रजयतीत्यादौ कथं प्रकृष्टजयादिप्रतीतिः। न हि प्रकृष्टजयादेः प्रादुपसर्गवाच्यतया तथा प्रतीतिः संभवति। त
था सति तस्याप्रकृत्यर्थत्वेन तस्याख्यातार्थान्वयापत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः प्रकृत्यैकदे
शार्थस्य प्रत्ययार्थान्वये च राजपुरुषमानयेत्यादौ राजानमानयेत्यादिबोधापत्तेः नापि प्रकृष्टजयादेर्ज्यादिधात्वर्थत
या तथा प्रतीतिः। तथा सति जयतीत्यादौ प्रादुपसर्गं विनापि प्रकृष्टजयादिप्रतीत्यापत्तेः व्यंजनांगीकारे तु ज्यादिधात्वर्थे ज
यादौ प्रादुपसर्गाणां व्यंजनया प्रकर्षादिबोधे प्रकृष्टजयादिप्रतीतिसंभवतीति व्यंजनाख्यवृत्त्यंतरमावश्यमंगीका
र्यमिति चेन्न। ज्यादिधातूनां प्रकृष्टजयादौ लक्षणयैव तादृशप्रतीतिसंभवात्। प्रादुपसर्गाणां च धातोस्तादृशार्थे शिव
तात्पर्यग्राहकत्वमेवोपयोगः। अत एव प्रादुपसर्गाणां द्योतकत्वप्रवादोऽपि धातोर्विशिष्टार्थे तात्पर्यग्राहकत्वस्यैव
द्योतकत्वात्। न च प्रादुपसर्गाणां प्रकर्षादौ शक्तिरेवास्त्विति वाच्यं तत्रान्यलभ्यत्वे वृथा द्वार्थतयोपसर्गाणां धातुमंतरेणा

प्रयोगाभावेन धातुत एवैतल्लाभे तत्रोपसर्गाणां शक्तिकल्पनानौचित्यात्। ननु प्राद्युपसर्गाणां प्रकर्षादौ शक्तिरेवोचिता प्राद्युप
सर्गेतान्नियमतः प्रकर्षादेरुपस्थापनात्। तस्य च धात्वर्थे जपादावाश्रयतयान्वये नैव विशिष्टजपादिलाभसंभवात्। वचनामा
र्थयोर्भेदान्वयासंभवान्नैवमिति वाच्यं। अव्ययातिरिक्तनामार्थयोरेव भेदान्वयस्याव्युत्पन्नत्वात् घटो नेत्यादावव्ययानुरोधेन तादृश
व्युत्पत्तिसंकोचस्यावश्यकत्वात् युज्यते चैतत्। अन्यथा यस्याद्यस्मिन्नियमेनोपस्थितिस्तस्य तद्दशक्तत्वे विभक्तेरपि संख्यादिश
क्तत्वं न स्यात्तत्रापि प्रकृतिं विना प्रत्ययप्रयोगाभावेन प्रकृतेरेव संख्यादिविशिष्टार्थबोधसंभवादिति चेन्न प्रतिष्ठत इत्या
द्यनुरोधेनोपसर्गाणां शक्त्युपगमासंभवात् तथाहि प्रतिष्ठत इत्यादौ गमनं शक्त्या स्थाधातुना बोधयितुं न शक्यते स्थाधा
तोर्गतिनिवृत्तिरूपस्थितिशक्तिमत्त्वात् तिष्ठा गतिनिवृत्तावित्यनुशासनात्। नापि प्रोपसर्गेणागमनं बोधयितुं शक्य
ते तथासति तस्य स्थाधात्वर्थान्वयानुपपत्तेः प्रत्ययानामित्यादिव्युत्पत्तेः। किंतु स्थाधातुरेव लक्षणया गमनबोधकः प्रोप
सर्गस्तु तात्पर्यग्राहकः इत्यवश्यमुपेयं न च स्थाधातुना गतिनिवृत्तिरुच्यते प्रशब्देन चाभाव इति गत्यभावो नास्तीति
प्रतीतेर्गमनबोधस्तु लभ्य एव तदभावाभावस्य

तद्रूपत्वादिति वाच्यं तावता गमनाभावाभावत्वेन गमनत्वेन बोधेपि गमनत्वेन गमनबोधस्यानुभवसिद्धस्यानुपपत्तेस्ता
दवस्थ्यात्। तस्मात्प्रतिष्ठत इत्यादावुपसर्गस्योक्तरीत्या द्योतकत्वावश्यकत्वे एकत्र निर्णीतः शास्त्रार्थोऽन्यत्रापि भव
तीति न्यायेन सर्वत्र प्रादुपसर्गाणां धातोर्विशिष्टार्थग्राहकत्वं प्रयोगतत्त्वापेक्षद्योतकत्वमेवोपेयम्। निलुपसर्गाणां द्योतकत्व
मेव न तु वाचकत्वं न तु प्रतिष्ठत इत्यत्रोपसर्गस्योक्तयुक्त्या द्योतकत्वेपि वेदेवोपेयम्। निलुपसर्गाणां द्योतकत्वमेव न तु वाचक
प्रजयतीत्यादौ वाचकत्वमेव प्रकृते न तु द्योतकत्वं एकत्र द्योतकत्वेनैव सर्वत्र द्योतकत्वांगीकारे विभक्तेरपि संख्यावाचक
त्वानुपपत्तेः तत्रापि प्रकृतिलस्यार्थे वसंख्याविशिष्टार्थबोधसंभवात्। किं बहुना नञेवेत्यादिनिपातानामपि वाचकत्व
विलोपप्रसंगः तेषां मपि स्वान्तरेण प्रयोगाभावात्समभिव्याहृतप्रातिपदिकैरेव लक्षणया घटाभावादिबोधसंभवादि
ति चिन्नेवं विभक्तेः संख्याद्यवाचकत्वे चैत्र इत्यादिषु द्वौ ज्ञाप्रमानस्यैकत्वादिप्रकारकचैत्रादिविशेष्यकशाब्दबोधस्य प्रस
कलानुभवसिद्धस्यापलापप्रसंगः एकपदार्थस्य शाब्दबोधासंभवात्। एवं नञादिनिपातानामभाववाचकत्वे घट इव ने ते
त्यादिषु धात्वनुप्रविभक्त्युपस्थित्यभावप्रकारकबुद्धाप्रतियोगिशाब्दबोधापलापप्रसंग इति विभक्तेर्नञादिनिपातानां संख्या
भावादिवाचकत्वमावश्यकं उपसर्गाणामवाचकत्वे तु न कस्याप्यनुभवस्यापलाप इति प्रादुपसर्गाणां द्योतकत्वमेव न
तु वाचकत्वं। किं चोपसर्गाणां वाचकत्वे उपास्यते गुरुरित्यनुभवसिद्धसामानाधिकरण्यानुभवं न संतस्य धात्वर्थक
र्मताविरहात् उपास्यमानादेरुपसर्गार्थत्वात् ततस्तत्कर्मकत्वाभिधानानुपपत्तेरुपसर्गाणां द्योतकत्वमेव अत एवोपदर्शिता

६

न्या॰ कौ॰ नुभवस्य विवादग्रस्ततया तस्यापलापे बाधकाभावेन विभक्तेर्निपातानां च संख्याऽभावादिवाचकत्वं न स्यादिति प्रतिबंधो
पसर्गाणामपि वाचकत्वमेव अन्यलभ्यस्य तु तत्रैव नञ् द्योत्यत्वमत्र तद्वतीकारे नञ्प्रतिबंधाद्यादिदोष इति कुंदलीकारम
तानुपपत्तिर्नापलापोपि निरस्तः उक्तं पुनोपसर्गाणां द्योतकत्वस्यावश्यकत्वात् एतेन चादयो निपाता द्योतकाः निपा
तत्वादुपसर्गवदित्यनुमानेन निपातानामपि द्योतकत्वसिद्धौ चादिनिपातानां वाचकत्वमुपसर्गाणां द्योतकत्वमित्य
र्धजरतीयं नैयायिकोक्तमनादेयं विभक्तेर्बीजाभावेन विनिगमकाभावेन च निपातमात्रस्यैव द्योतकतावाचकताव्य
वामुक्तत्वाच्चेति शाब्दिकोक्तमपास्तं उक्तमुक्तेरेवं वैषम्यबीजत्वाद्धिति गमकत्वाच्च । उक्तानुमानं चाप्रयोजकं अन्यथा
व्ययत्वेन हेतुनाव्ययमात्रस्यैव द्योतकत्वा— पत्तौ स्वयादीनामपि द्योतकत्वापत्तेः अपि तु निपातानां वाचकत्वे साक्षा
त्क्रियतेऽलंक्रियते गुरुरित्यादौ साक्षात्कारादेर्निपातार्थत्वे धात्वर्थताविरहेण तत्कर्मत्वे वृद्धिर्द्विलेकारेणाभिधानानु नगु ८
पपत्तिः कर्मणि लकारासंभवादिति चेन्न तत्र साक्षात्पदादेः प्रत्यक्षादिरूपफलवाचकत्वोपगमेन धातोस्तद
नुकूलव्यापारवाचकतोपगमेनादोषात् शिष्यादिनिष्ठव्यापारजन्यफलस्य विषयो गुरुरिति शाब्दबोधसंभवात्
अतएव साक्षात्कारस्य तुल्ययोगित्विकोरोपि प्रसंगश्छलो न चैवमपि गुर्वादेः कर्मत्वानुपपत्तिरिव धात्वर्थतावच्छेदकफ
लशालित्वाभावादिति वाच्यं धात्वर्थतावच्छेदकत्वरूपधात्वर्थतावच्छेदकत्वस्य फलेऽभावेपि धात्वर्थव्यापारानुकूल

६२

तासंबंधेन विशेषणत्वमात्वमिलरूपस्य धात्वर्थतावच्छेदकत्वस्य तत्र सत्वात्। नच चादिनिपातानां वाचकत्वे कीदृश
स्समुच्चय इति वा कीदृशश्चैत्रस्यापत्तिरेवं शोभनस्समुच्चयो दृष्ट इति वक्तुं शोभनतश्च दृष्ट इत्यस्य प्रयोगस्यापा
पत्तिरिति वाच्यं चादिनिपातानां स्वार्थे स्वपरविशेषणतयैव बोधकत्वस्य व्युत्पत्तिसिद्धि। इत्थमादिविशेषणत्वानुपपत्तिप्रसंगाभा
वेन तथापत्तिविरहात्। यत्तु निपातानां वाचकत्वे शरैरुस्रैरिवोदीच्यान्तुहरिष्पन्नसानिवेसादौ हस्वसदृशैः शरैरसम
ह्वानुदीच्यानुहरिष्पन्नत्रिस्यथैकृतमात्तत्रोक्तपदार्थस्याकरणेन तथात्वपुरोचरत्वं तीमापानेरर्थक्यप्रसंगः निपाता
नां द्योतकत्वे तु न दोषः उक्तपदार्थस्योक्तसदृशत्वकरणत्वसंभवेनोक्तपदोत्तरत्वं तीमापानां सार्थकत्वादिति तदसत्। उप
मानोपमेयवाचकपदयोः समानविभक्तिकत्वस्यैवोपमानोपमेयभावस्य साधुतयोक्तपदोत्तरत्वं तीमापानाः साधुता
संपादकत्वेनानर्थक्यप्रसंगाभावात्। पदंपि निपातानां वाचकत्वे घटस्य लादौ विना षष्ठीमनन्वयापत्तिः प्रातिपदि
कार्थयोर्विभक्त्यर्थं द्वारैकत्व भेदेनान्वयायोगात् अन्यथा राजापुरुष इत्यतोपि राज्ञः पुरुष इतिवद्बोधापत्ते
रिति तदप्यसत् सातिपदिकार्थे निपातातिरिक्तत्वविशेषणतादोषात्। किंच चादीनां समुच्चिताभिधायकत्वान्नभे
दनिबंधना षष्ठी समुच्चितो घटस्य भेदेनैवान्वयः। नच समुच्चिते धर्मिणि शक्तिकल्पने गौरवमिति वाच्यं प्रामाणि
कगौरवस्यादोषत्वात्। एवं च समुच्चयस्यैकदेशत्वान्न तत्र संख्यादिविशेषणान्वयोपि। एतेन घटश्चैत्रो विरुद्धवि

८३

न्या. कौ. भक्तत्वे नव रुद्ध आतिपदिकार्थत्वादभेदान्वयापत्तिर्घटस्य मुख्यमत्रोरिति पिनिरस्तं। घट इ पदं सुघटप्रतियोगिके लक्षणा
या अभेदान्वये इष्टापत्तेश्च नन्वस्ति सेदित्यत्रोपसर्गस्य वाचकत्वमावश्यकं तत्र धातोर्लोपेन तत्र लक्षणाया असंभ
वात् तथाहि विपूर्वस्य धातोर्लट् आत्मनेपदमध्यमपुरुषैकवचनांतं व्यतिसे इति अत्र अस भुवि धातुरयं धातुरदादिग
णस्थः परस्मैपदी। कर्तरि कर्मव्यतिहारे इति सूत्रेणात्मनेपदं। सूत्रार्थश्च धातोः कर्त्रीप्सायामात्मनेपदं स्यात् क्रियाविनि
मये गति अस् थास् इति स्थिते थासः से इति तोल सप्ताः से स्यात् व्यतिअस् से इति जाते कर्तरि शप् अदिप्रभृतिभ्यः शपो
लुक् श्नसोरल्लोप इति सूत्रेणाकारलोपः ततः तासस्त्योर्लोप इति सूत्रेण सलोपः सूत्रार्थश्च तासस्त्योः सस्य लोपः स्या
त्सादौ प्रत्यये परे व्यतिसे इति सिद्धं। इत्थं चात्र धातोर्लुप्तत्वात् ते न व्यतिपदे धात्वर्थस्य भवादुपसर्गस्यैव तद्वाचकत्वमुपेय
मिति चेन्न लुप्तधातोः स्मरणादेवात्र शाब्दबोधांगीकारात्। नचैवं मलुरुषस्य लुप्तधातोर्न स्मरणं तस्मात् शाब्दबोधानुत्प
त्तिरिति वाच्यं इष्टापत्तेरिति संगदाय। अत्र वदंति कर्तरि कर्मव्यतिहारे इत्यनुशासनात् व्यतिसे इत्यादौ व्यतिपदात्मनेप
दस्यैवार्थः स च शब्दाभासलक्षणया विलक्षणदे तल्लक्षणमप्यापि उपसर्गस्य द्योतकत्वमव्याहतं एवं च तत्र धातुलोपमात्रेण ततो
पि शाब्दबोधो भवत्येवेति न तत्रानुभवापलाप इति दिक्। अथ प्रसंगात् नञर्थो निरूप्यते अत्र शाब्दिकाः नञर्थो
नाभावः तथासत्यघट इत्यादौ घटभिन्न इति बोधे तत्पुरुषस्योत्तरपदार्थप्राधान्यभंगापत्तेः किंच असदित्यादौ सर्व

नामकाभावप्रसंगः अति सर्वाभेसादिवत् । अभावे प्रतियोगिनो विशेषणत्वस्य सर्वसिद्धत्वेनोपसर्जनत्वात्
इतरपदार्थविशेषणत्वस्यैवोपसर्जनत्वात्तस्या दूरे पृथिव्यमसंनञर्थः आरोप एव वा विषयत्वं तु संसर्गः एवं चाघ
टइत्यादावारोपितो घट इत्यादिबोधः । असइत्यादौ च तस्य दार्थस्य विशेष्यत्वात्र दोषः घटो नास्तीत्यादावप्यारोपितं
घटत्वमित्यादिबोधः एवं च घटो नास्तीत्यादावाधिकमभावत्वज्ञानमादाय नञर्थविशेष्यकोबोध इति व्यवहारः प्रति
योगिज्ञानमतिविधकृत्सारि किं च संगमनीयमित्याहुः । शाब्दिकनयास्तु समास एवारोपितसंनञर्थः असमासे घटो
नास्तीत्यादौ त्वभाव एव नञर्थः अनुभवसिद्धभावत्वदुरुपल्लापेमानाभावादित्याहुस्तदुभयमप्यसत् सर्वत्राभावबोधस्या
नुभवसिद्धत्वात् । आरोपस्य सानुगतस्याभरूपेणापि दुर्वचत्वेनारोपस्य नञर्थत्वे गौरवाच्च न चोक्तदोषः अर्थपिप्पली
सादित्स्यरूपस्यापूर्वत्वंभावाभावमिन्नतत्स्वरूपस्यानारोपदार्थप्राधान्यनियमस्यैवासिद्धेः नाप्यसइत्यादौ सर्वनामकाग्नीभा
वप्रसंगः रूपे दोषः तत्र तच्छब्दस्य सर्वनामसंज्ञाया एतत्तदोः सुलोपोकोरनञ्समासे हल्लीति लोपकादेवसंभवात् । अ
न्यथा सर्वाश्रिय इत्यादौ पाठेरेवाभावात् अकोट्टिलकच सहितस्यात्रस्य सर्वनाम्न एव आप्तेः तस्मादन्यथैव नञ्समर्थो भाव
एव तेन नतत्वादृश्यमभावश्च तदन्यत्वं तदत्यन्ताभावः । अभावत्वं विरोधश्च नञर्थाः घटपक्षी नितादृशपिपराशं । स्वादृश्या
दिवो धस्य लक्षणस्य वोपपत्ताद्भावमात्रस्यैव नञर्थत्वात् । तदुक्तं दीधितिकृता संसर्गाभावो योन्याभावश्च नञो र्थः

ति। अथ कथमिदं संसर्गाभावत्वमन्योन्याभावत्वं च अत्र केचित्। भेदसंसर्गारोपजन्यप्रतीतिविषयाभावत्वं सं-
सर्गाभावत्वं। अभेदसंसर्गारोपजन्यप्रतीतिविषयाभावत्वमन्योन्याभावत्वं। तद्धर्मिविशेष्यकतत्संबंधावच्छिन्नतद्रू-
पावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे तद्धर्मिकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकज्ञानस्य हेतुत्वात् लक्षणसमन्वयः। न
न्वधिकरणस्य प्रतियोगितानयोरभावबुद्धिहेतुतया तत्तदारोपस्याप्युपदर्शितातिरिक्तकार्यकारणभावे मानाभावः। न
च प्रतियोग्यधिकरणयोः स्वतंत्रस्यानस्ये अधिकरणे प्रतियोगिमत्ताज्ञानाभावदशायामभावप्रत्यक्षवारणाय उक्तका-
र्यकारणभावस्यावश्यकत्वमिति वाच्यं। तदानीमभावप्रत्यक्षस्वीकारेणाधिकाभावात्। अधिकरणानुपरक्तस्य प्रतियोग्य-
नुपरक्तस्य वाभावस्य लौकिकबुद्धेरनुभवविरुद्धतयाधिकरणप्रतियोगिज्ञानस्य तादृशाभावलौकिकप्रत्य-
क्षांगीकारात्। यत्त्वधिकरणप्रतियोगिज्ञानयोः हेतुत्वकल्पनापेक्षया प्रतियोगिविशिष्टाधिकरण-
ज्ञानस्यैककारणताकल्पनमेवोचितमिति लघुत्वात् कार्यकारणभावसिद्धिरिति तदसत्। प्रतियोगिप्रकारतानिरूपिताधि-
करणविशेष्यताशालित्वेनाधि~~करणस्य कार्यकारणभावसिद्धिरिति तदसत् प्रतियोगिप्रकारतानिरूपिताधिकरण~~
~~विशेष्यताशालित्वेनाधि~~करणविशेष्यतानिरूपितप्रतियोगिप्रकारताशालित्वेन वा हेतुत्वे विनिगमनाविरहेण तद्वा-
पि कारणताद्वयस्यावश्यकत्वात्। प्रतियोगिसहस्रसत्त्वे एकैकनिवेशाधिकरणसहस्रभेदेन सहस्रकार्यकारणभावा

भवतामिति यच्च सहस्रगुणितसहस्रकार्यकारणकल्पनं तत्रास्माकं सहस्रद्वयमात्रं तत्कल्पनमित्यस्ति लाघवाच्च
सर्वप्रतियोगितावच्छेदकसंबंधभेदेनापि कारणताबाहुल्यं भवतां दुर्वारमिति चेन्मैवं प्रतियोग्यारोपस्य हेतुत्वेऽने
काधिकरणसंनिकर्षदशायां तज्ज्ञानसत्त्वेपि क्वचिदेवाधिकरणेऽनुपस्थितानां प्रतियोगिनां कस्यचिदभावः प्रतीयते
न तु सर्वत्र सर्वेषामित्यत्र नियामकाभावः एवंभूतलादावधिकरणे कदाचिद्घटादेरत्यंताभावः कदाचिदन्योन्या
व: भावः अत्यंताभावोपि कदाचित्संयोगसंबंधावच्छिन्नप्रतियोगिताकः कदाचित्समवायादिसंबंधावच्छिन्नप्रतियोगिता
कः प्रतीयते तत्र नियामकाभावः अनियमेन च सर्व एवाभावाः सर्वत्र प्रतीयेरन्निति न तु भवन्मते प्रतियोग्यारोप
स्य हेतुत्वे च यत्राधिकरणे यस्य येन संबंधेन यदारोपस्तत्र तस्य तत्संबंधावच्छिन्नाभावप्रत्यक्षं तदेति नियमादुपप
द्यते अथ नानाधिकरणसंनिकर्षे तज्ज्ञानदशायामुपस्थितानां प्रतियोगिनां कस्यचिदेव प्रतियोगिनः केनचित्सं
बंधेन क्वचित्कदाचिदारोपस्तत्र नियामकाभावः तन्नियामकस्याननुगतस्य तत्तद्व्यक्तिविषयकज्ञानादेः कारणस
कल्पनेन च प्रतियोगितानव्यक्तिविशेषाणामेव तत्तदधिकरणधर्मिकतत्तत्संबंधावच्छिन्नतत्तद्रूपावच्छिन्नाभा
वप्रत्यक्षहेतुत्वसंभवात् किमंतर्गडुना प्रतियोग्यारोपेणेति चेन्न अभावबुद्धावनुगतनियामकसंभवेऽननुगतनि
यामककल्पनागौरवस्य च फलमुखत्वेनादोषत्वात् अन्यथा सर्वत्रैव विशिष्टज्ञानादेर्हेतुतया अन्यथासिद्धिप्रसं

५१

म्या॰ कौ॰

गात्। अन्यथा व्याप्तिहेतुदोषासंसर्गाग्रहादेव प्रवृत्तिहेतुताकल्पनेनोपपत्तिसंभवात्। यत्तु प्रतियोग्यारोपस्य
समानधर्मिकस्याभावबुद्धौ विपरीतज्ञानत्वेन प्रतिबंधकत्वमानहेतुत्वसंभवः। न चाहार्य एव प्रतियोग्यारोपो हेतुः स च
न प्रतिबंधक इत्यदोष इति वाच्यं। आहार्यज्ञानस्य सर्वं बाधबुद्धिमंतरेण संभवात्। प्रतियोग्यारोपस्याहार्यतानिर्वा
हार्यतत्त्वेन भावबुद्ध्यंतरे प्रमीतत्वादिप्रतियोग्यारोपस्य हेतुतयानवस्थाप्रसंगात्। न चारोपात्सर्वेपरोक्षरूपाभाव
बुद्धिरेव स्वीकार्या तत्र च तारोपोनतरापेक्षेतिनानवस्थेति वाच्यं। लिंगपरामर्शशब्दज्ञानादिघटितपरोक्षधीसामग्र्या अ
नियतत्वादिति तदप्रसक्तः। अभावलौकिकप्रत्यक्षस्यैव प्रतियोग्यारोपस्य हेतुतया तादृशारोपस्य चोपनीतभाना
त्मकत्वात् लौकिकप्रत्यक्षत्वविरोधित्वेन तद्धेतुतायामनुकूलबाधकासंभवात्। अभावबुद्धौ प्रतियोग्यारोपस्य हेतु
त्वे प्रतियोगितावच्छेदकत्वं च हेतुताविलोपापत्तेः। न च प्रतियोग्यारोपस्य हेतुत्वे प्रतियोगितावच्छेदकविशेषेण निवेश
ने गौरवादिति घटत्वादिनिर्विकल्पकानंतरं घटत्वाघटवाद्दिशाभावप्रत्यक्षस्य वारणाय प्रतियोगितावच्छेदकप्रकारकप्र
तियोगिज्ञानं तस्यापां कदाचित्व्यक्तिर्नास्ति कदाचिद्घटो नास्तीति प्रतीतिर्निर्विकल्पकप्रतिक्षेपे आहार्यप्रतियोग्यारोपस्य हेतुत्वा
म्प्रतियोगितावच्छेदकविशेषांतर्भावस्यावश्यकत्वादिति चेन्न दंडो रक्तो न वेति संशयानंतरं रक्तदंडो नास्तीत्यभावप्र
त्यक्षवारणाय तादृशाभावबुद्धौ दंडादिधर्मिकरक्तत्वादिप्रकारकनिश्चयत्वेन कारणत्वस्यावश्यकत्वात्। रक्तत्वादि

३ स्य स्वातंत्र्येहेतुताकल्पनमावश्यकमिति वाच्यं घटत्वव्यक्तित्वादिना नाधर्मप्रकारेणा॰ रवत्व प्रतियोगित्वात ३

विशेषितदंडाद्यारोपहेतुतामंगीकृत्य लाघवेन निश्चयपक्षानिवेशेनाप्रामाण्यज्ञानाभावादेर्निवेशप्रयुक्तादिशानंतस्य
लेहेतुतावच्छेदकगौरवात्तन्निवेशस्य प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैवैकहेतुताकल्पनेलाघवात्। एवं घटत्वा
दिनिर्विकल्पकोत्तरं धिशेष्यविशेषणाभिसादिरीत्या घटो नास्तीत्याद्युपनीतभानकारणमापितं तद्धर्मविशिष्टविशेषितप्रति
योगिविशेषिताभावबुद्धौ तत्तद्धर्मप्रकारकज्ञानहेतुत्वकल्पनमावश्यकं दर्शितप्राचीनैः किंतु प्रतिसमुच्चयप्रतियोग्या
रोपस्य हेतुत्वं न तावतोक्तापत्तिवारणसंभवादित्याकृतमिदमसत्। अवतीर्ण्युमसंसर्गाभावानां स्वाभाववमीदृश्यानतेः। नच
तादृशप्रतीतिविषयत्वस्वभावविभाजकोपाधिमत्त्वस्यैव सत्त्वग्रहणनोक्तव्याप्तिरितिवाच्यं। तथाप्यभावाधिकरणका
भावस्यानतिरिक्ततया सत्ताभाववत्त्वसत्त्वान्योन्याभावस्य संयुक्ताभाववृत्तमात्मोत्पन्नाभावत्वस्य सत्ताभावस्य सत्ताभावत्त्वात्तथाहि
संसर्गाभावत्वलक्षणस्यात्यन्तान्योन्याभावेः अन्योन्याभावत्वलक्षणस्य सत्ताभावेतिव्याप्तत्वमन्योन्याभावत्वमित्याहुस्तदप्यसत्। ध्वं
सप्रागभावयोरन्योन्याभावस्य च प्रतियोगितावच्छेदकसंबंधेनामानाभावेनाद्यलक्षणे ध्वंसप्रागभावयोरव्याप्तेरन्यल
क्षणे चासंभवात्। मन्नुन्नसत्ताभावप्रतियोगितावच्छेदकसंबंधेविमानाभावादाद्यलक्षणेप्यसंभवः नच तेन संबंधेन
तत्प्रकारकबुद्धौ तत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकस्याभावत्वानिरूपस्य प्रतिबंधकतया सत्ताभावप्रतियोगि
तावच्छेदकसंबंधासिद्धिरितिवाच्यं। वस्तुमात्ररीत्या तदसिद्धेः तथाहि विशिष्टमितमात्रं नेत्यं नास्तीति प्रतीतौ वस्तुमात्रवि
ष्यात्सेदुर्वारत्वात् अन्ये तु भेदसंसर्गावच्छिन्नप्रतियोगिताकाभाववत्त्वे संसर्गाभावत्वं भेदसंसर्गावच्छिन्नप्रतियोगि ५

न्या॰कौ॰ वयितामात्रपर्तिनियामकत्वेन तत्संबंधावच्छिन्नमेयत्वावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या प्रतियोगितायां विष
यितावच्छिन्नत्वादेर्भ्रमः तथा तेन संबंधेन तत्प्रकारकबुद्धौ तत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकाभाववत्ताज्ञानि
ष्टत्वेन प्रतिबंधकतायां तत्संबंधावच्छिन्नत्वनिष्ठसांसर्गिकविषयतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकवि
षयतानिरूपिताभावप्रकारताया निवेशनीयतया प्रतियोगितायां संबंधावच्छिन्नत्वादेर्भ्रमस्योक्तरीत्याभावस्य प्रति
योगितावच्छेदकसंबंधासिद्धेरिति तदसत्। वृत्त्यनियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वे बाधकाभावेन तद्
घटितासिद्धेरिति चेन्न विरोधप्रयोजकविशेषसंबंधेन वृत्तिमत्त्वस्यैव संसर्गाभाववृत्त्यन्योन्याभावत्वस्वरूपत्वात्। अतिरिक्ता
खंडोपाधौ संसर्गाभावत्वात्यन्ताभावत्वे इदस्य सुवचत्वाच्च। इत्थं तु ध्वंसाधिकरणे तद्ध्वंसप्रागभावयोरत्यन्ताभावविरो
धितया ध्वंसप्रागभाववत्यत्यन्ताभावेन तत्र घटो नास्तीत्यादिप्रतीतेरत्यन्ताभावविषयकत्वासंभवेन ध्वंसप्रागभावविष
यकतया तयोरपि नञ्पदवाच्यत्वमावश्यकं एतदभिप्रायेणैवात्यन्ताभावत्वस्य इत्युपेक्ष्य दीधितिकृता संसर्गाभावत्वमु
क्तं। वस्तुतस्तु तादृशविरोधेनाभावे ध्वंसप्रागभाववति घटो नास्तीत्यादिप्रतीतेरत्यन्ताभावविषयकत्वे बाधका
भावेनात्यन्ताभावोऽन्योन्याभावश्चेत्यभावो द्विविध एव युक्तः। तत्र घटो नास्तीत्यादेरपि घटाभावत्वेनैव बोधस्तत्राभावत्वमेव नञ्श
क्यतावच्छेदकं यदि चात्यन्ताभावत्वादिना बोधस्तदात्यन्ताभावत्वमन्योन्याभावत्वं च नञ्शक्यतावच्छेदकं न चैवमपि मत्वि

विद्यत्वस्यापि घटे तदभावसत्वात् घटो नास्तीत्यादिप्रतीत्यापत्तेरिति वाच्यं नञ्समभिव्याहारस्थले तु प्रतियोगितावच्छेदकाव
च्छिन्नप्रतियोगिताया निरूपितानुयोगितासंबंधेनैवाभावांशे प्रतियोगिनोन्वयस्य व्युत्पत्तिसिद्धतया दोषात् । न च कंबुग्री
वादिमान्नास्तीत्यत्रेव घटो नास्तीत्यादौ कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगिताप्रसिद्ध्या नोक्तव्युत्पत्तिसंभव इति वाच्यं ।
गुरुधर्मस्याप्यनुभववलेन प्रतियोगितावच्छेदकत्वांगीकारात् । न च पीतशंखो नास्तीत्यादावगतिः पीतशंखत्वा
देरवच्छिन्नप्रतियोगितावच्छेदकस्याप्रसिद्धत्वादिति वाच्यं । तत्रापि तत्पदस्यापि पीतत्वप्रकारकज्ञानविषयत्वेन लाक्षणिकतया ऽप्रसिद्ध्यभा
वात् । एवमन्यत्रापि । एतेन पुष्करिण्यां जलं नास्तीत्यत्र स्वल्पजलं नास्तीति तस्या घटेव धीः बधकत्वाद्युक्तव्युत्पत्तेर्नापि व
क्तव्यः । तत्र जलादिपदस्य प्रकृष्टजलत्वावच्छिन्ने नञ्समभिव्याहृतत्वधर्मे द्रव्यापप्रसाधनत्ववधत्वावच्छिन्नेलाक्षणि
कत्वोपगमात् केचित्तु नञ्समभिव्याहारभेदेन व्युत्पत्तिभेदात् पीतः शंखो नास्तीत्यादौ पुष्कलस्थले व्युत्पत्तेरनंगीकारेण
प्रतियोगितानिरूपितानुयोगितासंबंधेनैव प्रतियोगिनोऽभावान्वयेन तत्स्थलीयविनैव निर्वाह इत्याहुः । अथ भूतले
घटो नास्तीत्यादावसंसर्गाभावबोधो भूतलं न घट इत्यादौ योयोऽन्योन्याभावबोध इत्यत्र नञर्थसंसर्गाभावबोधस्य तत्र चैतादृश नि
नैके भेदेनान्वयबोधकत्वज्ञानाभावे तादृशोपगमात् न च नञर्थविनिर्मोकेण क्वचिद्भेदेनान्वयबोधः क्वचिच्चाभेदे
नेत्यत्रैव किं नियामकमिति वाच्यं तत्तदाकांक्षाज्ञानादेरननुगतस्यैव तत्र नियामकत्वात् । यत्तु अभेदेनान्वयबोधे विशेष्ये
किं नियामकं वैपरीत्येनापि बोधे बाधकाभावादिति चेन्न नञर्थविनिर्मोकेन यत्र भेदसंबंधेनान्वयबोधस्तत्र ३

८३

न्या॰ कौ॰

प्रत्ययार्थवाचकपदसमानविभक्तिकविशेष्यवाचकपदमनुगतमेव निपामकं दधि सुंदरमित्यादौ च लुप्तविभक्तेरनुसंधा
नादेव बोधः। यद्यपि स्तोकं पचतीत्यादौ स्तोकाद्यभेदान्वयबोधे व्यभिचारेण तेनाकस्याभेदेनान्वये निपामकत्वसंभवः। त
त्र विशेष्यवाचकपदोत्तरं लुप्तविभक्तेरभावात् स्वयं पाकरणम ते चैत्रः पचतीत्यादौ चैत्रे पाककर्तुरभेदेनान्वयबोधे व्य
भिचारः तत्र विशेषणवाचकात्स्वात्तपदोत्तरं विभक्तेरभावादिति विभाव्यं तेन तथापि विरुद्धविभक्तिराहित्यमेवाभेदेना
न्वयबोधे निपामकं न चात्रापि कर्तृस्थले व्यभिचारोस्त्वेवेति वाच्यं। क्वचिद्विशेष्यबोधकपदोत्तरविभक्तिवृत्तिमपमात्वा
द्यभाववत्सु विभक्त्यभावविशिष्टविशिष्यबोधकपदं निपामकमिति व्यवस्थापि विरुद्धविभक्तिराहित्यस्याभेदेना
न्वयबोधे नियामकत्वे लोपगमेन दोषाभावादिति तदसत्। वस्तुतो विरुद्धविभक्तिराहित्यस्य तादृशबोधनियामकत्वे
नीलादिपदस्याविरुद्धविभक्तिमत्त्वभ्रमकालेपि नीलघटमानमेत्यादावभेदान्वयबोधापत्तेः। तज्ज्ञानस्य तथात्वे च वि
रुद्धविभक्तेरनुपस्थितिकाले उक्तस्थले विद्यमानस्यापि विरुद्धविभक्तिराहित्यस्य ज्ञानासंभवेन तादृशबोधानुपपत्तेः।
न च विरुद्धविभक्तिमत्त्वेनाज्ञायमानत्वं तादृशबोधे नियामकमिति वाच्यं उक्तस्थले मैत्रस्य विरुद्धविभक्तिमत्तया ज्ञा
ने चैत्रस्यापि तादृशबोधानुपपत्तेः। न च चैत्रीयतादृशबोधे विरुद्धविभक्तिमत्त्वेन चैत्रेणाज्ञायमानत्वं निपामकमिति वा
च्यं तथा सति पुरुषभेदेनानंतहेतुतापत्तेः। किं च विरुद्धविभक्तिमत्त्वेनाज्ञायमानत्वं नाम वस्तुगत्या विरुद्धापि विभक्ति

त्तत्वेन ज्ञायमानत्वं विरुद्धविभक्तित्वावच्छिन्नप्रकारकज्ञानाविशेष्यत्वं वा नाम्नः। नीलो घट इत्यादौ नीलादि
पदोत्तरविभक्तेरमूपदत्वाद्द्वितीयहृद्ग्रामामप्यभेदान्वयबोधापत्तेः नीलः सः नीलो घट इत्यादाविव मादेर्विशेषणवाचक
पदानुत्तरत्वरूपविरुद्धत्वं विभक्तित्वं वा ज्ञा[स्] नतु नामभेदान्वयबोधप्रसंगादित्यादिकमवधेयं। इत्थं तु बोध्यं पर्युदासः सवि
ज्ञेयो यत्रोत्तरपदेन नञ्॥ विधेर्यत्र प्रधानत्वं प्रतिषेधे प्रधानता प्रसज्यप्रतिषेधोसौ क्रियया सह यत्र नञिति लक्षण
लक्षितपर्युदासः प्रसज्यप्रतिषेधश्च नञोर्थ इति प्रवादस्तस्यापि प्रथमोन्योन्याभावोत्यन्ताभावश्च नञोर्थ इत्येव प
र्यवसानं। तथाहि पर्युदासस्थलं तु यजतिषु येयजामहं करोति नानुयाजेष्वित्यादौ यत्र नञो निषेधार्थकत्वे वाक्यभेद
स्य ये यजामहं करोतीत्यनुषंगस्य च कल्पने गौरवात् नञो भेदार्थकत्वमुपेत्यानुयाजभिन्नेषु यागेषु ये यजामह इत्यादि
वाक्यवन्मन्त्रपाठं करोतीत्येकवाक्यतयान्वयबोधः। ननु इक्श्तिपौ धातुनिर्देश इत्यनुशासनविहितश्तिपो धातुस्व
रूपार्थकतया यजतिपदस्य रूपपरत्वाभावः। न चात्र यजतिपदं नाम्नि वर्त्तते किंतु क्तिन्प्रत्ययान्तमेवेति वाच्यं। तथा स
ति क्तिन्प्रत्यये परे संप्रसारणस्यावश्यकतया इष्टिरित्यस्यैव साधुतया यजतिरित्यस्यासाधुत्वापत्तेरिति चेत् धात्वर्थमीना
नुपाधिनः। श्यादिविकरणवदिक्श्तिपोर्निरर्थकत्वमेव। पचत्यादिपदे शपादिधातुनैव लक्षणयापास्यात्मकधातुःप्र
साप्यते श्तिपश्च तात्पर्यमात्रग्राहकत्वं तथा प्रयोगः उक्तानुशासनेपि धातुनिर्देशे इत्यस्य प्रकृतिस्वरूप इत्यर्थः। यजतिपद

सत्तासमं ग्राहकाविति च न दोषः इत्थं च यजतिष्वित्यत्र ष्णिप्रसमभिव्याहृतयजधातुनात्र स्तणगाश्चरूपोपस्थितावप्य
त्रिकृत्वरूपस्फिर्के नयज धातुस्वरूपेणापागलाभः नचैवं यजतीति प्रकृत्यर्थस्यासिध्यात त्वस्य धर्मस्य वप्रासं नवरितिवा
च्यं। इष्टापत्तौ निरर्थकोणादिभावकृदंतमात्रादिपदेतरविभक्तेरिवनिरर्थकोणादिविषयांतपदोत्तरविभक्तेरपिप्र
कृत्यर्थान्वितस्वार्थबोधकत्वानंगीकारात्। नचैवं यलग्रहणांनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति प्रसक्तिरिति वाच्यं।
तत्र लग्नस्य यपदस्यार्थवत्त्वकृतिकत्रस्य यपरत्वात्। प्रकृतित्वस्य प्रत्ययत्वस्य चानुगतानतिप्रसक्तस्याभावेन एतत्कृ
तिप्रत्ययांतभावेनतादृशव्युत्पत्तिकल्पनाद्वा किं तु तत्र तादृशप्रत्ययपरकृति भूतधातो केवलस्वरूपेण धातूपस्थापिते
तदर्थान्वयस्य तत्र तथैव व्युत्पत्तेः यत्तु। पचतीति त्रान्वयमति पौरपुपस्था पकृपदांतरविरहेण केवलतिवंतपचत्या
दिपदात्ताकादेरिव केवलम्लिवंतपचत्यादिपसादपिपदार्थोपस्थितिमात्रसंभवेपि शाब्दबोधासंभवान्न चेष्टापत्तिः तत्र
पचादिधातोः शाब्दबोधस्यानुभवसिद्धत्वेनानुभवविरोधादिति तदसत्तात्तिवंतपचत्यादिपदे प्रकृतिप्रत्ययरूपपदद्वय
सत्वेनपाकानुकूलकृतिशाब्दबोधोदयेनदृष्टांतासिद्धेः केवल प्रकृतितः शाब्दस्तु दृष्टेनेष्टापत्तावनुभवविरोधाभावाच्चेति
यदिति वस्तुतः श्रियो धातुस्वरूपेण धातुरेवार्थः समभिव्याहृतपचादिधातौ च न स्वरूपेण स्मरणात् किंतु पाकादिरेवार्थबोधकत्वस
च प्रतिपादकत्वात्तत्संबंधेनश्रिवायर्थविशेष्यणतयान्वयः एवंच पचत्यादिपदस्यापि प्रतिपादको धातुरित्यादिरेव शाब्दबोधः।

नचैवं पाकादिप्रतिपादकधात्वंतरस्यापि वोधापत्तिरिति वाच्यं। सर्वनाम्निवृद्धिरूपस्य स्वपदत्वस्यापि स्वप्रकृतित्वस्याति
पादकत्वात्। पचतिघुपेयज्ञामहं करोतीत्यादौ च धात्वर्थयागादौ प्रतिपाद्यतासंबंधेन क्रियायां धातोर्विशेषणात्तथा वृषः
धातुप्रतिपाद्येषु यागादिष्विसर्गः। महाविप्रो धातुस्वरूपेऽशक्तत्वादपि स्वरूपयागादिस्वरूपेऽर्थे लक्षणायामनादिधातुर्लक्षण
या स्वपरः। तस्य च प्रतिपाद्यतासंबंधेन क्रियायां यागादौ विशेषणात्तमान्वयः। तथा च पचतिप्रतिपाद्येषु यागेष्वित्यादिरेव
तत्र बोधः। इत्थं च प्रत्ययानां प्रकृत्यर्थे स्वार्थान्वयबोधकत्वमिति नियमो गोविन्दास्ति। नच श्रिमेऽर्थांतरे साधुता कथमेतदिति वाच्यं।
स्वप्रकृतिसर्थातिरिक्तार्थांतरस्य वृत्त्या साधुत्वात्। तस्यार्थांतरासाधुत्वे मातामावाद्वो। अत एवेदरी साइस्त्रे नान्नः प्रति
तिर्वेदा तस्य चेदोअस्मद्धमनादेरपज्ञातिषु विधीयत इति कालापनस्त्रे ईश्वणापागमोऽत्र पवो धविवपतो पचादिनी
मा। एतेनेत्यर्थेनोऽप्रमिसत्रे सतिशास्त्रे भणवाचकत्वबयजतिष्विसादवृपिप्रजातिशद्वस्यपागवाचकत्वमिति
नवीनोक्तिः पास्ता। इकृश्तिपो धातुनिर्देशइत्यनुशासनविरोधात्। नच श्तिपो धातुत्वविशिष्टशक्तौ पचति धातुरि
त्यादौ पोऽहत्वप्रसंगइति वाच्यं। इकोरत्कदंडइतिवत् पेलरुक्तयिरहात्। नचैतथापि पचतिपदधोविशेष्यकधा
तुपदार्थप्रकारकप्रतीतिच्छेदेष्वरितस्य पचति धातुपदर्थाश्रीलक्षणोपगमात्। केचित्तु श्तिपो धातुत्वे शक्तिः इकृ
श्तिपादिसनुशासनेपि धातुनिर्देशइत्यस्य धातुत्वइत्यर्थः धातुर्त्वं च संकेतविशेषसंबंधेन धातुपदवत्त्वमेव तत्रावविप्रयै

६३ रित्यादिवाक्यस्य रक्तदंडो यं सादिवाक्यवन्निराकांक्षत्वापत्तिर्दुर्वारेति वाच्यं॥ तत्र धातुपदस्य धातुर

व्यु॰ कौ॰

ष्टसाधनत्वादिः यत्समभिव्याहृतधात्वर्थविशेषणतया बोधेति समभिव्याहृतधातोश्च स्वरूपेण लक्षणा तथा च श्रिवं
जपचत्वादिविदात् धातुत्वान्यचूड्त्वादिरेव बोधः तदुत्तरसुबर्थो विधात्वर्थ एवान्वेति प्रकृते सर्पगते त्वादि सुलक्तेरक
त्वमात् । नत्वसार्थकमसमांत समभिव्याहृतसुबर्थस्य प्रकृत्यर्थ एवान्वयो युक्तस्तत्र इति वाच्यं । सर्वत्र तत्र इष्टयुक्तेर्मा
नाभावात् इष्टसाधनत्वादिप्रकृते तथा यत्समभिव्याहृतसुबर्थस्तत्वायत प्रकृत्यर्थे ऽन्वयादर्शनेन तमनि चारात्
यजतिषु ये यजामहं करोतीत्यादौ च श्रिपो धात्वर्थः यजादिधातोश्च यजप्रति प्राधपागादेर्लक्षणा तदेकदेशे य
जादौ च धातुत्वस्य विशेषणतया वमो युक्तत्वात्तेनैव चेन्मात् । इत्थं च धातु यज प्रति पाघपागोष्ठिसादिरेव तत्र बोधयुक्त
ङः । श्रपेत्तु श्रिपो धातुत्वेन धाता वेव शक्तिः तत्र च प्रकृतिलक्षणा यस्य प्रकृतिस्वरूपस्य ता दृश्यनान्वयः तथा च श्रिवं
तपचत्वादिपदात् पचामिन्तो धातुरिसाधाकारको बोधः यजतिषु मे यजामहं करोतीत्यादौ च यज प्रति पाघपागादिर्ध
त्वर्थत पातरेकदेशे यजादौ श्रिवर्थस्य धातुत्वावच्छिन्नस्याभेदेनान्वयस्तत्र कृत्तद सतएकदेशे नसमं भेदेनान्वये
पित्वे भेदेनान्वयानुपपत्ते । प्रकृत्यर्थप्रत्ययार्थयोर भेदान्वयस्य क्षाप्यदृष्टत्वाच्चानेन चानन्तासम्बाद्दृष्टेऽपि ताद्दृशाभ्यु त
पः स्वीक्रियत इति वाच्यं । तेन प्रकृतात् । अत एव श्रिपो धातुत्वेन धातौ शक्तिः यजधातुः स्वरूपः तेन यजामि च धातुरिति
बोधः एवमन्यत्रापि एवं च यजधातुबोधे सतिते नद्य्याप्यागडपस्थाप्यत इत्यपि निरस्तं । वधूमितीपाधायातुयामि

तुपापितो मे पिलास्का इकृश्रिपो धातुनिर्देश इति सूत्रेण सिद्धं स्पजतिश्रि तृस्य द्विरेफत्र हस्से व स्वकाश्रुबाध्येन
स्वरूपाणि लाघागलाभः। अथात्र तश्रिपस्य समस्य भागल स्वकस्य तस्य प्रकृतिभाग स्वरूपता समीया हकतपो पसर्गी
वत्प्रयोगक स्यात् अत्रमथातन्न इतरपसंत येनानं तर्हि क्रिफलजनयोरव्यप्रसंगात्। प्रकृतिरूपेण पजधातुना योनरूपा
द्या। नचपजधातो रेधागेलसर्णे तिवाच्यं तस्य तत्र शक्त्यात्। नचधातुत्वविशिष्टशब्दत्वविशिष्टे यश्रिपः शक्तिः तत्र
प्रकृतुपस्थापितस्य धातुस्वरूपस्य तादात्म्येनान्वयापजाभिन्नरूपाइति स्वाभाविकोबोधः पजतिविसादौ तुपजाभिन्न
धातुवाच्ये भागे तापसंवं धादिरूपाश्रिपोलक्षणातेनभागलाभ इतिवाच्यं। अन्ये परतायां श्रिपोः साधुत्वात्तः श्रिपोधा
तुत्वविशिष्टेशब्दत्वविशिष्टवाचकत्वो पजतिधीतुर्भवतिः शब्दइत्यादावनन्वयप्रसंगाच्चेति चेन्मैवं अतुशासनानां नियम
मार्थत्वे पिइकृश्रिपावेव धातुनिर्देशे साधवानान्यान्यादिरिते वनिपम्पतेनतुश्रिपोः प्रयोगासाधुत्वमनेनानुशिष्यते एवंक
मीणिहृतीमेवेसेवनिपमोनतुहृतीमाकमीएवेति अतएव घट इत्यानासाम्ना नंवेदनीसादौ विषमतामात्रेलक्षणा पादिती
प्रयोगः श्रिपश्च धातुस्वरूपेस्वरूपत्वावच्छिन्नायत्तिर्यत्प्रयुपमानेन श्रिवंतपजतिप्रयोगजस्वरूपमितिस्वाभावि
कोबोधः स्वरूपत्वं तुगगनाभावादिरखंडोधर्मः सचानवच्छिन्नोनावप्रसमादौ नंप्रयुक्तिनिमित्तं अन्यथापजतिमधुर
इत्यादौ मधुरताद्यात्मस्य पजस्वरूपेप्रसमानुपपत्तेः। नचधात्वर्थस्यैव तदन्वय इति वाच्यं धातुसमानाधिकरणाविरोध्यनि

ना॰कौ॰ घृस्नपुंसकत्वापत्तेः संज्ञा ऐरतिमंद्रिराय धीतिवृत्तः तेन स्वरूपार्थकप्रत्ययस्य सामानाधिकरण्येन तल्लिंगसंख्याग्रहक-
त्वं धातुसामानाधिकरण्येन पुंसकैकवचनत्वं विशेष्याभिघ्नपदानामिस्य वत्त्वमभ्युपेयं अनुपपन्नं तिच धातुनिर्दिष्टसा-
न्यर्थस्यभावमत्यपद्याम्यत्वमभियुक्ताः । क्रियामात्रः साध्यतावस्था धातुरूपनिर्बंधना सिद्धभावस्तु प्रत्ययार्थः सत्त्वमादितिर्यध
न इति साध्यता लिंगसंख्यानन्वयः सिद्धभावस्तु द्रव्यवदित्याहुः नव्यमैथिलास्तु प्रजतिपदमिह स्वरूपार्थकं नेकप्रजति
षिति समस्तपात्तमधिकरणत्वमर्थ धर्मीविशेषणे प्रपञ्चयिते मप्रागतिकर्मीकृतनेकनीत्व तेत्वत्रैवमेवानुपात्तमिन्नता
प्रागरूपार्थनिष्ठापि शेषसार्थसंबंधादुपचर्मतदुत्ताकुमिलल प्रसंगागते नञ्सस्य प्रतिषेधस्तु राज्ञो ग्राह्यं न कुर्वीतेत्या
दौ । अत्र नञः प्रसज्य प्रतिषेधोर्थः तत्वं चासंताभावत्वमेव स्ववालंताभावः लिङर्थेष्टसाधनताव्यपीतया चराज्ञि
ग्राह्यकरणं इष्टसाधनत्वाभाव इति स्वरूपबोधः । नचात्र नञः पर्युदासार्थकमेदार्थकतामुपेत्य राज्ञोतरकाले श्राद्ध
करणविधायकत्वमेवाप्यस्तु किंनिषेधार्थकतयेति वाच्यं तथा सति श्राद्धमावास्यामां पितृभ्यो दद्यादितिवाक्येन राज्ञो श्राद्ध
प्राप्तात्तत्करणापत्ते दुर्वारत्वात् निषेधार्थकत्वे तु विशेषनिषेधस्य तेसामान्यविधेर्विशेषेतरपरतापत्ताकालतो भो
दधिदेमनकौंडिन्यायदात्तत्प्रभिसादो ष्युसत्रि सिद्धतयामाभावास्यायामिसादिविधे राज्ञीतरामावास्यायां श्राद्धविधाय
कतमानराज्ञोश्राद्धकरणापत्तिः तत्वाप कवचनाभावात् । अमावास्यायामित्यादिविधे राज्ञोतरपरतोपपादकतमाच

न निषेध्यत्वैव पर्यं। न च तत्पापि प्रसक्तं हि प्रतिषिध्यते इति नियमेन रात्रिश्राद्धस्याप्रसक्त्या निषेधासंभव इति वाच्यं
दिनिषेधो न स्यात् रामावास्याभ्यासिता दिवा वस्य रात्रीतर परतान स्यात् दा एत्रिश्राद्धं प्रसज्येत तन्मा प्रादित प्रसक्तेः स्तत्वात्
न च पिपासात्तां तरिक्षे हिरण्मयेग्निश्चेतव्य इत्यादावंतरिक्षेग्निचयनस्याप्रसक्तावपि प्रतिषेधे न तादृशनियमेमानाभावा
त्। वस्तुतस्तादृशनियमसत्वेपि न क्षतिः यद्दूर्भेमू त्रापितावच्छेदकीकृतसाधारणत्वेनाकृतावा इष्टसाधनत्वस्य पगतं तत
द्भी श्राद्धमेव धात्वर्थे इष्टसाधनत्वान्वये तावत्संसर्गो विधिसमभिव्याहृतनञा प्रसाप्तेन तु तद्देशाद्यमेव धात्वर्थेष्टसाधनत्व
तादृशानियमार्थः इत्थंचामावास्याश्राद्धत्वस्य रात्रिश्राद्धे विसत्वात्कता दृशानियमभंग इति सारं। अत एव दं तिसामान्यशा
स्त्रविरोधि विधिघटकत्वेऽप्यनकृतनञः पर्युदासपरत्वनियमेन रात्रौ श्राद्धं न कुर्वीतेत्यत्रापि नञः पर्युदासपरत्वैव न तु नि
षेधपरता अत्र न कलंजं भक्षयेदित्यादिवाक्यस्य नञ्यभिचारवारणाय जनकान्तं नञ्विशेषणं प्रतिरात्रौ श्राद्धं
न कुर्यादित्यादिविधिवाक्यस्य नञि व्यभिचारवारणाय सामान्येति शास्त्रविरोधि विशेषणं सामान्य
शास्त्रत्वं चात्र स्वघटितशास्त्रत्वावच्छेदकव्यापकीभूतधर्मावच्छिन्ने निष्टसाधनताबोधकत्वं स्वपदेन नञ् परं ग्राह्यं
तु रात्रौ श्राद्धं न कुर्वीतेत्यत्र नञो लक्षणया भेदकसरणिपर्या त्रिभिन्नेश्राद्धकरणमिष्टसाधनमित्येव बोधः भेदवद्धर्मक
त्वेपि भेदबोधकत्वान्न पापास्पर्युदासपरत्वमव्याहतं घटादन्यो घटादितरद्धटादिविवपरान्भेदके द्वेऽपि भेदैः परं परा...

श्री

दै.

यो नुसक्तिर्वैचित्र्यात्। अथ भेद एव न सर्वेष्यान्तां तस्य चामावास्यापौर्णमास्योर्दर्शादितिविधिवाक्यस्थामावास्यादि
पदार्थे किं विषयता नमावास्यास्य एवं च एतत्त्रिभिरामावास्यापौर्णमास्योर्दर्शादिसाधारकत एवाव्ययबोधः इत्येकवा
क्यतैव न भिन्नवाक्यत्वमिति चेन्न। तथा सति राज्ञि कृतस्याप्यष्टकाः कार्या इत्यादिविधिबोधितेऽष्टकादिश्राद्धस्य सफल
तापत्तेः तत्र विधौ संनयतकालत्वाचकपदेन त्रिभिन्नकालकत्वेऽप्यत्वस्यालाभात्। किं चामावास्यापौर्णमास्योर्दर्शादिसा
दर्शादितिक्रियापदस्य त्रैश्राद्धं न कुर्वीत स च कुर्वीतेति क्रियापदस्य वावैयर्थ्यप्रसंगः अत एव वाक्यभेदोऽपि नामोपि
न दोषाय न च यथा चैत्रः पचति मांसादीं संभेदेनान्यतरस्य वैयर्थ्यमिति तस्यापेन सुवाक्यता। तथा नैकमेवैकत्वस्य दिकं बोध
नेन दृष्टान्तापि तु मांसमेव क्रियापदं मांसमेकं वक्रियाबोध्यतइति गाच्यं। ऋत्यर्थातुदाधात्वोः समानार्थकत्वाभावात्। यथा
कथंचित्समानार्थकत्वेऽपगमे न वैयर्थ्यपरिहारे [illegible] नफलस्य दुर्वारत्वात्। चैत्रः पचति मांसादीनसाधुत्वस्ये

ले

वैकवचनद्वयोपादानप्रयोजनत्वात्। न तु राज्ञि मिश्राद्धं कुर्वीतेति भिन्नवाक्यतया तु मवाधेऽमावास्यापौर्णमास्यो
दर्शादिति विधित्वात् राज्ञिकृतस्यामावास्यादिश्राद्धस्य फलजनकत्वापत्तिर्दुर्वारा। अमावास्यादेः युक्तिदं ज्ञावच्छि
न्नतयाऽमावास्यादिश्राद्धत्वेन राज्ञिश्राद्धस्य विफलत्वरूपप्रयोज्यत्वादिति तदसत्। रात्रिश्राद्धं न कुर्वीतेत्यस्य शुचिनाकर्म
कर्त्तव्यमिति वाद्विधिकारविधिरूपतया कर्मसामान्ये फलविशेषणत्वेन शुचित्वस्याधिकारतया अशुचिकृतकर्मणः फ

लस्वरूपयोग्यत्वेपिफलानुपधायकत्ववत्विशिष्टवर्णत्रिंशत्वाद्यतिरिक्तस्याद्दृष्टसामान्येपिकालविशेषवर्णनपाराविमे
दृष्टाधिकारसमाराविकृतत्तन्मावास्यादिश्राद्धादेः फलस्वरूपयोग्यत्वेपिफलानुपधायकत्वात्। नचतत्रसमानाभावइ
~~तियत्नंकर्मसामान्येपुच्चित्वस्यैवामावास्यादिश्राद्धादेः फलस्वरूपयोग्यत्वेपिफलानुपधायकत्वात्। नचतत्रसमानाभावइ~~
तियत्नंकर्मसामान्येपुच्चित्वस्यैवामावास्यादिश्राद्धजन्यतावच्छेदकपुण्यत्वावांतरनिखिलजातिव्याप्यजातिविशिष्टाव
च्छिन्नजातिराविभिन्नकालकृतश्राद्धस्यापिसामान्यतःकारणत्वात्। नचैवमपिरात्रिश्राद्धस्यरात्रिमित्रमहाफलकृतत्
वात्ततःफलापत्तिर्दुर्वारैवेतिवाच्यं। एतन्मतेरात्रिश्राद्धत्वेनतस्यकारणत्वात्। नहिप्रेतरूपेणबेदादृष्टजनकत्वेतेनैवरूपे
लकारणतेतिनियमोमानाभावादिति। अपरेतुनञोभेदएवार्थः तस्यचामावास्यापांपित्रभ्योदद्यादित्यमावास्यादि
पदार्थैःन्वयः तथाचरात्रिभिन्नामावास्यापांपितृभ्योदद्यादितिवाक्यार्थस्तथाचयःसंभवत्येकवाक्यत्वेवाक्यभेदोहिने
ष्यतइतिन्यायात्। एवंसतिलक्षणाविरहेणलाघवमपि। अस्यतांभावत्वान्योन्याभावत्वयोरूपयोरेवाखंडोपाधिरूपयोः
समशरीरत्वात्विनिगमकाभावेनशक्यतावच्छेदकतयालक्षणाविरहात्। ततोऽन्यतमाभावत्वेनशक्यमवच्छेदकत्वेनाभाव
त्वेनापिशक्यस्यसमारोपितकल्पमानामात्रिकत्वसिद्धत्वाच्च। नचतथापिदद्यात्कुर्वीतेतिक्रियापदद्वयोरन्यतरवैयर्थ्या
पत्तिर्दुर्वारैवदधातुरूपधात्वोःसमानार्थकत्वाभावेनसंभेदेनान्यतरवैयर्थ्यमितिन्यायात्रिवमत्वादितिवाच्यं। तथासति

क्रिमापदैवैयर्थ्ये । मिश्रामित्रवाक्यतेऽनुयाजेयेयजामहमंत्रपाठनिषेधकवाक्येऽपि निषेधपरत्वापत्तेः तत्रपर्युदा
सपरत्वस्यैवपर्युदासाधिकरणसिद्धत्वात् । तत्रपर्युदासपरत्वाभावेपर्युदासस्थलस्यैवदुर्लभत्वापत्तेः । नचप्रजानिषु
येयजामहं करोति नानुयाजेष्विसस्यैवतत्रनिषेधविधिसमाक्रिनापदद्वयाभावेनतदैकार्थ्याभावात् येयजामहमि
त्याद्यनुषंगप्रसंगापत्तेश्चैनेकवाक्यत्वासंभवइतिवाच्यं । प्रजानिषु येयजामहं करोतिनानुयाजेष्विति वाक्यस्यैकवाक्यस्यै
त्वाभावेनतद्वाक्यस्यैकवाक्यत्वासंभवेविधिपक्षेऽपिपर्युदासग्रहणस्यायोगात्तत्पाठिस्यैवैसमर्दशप्रजापतिर्यज
येत्समद्वादशत्वमस्येकंवाक्यं नानुयाजेषुयेयजामहंकरोतीतिहि नीयं स्वत्रप्रजापतिरिस्तेनप्रथमगामैकदेशेनत्रा
ययेतिचतुरक्षरं अस्त्रश्रौषडितिचतुरक्षरंयजेतिद्व्यक्षरंयेयजामहइतिपंचाक्षरं द्व्यक्षरोवषट्कारएषवैस
मदशाक्षरोमंत्रगणः प्रजापतिस्तेनतत्तुल्यत्वेप्रजापतेरपिसमदशकलिंगशरीरसमहिरूपत्वात् । यजेत्यादिपत्नोनु
गतइत्यनारभ्याधीतेनवाक्येनैकदेशेनसर्वमस्तेषु मंत्रगणो विनिर्मुक्तः । नानुयाजेष्वित्यादिहितीयवाक्येनमंत्रगणविधे
रेवपक्षप्राप्तौ भूतंसदनुयाजातिरिक्तयागेषुयेयजामहंविधिरूपं पर्युदासपरमिति । नचैवमतिरात्रेषोडशिनंगृह्णा
तिनातिरात्रेषोडशिनंगृह्णातीत्यत्रापि पर्युदासपरत्वापत्तिरितिवाच्यं । षोडशिपात्रग्रहणेतदेवाभावेनानन्यगतिकत्वे
वयस्तोविकल्पाश्रयणीयतयात्रपर्युदासाधिकरणादेवसिद्धत्वात् । तेनअथपराभिप्रायं हंतकुर्वीतेतस्वपक्षसमप्र

त्वं न संभवति पर्युदासस्य भेदस्य तथा तदनुयोगिकालवाचकपदाभावात्। न च समस्तकालपदस्याहोरात्रदोष
इति वाच्यं तत्प्राप्तिगौरवापत्तेः प्रसज्यप्रतिषेधपरत्वांगीकारस्यैवौचित्यादिति चेन्न तद्वाक्यस्य प्रतिषेधपरत्वे विशे
षनिषेधे सामान्यविधेस्तदितरपरत्वस्य ब्राह्मणेभ्यो दधि दीयतां न कौण्डिन्यायेत्यादौ क्लृप्तिसिद्धत्वमामावास्यापितृ
भ्यो दद्यादित्यादिवाक्यश्राद्धविधिषु अमावास्यादिपदानां रात्रौ तु अमावास्यापरत्वे लक्षणापत्तिरूपगौरवप्रसंगेन तदपे
क्षया पर्युदासपरत्वमुपेक्ष्य समस्तैककालपदाध्याहारकल्पनेनापि च न पर्युदासपरत्वस्यैव युक्तिसहत्वात् शेषं पूर्ववद्
दिति प्राहुः। केचित्तु अमावास्यामामिला दिवा कैर्न दिवाश्राद्धानि श्राद्धयोग्यमपरिवृषमप्रत्वात्। रात्रौ श्राद्धं न कुर्वीतेति वाक्यं
दिवाश्राद्धेऽमावास्यापरं तथा च रात्रौ तत्कालीनश्राद्धकरणं प्रशस्तमिति सक्वपवोधेन दिवाश्राद्धस्य प्राशस्त्यप्रत्ययः अर्थ
तस्य च रात्रिश्राद्धस्य अमावास्याश्राद्धत्वेन लभ्यते कृष्णपक्षादृष्टजनककल्पकत्वे एकोत्कर्षापकर्षौ चादृष्टगतौ फलो
त्कर्षापकर्षप्रयोजकौ जातिविशेषरूपौ एवं च दिवाश्राद्धजन्यतावच्छेदकं पुण्यत्वावान्तरजातिविशेषावच्छिन्नं प्रति दि
वाश्राद्धस्य कारणत्वमेकं रात्रिश्राद्धजन्यतावच्छेदकपुण्यत्वावान्तरजातिविशेषावच्छिन्नं प्रति रात्रिश्राद्धस्य चाप
रं। अपि च दिवाश्राद्धजन्यतावच्छेदकवैजात्यस्य दिवाश्राद्धानि रात्रिश्राद्धजन्यादृष्टसाधारण्ये नामावास्यादिश्राद्धजन्यताव
च्छेदकेन पुण्यत्वावान्तरजातिविशेषेण समनन्तरमामावास्यादिदिवाश्राद्धजन्यादृष्टसांकर्यापत्तेः अष्टकादिदिवाश्राद्धज

न्या·कौ· न्यादृष्टामावास्यादिरात्रिश्राद्धजन्यादृष्टयोः परस्परव्यभिचारात् एवं रात्रिश्राद्धजन्यतावच्छेदकवैजात्यस्यापि तेन सम
मावास्यादिरात्रिश्राद्धजन्यादृष्टे सांकर्यापत्तिः अष्टकादिरात्रिश्राद्धजन्यादृष्टामावास्यादिदिवाश्राद्धजन्यादृष्टरा
त्रिश्राद्धजन्यादृष्टसाधारणत्वेन तद्वैजात्यममावास्याश्राद्धवैजात्यं हि दिवाश्राद्धरात्रिश्राद्धजन्यादृष्टसाधारणं नैकं किं तु एकं
दिवाश्राद्धजन्यादृष्टमात्रवृत्तिरपरं च रात्रिश्राद्धजन्यादृष्टमात्रवृत्तिकारणतापि भिन्नैकं दिवाश्राद्धत्वरात्रिश्राद्धत्वाभ्यां
मित्युपगमात् । अपराह्णे श्राद्धमिति वाक्यस्य प्राशस्त्यपरत्वे पक्षिन्नदृष्टभेदेपदिन एव मध्याह्नमरणतिथ्यभावःत
स्मिन्नद्वे एकोद्दिष्टविलोपप्रसंगः प्रसन्नकुर्पीदिति वीप्साभंगप्रसंगश्च । एवं पक्षिन्यासे दिनद्वयपक्षे एव मरणतिथ्य
भावस्तस्मिन्मासे प्रेतषाण्मासिकैकोद्दिष्टविलोपापत्तेः षोडशश्राद्धाभावेन प्रेतत्वापरिहारापत्तिः पूर्वाह्णे मातृकं
श्राद्धमपराह्णे च पैतृकं । एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति ब्रह्मपुराणवचनेन एकोद्दिष्टकरणस्य म
ध्याह्नमात्रकर्त्तव्यताबोधनात् कालांतरविधायकवचनाभावेन प्राशस्त्यपरमिदं वचनमिति वक्तुमशक्यत्वात्
। एवं चाविनादिवामरणे त्रिमित्रैश्राद्धे कुर्वीते तिपर्युदासपरत्वे तु तस्यैव कालांतरस्यापकत्वाभावान्मध्याह्नविधेः प्राश
स्त्यपरत्वसंभवः कुत्राकालादिति चिंत्यकालांतरस्याविधितो प्राप्तावपि प्रसज्यमानमिति वीप्साघटनापात्तुपपसेर्वमध्याह्नवि
धेः प्राशस्त्यपरत्वसंभवादित्याकुलमस्तत् । एवं चाविनादिवामरणे प्राशस्त्यपरत्वे सकलेप्साभासिकसंमतविधित्वा

नुपपत्तेः अनेकवैजात्यकारणतादिकल्पनाप्रयुक्तगौरवापत्तेश्च एतेन रात्रावित्यादिवाक्ये नञो मा शास्त्रे लक्षणा
परात्रिश्राद्धसामान्यस्य बोधप्रतिरात्रिश्राद्धकरणमप्रशस्तमिति बोधः शेषं पूर्ववदित्यपि परास्तं। नञो मा शास्त्रस्य
लक्षणाकल्पनाप्रयुक्तगौरवापत्तेश्चेति दिक्। ननिरस्तैतत्द्वीपवर्त्तिरविरश्मिजालः कालविशेषोऽत्र रात्रिः निरस्तमे-
तत्द्वीपवर्त्तिरविरश्मिजालं यदेतिप्रयुक्तसा एतद्द्वीपवर्त्तिरविरश्मिजालाभाववान् कालविशेषोऽत्र द्वीपे रात्रिरित्यर्थः।
रात्रिसामान्यलक्षणे एतद्द्वीपवर्त्तिरविरश्मिसम्बन्धकालीनद्वीपान्तरीयरात्रावव्याप्तिप्रसंगात् अत्र द्वीप इति लक्ष्य-
घटकं दिवसेऽपि कुत्रचिद्रश्मीनामभावसत्त्वादतिव्याप्तिवारणाय जालपदं सामान्याभावलाभाय तथा चैतद्द्वीपव-
र्त्तिरविरश्मिसामान्याभावाधिकरणीभूतः कालविशेषोऽत्र द्वीपे रात्रिरिति फलितं। एतेनात्र निरुक्ते न प्रागभावः अती-
तरविरश्मीनां जालान्तर्गतानां प्रागभावविरहेणासंभवापत्तेः नापि ध्वंसः अनागतरविरश्मीनां जालान्तर्गतानां ध्वंस-
विरहेणासंभवापत्तेरिति निरस्तं। न च दिवसेऽपि द्वीपान्तरावच्छेदेन तादृशसामान्याभावसत्त्वादतिव्याप्तिरिति वाच्यं नि-
रवच्छिन्नतादृशसामान्याभावाधिकरणत्वस्य विवक्षितत्वात्। अस्मोमानाभावोपादिना व्याप्यत्वमित्यस्तु तादृशरश्मिस-
त्त्वसामान्याभावस्य समेव वा दिवसस्तथैव रात्रावपि द्वीपान्तरवर्त्तिरविरश्मिसत्त्वेनासंभववारणाय एतद्द्वीपवर्त्तीति रश्मिवि-
शेषणं। द्वीपो नाम भारतवर्षादिरूपो भूखण्डविशेषः तद्वृत्तित्वं च तत्संयुक्तत्वं तेन रात्रावपि जंबुद्वीपान्तर्गतस्य सुमेरोस्त

न्या॰ कौ॰

त्तरदिशि रविरश्मिसत्वेपि नाव्याप्तिः। नच भारतवर्षादिपरत्वे पुष्कलदेशोपस्थापकदंडद्वयं रात्रिस्तदा कामरूपादौ र
विरश्मिसत्वेपि नाव्याप्तिः। नच भारतवर्षादिपरत्वे पुष्कलदेशोपस्थापकदंडद्वयं रात्रिस्तदा कामरूपादौ रविरश्मिसत्वा
दव्याप्तिर्दुर्वारेति वाच्यं। तदानीं कामरूपादौ रविरश्मिसत्वे मानाभावात्। अस्तु वा पावके हेतुः वच्छेदेन रविरश्मिसंबंधाभ
वेप्यभाषिकानां रात्रिव्यवहारस्तु तत्र भेदद्वीप पदं सत्व गौडमैथिलादिरूपभूखंडविशेषएव। एवं वापि चंद्रादीनां
रश्मिसत्वादर्शनजन्यव्यवहाराभ्युपगमात्। अथैतत्द्वीपवर्त्तिरविसामान्याभाववान्कालविशेषः इति वाच्यं किं रश्मिप
देन। नच रात्रावप्येतत्द्वीपवर्त्तिरवेर्द्वीपान्तरावच्छेदेन सत्वादसंभव इति वाच्यं रश्मिपदं तादृशरश्मिपरस्तु नद्वी
पांतरावच्छेदेन रात्रौ एतत्द्वीपसंबद्धरविरश्मीनां द्वीपांतरे सत्वे मानाभावादिति वाच्यं। एतत्द्वीपवर्त्तिरविविशिष्टर
श्म्यभावविवक्षणेपि तद्घटकरश्मिसंभवात् इति चेन्न। अखंडाभावतया वैयर्थ्याभावात् द्वीपस्य भूखंडविशेषात्म
कतया तद्वृत्तिरश्म्यभावस्य दर्शितरीत्या रविरश्मिपदस्य सार्थकत्वात्। नच रात्रावपि सौरतेजोभिन्नप्रवाल
कादीनां रविरश्मिसत्वान्न तत्र रात्रिलक्षणसंभव इति वाच्यं। रश्मिपदस्य प्रकृष्टमहत्वोद्भूतरूपवत्तेजः परस्मात्
वस्तुतस्तु। रविरश्मिपदं चंद्रप्रभादिव्यावृत्तसौरप्रभाव्यक्तिप्रभात्वव्याप्यानुभवसिद्धजातिविशेषविशिष्टपरं।
प्रभात्वं च चाक्षुषजनकतावच्छेदकतया सिद्धं महदुद्भूतानभिभूतरूपवत्तेजोमात्रवृत्तिः त्रसरेणुमात्रवृत्तेजोजातिवि

दोषः ॥ अस्य प्यारविरश्मित्वस्यैव दुर्वचत्वात् । तद्भिन्नरविसंयुक्तरश्मित्वं तारकादिरश्मिसाधारणत्वात् । तन्नाद्यः ॥ रविर
श्मीनां तत्संयोगानां वा कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य गगनादावपि सत्त्वादतिव्याप्तिवारणाय काल
पदं मलयेऽतिव्याप्तिवारणाय विशेषपदं नाहो तत्र रविरश्म्यागमात्तस्यारात्रिभिन्नत्वाद्वारणात् विशेषत्वं च सूर्यध
रत्वं महाकालादौ च निरवच्छिन्नत्वात् इत्याभावाधिकरणत्वविरहात् अतिव्याप्तिः । केचित्तु । निरस्तेत्यादेरेतत्तद्द्वीपाव
च्छेदेन रविरश्मीनामन्योन्याभावाधिकरणत्वमर्थः । एवं च निरवच्छिन्नाधिकरणत्वेन विवक्षणीये दिवसे द्वीपांतरावच्छेदेन
रविरश्म्यभावसत्त्वेऽपि तत्तद्द्वीपावच्छेदेन रविरश्म्यभावसत्त्वादेवातिव्याप्तिविरहात् कुत्र वारणायापि सार्थक्यमेतत्
द्वीपसंयुक्तानां रविरश्मीनां द्वीपांतरे हि त्रिक्षणावस्थानेऽपि नासंभवो व्याप्तिर्वा द्वीपांतरे तत्सत्त्वेऽपि एतत्तद्द्वीपावच्छेदे
न तदभावसत्त्वात् । नापि मलयेऽतिव्याप्तिः तदानीमेतत्तद्द्वीपाभावेन तदवच्छेदेन रविरश्म्यभावस्य तत्रासंभवात् । म
हाकालेऽतिव्याप्तिवारणाय च विशेषपदं विशेषत्वं च सूक्ष्मकालत्वं त्र्यणुकत्वं पूर्ववदित्याहुः । तच्च तत्र निरासिष्येऽत्र
ध्वंसः । तथा चैतत्तद्द्वीपवर्तिभावद्रविरश्मिध्वंसविशिष्टः कालविशेषोऽत्र द्वीपे रात्रिरित्यर्थः । अत्र भावत्वं तु भावपरत्वे
ध्वंसप्रागभावयोरसंनाभावविरोधित्वादसंभवापत्तेः । न च रात्राववश्यमनागतरविरश्मीनां ध्वंसविरहादसंभव इति
नास्ववृत्तिध्वंसप्रतियोग्युत्पत्तिकत्वेन रविरश्मिविशेषणात् । स्वपदं तत्तत्कालाभिमतपरं । न च ध्वंसस्य सामान्या

न्या° कौ

भावत्वात्तंगीकारात्तादृशयाचन्द्रविरश्मिप्रतियोगिको ध्वंसोऽप्रसिद्ध इति वाच्यं । तथाविधाभाववतो रविरश्मयस्तत्र
त्वेन ध्वंसविशिष्टत्वस्य तथाविधरविरश्मीनामार्वतो ध्वंसात्तद्विशिष्टत्वस्य वा विवक्षितत्वात् । न च तथापि रात्रिशेषे
द्वीपान्तरीयत्वनानोप्रान्तरे तत्तद्वीपसंबद्धानां रविरश्मीनां नाशस्य तत्राभावादव्याप्तिः एतत्तद्वीपवर्त्तित्वपदेन एतत्तद्वी
पीयसत्त्वविवक्षणोऽपि सामयेतत्तद्वीपीयत्वन रविरश्मीनां रात्रौ द्वीपान्तरे द्वित्रिक्षणावस्थानसंभवादव्याप्तिरिति वाच्यं द्वी
पान्तरीयत्वनरविरश्मीनामेतत्तद्वीपागमने एतत्तद्वीपवर्त्तिरविरश्मीनां द्वीपान्तरगमने च मानाभावात् एतत्तद्वीप
वर्त्तिरविरश्मिपदेन एतत्तद्वीपनिष्ठरविरश्मिसंयोगस्य वा विवक्षितत्वात् । भाविप्रलये महाकाले चातिव्याप्तिवा
रणाय विशेषणपदं विशेषत्वे प्रलयान्यत्वं । महानिरासपदं प्रागभावपरं तथा चैतत्तद्वीपवर्त्तिपाद्यविरश्मिप्राग
भावविशिष्टः कालविशेषो ऽन्यद्वीपे ऽन्तिरिक्तपर्यः स्ववृत्ति ध्वंसप्रतियोगित्वेन रश्मिविशेषणीयः स्वपदं त्वस्य लेना
भिमतपरं तेन एतद्वर्त्तीनरविरश्मीनां प्रागभावविरहेऽपि नासंभवः एतत्प्रलयेऽतिव्याप्तिवारणाय चाविशेषपदं
विशेषत्वं च स्वसमानाधारत्वं स्वेमसमत पूर्ववादिसाधुः तदसत् । प्रलयान्यवहितेनतत्द्वीपीयकालस्य रात्रित्वासंदेहात्
ध्वंसघटितलक्षणस्य संदिग्धाव्याप्तेः एतत्तद्वीपीयप्रलयोत्तरकालस्य रात्र्यव्यवहितोत्तरभाविता संदेहात् प्रागभाव
घटितस्यापि संदिग्धाव्याप्तिकत्वात् तस्मात् ध्वंसप्रागभावयोरसत्ताभावविशेषविशेषितः भावादसंताभावगर्भ तैवप्रामस्मी

ह

सम्यं विस्तरेण। क्त्वाप्रत्ययस्य प्रधानक्रियापूर्वकालीनत्वमर्थः नच भुक्त्वा वर्षोत्तरं गते चैत्रे चैत्रो भुक्त्वा व्रजतीति प्रयो-
गवारणाय प्रधानक्रियायाः अव्यवहितपूर्वकालीनत्वमेव क्त्वाप्रत्ययस्यह्यक्तिरुच्यितेति वाच्यं। भोजनानंतरं घटिकादि-
कादिविलंबेन गते चैत्रे चैत्रो भुक्त्वा व्रजतीति प्रयोगानुपपत्तेस्तत्पावकुमहाकालात्। नचैवं भुक्त्वा वर्षोत्तरं गते चैत्रे
चैत्रो भुक्त्वा व्रजतीति प्रयोगापत्तिर्दुर्वारैवेति वाच्यं। मतः प्रधानक्रियापूर्वकालत्वस्य प्रधानक्रियाप्रागभावाधिक-
रणघटिकामुहूर्तादिनानाविधकालव्यक्तित्वरूपस्य नानात्वेनाव्ययानामनेकार्थकत्वात् क्त्वाप्रत्ययस्याव्ययरूपत्व-
सयत्वेन च नानार्थतया भुक्त्वा व्रजतीत्यादौ वर्षात्मकस्थूलकालघटितप्रधानक्रियापूर्वकालत्वविशिष्टं न क्त्वाप्रत्ययस्या-
र्थः किंतु प्रधानक्रियाप्रागभावाधिकरणघटिकादिरूपपूर्वकालवृत्तित्वं तथैवमुपगमेनोक्तापत्त्यभावात् अत्र पूर्वका-
लीनत्वमात्रं क्त्वाप्रत्ययार्थः प्रधानक्रियायाः तिङादिप्रकृतित एव लाभः एवं समानकर्तृकत्वमपि क्त्वाप्रत्ययस्या-
र्थः अन्यथा मैत्रभोजनानंतरं गते चैत्रे चैत्रो भुक्त्वा व्रजतीति प्रयोगापत्तेः एवं च चैत्रो भुक्त्वा व्रजतीत्यादौ गमनक्रिया-
पूर्वकालीनभोजनसमानकर्तृकपदमिन्नं तदनुकूलकृतिमांश्चैत्र इत्याद्याकारकोऽन्वयबोधः अपमुखंव्यादायस्व-
पितीत्यादौ ग्रहणात्क्त्वापतितः कस्तइत्यत एव च क्त्वाप्रत्ययार्थपूर्वकालीनत्वाद्यनुपपत्तिः मुखव्यादानस्य स्वापज-
न्यत्वेन स्मरणात्कारस्यकं सपतनजन्यत्वेन च मुखव्यादानस्मरणात्कारयोः स्वापकं सपतनपूर्वकालीनत्वासंभवा

न्या॰ कौ॰ दिति चैत्रो मुखं व्यादाय स्वपितीत्यादौ मुखव्यादानस्येति स्वस्वापेनाव्यवधानात् एवं ऋणं कृत्वा पतितः कंस
इत्यादावपि कंसः पतितो ऋणं करोतीति स्वस्वप्येनान्वयानुपपत्तिः वस्तुतः क्त्वाप्रत्ययस्य नानार्थकतयामु
खं व्यादाय स्वपेत्यादौ क्त्वाप्रत्ययेन जनकत्वस्य बोधनात् मुखव्यादानजनकः स्वाप इत्याद्यन्वयबोधोपगमान्न कौ
पिदोषः न चावजानासि मां यस्मादतस्ते न भविष्यति। मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सेत्यत्र क्त्वाप्रत्ययार्थ
समानकर्तृकत्वाद्यनुपपत्तिः प्रजाकर्तृकोत्पत्तिनिरूपप्रधानक्रियासमानकर्तृकत्वस्य दिलीपकर्तृकाराधन
क्रियायामभावादिति वाच्यं तत्रानाराध्येत्यनन्तरं स्थितस्येत्यध्याहारेण स्थितिरूपप्रधानक्रियामादाय तत्र समान
कर्तृकत्वान्वयबोधसंभवादित्याचार्यानुयायिनः। चिंतामणिकारानुयायिनस्तु पूर्वकालीनत्वं न क्त्वाप्रत्ययार्थः किंत्वा
नंतर्यं भुक्त्वा व्रजतीत्यादौ गमनक्रियायां भोजनानंतर्यबोधस्यानुभविकत्वात्। एवं समानकर्तृकत्वमपि क्त्वाप्रत्य
यार्थः अतो न मैत्रभोजनानंतरं गते चैत्रे चैत्रो भुक्त्वा गच्छतीति प्रयोगापत्तिः एवं च चैत्रो भुक्त्वा व्रजतीत्यादौ भोजनस
मानकर्तृकं यद्भोजनानंतरगमनं तदनुकूलकृतिमांश्चैत्र इत्यन्वयबोधः तदानंतर्यं च तत्तद्ध्वंसाधिकरणक्षणावृत्ति
त्वरूपं बोध्यं। न तु तदधिकरणक्षणध्वंसाधिकरणक्षणावृत्तित्वं तत्पाककाले भुंजाने पुरुषे पक्त्वा भुंक्त इत्यादिप्रयो
गापत्तेः पाकाधिकरणक्षणध्वंसाधिकरणक्षणावृत्तित्वस्य तत्र भोजने सत्त्वात्। अथैवमपि मैत्रभोजनानंतर

गते चैत्रे चैत्रो भुक्त्वा गच्छतीति प्रयोगो दुर्वारः मैत्रभोजनानंतर्यस्य गमने तत्र चैत्रकर्तृकभोजनमादाय समानकर्तृक
त्वस्यापि संभवादिति चेन्न। यद्भोजनानंतर्यं यद्गमने प्रतीयते तद्भोजनसमानकर्तृकत्वस्यैव तत्रान्वयप्रतीयमानानु
पसंभावात्। चैत्रः स्थित्वा पठतीत्यादौ तु दर्शनेनिष्टमतत् चैत्रस्थितिसधिकरणकालवृत्तित्वरूपचैत्रस्थितिसामानाधिक
रण्यं तत्र क्त्वाप्रत्ययस्य लक्षणया स्थितिसमानकालीनदर्शनबोधनात् सर्वत्रैव तत्तत्प्रयोगात्। एवं मुखं व्यादाय स्वपिति
त्यादौ मुखव्यादानजनकस्मरणात् कृत्वापाणिनितः कंसट्टलादौ तु स्मरणाकारजनके क्त्वाप्रत्ययस्य लक्षणेति वदंति वैयाकर
णानुयायिनस्तु क्त्वाप्रत्ययस्य भाव एवार्थः समानकर्तृकत्वादिकं च क्त्वाप्रत्ययस्य द्योत्यमेव द्योतकत्वं चार्थीयो संसर्गे
तात्पर्यग्राहकत्वं तथा हि प्रत्ययभावस्य साध्यभावस्य एव स च धातुना लब्धः क्त्वाप्रत्ययस्य भूतता चक्रिया क्रियांतरे विशेष
णं धातुसंबंधाधिकारात् तत्र मोः संबंधश्च समानकर्तृकत्वमानं तयोरादिकं च तत्र संबंधतात्पर्यग्राहकाः क्त्वादयः स
मानकर्तृकयोः पूर्वकाले क्त्वेति सूत्रमपि द्योतकत्वाभिप्रायेणैव एवं समानकर्तृकत्वादिप्रकारकबोधस्तु विवादग्रस्त
स्य एवं च भुक्त्वा व्रजतीत्यादौ गमने भोजनस्य समानकर्तृकत्वानंतर्याभ्यां संबंधेन मुखं व्यादाय स्वपितीत्यत्र स्वापे मु
खव्यादानस्य समानकर्तृकत्वसमानकालीनत्वोभयसंबंधेनाधीत्य तिष्ठतीत्यादौ च स्थाने अध्ययनस्य समानकर्तृ
कत्वव्याप्यत्वोभयसंबंधेन तमेव विदित्वा तिमृत्युमेतीत्यादौ च तिमृत्ययनेतद्वेदनस्य समानकर्तृकत्वजन्यत्वोभयसं

न्या॰कौ॰ वंधेतात्वयः एवमन्यत्रापि यथानुभवमूह्यमित्यास्तां प्रसक्तम्। भुक्त्वा व्रजति न तु स्नात्वेत्यत्र गमने स्नानसमा
नकर्तृकत्वानंतर्ययोर्मुखं व्यादाय स्वपिति न तु संदर्शयेत्यत्र स्वापे मुखसंवरणसमानकर्तृकत्वसमानकालीन
त्वयोरबाधोस्ति इति न तु शयित्वेत्यत्रापि स्वापे शयनसमानकर्तृकत्वव्याप्यत्वयोर्भुक्त्वैवाहं तृप्तो न तु पीत्वेत्यादौ तृप्तौ
पानसमानकर्तृकत्वजन्यत्वोभयाभावो न ज्ञायते इति यथायथं समानकर्तृकत्वानंतर्यादौ क्त्वाप्रत्ययार्थत्व
स्याकल्पकत्वात् न च तत्र समानकर्तृकत्वानंतर्यादिसंबंधावच्छिन्नप्रतियोगिताकाभावस्यैव नञर्थत्वेन तेषां
क्त्वाप्रत्ययार्थत्वमिति वाच्यं समानकर्तृकत्वादेर्वृत्तिनियामकत्वमाने तत्संबंधावच्छिन्नप्रतियोगिताकाभाव
स्यैव धर्तुमशक्यत्वात्। यस्य तस्य समानकर्तृकत्वादौ क्त्वाप्रत्ययार्थत्वोपगमे भुक्त्वा व्रजतीत्यादिशाब्दसाम
ग्र्याः ग्रामनंभोजनसमानकर्तृकत्वाभाववदादित्याद्यनेकविधमानसादौ प्रतिबंधकत्वकल्पनेन लाघवात् समा
नकर्तृकत्वादेः क्त्वाप्रत्ययार्थत्वमेवोचितं अन्यथा तादृशशाब्दसामग्रीकालीनतादृशमानसादिवारणायानेक प्रतिबं
धकतापत्तेरिति वाच्यं मन्मते तु तादृशशाब्दसामग्रीकाले योग्यताज्ञानविधया ग्रामगमनादौ भोजनसमानकर्तृकत्वा
दिनिर्णयस्यावश्यकत्वमाबाधनिर्णयविधया क्लृप्तस्य प्रतिबंधकत्वमेव तत्र कारणात्। न च संशयनिश्चयसाधा
रणयोग्यताज्ञानस्य शाब्दबोधहेतुतया योग्यतासंशयसत्त्वे तद्वारणायोक्तप्रतिबंधकताकल्पनमावश्यकं वा

योगव्यवछेदबोधकत्वांगीकारे गौरवापत्तेरभावात्। ज्ञानमर्थं गृह्णातीत्यादौ च ज्ञानत्वादिव्यापकत्वाभाववि
शिष्टार्थविषयिताप्रसाद्यभावव्यवछेदस्य ज्ञानत्वाद्यवछेदेन सत्वान्न दोषः अत्र देवो ध्वंसं करोति क्रियादिं स
गतेवकारस्यात्यंतायोगव्यवछेदबोधकत्वमिति न सर्वथा नियमः किंतु संसर्गः तात्पर्यवशादनुभवानुसारेण
क्वचिदन्यथापि बोधात् एवं च यथानुभवं तादृशबोधे तादृशानुपूर्वीज्ञानस्य हेतुत्वं बोध्यं अत एव चैत्रस्यैव दं धनं
दपथिकानेव गंधद्रव्यादावेवकारस्य विशेषणसंगतत्वेपि चैत्रान्यस्वत्वव्यवछेदः पथिकान्यसमवेतत्वव्यवछेदहू
पात्ययोगव्यवछेदबोधकत्वमनुपपद्यते एवं च ऋतौ स्वदारान्गछेदेवेत्यादावेवकारस्य क्रियासंगतत्वेप्ययोगव्य
वछेदबोधकत्वं तत्र ऋतुकालावछिन्नस्वदारनिष्ठकर्मताकगमनाभावाभावः प्रत्यवायाभावरूपेष्टसाधनमि
त्याद्याकारक एवकारार्थविशिष्टको बोधः नचैतादृशबोधे ऋतुकालीनस्वदारकर्मकगमनाभावस्य प्रत्यवाय
हेतुत्वाभिधानेन ऋतुकालीनस्वदारकर्मकगमनाभावात्प्रत्यवायोत्पादो न स्यादिति वाच्यं। तादृशबोधोत्तरं पदभा
वोपदभावरूपेष्टसाधनं तत्र ऋतुगमनमिति व्याप्तिबलात् ऋतावपदर्शितगमनाभावे प्रत्यवायहेतुत्वस्यानुमितिसं
भवेन तादृशगमनाभावस्य प्रत्यवायहेतुत्वाभिधानेनोक्तदोषाभावात्। ननु ऋतुकालीनस्वदारकर्मकगमनाभावेत्व
त्त्वचिपर्यंततत्कालपर्यंतयाचकाशमूढस्थलेपकराशीरावछेदेन स्वदारकर्मकगमनसत्वे शरीरांतरावछेदेन

प्रसक्तव्याप्तेर्न स्यात् तादृशगमनाभावरूपहेत्वभावात्। न च प्रसक्तव्याप्ये तच्छरीरावच्छिन्नतत्कालीनस्वदारकर्म
कस्वकृतिजन्यगमनाभावस्य हेतुत्वकल्पनान्न दोष इति वाच्यं तथा सति परपुरुषस्य तत्कालीनस्वदारकर्म
कगमनप्रसिद्धेस्तस्य तदभावाप्रसिद्ध्या प्रसक्तव्याप्तेर्न स्यादिति चेन्न। स्वदारनिष्ठप्रत्यक्षतत्कालावच्छिन्नतत्तच्छरी
रावच्छिन्नस्वकृतिजन्याभिगमनसंबंधावच्छिन्नतत्तदात्माभावकूटस्येव प्रसक्तव्याप्यप्रतिहेतुत्वेनोक्तदोषाभावात्।
प्रसक्ततादृशाभिगमनप्रसिद्धेस्तस्येतादृशसंबंधस्याव्यधिकरणत्वात् तत्संबंधावच्छिन्नप्रतियोगिताकतदभावस्य
स्वदारेपि सत्त्वात्। वस्तुतस्तु स्वदारकर्मकत्वस्वजन्यत्वकत्वोभयाभाववद्विशिष्टतत्तच्छरीरावच्छिन्नतत्कालाव
च्छिन्नगमनाभावानां प्रसक्तव्याप्यहेतुत्वान्नानुपपत्तिः न च प्रसक्ततादृशगमनप्रसिद्धेस्तस्य कारणाभावात् प्रसक्तव्या
प्येन स्यादिति वाच्यं तत्रापि तत्कालावच्छेदेन तत्तच्छरीरावच्छेदेन चरेत्संतरेणापि तदेवागमनसंभवेनाप्रसि
द्ध्यभावादिति संक्षेपः। नन्वास्तु सर्वेषां पक्षाणां प्रत्येकमवच्छेदकत्वं वा पक्षः। अप्रतियोगिव्यापकसंबद्धत्वं पंचनी
लसरोजं भवत्वेवं साध्यतावच्छेदकसाश्रयधर्मिविशिष्टलक्षणमानी लभवनवदसत्वमवच्छेदत्वरीतिसत्त्वसामाना
धिकरण्येन सती मते तेषां रक्तः पांडुर एवेत्यादौ रक्तत्वावच्छेदेन पांडुरत्वस्यावच्छेदकत्वे धर्मवधनुर्द्धरइत्यादौ
धनुर्धरत्वावच्छेदेन पापित्वस्यावच्छेदकत्वे धः प्रतियोगिव्यापकं गंधाइत्यादौ प्रतियोगित्वसमवेतत्वमवच्छेदकत्वं धा

है प्रतीयते वह्निमत्त्वेव धूमवत्त्वादौ धूमे वह्निमद्भिन्नसंयुक्तत्वमवच्छेदः घटत्वाभाववत्त्वेव द्रव्यत्वाभाववत्त्वा
दौ द्रव्यत्वाभावे घटत्वाभाववद्वृत्तिविरोधित्वाभावः अतो स्वरूपानावच्छेदेवेत्यत्र तादृशगमनवद्धन्यत्वमवच्छे
देऽप्रत्ययाप्रपरिहाररूपेष्टसाधनत्वं प्रतीयत इत्यादिवोध्यं। न च पूर्वपक्षिमतेव गंधवत्त्वादौ पृथिव्याः सम्मर्पविरो
धित्वमेव स्तिधुसाधूपमेव कारणं र्भ्रात्त्विलेवमः एकविरोधित्वेनोपस्थितस्वासमवायावृषस्वात्तुसत्त्वादितिवाच्यं।
एवकारस्थले तादृशाश्रुसत्तिसंकोचात्। एवमन्यादृशाश्रुत्वत्तिविरोधोपितत्रप्रयुक्तरेवकारस्थले संकोचवं
गीकृत्यपरिहरणीयमित्ति नव्यंनिश्चयपचैत्रस्यैवायं भ्रांतत्वंऽकोऽहंश्चापक्षोधरतिचैद त्रकेचित्चैत्रान्यभ्रान्तकत्वा
भाववानमंमैव इतिवोध्यः अत्र चैत्रान्यभ्रान्तकत्वं न चैत्रान्यजनकजन्यत्वं चैत्रान्यस्यास्येव परजनकत्वात्रिरूपि
तजन्यत्वस्याव्याप्तिसत्त्वेन घ्नावच्छेदबोधासंभवात्। नापि चैत्रान्यभिन्नत्वे सति तज्जनकजन्यत्वं चैत्रान्यभ्रान्तकत्वं
चैत्रान्यपुलिंकिंचित्त्वातिमोगिकभेदस्यापि सत्त्वाभिन्नत्वात्। चैत्रान्यत्वावच्छिन्नभेदविशिष्टस्य तज्जनकजन्यत्वस्यैवै
त्र एवसत्त्वेन चैत्रमैत्रोभयभ्रातृकेपि चैत्रस्यैवायं भ्रातेत्यादिप्रयोगप्रसंगात्। चैत्रान्यतत्कर्तृकानां प्रातिस्विकरूपेण
भेदघटितस्य चैत्रान्यभ्रातृकत्वस्य बहुगुणसहस्रेणापि दुर्ज्ञेयत्वात्। किंतु तद्भेदावच्छिन्नस्वरूपसंबंधेन तज्जनकज
न्यतावत्त्वं तद्भ्रातृकत्वं चैत्रभेद एव च चैत्रजनकजन्यत्वस्यैव संबंधेनान्वयस्य प्रतिबंधकत्वं। चैत्रे चैत्रभेदावच्छिन्नस्व

न्या॰कौ॰ रूपसंबंधेन चैत्रजनकजन्यत्वस्यात्वेन चैत्रे चैत्रभ्रातृकत्वस्य न प्रसंगः तद्भेदस्यैककालीनवृत्त्यावृत्तिधर्मा
वच्छिन्नप्रतियोगिताकोबोधः न त्वेकमात्रवृत्तिधर्मावच्छिन्नप्रतियोगिताकः तेन चैत्रीयद्वितीयशरीरमित्रत्वेपि
तदीयप्रथमशरीरस्य न तद्भ्रातृकत्वप्रसंगः न वा भयत्वावच्छिन्नभेदमादाय तत्र तद्भ्रातृकत्वप्रसंग इत्याकूतं इत्यत
चैत्रभेदावच्छिन्नस्य रूपसंबंधस्यैत्रजनकजन्यत्वस्यैव संबंधो नामस्येतिपमः किंतु परस्य स्वरूपसंबंधो भेदेपि
तस्यैवैत्येवनियम्यात् । यत्तु चैत्रस्यावधिकद्व्यपत्काश्रयत्वे सति चैत्रान्यजनकजन्यत्वमेव चैत्रस्य भ्रातृकत्वं तस्य
च भेत्रेन्यवच्छेदः चैत्रीयप्रथमशरीरस्य न द्वितीयशरीरावधिकद्व्यपत्क्वाश्रयत्वेपि न तस्य तद्भ्रातृकत्वं तज्जन
कजन्यत्वात् प्रथमशरीरस्यैव तज्जन्यत्वात् एवं चप्रथमशरीरे भ्रातृत्वस्य वहारत्वाद्वितीयशरीरव्यक्तिश्चैत्रत्वा
दिजातिनिबंधन इति तदसत् । शुक्रशोणितसंनिपातादिपूर्वं परात्कारस्य प्रथमशरीरवद्वितीयशरीरेपि पितुर्जनक
त्वात् । अन्यथा प्रथमशरीरेपि पितुर्जनकत्वेन स्यात् । नहि रेतःसेके नाहत्वेन प्रथमशरीरमुत्पाद्यतेन च तदव
धिकद्व्यपत्केतज्जनकजन्यत्वेच भ्रातिस्त्रिकरूपेण भ्रातृत्वप्रतियोगितां प्रवेशान्नदोष इति वाच्यं तथासत्यनंत
रान्यादुहेषत्वापत्तेः । केचित्तु स्वाश्रयसमानाधिकरणाध्वंसैककालीनवृत्त्यावृत्तिधर्मावच्छिन्नभेदत्वमवच्छिन्नमति

धर्मांशस्याप्रतिबंधकत्वादिति वाच्यं । भ्रमसंशयोत्तरस्य सत्त्वनिर्णये विशेषदर्शनस्य हेतुतया तदानींतदभावादेव तत्
द्वारत्वासंभवात् विशेषदर्शनत्वेन च मानसस्यैवोत्पत्त्या शाब्दबोधस्यैवानुत्पादात् । न च तादृशनिर्णये विशेषदर्शनस्य हेतु
त्वमेव नास्तीति वाच्यं तस्यान्यत्र व्यवस्थापितत्वात् । एतेन कृतिरेव क्त्वाप्रत्ययार्थः कृतित्वस्य जातिरूपतया तस्य शक्यताव
च्छेदकत्वे लाघवात् । न तु समानकर्तृकत्वानंतर्यादौ क्त्वाप्रत्ययस्य शक्तिः समानकर्तृकत्वानंतर्ययोर्गुरुतया तत्र
तच्छक्यतावच्छेदकत्वकल्पने गौरवप्रसंगात् एवं चानंतर्यादौ क्त्वाप्रत्ययो लाक्षणिकः कृतावेव शक्तिः तादृशकृतिश्च
गौरवात् क्रियापदार्थविशेष्यत्वेन प्रधानक्रियायाश्च विशेषणत्वेनान्वयो न चेन्न एवं च चैत्रो भुक्त्वा व्रजतीत्यादौ भोजनानुकूलकृति
मत्त्वं व्रजनानंतर्यमनंतरं तदनुकूलकृतिमांश्चैत्र इत्यन्वयबोधः व्रजनानुकूलत्वं जनकत्वं च संसर्गमर्यादया भास
ते एवमन्यत्रापि यथानुभवमसह्यमिति नवीनमतमपि परास्तमिति संक्षेपः । एवकारस्यान्ययोगव्यवच्छेदोऽयोग
व्यवच्छेदोऽत्यंतायोगव्यवच्छेदश्चार्थः अत्यंतायोगव्यवच्छेदपदार्थश्चास्वरतासमभिव्याहृतपितावच्छेदकव्यापकत्वा
भावविशिष्टोऽयोगः अभावः प्रतियोगितासंबंधेन तद्विशिष्टव्यवच्छेदः तत्रात्यंतपदनञ्पदयोगपदव्यवच्छेदपदैर्व्याप
कत्वाभाववैशिष्ट्यव्यवच्छेदानां लाभः इतरांशस्तु तात्पर्यविशेषाद्भाव्यः एतादृशात्यंतायोगव्यवच्छेदो धर्मे नीलं स
रोजं भवत्येवेत्यादिक्रियासमभिव्याहृतैवकारस्थले भवति तथाविधबोधे तादृशानुपूर्वीज्ञानस्य हेतुत्वात् । तथा च नी

न्या॰ कौ॰ नं सरोजं भवत्येवेत्यादौ सरोजत्वव्यापकत्वाभावविशिष्टाभावस्यावच्छेदकं नीलभवनाश्रयत्ववत्सरोजत्वमित्याद्याका
रकः शाब्दबोधः भवनमत्राभेदः तत्संबंधाभावोऽवच्छेदे प्रतियोगितया चेति। तादात्म्याभावव्यवच्छेद एवायोगव्य
वच्छेदः तस्य च शंखः पांडुर एवेत्यादिविशेष्यसंगतैवकारस्थले बोधः तादृशायोगव्यवच्छेदबोधे तादृशानुपूर्वी
ज्ञानस्य हेतुत्वात् इत्थं च शंखः पांडुर एवेत्यादौ पांडुरतादात्म्याभावव्यवच्छेदवान् शंख इत्याद्याकारकोऽन्वयबोधः अन्य
योगव्यवच्छेदस्त्वन्यतादात्म्यादिव्यवच्छेदः एतद्बोधश्च विशेष्यसंगतैवकारस्थले पार्थ एव धनुर्धर इत्यादौ बो
ध्यः तादृशबोधे तादृशानुपूर्वीज्ञानस्य हेतुत्वात् एवं च पार्थ एव धनुर्धर इत्यादौ पार्थान्यतादात्म्याभाववद्धनुर्ध
राभिन्नः पार्थ इत्याद्याकारकोऽन्वयबोधः ननु क्रियासमभिव्याहारे एवकारस्यात्यंतायोगव्यवच्छेदबोधकत्वे ज्ञान
मर्थं गृह्णात्येव ब्राह्मणो वेदानधीत एवेत्यादिवत् ज्ञानं रजतं गृह्णात्येव नरो वेदानधीत एवेत्यादिष्वयोगप्रसंगः त
त्र ज्ञानत्वादिव्यापकत्वाभावविशिष्टरजतनिरूपितविषयिताश्रयत्वस्याभावादिव्यवच्छेदस्य ज्ञानत्वादिसामानाधि
करण्येन बोधासंभवात्· न च त्वपितावच्छेदकावच्छेदेनैवात्यंतायोगव्यवच्छेदबोधांगीकारान्न दोष इति वाच्यं। नी
लं सरोजं भवत्येवेत्यादौ सरोजत्वाद्यवच्छेदेन नीलभवनाश्रयत्वायोगव्यवच्छेदासंभवेन तथाव्युत्पत्तेरनुपपन्नत्वादिति
चैत्रज्ञानाध्ययनाद्यर्मिकधात्वसमभिव्याहृतत्वात् समभिव्याहृतैवकारस्य त्वप्मितावच्छेदकावच्छेदेनैवात्यंता

भ्रातृपदस्य शक्तिरेकैव न तु चैत्रमैत्राद्यनन्तभावेऽनन्तशक्तिः अवच्छिन्नत्वेन जनकत्वेन च समभिव्याहृतपदार्थस्य २

योगिताकात्यन्ताभावावच्छिन्नस्वरूपसंबंधेन चैत्रात्मजनकजन्यत्वस्य स्वावच्छेदो मैत्रे भासते तेषां सामानाधिकरण्यं च प्र
त्वे पर्याप्तनिष्ठजनकतात्वं संबंधेन त्वो ध्यामतिप्रसङ्गः अपरे तु अवच्छिन्नमनोनिष्ठात्यन्ताभावप्रतियोगितावच्छेदके जन
कजन्यत्वस्य भ्रातृपदार्थैकदेशेऽन्वेति प्रतियोगिनश्चैवादेः स्वरूपः मैत्रस्य भ्राता मैत्र इत्यादिप्रयोगवारणाय छेदका तस्य भ्रा
तृत्वान्वयः चैत्रस्य भ्राता मैत्र इत्यत्र चैत्रशरीरावच्छिन्नमनोनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वस्य चैत्रजनकजन्यत्व
स्य चैत्रे सत्त्वाद्भ्रातृत्वबोधः अन्यथैवमपि मैत्रस्य भ्राता मैत्र इत्यादौ उपदेशवदत्रादिप्रयोगापत्तिः मैत्रशरीरावच्छिन्नमनोनि
ष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वस्य चैत्रे मैत्रशरीरजनकजन्यत्वस्य मैत्रे सत्त्वादिति चेन्न तत्र विशेष्यविधया भ्रा
तृपदार्थैकदेशमस्तत्रैव तादृशात्यन्ताभावप्रतियोगितावच्छेदकत्वबोधाभ्युपगमेति प्रसङ्गः मैत्रस्य भ्राता चैत्र इत्यत्र तु मै
त्रशरीरावच्छिन्नमनोनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वे सति मैत्रजनकजन्यं चैत्र इत्येवाकारबोधः इत्थं च
मैत्रस्य भ्राता मैत्र इत्यादिप्रयोगो न संभवति अत्र हि भ्रातृपदार्थस्य विशेष्यविधया ... भविष्यति मैत्रे स च न मैत्रश
रीरावच्छिन्नमनोनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकः मैत्रशरीरावच्छिन्नमनसि मैत्रावच्छिन्नभेदासत्त्वात् न
चैवमपि कस्यचित्स्वस्यैव मनसो भ्रातेति प्रयोगापत्तिरिति वाच्यं इष्टापत्तेः एकस्यैव मनसो नानाशरीरावच्छिन्नत्वा
भ्युपगमे नोऽत्यन्ताभावस्य ... यत्तु विशेष्यविधया जनकजन्यत्वरूपभ्रातृपदार्थान्वयपक्षे विशेषणताविशेष

न्या॰कौ॰

संबंधेन भ्रातृपदार्थप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावस्य स्वरूपतः सत्त्वमपेक्षित
मिति न मैत्रस्य भ्राता मैत्र इति प्रयोगापत्तिः इत्थं च स्वाश्रयावच्छेदकान्तं न निवेशनीयमिति तदसत्। तथा सति मैत्र
स्य मैत्रान्यत्वघटितमैत्रस्य भ्रातापि नतिप्रयोगानापत्तेः तत्र भ्रातृपदार्थविशेष्ये मैत्रे स्वरूपतो मैत्रान्योन्याभावसत्त्व
ात्। एवं च चैत्रस्य भ्राता मैत्र इत्यादौ चैत्रावच्छिन्नजनकनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वे सति चैत्रजनकज
न्यतावान्मैत्र इत्याद्याकारको बोधः चैत्रस्य वामभ्राता मैत्र इत्यत्र च चैत्रान्यशरीरावच्छिन्नजनकनिष्ठान्योन्याभा
वप्रतियोगितावच्छेदकत्वविशिष्टचैत्रान्यजनकजन्यत्वाभाववानित्याकारको बोधः न च चैत्रमात्रभ्रातृकोऽपि
चैत्रस्य वामभ्रातेति प्रयोगापत्तिः चैत्रान्यदेवदत्तशरीरावच्छिन्नजनकनिष्ठान्योन्याभावप्रतियोगि
तावच्छेदकत्वस्य चैत्रान्यजनकजन्यत्वस्य च मैत्रे सत्त्वेन तद्वच्छेदको धर्मो प्रमाणादिति वाच्यं स्ववच्छिन्नत्वेनप्र
तत्वप्रतियोगिप्रकारकेच्छाप्रयोज्यप्रकारकजनकत्वे भ्रमइतिभूतस्वीकारे रागादेर्वादित्वात्। अन्ते तु स्वाश्रमीभ
ततत्तच्छरीरजनकत्वसंबंधेन चैत्रान्यत्वविशिष्टोपस्थितस्य भेदतद्घटितभिन्नत्वविशिष्टजन्यता संबंधावच्छिन्नप्रति
योगिताकाभावाभावस्य एवं च पदार्थैकतत्रप्रतीयं ते चैत्रमैत्रोभयभ्रातृके स्वाश्रयमैत्रजनकत्वसंबंधेन चैत्रान्यत्वविशि
ष्टोपस्थितस्योपदर्शितजन्यतासंबंधेन सत्त्वेन तादृशाभावकूटासत्त्वात्। तथाविधबोधासंभवेन तादृशप्रयोगापत्तिः।

न च चैत्रमात्रभ्रातृकेऽपि मैत्रे सोऽस्य पोऽस्जमैत्रीयवालकशरीरजनकत्वसंबंधेन चैत्रान्यत्वविशिष्टस्योपदर्शितसंबंधे
न मैत्रीयपुत्रशरीरे सत्त्वात्। तथाविधबोधासंभवेन तादृशप्रयोगानुपपत्तिरिति वाच्यं। तत्र हि श्रृं शरीरमात्रवृत्तिजा
त्यभाववद्विशिष्टजन्यतासंबंधावच्छिन्नप्रतियोगिताकतादृशाभाववत्कूटस्य तत्र बोधोपगमेनानुपपत्त्यभावादित्याहुः। अन्ये
तु वदंति। स्वावच्छिन्नभिन्नत्वस्वाश्रयजनकजन्यत्वोभयसंबंधेन तद्व्यक्तिजातिमत्त्वमेव भ्रातृपदप्रवृत्तिनिमित्तं वृत्तौ
चैत्रादिनिरूपितत्वाद्वयः चैत्रादिभ्रातरि तादृशोभयसंबंधेन चैत्रत्वादिजातिमत्त्वाच्चैत्रादिभ्रातृव्यवहारः चैत्रमै
त्रोभयादिभ्रातरि तादृशोभयसंबंधेन चैत्रत्वमैत्रत्वादिजातिमत्त्वाच्चैत्रमैत्रादिभ्रातृत्वव्यवहारः तद्व्यक्तित्वाद्यवच्छिन्न
भेदवत्त्विसीकृशरीरांतरे स्वभ्रातृत्ववारणाय धर्मस्य जातित्वेन निवेशः न चैकमात्रशरीरकस्य भ्रातरि भ्रातृत्वं न स्या
त् भ्रातृशरीरावच्छिन्नतद्व्यक्तिजातेरप्रसिद्धत्वादिति वाच्यं। तादृशपुरुषप्रमाणाभावात् एककालीनोभयावच्छिन्नजाति
न्यूनवृत्तित्वस्य धर्मविशेषणत्वे तु वारणाय चैत्रादिधर्मस्यादर्शितस्यत्वेन तादृशशरीरनिष्ठतद्व्यक्तित्वमपीतिनोक्तदो
षः तद्व्यक्तित्वमादायवसिज्ञिन स्वभ्रातृत्ववारणायापान्नं तद्धर्मविशेषणं तत्र तादृशचैत्रत्वादिन्यूनवृत्तित्वान्न दोषः
चैत्रत्वादेरपि इत्थं तत्त्वादिजातिन्यूनवृत्तित्वादस्य भयवारणाय तत्तावद्व्यक्तित्वं इत्यस्यादरेककालीनोभयघटपटादि
वृत्तित्वान्न दोषः तद्व्यक्तित्ववारणाय जातित्वनिवेशः इत्यंच चैत्रस्यैकार्धभ्राम्यत्र निरुक्तचैत्रान्यभ्रातृत्वस्य देव

दण्डादौ प्रसिद्धस्यावच्छेदे दो मैत्रादौ सुघट इति न काप्यनुपपत्तिरिति। अत्रेदं बोध्यं। चैत्रस्यैवेदं धनं पृथिव्या एव
गंध इत्यादौ यदि चैत्रान्यस्वत्वं पृथिव्यन्यसमवेतत्वमवच्छेदबोधः स्वीक्रियते तदा स्वत्वे चैत्रान्यस्य न कस्यापि पृथिव्यन्य
स्मिन्न किंचित्त्वमवेति भोजनं न जलान्यस्य कस्य चित् भातां न चैत्रान्यस्य कस्य चिदित्यादिस्य मद्दशायामुक्तस्थले श
ब्दबोधानुपपत्तिः स्वत्वादौ चैत्रान्यीयत्वाभावनिरूपितेन चैत्रान्यीयस्वत्वादिमवच्छेदबोधासंभवात्। एवं प्राणिनस्स
वधेन जातिमत्स्ये वहत्वादृश्यमेव भुंक्ते प्राणिन एव भुंक्ते इत्यादावपि शाब्दबोधानुपपत्तिः यानिमितस्वत्वाद्यप्रसि
द्ध्या तद्यवच्छेदबोधासंभवादिति अत्र योगप्रतियोगिकत्वावच्छेदकत्वान्यानुयोगिकयोगत्वावच्छेदेयेवका र
र्थः अन्यानुयोगिकयोगत्वावच्छेदेन वा सर्वत्रैवकारार्थ इत्यभ्युपेमंतव्यं च चैत्रस्यैव धनमित्यादौ चैत्रान्यस्मि
न्धनस्वामित्वाद्यभावः पृथिव्यामेव गंध इत्यादौ पृथिव्याद्यन्यस्मिन्गंधसमवायाद्यभावः चैत्रो जलमेव भुंक्ते
इत्यादौ जलाद्यन्यस्मिन् चैत्रकृतिकभोजनकर्मत्वाद्यभावः चैत्रस्यैवाभ्यगादित्यादौ चैत्रान्यस्मिन्न्रेति निष्ठप्राप्ये
त्वप्रतियोगित्वाद्यभावः प्रतीयते तत्र च नानुपपत्तिलेशोपि न च धनं स्वामित्वाद्यवच्छिन्नानुपस्थितत्वात्तद्यव
च्छेदबोधासंभव इति वाच्यं धनादिपदस्य धनस्वामित्वाद्यवच्छिन्ने लक्षणास्वीकारेणादोषात्। वस्तुतस्तु
अन्यानुयोगिकाभावच्छेद एव सर्वत्रैवकारार्थः न तु योगत्वावच्छिन्नप्रतियोगितपानिवेशो मानाभावात्।

अवच्छेदश्च द्विविधः अन्योन्याभावो संसर्गाभावश्च पार्थ एव धनुर्धर इत्यत्र पार्थान्यस्मिन् धनुर्धरत्वावच्छिन्नभेदः
शंखः पांडुर एवेत्यत्र पांडुरान्यस्मिन् शंखत्वावच्छिन्नभेदः नीलं सरोजं भवत्येवेत्यत्र नीलभवनाश्रयासत्त्वसामा
नाधिकरण्येन सरोजत्वावच्छिन्नभेदः प्रतीयते चैत्रस्यैव धनमित्यादौ चैत्रान्यस्मिन् स्वामित्वसंबंधावच्छिन्नप्र
तियोगिताकधनाद्यभावः पृथिव्यामेव गंध इत्यादौ पृथिव्यान्यस्मिन् गंधसमवायाद्यभावः चैत्रो जलमेव भुं
क्ते इत्यादौ जलादन्यस्मिन् चैत्रकर्तृकभोजनकर्मत्वाद्यभावः चैत्रस्यैव धनं भ्रातादित्यादौ चैत्राद्यन्यस्मिन्नेतित्रिप
भ्रातृत्वसमनियतप्रतियोगिताकाद्यभावः प्रतीयते तत्र चैत्रेनानुपपत्तिलेशोपि न च धनस्वामित्वत्वावच्छिन्नानुपस्थितत्वात्तद
वच्छेदलोभासंभव इति वाच्यं धनादिपदस्य धनस्वामित्वत्वाद्यवच्छिन्ने लक्षणास्वीकारेण दोषात्। वस्तुतस्त
स्तत्र स्वत्वानुयोगिकोऽवच्छेद एव सर्वत्रैव कारार्थः न तु योगारूढ्या पियव्यवछेदप्रतियोगितवानिवेशो ना
नाभावात्। अवच्छेदश्च द्विविधः अन्योन्याभावो संसर्गाभावश्च पार्थ एव धनुर्धर इत्यत्र पार्थान्यस्मिन् धनुर्धरत्वा
वच्छिन्नभेदः शंखः पांडुर एवेत्यत्र पांडुरान्यस्मिन् शंखत्वावच्छिन्नभेदः नीलं सरोजं भवत्येवेत्यत्र नीलभव
नाश्रयासत्त्वसामानाधिकरण्येन सरोजत्वावच्छिन्नभेदः प्रतीयते चैत्रस्यैव धनमित्यादौ चैत्रान्यस्मिन् स्वामि
त्वादिसंबंधावच्छिन्नप्रतियोगिताकधनाद्यभावः पृथिव्यामेव गंध इत्यादौ पृथिव्यान्यस्मिन् समवायादिसं

व्या॰कौ॰

वंधावच्छिन्नप्रतियोगिताकोगंधाद्यभावः चैत्रो जलमेव भुंक्ते इत्यादौ जलान्यस्मिन्नकर्मतादिसंबंधावच्छिन्न
प्रतियोगिताको भोजनाद्यभावः चैत्रस्यैवान्यं भ्राता इत्यादौ चैत्राद्यन्यस्मिन्न प्रतियोगितादिसंबंधावच्छिन्नप्रतियो
गिताकएतद्भ्रातृत्वाद्यभाव एव प्रतीयत इति न च स्वामित्वादिसंबंधस्य वृत्त्यनियामकतया प्रतियोगितावच्छेदक
त्वाभावेन नोक्तरीतिरसंभवतीति वाच्यं वृत्त्यनियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वे बाधकाभावा
त्स्वकारस्याप्रयोगः। अत्र केचित् पार्थ एव धनुर्द्धर इत्यादौ पार्थान्यतादात्म्यव्यवच्छेदादिसंबंधेन धनुर्द्धरादौ पार्थाद्यन्य
यबोधसंभवाद्दलमेवकारस्यान्यव्यवच्छेदादौ शक्त्यादिकल्पनमपि च सततस्य विषयकबोधाभ्युपगमेन। न चैवं पार्थ
एव धनुर्द्धर इत्यादिवत् पार्थो धनुर्द्धर इत्यादावप्युपदर्शितसंबंधेन धनुर्द्धरादौ पार्थाद्यन्यबोधापत्तिरिति वा
च्यं। एवकारस्य तेन संबंधेन तदर्थविषयकबोधे तात्पर्यग्राहकतया पार्थो धनुर्द्धर इत्यादौ तादृशबोधतात्पर्य
ग्रहाभावेन तादृशशाब्दबोधानुदयात्सभूतनामार्थे मोहरितिक्षुलत्तिसंकोचाक्षेन तद्दृशो घ इत्यादौ कुञ्ज इत्यन
नाम्नाप्रेमोरितिक्षुलत्वसंकोचेन निर्वाहे तत्संकोचे मानाभावात् पार्थ एव धनुर्द्धर इत्यादौ पार्थान्यत्वव्यवच्छेदा
दिसंबंधेन धनुर्द्धरादौ पार्थाद्यन्यबोधाभ्युपगमे भूतलेन घट इत्यादावपि स्वाभाववत्वादिसंबंधेन भूतलव
त्तिताद्यर्थकत्वादावत्ययसंभवेन नञादिरप्यभावबोधार्थकस्य विलोपप्रसंगाच्च सर्वानुभवसिद्धस्य धनुर्द्धरादौ पार्थान्य

त्वावच्छेदादिप्रकारकबोधस्यापलापप्रसंगाच्च। नचतादृशानुभवएवासिद्धइतिवाच्यं। तथापितादृशाव
च्छेदादिसंबंधस्यवृत्तित्वनियामकतयाप्रतियोगितानवच्छेदकत्वेननतत्संबंधावच्छिन्नप्रतियोगिताकबोधोप
गमासंभवात्। नचवृत्तित्वनियामकसंबंधस्यप्रतियोगितावच्छेदकत्वेबाधकाभावान्नदोषइतिवाच्यं तथापिपा
र्थएवधनुर्धरइत्यादौत्वावच्छेदप्रकारकबोधानंगीकारेतादृशतादृशसामग्र्याः पार्थान्यत्वावच्छेदाभाववान् धनुर्ध
रइत्यादिमानसप्रतित्वात्तेनतत्रप्रतिबंधकत्वंनकल्प्यतेतादृशतादृशसामग्रीकालेतादृशमानसप्रतिबंधकस्या
त्वावच्छेदप्रकारकयोर्बोधयोः सत्वेनबाधप्रतिबंधकतयैवोपपत्तेरितिलाघवेनएवकारस्यत्वावच्छेदादौशक्तिमु
पेत्यत्वावच्छेदप्रकारकबोधांगीकारस्यैवोचितत्वात् अधिकं पूर्वोपदर्शितरीत्याबोध्यं। एतेनपार्थान्यत्वावच्छे
दविशिष्टाभेदादिसंबंधेनपार्थादेर्धनुर्धरादावन्वयेननानार्थप्रयोरितिमुक्तित्रिविरोधोनवानव्यानुपपत्ति
रित्यपिपरास्तमितिसत्यमंदबुद्धीनांजातमितापादकविचारेण। चैत्रइवमुखमित्यादौइवार्थः सादृश्यं। मुखेचंद्र
सादृश्यबोधस्यानुभवसिद्धत्वात्। नचतत्रकीदृशःशाब्दबोधः नामार्थयोर्भेदान्वयाभावेनचंद्रसादृश्यवन्मु
खमित्यादिशाब्दबोधासंभवादितिचेदत्रप्राचीनानुयायिनः चैत्रस्येदंधनमित्यादौयथाख्यातमिचैत्रीयंधनमि
त्याद्याकारकोन्वयबोधस्तथात्रापिसदृशार्थचंद्रीयंमुखमित्याद्याकारकोन्वयबोधः नामार्थयोर्भेदेनान्वयबोधेप्रकारी

न्तविभक्त्यर्थनिपातार्थानामनुपस्थितेर्हेतुत्वात्फलानुरोधेन तथैव कल्पनादित्याहुः। नव्यास्तु निपाताति
रिक्तनामार्थयोरेव भेदान्वयबोधे न चंद्रसादृश्यवन्मुखमित्याद्याकारक एव शाब्दबोध इति वदंति। अथ किमिदं
सादृश्यमिवाद्यर्थ इति चेत् तद्विशिष्टधर्मवत्त्वरूपं तदिति जगदीशः। तत्र भेदे च चंद्रादेश्चंद्रत्वाद्यवच्छिन्नप्रतियोगिता
संसर्गेण धर्मे चाधेयतासंसर्गेणान्वयः। तथा च चंद्रवृत्तिचंद्रभिन्नत्वविशिष्टधर्मवन्मुखमित्याद्यन्वयबो
धः। स च धर्मश्चंद्रवृत्तिविलक्षणाह्लादित्वमेवमप्याकंपं चित्रधर्मस्यातिप्रसक्तत्वात्। न च चंद्रवृत्तिरूपादेः स
मुदायेन मुखे सत्त्वात्कथमन्वय इति वाच्यं। तत्प्रकारकज्ञानविशेष्यत्वसंबंधेन तद्वत्त्वस्य मुखे सत्त्वात्। चंद्र
भेदविशिष्टधर्मस्य चंद्रवृत्तित्वं न संभवतीति वाच्यं। गुणाद्यन्यत्वविशिष्टसत्तायाः गुणादिवृत्तित्ववत्तस्य
संभवात्। यद्वा चंद्रविशिष्टधर्मत्वावच्छिन्ने चंद्रवृत्तित्वस्यान्वयः किंतु धर्मत्वावच्छिन्ने तथा च चंद्रभिन्नत्ववि
शिष्टचंद्रवृत्तिधर्मवन्मुखमित्याद्यवबोधः। अत्र चोपमानोपमेययोः समानविभक्तिकत्वं तंत्रं तेन चंद्रस्येव मु
खमित्यत्र न मुखे चंद्रसादृश्यबोधः। कालिदासस्येव मम शाब्दत्वादौ च मम शः पदाधारता कालिदासस्य शाब्दत्वे
मशाब्दत्वमपि। न च सादृश्यस्य भेदघटितत्वे रामरावणयोर्युद्धं रामरावणयोरिवेति प्रयोगो न स्यादिति वाच्यं। तत्र
विशिष्टवाचकेव शब्दस्य तद्धर्मवत्त्वरूपकेवलविशेष्ये लाक्षणिकत्वात्। यद्वा एवकारवत्त्व शब्दस्यापि ख

त्वमपि धर्मस्य स्वप्रकारकज्ञानविशेष्यत्वरूपसंबंधघटितसामानाधिकरण्यसंबंधेन बोध्यं न च चंद्रभेदविशिष्ट

ऽस्योभेदे धर्मे च व्यक्तिः तथा च रामरावणयोर्युद्धमित्यादौ भेदं शामपहापद्मसैवेव केवलं तत्र धर्मे वस्तुवो ध
इति संप्रदायः केचित्तु भेदोवृत्तिसजातीयं धर्मविशिष्टसादृश्यं साजात्यं च प्रपानुभवं तत्र त्रद्धेऽलम् एवं च नानार्थत्वेपि
शक्तिग्रहः सर्वनाम्नवद्रूपः चं इत्थमनुगमितत्वमेवोचवृपितावच्छेदकावच्छिन्नप्रतियोगितया च वृत्रेत्थं पस्तुनमु
खं मुख्यमिवेतितत्वनमवौ धः तत्त्विवेचनिरूपकतया मुख्ये च भेदतो हृाधर्मयोरधिकरणतया साजात्यं वाच्यमिति ताल
मेवस्यात्। आह्लादकत्वरूपमोऽपसंख्यानविशेषाद्भिन्नस्य धर्मे एवं च चंद्रमिवत्वसतिचंद्रत्वसाह्लादकत्वसजा
तीयाह्लादकत्ववन्मुखमितिशाब्दबोधः कालिदाससस्यैवपद्य इत्यत्र तु पद्यः संबंधित्वेनैतस्यैवसस्यापद्यस्याक्षिप्ताहा एदे
तस्मिन्नेवद्वावार्थीवृपः। एवं च कालिदाससमभिव्याहृते सति कालिदाससनिरूपकः सजातीयपद्याखिनस्तत्स्यपद्य
इतिशाब्दबोधः साजात्यं च युद्धपुरुषवेधलावादिनाऽज्ञमकामप्रभवत्वादिना वा निष्पन्नतादृशसाजात्यबोधार्थं
पद्यः पदं प्रकारभेदत्वं न पौनरुक्त्यं गगनं गगनाकारं। रामरावणयोर्युद्धमित्यादौ चोपमेयवाचकपदे तत्रैव
कारो ध्याहर्त्तव्यः द्वितीयं चोपमानवाचकं युद्धमिति च तथा च गगनमिव गगनमित्यादौ सादृश्यं एवं रामरावणयुद्धमितिरिक्ते
रामरावणयुद्धसादृश्यं नास्तीति शाब्दबोधः अत्र भावाभावयोर्न विवक्षितः बाधात्। पूर्वत्र भेदाघटितसादृश्यम
तस्याद्वयबोध इति संप्रदायमतं तदतिप्रसंगादत्रुनवविरोधाद्वोपक्रमापमिति प्राञ्चः अधिकमस्मत्कृतसादृश्यवि

२४

न्या॰कौ॰ चारेऽनुक्तं घटेऽपि विलक्षणाभिधानोक्तेः। अत्र केचित् चंद्र इव मुखं इत्यत्र चंद्रप्रतियोगिकसादृश्यमेवेवार्थः घटो नेत्य
त्र घटप्रतियोगिकाभावस्य नञर्थतापत्तेः कृतत्वात्। न च लाघवात् सादृश्यमेवेवार्थ इति वाच्यं तथा सति चंद्रस्य सा
दृश्यमिति वत् चंद्रस्येव मुखं भिन्नात्वापत्तेः घटस्याभाव इतिवत् घटस्येदेरपापत्तेः इवशब्दस्य सादृश्यमात्रवाच
कत्वात्ततः षष्ठ्यर्थस्य वृधा...नुतत्वो...धायीषष्ठी प्रयोगस्यावश्यकत्वात्। अस्मन्मते तु सादृश्यप्रतियोगिताप्रादु
र्भावादिपदार्थस्तत्राभावस्यतपेक्षणान्नोका प...निरिति तदसत् तथा सति अभावस्य स्थले विता भिधानोपगमे नभीभास
कमत्तानुपपत्तेः स्यात् अस्मन्मते नञोऽभावमात्रपरत्वेन प्रतियोगितासंसर्गेणमकीदृशाभावसंभवाच्च। न च घ
टस्याभाव इतिवत् घटस्य नेति प्रयोगापत्तिरिति वाच्यं नञ्पदजन्याभावोपस्थितौ प्रतियोगितासंसर्गेणेव
भानं अभावपदजन्यायां तु प्रकारतयैवेति नियमाभ्युपगमेनादोषात् न चैवं गौरवमिति वाच्यं तत्रापि घटोभेस्त्र
पराभावबोधवारणाय सम...प्रतियोगिकत्वाभावो भासत इति नियमस्यावश्यकत्वात् तदपेक्षया
भावमात्रं नञर्थः प्रतियोगित्वं संसर्गतया भासत इति नियमस्यैव युक्तत्वात्। अस्मन्मते घटपदस्यैव घटप्रतियोगिका
भावपरत्वं नञ्पदं तु तात्पर्यग्राहकमिति...निगमनात्। किं च लाघवं...। एवं च प्रतियोगितासंसर्गेण
संसर्गतया भावसंभवेन तत्र नञादेनिशक्तिरत्पलभ्यतात्। न चैवं घटोऽभाव इत्यत्रापि प्रतियोगित्वसंसर्गेण...

नासंभवात्। अन्यथा लक्षणे पितत्राभावपदस्येव घटप्रतियोगिकाभाववाचकत्वसंभवेन तत्र षष्ठ्यपेक्षानाप
त्तेः। इत्थं च चंद्र इव मुखमित्यत्र प्रतियोगित्वस्य संसर्गतयैव लाभात् षष्ठी चंद्रस्य सादृश्यमित्यत्र तु संसर्गतया तल्ला
भासंभवात् षष्ठ्यैव तेन चंद्रप्रतियोगिकसादृश्यमित्यायोतित्वा घटप्रतियोगिकाभावेन जपदंडवत्प्रकृतरीतिरेव साधीः।
यस्तु चंद्र इव मुखमित्यत्र तुल्यसदृशाश्च उः चंद्रसदृशं मुखमित्युभयविशेष्यको बोधः यथा चंद्रस्तथा मुखमित्यत्र
सादृश्यधर्मिकोश्चंद्रसादृश्याधर्मवन्मुखमित्युपमानोपमेयोभयविशेष्यकबोधस्य लक्षणया तन्न च तत्र प्रकारांशे
यालुप्तस्यपेनमन्तच्छदृश्यभावावाकभेदोपगमेन चोभयविशेष्यको बोधोपगमेप्यत्रोभयविशेष्यकबोधे मानाभावव्या
तिवाच्यं। तथासति हंसीव धवलश्चंद्र इत्यादौ हंसीसदृशश्चंद्रो धवल इत्युपमेयमात्रविशेष्यकबोधे बोधकाभावे
न लिंगभेदस्योपमादोषत्वानुपपत्तेः। मन्मते तु तत्र धावल्यवती हंसी धावल्यवांश्चंद्र इत्युभयविशेष्यकबोधे न पुंलिं
गधवलशब्दस्य हंसीमुख्य पा संभवाल्लिंगभेदस्य दोषत्वोपपत्तेः। न च तादृशार्थोपमासंभव एवरा कुत इति वाच्यं अनिय
तलिंगवचनकनामार्थप्रकारकतादात्म्यसंसर्गकशाब्दबोधे समानलिंगवचनकनामजन्योपस्थितेर्हेतुत्वेन तादृशा
र्थविषयसंभवात्। न च तादृशहेतुतायां मानाभाव इति वाच्यं नीलं घट इत्यादावभेदान्वयबोधवारणाय तदावश्यकत्वात्
अजहल्लिंगस्थले लिंगभेदेप्यभेदान्वयादर्शनात् दत्तिपतत्वनिवेशः अतएव मणिकृता पुरुषमित्र विभक्तिकयोरिव मित्र

न्या॰ द्वै॰

लिंगयोरपि सामानाधिकरण्येन विशेषणविशेष्यभावाभावात्। अजहल्लिंगे तु लिंगनियमाननुशासनात्पोति।
पुंस्त्वे चैतत्। अन्यथा चंद्र इव मुखमित्यादावुपमानोपमेययोरेकविभक्तिकत्वेनोभयत्रसादृश्यस्फुटत्वात् श्रौ
त्युपमा च द्रेणतुल्यं मुखमित्यादौ विभक्तिभेदेप्यसादृश्यस्फुटत्वात्तथात्वेनार्थ्युपमा परं मुखं चंद्रतुल्यमित्यादौ विभक्तिरु
स्य पुमानोपमेयभावस्य प्रसिद्धिवशादेव लाभ इत्यार्थ्युपमेति श्रौतार्थीविभागानुपपत्तेरिति तदसत् त
भासलुप्तविशेष्यकबोधांगीकारेपि चंद्र इव मुखं रमणीयमित्यादावप्युपमापादुष्टत्वापत्तेः तत्राप्युपमानोपमेय
मि यमयोर्मिथः लिंगात पारमणीयत्वस्य मुखवृत्तिनस्य चंद्रे चपासंभवात्। नच तत्र रमणीयं च रमणीयश्चेति द्वंद्वे नपुंस
कमनपुंसकेनैकशेषे एकवद्भावे च पुंल्लिंगरमणीयशब्दस्य चंद्रेन पुंसकस्य च मुखे चान्वये दोषस्यानिवार्यं। तथा
पि कुवलयमिव श्यामः कटाक्षः धौतमिव केशो नील इत्यादावुपमापादुष्टत्वप्रसंगस्य दुर्वारत्वात्। नच तत्र दुष्टत्वमिष्ट
मेवेति वाच्यं। मानाभावात्। दृष्टः पुंनपुंसकयोः साम्येणितिवामनोक्तेरुभयत्र साम्यात्। नच तत्राप्येकशेषप्रयुक्ते
स इति वाच्यं पुंल्लिंगोपमेयवृत्तेर्वोपमानस्थले साधारणधर्मस्योपमेयसमानलिंगत्वेन तत्रापि नपुंसकस्यैव श्रव
णापत्तेः एवं सर्वत्राप्यदुष्टत्वे वामनोक्तौ प्रायशब्दविरोधाच्च। किंच प्राणा इव प्रियोयं मे विद्या धनमिवार्जितं स्या
पिदंशादिभिरालंकारिकाचार्यैरदुष्टत्वेनांगीकृतस्य दुष्टत्वप्रसंगाच्च। अथैवं हंसीव धवलश्चंद्र इत्यादेः कथं दुष्टत्वं

रुपमेयमात्रविशेष्यकयोर्धे लिंगभेदस्याप्रतिकूलत्वादिति भेवं। नहि रूपणदृष्ट्या बोधप्रतिकूलत्वमेव दोषत्वं उभय
विशेष्यकत्वे चांगीकारेप्यतिप्रसंगस्योक्तत्वात् हीनत्वादिदोषाणां तत्प्रतिकूलत्वापाः संभावयितुमप्यशक्यत्वा
च्चेत्र तस्यापत्रपुल्लिंगेषूपमेये स्त्रीलिंगस्योपमानस्य नपुंसकलिंगता संभवः। यत्र चैकवचनांतेषूपमेयेषु नित्यव
हुवचनांतस्योपमानस्यानेकवचनांतत्वसंभवस्तत्र न लिंगवचनभेदेपि दोषः। तदुक्तमाचार्यदंडिना। तल्लिंगव
चनभिन्ने न न्यूनाधिकतापि च। तदुपमादूषणायालं यत्रोद्वेगो न धीमतां। स्त्रीव गच्छति षंढोयं वक्त्येषा स्त्री पुमानिव
प्राणा इव प्रियो यं मे विद्या धनमिवार्जितेति। सुहृद्दयो हेगवीजं तु कौरीसाप्रकृतानुषपुत्रः लिंगवचनविशेषणपाय
नमेव। तत्र च न नियतलिंगवचनेषु षष्ठि लिनत्तत्रोद्वेगः। नियतवचनत्वं तु स्वरूपकत्वाभिधानाविमतत्वकत्वेतत्वेना
नुशासनतालमर्थे विषयमलमितिमावत्। प्राणाद्यादुत्सादेः स्मैकस्मिन्नपि प्रयोगे एकत्वाभिधानाविमतत्वात्। तेनप्र
णाश्च इत्यस्य कोषादावेकवचनांतत्वेनानुशासनेपि पुंसि भूम्न्यसवः प्राणा इति बहुवचनांतत्वेनाप्यनुशासनम
स्त्येवेति न दोषसंभव इति। अत्रेदं बोध्यं यत्र साधारणधर्मस्याश्लेषस्तत्र तद्रूपेणैव सदृश्यार्थः। अन्यत्र तु धर्मतुल्ये नैवमू
त्यं चर्च इदमुखं वरमाणिमभिलत्र चंद्रवदिति धर्मैक्यमुखमिति बोधः। अत एवात्र श्रौतीत्वं साधारणधर्मस्योपमानोप
मेयोभयनिष्ठतायाः इवशब्देन प्रतिपादनात्। तत्र समानाधिकरणत्वेनोपमेयवृत्तित्वं च सति तेनोपमानवृत्तित्वं प्रतिपा

सा॰कौ॰

घटे तथा चंद्रमवत्तित्वस्य तत्तोलाभेपि मुखवृत्तित्वस्यालाभात् कथमेतदिति वाच्यं उपमेयस्यापि चंद्रादिमत्तया सामा
न्यतस्तद्वृत्तित्वलाभात्तदा वृत्तेर्वोपपत्तेः॥ न च साधारणधर्मप्रयोगस्थले तस्यैव शब्देन रमणीयादिशब्देन तद्बोधनेन्य
तरस्य व्यर्थत्वमिति वाच्यं उभाभ्यामेकस्यैवोपस्थापनादिति दिक्॥ ननु गज इव गवय इति पिक इव रौतीत्यादौ कथं बोधः गज
सादृश्यस्य गमने पिकसादृश्यस्य च रवात्मकरवणे वा बाधादिति चेन्न गजपदस्य गजगमनलाक्षणिकत्वात् पिकशब्दस्य च
पिकरवणलाक्षणिकत्वाद्गजगमनं न तत्सदृशगमनकृतिमान् पिकरवणसदृशरवणकृतिमानित्याद्याकारक एव बोधो
धांगीकारान्न प्रकृते तत्र तद्वृत्तिगमनसजातीयत्वस्य कृतिरवणसजातीयत्वस्य च सादृश्यस्यैवार्थतया गजवृत्तिगमन
सजातीयगमनकर्तृ पिकवृत्तिरवणसजातीयरवणकर्तृत्वमिति शाब्दबोध इति॥ ननु घटो न रूपवतीत्यत्र घटावृत्तित्वाभावस्य
दृष्टेनैकमेतासंसर्गेण ह्युभयबोधधारणाय धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेन शाब्दबोधं प्रति विशेष्य
तया विभक्तिजन्योपस्थितेः कारणत्वमवश्यमुपेयं एवं च गज इव गच्छति पिक इव रौतीत्यादौ किंवा धात्वर्थस्य सादृश्यस्य धात्व
र्थे गमनादावन्वयासंभवः। न चैवं पाकोनुमागइत्यादौ नञर्थभेदस्य प्रकारत्वं वो न स्यात् तत्पाकस्य धात्वर्थतया तन्निष्ठ
विशेष्यतानिरूपितप्रकारतासंबंधेन भेदस्यान्वयबोधार्थं न वा दिति वाच्यं नामार्थेति विशिष्टेन धात्वर्थस्य विशेषण
ता। उक्तस्थले चापाकादेर्धात्वर्थत्वेपि नामार्थत्वेन दोषा इति चेत् उक्तकल्पे पचतीत्यादौ व्यभिचारवारणाय प्रकारतायां भे

दर्सबंधावच्छिन्नत्वस्य वस्पंतिवेशेनोक्तस्थले ध्वस्य दृश्यसादृश्याश्रये लाक्षणिकत्वमात्रस्यत्वा मे दर्सं बंधेनै
बंधात्वर्थो गमनादौ प्रकारतया त्वन्वये संभवात् केचित्तु उक्तानुपपत्तेः तत्र गजादिसादृश्यस्य नंगमनादिकर्तृत्वेन वा
त्वयः कर्तरि गजादिसादृश्यं च स्यगमनादिसदृशगमनादिकर्तृत्वमेवेत्याहुः अस्मे तु एतन्मतस्य युक्तं तथा
सति वनगजस्वगृहे देवदत्तो गच्छतीत्यादौ वनादेः सर्वथैवान्वयापत्तेः तस्मादुक्तनिरूपितसादृश्यप्रयोजक
गमनाश्रयत्वस्यैव बोधः वनेगजइवेत्यादौ तु गजादीपदात्तस्य गजादिकर्तृकगमनादौ लक्षणो स्वैव साधुः न चै
वमपि भालत्वरूपे निष्ठत्यादेः आगुक्तकार्यकारणभावस्य व्यभिचारो दुरुद्धर एवेति वाच्यं तादृशकार्यकारण
भावस्यैवानंगीकारात् तदंगीकारे च तत्र धर्मप्रमाणतत्प्रत्युक्तगच्छतीत्यादौ तत्र नीपदार्थो गमनादेरन्वयेन
व्यभिचारापत्तेः न च तदनंगीकारे घटो नश्यतीत्यादौ घटाभावं पश्यतीत्यादिशाब्दबोधवारणासंभव इति वा
च्यं। धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारे घटो नश्यतीत्यादौ घटाभावं पश्यतीत्यादिशाब्दबोधवारणासंभव इति
वाच्यं। धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेन स्वप्रकृतिधर्मजनितत्वजन्मोपस्थितिविषयमतपाप्रति
बंधकत्वकल्पनेन तद्वारणादित्याहुः अत्रेदमवधेयं। एतन्मतमयुक्तं मिलितयुक्तं उक्तप्रतिबध्यप्रतिबंध
कभावकल्पनेन कलंजभक्षणमेदिष्टादौ कलंजभक्षणादौ विधिप्रर्थबलवदनिष्ठाननुबंधित्वाभावबोधो तस्या

व्यु·दी

द्वितीयद्वैतीकं कार्यकारणभावस्थाववत्त्वकं इति। अन्ये तु वादिमते तस्यैवापुक्तत्वात्। न च लडर्थकरीलाप्ये तदनुपपन्नं
अभावस्य विभक्त्यर्थत्वाभावादिति वाच्यं। तत्र विशिष्य धातुविशेषसमभिव्याहृतनञ्जन्योपस्थितित्वेन कार
णत्वान्तरकल्पनात्। न च समभिव्याहारमेव निराकाङ्क्षं इति वाच्यं प्रतिबन्धकसत्त्वे हेत्वन्तरेणापि कार्यानुदयान्वयवक्तुः तत्त
न कल्पं ज्ञानिसत्त्वेनिरुक्तनिष्ठत्वेन धनत्वेन लक्षणानन्तस्य सर्वग्राहकतेति मतावलम्बनेनोक्तव्यभिचाराभावेनोक्त
कारणतान्तरं कल्प्यतेव नं गजः इत्यत्र ह देवदत्तो गच्छतीत्यत्र च वनतीर्थ्यवनस्य द्वन्द्वस्य हयोरन्वये द्वयः देवद
त्तेगजः स्यादन्यच वसंयोगानुकूलगमनस्य द्वन्द्वस्य हसंयोगानुकूलगमनकर्तृत्वेन तथा चोक्तधर्मेण गजस
इत्रः पुरुषो वनस्य द्वन्द्वाभिन्नं गृहकर्मकगमनकर्ता स्याद्वा कारकः॥ एवं बोध इति उक्तरीत्या पूर्वमते तत्र अन्वय
प्रकृ। यद्यपि पूर्वमते देवदत्तमिव भवन्तं पश्यामीत्यादाव संगतिः तत्रापि भवत्कर्मकदर्शने देवकर्मकसादृश्यप्रती
य तेन तु भवति देवसादृश्यं तु प्रामाण्ये ति देवपदोत्तरद्वितीयार्थे प्रवृत्तत्वसम्भवस्यपीसाधुत्वेपदसाधुत्वस्यापि वार्थ
त्वापदपमीयत्वात् तत्र च देवे नेवार्थस्य तत्र च द्वितीयार्थस्याद्वयपद इति वाच्यं। तथानन्वयभवनात् फलमानं प्रकृत्यर्थ।
वितत माथ्र्ये प्रसापकत्वभंगप्रसंगाच्चेति हृषां कैश्चिदुक्तं तदप्यसत् उपमानोपमेययोः समानविभक्तिकत्वस्यै
व लिङ्गिकत्वाद्वैयर्थ्याभावात्। परं तु पूर्वमते कर्तृत्वा वक्तृपदप्राभावे ऽनुपपत्तिः तत्र कर्त्तरि साहस्य वच्या समासत

एवं सादृश्यस्य विधेयतया प्रतीतिरनुभवसिद्धा न सिद्ध्येत् गजइव यः पुरुषः स गच्छति पुरुषो यः स गजइव गच्छ
तीति वाक्यार्थाभिन्नविधेयकप्रतीतिजननात् किं च स्वः पदस्य प्रतीत्यादौ विभक्तिजन्योपस्थितेर्हेतुतायां व्यभिचारवार
णाय स्वःपदस्य स्वःकर्मिके लक्षणाश्रयणस्यावश्यकतया गजइवेत्यादावपि इवशब्दस्य सादृश्यार्थे लक्षणामाश्रित
त्य गुणमतादिवद्वयमप्येवोचितमिति पूर्वमतमप्यसम्यगेव तथास्तु घटाभावपदप्रतीत्यादिबोधे घटो न पदप्रतीत्यादयः स्व
रूपायोग्याः तत्र तत्तदानुपूर्वीरूपाकांक्षाज्ञानाभावात् तत्तादृशानुपूर्वीप्रतिबंधाद्घटानयनादिबोध इति धात्वर्थविशेषलाघु
ह्वरी साविभक्तिजन्योपस्थितेर्हेतुत्वमेव नास्तीति गजइवेत्यादाविवार्थसादृश्यस्य गमनादावन्वयेन कोपि दोष इतिस्रा
कुरिति दिक् । अथ चंद्र इव मुखमित्यादेउपमानोपमेययोर्विशेषणविशेष्यभावाभावेपि एकैव विभक्तिः लिंगसंख्या
विभिदेपि उपमानोपमेययोः विभक्तिः पुनरेकैव उपमानोपमेययोरित्यनुशासनेनोपमानोपमेयपदयोस्समानवि
भक्तिकत्वनियमावगमात् तेन चंद्र इव मुखमित्यादयो न प्रयोगाः । लिंगसंख्याविभेदेपीत्यस्य तु लिंगवचनभेदेनोप
मांशाद्वयोपप्रतिकूलत्वेन दोषः किंतु सादृश्यबोधजनकत्वेनैवेत्यादिः प्रागुक्त एवाशयः एतेन चंद्र इव मुखमित्या
दौ चंद्रपदं चंद्रसदृशलक्षकं इवशब्दश्च तात्पर्यग्राहकतया द्योतक एवेति उपमानोपमेयपदार्थयोर्विशेषणविशे
ष्यभावेनैवान्वयः तथा च निपातानां वाचकत्वाकल्पनमिवरूढ्ययोतकत्वमिति वा नञादिनिपातानां वाचकत्वेप्यग्रे

वशब्दस्य द्योतकत्वे पराभिमतबाधकाभावात्। तथा हि। चंद्रमिव मुखं पश्यामीत्यादौ चंद्रपदोत्तरं द्वितीया सर्वसिद्धा
सा चेवशब्दस्य द्योतकत्व एवोपपद्यते तथा सत्येव चंद्रपदस्य चंद्रसदृशे लक्षणया तस्य मुखेनाभेदान्वयात्। अभेदान्व
ये च विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य नियामकतया विशेषणवाचकचंद्रपदोत्तरं द्वितीयाया आव
श्यकत्वात्। इवशब्दस्य सादृश्यवाचकत्वे तु तस्यैवाश्रयतया मुखेऽन्वयेन चंद्रपदार्थस्य मुखपदार्थेनाभेदान्वयाभावात् चंद्रपदोत्त
रं द्वितीयानुपपत्तेः। नन्वस्तु तस्या अनावश्यकत्वात् चंद्र इव मुखं पश्यामीत्यादितोऽपि तादृशबोधोपपत्तेः। अथ चंद्रपदस्य चं
द्रप्रतियोगिकमर्थः सादृश्यात्मकस्य चेवशब्दस्य सादृश्याश्रये लक्षणया तस्य च मुखेऽभेदेनान्वय इति रीत्या चंद्रमिव
मुखं पश्यामीत्यादौ समानविभक्तिकत्वोपपत्तिः संभवत्येवेति चेन्न केवलस्य इवशब्दस्येति प्रयोगाभावेन तादृशलक्षणाया इवपद
त्तादृशविशिष्टबोधकत्वाभावादिवादेः सादृश्यपरत्वे एवाकल्पना नेषा निरर्थकतया स्वशक्यस्यैव धर्मरूपलक्षणया श्र
संभवात्। नायकान्तदशार्थस्यैवाभेदेन मुखेनान्वये मुखशब्दे इवशब्दस्य समानविभक्तिकतालाभेऽपि चंद्रपदस्य समानविभ
क्तिकताया अनुपपादनाच्च। एवमिवशब्दस्य द्योतकत्वे हंसीव धवलश्चंद्रः सरोवरीभासितादिवशुद्धकूलवधूरिवेत्यादौ
लिंगभेदवचनभेदयोरुपमालोपमायामनुपपद्यते तत्र हंसीपदस्य हंसीसदृशे कूलवधूपदस्य कूलवधूसदृशे लक्षणायां मात
स्य च चंद्रे तत्कुसुमाभेदेनान्वयात् भेदान्वये च विशेषणविशेष्यपदयोः समानलिंगकत्वस्य समानवचनत्वस्य च नियमा

तादृशवृत्तस्य सादृश्यवाचकत्वेऽपि तु हंसीसादृश्यस्य कुलवधूसादृश्यस्य चैवाभीष्टत्वेनाश्रमतपायं देसक्रुषु चाद्वयेन हंसादि
पदार्थाभेदान्वयाभावेन लिंगभेदवचनभेदयोरुपमादोषत्वानुपपत्तिः ननु समानलिंगकत्वसमानवचनत्वयोरभेदा
न्वयनियामकत्वे वेदाः प्रमाणमित्यादिप्रयोगानुपपत्तिः तत्र लिंगभेदवचनभेदाञ्जनत्वानियतलिंगस्थले समानलिंगक
त्वस्य नियामकतया प्रमाणशब्दस्य नित्यलिंगत्वेऽतमानियतलिंगत्वान्न दोष इति वाच्यं तथापि समानवचनत्वस्य नियामक
त्वासंभवस्य दुरुद्धरत्वात्। प्रमाणशब्दस्यानियतवचनत्वेनानियतवचनस्थले समानवचनत्वस्य नियामकत्वोपगमेऽप्य
निस्तारादिति चेन्न यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यापानविरुद्धात्तत्राभेदान्वये विशि
ष्यविशेषणपदयोः समानवचनत्वस्य नियामकत्वाभ्युपगमात् वेदाः प्रमाणमित्यादौ च प्रमाणपदोत्तरप्रथमाविभक्त्या
वेदपदोत्तरविभक्तितात्पर्यविषयबहुत्वविरुद्धमेकत्वं विवक्षितमिति न दोषः। तच्च प्रमाणतावच्छेदकतपातत्रैकत्वावच्छेदकसंभ
वात्कथं तत्रैकत्वं विवक्षितेति वाच्यं। तत्र प्रकृत्यर्थतावच्छेदकप्रमाकरणतापर्याप्त्यैकत्वान्वयात्। वेदनिष्ठप्रमाकरणतायाः इ
तरावच्छिन्नापाद्यकत्वान्न दोषः। न च संख्यायाः प्रकृत्यर्थतावच्छेदकान्वयस्य दृष्टत्वात् कथं तस्यास्तत्रान्वय इति वाच्यं। अ
नेकव्रीहितात्पर्यकेऽपि पद्भ्यो व्रीहिरिति वाक्ये व्रीहित्वे एकत्वान्वयदर्शनात्। व्रीहीणामनेकत्वेन तत्रैकत्वान्वयासंभवात्।
न च तत्रैकवचनोपस्थितनानैकत्वानां प्रत्येकं नाना व्रीहिष्वन्वयः संभवत्येवेति वाच्यं। एकत्वमात्रस्य वस्तुमात्रसाधार

 ऽपेनास्यावर्त्तकतमास्वसजातीयनिष्ठभेदप्रतियोगितानवछेदकैकत्वरूपस्वजातीयवृत्तिधर्मरहितत्वस्यैकवचना
र्थस्ये कुरीत्याद्वित्वबाधसंभवात् । नच यथाकथंचित्साजात्यस्यावर्त्तकतया प्रकृतस्यार्थतावछेदकरूपेणोव तद्वाच्यं तथा
चात्र घटोस्तीत्यादौ घटनिष्ठभेदप्रतियोगितानवछेदकैकत्वाप्रसिद्ध्या तद्बोधासंभवइति वाच्यं । समभिव्याहृतपदार्थसंस
र्गित्वविशिष्टप्रकृतस्यार्थतावछेदकरूपेण साजात्यविवक्षणेन एतद्दोषविद्यमानघटनिष्ठभेदप्रतियोगितानवछेदकैकत्व
स्याप्रसिद्ध्या तद्बोधसंभवात् । अथैवेपशुनायजेतेत्यादौ एकत्वमात्रस्य यागकरणपश्वंतरनिष्ठभेदप्रतियोगितावछे
दकतया यागकरणपशुनिष्ठभेदप्रतियोगितानवछेदकैकत्वाप्रसिद्ध्या तदन्वयासंभवेन संख्यारूपैकत्वस्यैव पश्वा
द्यवत्वयो वाच्यस्तथा चानेकपशुकरणकयागादृष्टसिद्धौ बाधकाभावेन तत्रक्रतुवैगुण्यानुपपत्तिः नचपश्वाभागय
कौ पत्नशोः करणत्वेतान्वयस्तत्रपशौ तद्यागव्यक्तिकरणपशुनिष्ठभेदप्रतियोगितानवछेदकैकत्वान्वयोविवक्षितस्तद्धति
नोक्तदोष इति वाच्यं । तेनरूपेण पशुपदादनुपस्थितत्वात् तत्तद्यागव्यक्तिकरणत्वस्य समभिव्याहृतपदार्थत्वाभावेन तथा वक्तुमश
क्यत्वादिति चेन्न । पशुनायजेतेत्यादौ तात्पर्यवशात् स्वाश्रयनिष्ठभेदप्रतियोगिपश्वकरणकत्वस्वाश्रयकरणकत्वैतदु
भयसंबंधेन तत्तद्यागव्यक्तिकरणपशुत्वव्यापकैकत्वव्यक्तिनिरूपितसमवायसंबंधेन वा संख्यारूपैकत्वस्य भागे
पशौरन्वयोपगमेनादोषात् प्रथमकल्पे समवायेन प्रकृतस्यार्थप्रकारावधितद्वयोपगमान्न प्रकृतस्यान्वितत्वेत्यादिक्रमुस

ति भंगः वृत्तौ तृतीयापजिपदस्य स्वभिन्नपशुकरणकत्वसंबंधेन पशुविशिष्टान्वयोगे लक्षणागतत्र च पशुकरण
कत्वस्य तृतीयार्थस्यान्वयः करणतासंबंधेन पशोरेवान्वयः तृतीयायाश्च पजिपदस्य विशिष्टान्वये लक्षणापातात्सर्प
ग्राहिकेति स्मारमित्यपिपरास्तं ऽकृतौ लैवेवशाहृस्यवाचकत्वेपि चंद्रमिवमुखंपश्यामीत्यादौ चंद्रपदोत्तरं द्वितीयोप
पत्तेः हंसीवेत्यादौ लिंगभेदादेरुपमादोषत्वोपपत्तेश्च। यदपि स्वानुयोगिवाचकमुखादिपदसमभिव्याहाराभावे चंद्रमि
वपश्येत्यादौ चंद्रपदः चंद्रसदृशलक्षकः इवशब्दश्च तात्पर्यग्राहकः इवशब्दस्य सादृश्यवाचित्वे चंद्रस्यतत्रभेदान्वयो
नस्यात् द्वितीयातदर्थान्वयानुपपत्तिश्च कर्मत्वेपि वा द्वितीयाविधानादिति तदप्यसत् तन्निपातार्थेतरेदंनान्वयेवाधकाभावा
त्। निपातसमभिव्याहृतपदोत्तरविभक्त्यर्थस्य निपातार्थेन्वयस्वीकारात् नद्वितीयार्थेनान्वयः तच्चैवंप्रकृते सर्पान्वितेत्या
दिस्थलस्थिभंगइतिवाच्यं नामुदस्येतरोत्तरात्मनः नानुपपन्नत्वप्रादुर्भावादित्यादौ तथा च यदर्शनेन प्रकृतसर्पान्वितेत्यादिस्थल
तेर्निपातासमभिव्याहारस्थलेएवोपगमात्। इत्थं च चंद्रमिवपश्येत्यादौ दर्शनकर्मतमेवार्थसादृश्यस्येवान्वयेन चंद्रस
दृशंपश्येत्याद्यन्वयबोधः चंद्रमिवमुखंपश्येत्यादौ तु सादृश्यस्य मुखएवान्वयः। न चोपमानोपमेयपदयोः समानवि
भक्तिकत्वनियमने गजइवगच्छतीत्यादौ व्यभिचार इति वाच्यं। नाम्नार्थयोरुपमानोपमेयभावे तथा नियमात्। न चैवम
पि चंद्रइव यशोभाकामिनीमुखइत्यादिप्रयोगानां चंद्रशोभयोरुपमानोपमेयभावपरतापांकथमुपपत्तिरितिवा

138
3 (B)

सा॰कौ॰ र्थं तदृक्प्रयोगानामसाधुत्वस्यैवोपगमात्। चंद्रस्येव शोभा कामिनीमुखस्येत्यत्र तु चंद्रमुखयोरेवोपमानोपमेय
भावेन तु चंद्रशोभयोरित्युपगमात्। मतु। उपमानपदस्यानियतलिंगतास्थल एव तादृशनियमः। अत एव राजन्
हरीतकीं भुंक्ष्व मातेव हितकारिणी इत्यत्रापि निर्वाहः मातृशब्दस्य नियतलिंगत्वात् एवं च चंद्रस्येव शोभा कामिनी
मुखेऽल्हादयः प्रयोगाः शोभायां चंद्रनिरूपितसादृश्यान्वयपरतामामपि सुघटा इति तत्र दृष्टांतमपि क इव रौतीत्यादौ तथाप्य
गतेः अत्र वदंति उपमानोपमेयभावेनान्वयस्थल एवोक्तनियमः गज इव गच्छतीत्यादौ च गजस्य कर्तृत्वेनान्वयो गितपान
गमकान्वयः वा धात्वर्थ किंतु इवशब्दस्य लक्षणया गमनसजातीयत्वार्थकतया तदन्वयोगितयैवागमनतान्वय इति न
दोषः एवं च चंद्रस्येव शोभा मुखेऽल्हादयोऽपि प्रयोगा इवशब्दस्य लक्षणया शोभासजातीयत्वपरतयैव सुघटाः अथ
तथापि राजन् हरीतकीं भुंक्ष्व मातेव हितकारिणीमित्यादावगतिरेव तत्र मातृहरीतक्योरुपमानोपमेयभावेनान्वय
स्वत्वादिति चेत् तत्रेवशब्दस्य सदृशे लक्षणया मातेव या सौ हितकारिणी चेति कर्मधारयसमासानंतरं हितीयोपग
मेन मातृसदृशस्य हितकारिणीपामभेदेनान्वयेन मातृहरीतक्योरुपमानोपमेयभावेनान्वयस्याभावात्। वस्तुतस्तु
अत्र मातृशब्दो न स्त्रीलिंगो जननीवाचकः किंतु मातृपर्यायः पुल्लिंग एव तथा चात्र मातृहरीतक्योर्नोपमानोपमेय
भावेनान्वयः किंतु मातृसंबोधनराजोरेव तदर्थं चपमाहरीतक्याहितकारित्वप्रमातापुरुषो हरीतकीं भुंक्ष्वेनि

तपाकथमनुगत४

उपमारहितं सोमं सोमखंडविभूषितं नमामि तं महेशानमभीष्टार्थप्रसिद्धये १ अथानुमाने निरूपिते क्रमप्राप्तमुप
मानं निरूपणीयमिति प्रतिबंधकजिज्ञासाविरहतावदवश्यवक्तव्यत[illegible]पोवसरसंगत्योपमानं निरूप्यते: तत्रोपमितिक २
रणमुपमानं उपमितित्वं जातिविशेषः स एव चोपमितिलक्षणं न तु तादृशज्ञानात्तौ मानाभावः करणविशेषे कार्यवैजा
त्यस्यावश्यकत्वात्‌ अथोपमितिकरणयोः साधर्म्यवैधर्म्यज्ञानयोरननुगतकारणप्रयोज्यानुगतजातिसिद्धि
रिति चेन्न। अविदितसंगतिकसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिनि अनुसंधानमेवोपमानं तादृशवाक्यार्थश्च
क्वचित्साधर्म्यं क्वचिद्वैधर्म्यं तादृशानुसंधानजन्यसंज्ञासंगतिपरिच्छेद एव चोपमितिरिति अविदितसंगतिकसंज्ञा
समभिव्याहृतवाक्यार्थज्ञानत्वेन साधर्म्यवैधर्म्यज्ञानयोरनुगमेन करणानुगमाभावात्‌ वस्तुतस्तु उपमिनो
मीति प्रतीतिसाक्षिक एवोपमितित्वाख्यजातिविशेषः न च तादृशानुसंधानजन्यसंज्ञासंज्ञिसंगतिपरिच्छेदत
मेव तस्या। विषयोस्त्विति वाच्यं तादृशानुसंधानजन्यत्वाद्यप्रतिसंधानेपि तादृशप्रतीतेर्जोपमानत्वेन तथाप्यक्रम
शक्यत्वादिति: यद्वा ऽविदितसंगतिकसंज्ञासमभिव्याहृतवाक्यार्थज्ञानजन्यसंज्ञिसंगतिपरिच्छेदत्वं अतिदेशवाक्या
र्थज्ञानजन्यशक्तिनिश्चयपदस्यानुभवनिष्ठभेदप्रतियोगितावच्छेदकजातिमत्त्वमेवोपमितेर्लक्षणं: वैधर्म्यज्ञानकरण

संसा २

न्या·कौ

138/3(c)

कोपमितिसंग्रहापत्तेरमे जातिघटनाः ज्ञानत्वादिकमादायातिप्रसंगवारणाय पादवच्छेदकं ततः प्रत्यक्षादौ तद्वारणा
पहेसंते जातिविशेषणाः नव्यास्तु गोसदृशो गवयपदवाच्य इत्याकारकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिक
कार्यताश्रालिसादृश्याविषयकज्ञानवृत्तिज्ञानत्वव्याप्यवृत्तिजातिमत्त्वमुपमितित्वं अयं घट इति प्रत्यक्षशाब्दादिक
मादायप्रत्यक्षादिमात्रेतिप्रसंगवारणाय पश्चात्स्येतः गवयपदवाच्यो गोसदृशो वान्नितिप्रत्यक्षस्य सादिकमादाय तद्वा
रणाय सादृश्याविषयकेति मत्त्वगुणत्वादिकमादायातिप्रसंगवारणाय पच्यन्तव्याप्यं नत्वमित्याहुः केचित्तु शाब्दविषय
कत्वाव्यभिचारिजातिमत्त्वे सति प्रत्यक्षान्यत्वमुपमितित्वं अनुमित्यादिवारणाय संत्यंतं अनुमितित्वादीनां गगने
शब्दवदित्यादौ शब्दविषयकत्वसामानाधिकरण्येपि पर्वतो वह्निमानित्यादौ शब्दविषयकत्वव्यभिचारित्वात् अनुमित्यादौ
तादृशजातिमत्त्वाभावात्सत्यंतेन तद्वारणं अत एव शब्दविषयकत्वसमानाधिकरणजातिमत्त्वे सतीत्युक्तौ नानिस्तारः
आवरणप्रत्यक्षस्य शब्दविषयकत्वनियमेनाआवरणत्वजातेः शब्दविषयकत्वाव्यभिचारित्वनियमादायआवरणप्रत्य
क्षेतिप्रसंगवारणाय विशेष्यदलं नचोपमितित्वस्यैव कथं शब्दविषयकत्वाव्यभिचारित्वमिति वाच्यं उपमितेः पदवाच्य
त्वविषयकत्वेन पदमविषयीकृत्य तद्वाच्यत्वविषयकत्वासंभवेन पदस्य शब्दात्मकतया उपमितेः शब्दविषयकत्वनियमे

शीव

नोपमितित्वस्य शब्दविषयकत्वाव्यभिचारित्वसंभवादित्याहुस्तदसत् ः कीदृश्यौषधी ज्वरहंत्रीति पृष्टे मुद्गपर्णीसदृ
श्यौषधी ज्वरहंत्रीत्युत्तरिते ज्वरहरणतादृश्यौषध्योः कार्यकारणभावउपमानेनावधार्यत इति मते तादृशस्थले उप
मितेः शब्दविषयकत्वाभावेनोपमितित्वस्य शब्दविषयकत्वाव्यभिचारित्वाभावेनासंभवात् ः न च ज्वरहरणतादृश्यौषध्योः
कार्यकारणभावश्चानुमानेनैवावधार्यतस्तत्रोक्तमतमसंभवदुक्तिकमेवेति वाच्यं पदवाच्यत्वस्याप्यनुमानेनावधा
रणसंभवस्य वक्तुं शक्यतयोपमितेरतिरिक्तप्रमितित्वस्यैव विलयप्रसंगात् ः न च व्याप्त्याद्यप्रतिसंधानेपि पदवाच्य
त्वावधारणात्तस्यानुमानेन निर्वाह इति वाच्यं ः कार्यकारणभावेपि समानत्वात् ः अत्रोपमितिक्रमः विशिष्यातिदि
ष्टगवयपदसंगतिकस्याभावात्ततो गवयपदवाच्यं किंचिदस्तीति जानन्नागरिकआरण्यकं पृच्छति कीदृग्गवय इति स चा
रण्यको नागरिकमुत्तरयति गोसदृशो गवय इति ततस्तस्मादतिदेशवाक्यात्तस्य गोसदृशो गवयपदवाच्य इत्याकारकानु
भवो जायते विशिष्यागृहीततत्किंकप्रश्नोत्तरस्य गवयपदवो गवयपदवाच्यलाक्षणिकत्वात् ततस्तदनुभवजन्यसं
स्कारवान्नागरिकोऽरण्ये प्रविष्टो महिषादिविलक्षणं गोसदृशं पिंडं पश्यति ततो गोसदृशोपमिति पिंडे विशेषदर्श
नोद्बुद्धसंस्कारजो गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरति ततो गवयो गवयपदवाच्य इति प्रतीतिर्हदेतिसैवोप

ऽनुमानेनादौ सामान्यतः शक्तिपरिच्छेदः ततो गोसादृश्यं न गवयपदशक्यतावच्छेदकं जातिसमनियतोपाधित्वा
त् गोत्वसमनियतसास्नादिमत्त्वोपाधिवदित्यनुमानेन गवयत्वसमनियते गवयत्वे ततः तन्न गवयपदशक्यतावच्छे
दकं जातिसमनियतजात्यन्यत्वात् गोत्वसमनियतसास्नादिमत्त्ववदित्यनुमानेन वा गवयत्वस्यापि सिद्धौ गवयपदशक्य
तावच्छेदकत्वाभाववन्निश्चयः ततो गवयपदस्य गवयत्वेतरावच्छिन्नाशक्तत्वे निर्णीते गवयप[illegible]वयपदशक्यतावच्छे
दकं संस्थानविशेषव्यङ्ग्यजातित्वात् यन्नैवं तन्नैवं यथा सत्तेत्यनुमानं गवयत्वं गवयपदशक्यतावच्छेदकं संस्थानव्यंग्य
जातित्वाद्गोत्वादिवदित्यनुमानं वा ततो गवयपदं गवयत्वावच्छिन्नशक्तं गवयत्वेतरावच्छिन्नाशक्तत्वे सति किंचिद्धर्मा
वच्छिन्नशक्तत्वात् यत्पदं यदितरावच्छिन्नाशक्तत्वे सति किंचिद्धर्मावच्छिन्नशक्तं तत्तदवच्छिन्नशक्तं यथा गोपदं गोत्वाव
च्छिन्नशक्तमित्यनुमानाद्गवयत्वावच्छिन्नशक्तिपरिच्छेदः पश्चाद्गवयपदं गवयत्वविशिष्टवाचकं वृत्त्यन्तरं विना बुद्धेस्तत्व
प्रत्यमानत्वात् यद्यद्वृत्त्यन्तरं विना बुद्धेः प्रपज्यते तत्तस्य वाचकं यथा गोपदं गोः तथा चेदं तस्मात्तथेत्यनुमानप्र
योगः ननु गवयत्वविशिष्टशक्तिग्रहं विना वृत्त्यन्तरं विनेतस्य दुर्ग्रहत्वादसिद्धिरिति वाच्यं गवयप्रतिपत्तीतर
प्रयोजनं विना प्रयोगे न वृत्त्यन्तराभावस्य दुर्ग्रहत्वात् यद्धि गंगापदं लक्षणया प्रयुज्यते तत्र शैत्यपावनत्वादिप्रती

३

मा.कौ. तिप्रयोजनमुद्दिश्यैव स्वोपज्ञे शब्दप्रयोगे कस्मिंश्चिद्वाचकं प्रयुंजामह इति व्याप्यात्ः तथा चानुमानेनोपमानफलनि
र्वाहः सुघट एव अत एव वैशेषिका अनुमान एवोपमानमंतर्भावयंतीति चेन्नः अतिदेशवाक्यार्थज्ञानादिमत उक्ता
नुमानानवतारेपि संज्ञासंज्ञिसंगतिपरिच्छेदस्य सर्वैरनुभवसिद्धत्वात्ः एतेन कीदृग्गवय इति प्रश्नवाक्यं गवयपदवा
च्यत्वं कीदृग्लिंगकमित्येतदर्थपरं गोसदृशो गवय इत्याद्युत्तरवाक्यं च गवयपदवाच्यत्वव्याप्यतद्धर्मगोसादृश्यप्रति
पादनपरं। एवं चारण्ये गोसदृशपिंडदर्शने सति अयं गवयो गवयपदवाच्यो गोसदृशत्वादतिदेशवाक्यावगतगो
सदृशवदित्यनुमिनोतीत्यनुमान एवांतर्भाव इत्यपि परास्तंः क्वचिज्जवयपदवाच्यत्वस्य गवयपदे वा किंचिद्वाचक
त्वस्य लिंगं विना प्रतीत्यसंभवेन गवयपदं कस्यचिद्वाचकं पदत्वादित्यनुमानादेव तथा प्रतीत्या लिंगप्रश्नासंभवा
तः गवयपदवाच्यत्वमनुमेयमेवेत्यनिर्णयेन लिंगप्रश्नासंभवाच्चः नच ज्ञापकमात्रप्रश्नेन हि शेषस्य लिंगस्योत्तर
त्वे संभवत्येवेति वाच्यम्ः तथा सति वनेगतो रक्षपसीति प्रत्यक्षस्याप्युत्तरत्वसंगात्ः अथापि लक्षणप्रश्न एव गोस शिव
दृशो गवय इत्याद्युत्तरं च गोसादृश्यस्य गवयलक्षणत्वप्रतिपादनपरं एवं चायं गवयो गवयपदवाच्य इति व्यव
हर्तव्यो गोसदृशत्वात्ः यस्तथा न व्यवह्रियते नासौ गोसदृशः यथा गज इत्यनुमानेनैवानिर्वाह इति चेन्नः ग

जादौ तादृशव्यवहारविषयत्वाभावस्य मानाभावेनासिद्धेः नच गवयपदाप्रयोगेण तदनुमेयमिति वाच्यम् सर्वे
षामप्रयोगस्य निर्णेतुमशक्यत्वात् केषांचिदप्रयोगस्य च गवयेपि संभवेन व्यभिचारात् न त्वस्तु गोसदृशो गवय इत्य
त्यतिदेशवाक्यादेव गवयपदवाच्यत्वग्रहः गोसदृशपिंडदर्शने सति तु केवलमसौ प्रत्यभिजानाति यो गोसदृशो ग
वयपदवाच्यत्वेनावगतः सोयं गवयपद इति नोपमानमतिरिक्तमिति चेन्न गवयत्वावच्छेदेन शक्तिग्रहस्यैव शाब्दबो
धोपयोगितयोपमितौ गवयत्वादौ स्वरूपसंबंधविशेषरूपावच्छेदकत्वस्य भाने नोपमानस्वीकारस्यावश्यकत्वात् न
च गोसादृश्यमेव शक्यतावच्छेदकमिति वाच्यम् गुरुत्वात् अप्रतीततया नामपि गवयव्यवहारादावप्युत्पत्तेश्च न च श
ब्दादेव गवयत्वावच्छेदेनैव शक्तिग्रहोस्त्विति वाच्यः शब्दश्रवणकाले गवयत्वविशिष्टस्यानुपस्थित्या गवयत्वावच्छेदेन
गवयपदवाच्यत्वस्य शब्देन बोधनासंभवात् न च गवयपदात्तदुपस्थितिः संभवति तस्याग्रहीतशक्तिकत्वात् न च गोसदृ
शपदात्तदुपस्थितिरिति वाच्यं तस्य गोसादृश्याश्रयमात्रप्रतिपादकत्वात् न च गोपदस्य सदृशपदस्य वा लक्षणया
पात्तदुपस्थितिरिति वाच्यम् प्राक्शक्यसंबंधविरहात् ग्रहो तस्यैव लक्ष्यतया गोसदृशशक्यपदार्थयोगि गवयत्वविशि
ष्टे न संबंधग्रहेण लक्षणाया असंभवात् परन्तु प्राग्यद्यपि गवयत्वविशिष्टानुपस्थित्या शाब्दोत्संकेतग्रहे न संभ

४

इतरत्र गभीरत्वविशिष्टनद्युपस्थितौ लक्षणया विशिष्टसंबंधितीरोपस्थितौ तदनंतरं वस्तुगत्या गभीरनदीसंबंधितीरि ३

ना॰कौ॰ वत्ति। तथापि प्रत्यक्षेण गवयत्वविशिष्टोपस्थितौ सत्यां तत्र गोशब्देन सदृशशब्दस्य तात्पर्यग्रहे सति गोसदृशसंबं
धितया गृहीतस्य गवयत्वविशिष्टस्य सदृशपदेन लक्षणायोपस्थितौ संज्ञा गवयत्वविशिष्टो गवयपदवाच्य इति ज्ञानं
गोसदृशो गवय इति स्मृत्यात्मकवाक्याद् देवभविष्यति गभीरायां नद्यां घोष इत्यादौ घोषान्वयबोधवत्। न चातिदेशवाक्ये गवयपदस्य
गवयपदवाच्यत्वलाक्षणिकतया सदृशपदस्यापि गवयत्वविशिष्टलाक्षणिकत्वे गोपदस्य तात्पर्यमात्रग्राहकं
तया सर्वपदस्य लाक्षणिकतयान्वयबोधासंभवः लाक्षणिकपदस्याननुभावकत्वादिति वाच्यः अत्र लाक्षणिकस्या
विभक्तस्यैवान्वयबोधसंभवात्। धूमादितात्यादौ सर्वलाक्षणिकस्थलेप्यन्वयबोधस्य सर्वसिद्धत्वेन लाक्षणिकपदस्याप्य
नुभावकत्वाच्च। अत्र परे वाध्यपनसमणगृहीतो वेदांगोपांगपर्यवसाने कालांतरे ऽध्यवगतिजन्यप्रतीतिसर्वसि
द्धमिति तन्न। अजनितान्वयबोधस्यैव शब्दस्य कालांतरे सामग्रीलाभे स्मरणेनार्थप्रत्यापकतया प्रकृते गोसदृ
शो गवय इति शब्दस्य गोसादृश्यसामानाधिकरण्येन जनितगवयपदवाच्यत्वान्वयबोधस्य मानांतरोपस्थितिमपेक्ष्या
न्वयबोधजनकत्वासंभवात्। शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्। अथ एकविषयकज्ञानजनकस्यापि शब्दस्यो शिवं
दृसा पुनर्विषयांतरज्ञानजनकतया स्वेव शब्दस्य विरम्य व्यापारः। न चैकस्याः शब्दोपस्थितेर्विरम्य न विषयांतरज्ञानजे

नकत्वमितिवाच्यं दृष्टत्वात् अत्रापूपस्थित्यंतरस्यैव शाब्दबोधजनकत्वेन प्राक्तनशाब्दोपस्थितेः कालांतरे फल
जनकत्वानभ्युपगमात् नच प्राक्तनशाब्दोपस्थितेः प्रथममेवकथनफलजनकत्वमितिवाच्यम् तदागवयपत्ववि
शिष्टस्यानुपस्थितत्वात् तद्वाच्यत्वपरत्वग्रहाभावेन फलजनकत्वासंभवात् गवयपत्वविशिष्टोपस्थितौ सत्यां तद्वाच्यताप
रत्वग्रहे तस्मादेवातिदेशवाक्यात्स्मरतु संहितात् तस्य गवयपत्वविशिष्टे शक्तिग्रहसंभवात् एतेन गोगवयायांघोष
इत्यादौ पदार्थानामन्वयापोप्यतयातीरोपस्थितिमपेक्ष्य पश्चादन्वयबोधकत्वंसंभवति प्रकृते च गौरिव गवय इति सामाना
धिकरण्येन गवयपदवाच्यत्वबोधने बाधकाभावेन गवयपत्वविशिष्टोपस्थितिमपेक्ष्य शाब्दबोधजनकत्वे माना
भाव इत्यपि निरस्तम् प्रथमं गोसादृश्यसामानाधिकरण्येन गवयपदवाच्यत्वान्वयबोधे जाते पश्चाद्गवयपत्वे गोसा
दृश्ये चोपस्थिते लाघवात् गवयपत्वविशिष्ट एव वाच्यता महतीतिविमर्शानंतरं तदागवयपत्वविशिष्टवाच्यताप्रतीतिसं
भवत्विति समभिप्रायेणामददासेन वाक्यं प्रयुक्तमित्यवधारयति तदा पुनरुपस्थितत्वात् अतिदेशवाक्यस्य गवयपत्व
विशिष्टे गवयपदवाच्यताबोधकत्वाभ्युपगमात् अत एव मेव हि वाक्यार्थेकारणतादृशज्ञानेन ममोपपथा बोधो
भूदिदानींतनस्मानेन तस्मादेव वाक्याद्गहेसम्पगार्थमधिगच्छामीति सर्वजनसिद्धो व्यवहारोपि संगच्छते इति चेन्न भ
दा इदं वाक्येन प्रेषात्तिनिमित्तपरं किंतु स्वरूपाख्यानमिति निर्णयोस्ति तदानीमप्यतिदेशवाक्यार्थज्ञानादिद्धिरिति

५

न्या॰ कौ॰

४९

सामान्याशक्तिपरिच्छेदस्य जायमानत्वेन तदा शब्दस्य तदार्थतादृशपर्यनिश्चये नप्रस्तुतविपरीततोस्य पर्यनिश्चयस्यापि सं
भवेन शब्दस्य पुनरुपस्थिता वापि तत्र कुं पित्वेन शाब्दबोधाजनकत्वात्‌ः किंच पत्रकमेतकं निंदतो मं पिकुरभूति
दीर्घग्रीवं प्रलंबौष्ठं कठोरकं टकाशिनं पशूत्पदं पश्यन्नपि तिबाक्यं श्रुत्वा प्रागदृष्टकरभस्तादृशपिंडं उपलभ्य नवाक्यार्थं
स्मृत्वा करभत्वजातिविशिष्टो पुं करभपदवाच्य इति शक्तिं परिछिनत्ति तत्र तादृशवाक्यस्मृतिंदा तात्पर्यकत्वेन तादृश
पदवाच्यत्वपरतत्त्वदृढयोरसंभवानोपमानस्य शाब्दे नान्यथासिद्धिरित्युपमानं प्रमाणांतरमेव वस्तुतस्तु तादृश
व्याप्यादेराकांक्षाप्रयोग्यतादेश्च प्रतिसंधानेपि जायमानायां उपमितौ नोमित्यानुमिनोमि न शाब्दयामीत्याद्यनुभव
सिद्धाया विलक्षणायाः प्रमितेर्हेतुरपद्भवनोपातकारणं प्रमाणांतरमावश्यकं एतेन कोद्रिमानिति एष्टे धर्मवाच्य द्रि
मान्महान स सदृशो वद्रिमानित्युत्तरवाक्यात्‌ को ग्नौषधी ज्वरं हंतीति पृष्टे मुद्गपर्णीसदृशी औषधी ज्वरं हंतीत्युत्तरवाक्या
च्छ्रुतेत्तद्वाक्यार्थज्ञानोत्तरं पंचभवाननपमहानसमसदृशाः इयं मुद्गपर्णीसदृशीतिदर्शनेन तद्वाक्यार्थस्मरणे अयं वन्हिमान्
इयं ज्वरं हंतीति निश्चयो जायमानेन स्याप्रदिउपमितित्वं तदा शक्तिमात्रपरिछेदकोपमितिरिति निपमभंगः पदि वा तस्यमा शिव
नसोपनीतमानत्वं तदा गवयपत्ववि शिष्टे गोसादृश्यज्ञानसहकृतगोसदृशो गवयपदवाच्य इति ज्ञानोत्तरोत्पन्नं गवयोग
वयपदवाच्य इति ज्ञानमपि मानसोपनीतमानात्मकमेवास्त्विति निरस्तं तादृशनिपमे मानाभावात्‌ अन्योपपिनोमीत्य

नुमत्वाभावादस्तु उपमितित्वाख्या जातिविशेषः स च प्रत्यक्षत्वव्याप्य एवेति न तदवच्छिन्नकरणस्य प्रमाणान्तरत्वं न चोपमितेः
प्रत्यक्षत्वे तदुत्तरं साक्षात्करोमीत्यनुव्यवसायापत्तिरिति वाच्यं लौकिकविषयताशालिसाक्षात्कारत्वस्यैव तादृशानुव्यवसा
यविषयतया साक्षात्कारत्वव्यंजकलौकिकविषयताया उपमितावसत्त्वे न तदुत्तरं साक्षात्करोमीत्यनुव्यवसायापत्तेरभावात् तन्न
चैवमुपमितौ प्रत्यक्षत्वसत्त्वे मानाभावः अनुमानस्य चाप्रयोजकत्वादिति वाच्यं उपमितौ प्रत्यक्षत्वानंगीकारे उपमि
तिसामग्रीकाले प्रत्यक्षसामग्रीकाले प्रत्यक्षवारणाय प्रत्यक्षं प्रति उपमितिसामग्र्याः प्रतिबंधकत्वकल्पने गौरवे उपमितौ प्र
त्यक्षत्वांगीकारे च तत्रोपमित्यात्मकस्यैव प्रत्यक्षस्योत्पत्त्यान्तरकल्पने लाघवमिति उपमितौ प्रत्यक्षत्वसिद्धेरिति चेन्न उपमितित्वस
चाक्षुषत्वादिव्याप्यत्वे तावाचादिसादृश्यप्रज्ञानोत्तरौ सर्वत्र शक्तिपरिच्छेदे उपमितित्वानापत्त्या चाक्षुषत्वादिव्यापकत्वस्य चासं
भवितपापरस्परव्यभिचारिणो रूपमितित्वचाक्षुषत्वाद्योरेकत्र समावेशे सांकर्यापत्त्या चाक्षुषत्वादिविरुद्धमेवोपमितित्व
मुपेयम् एवं चोपमितिसामग्रीकाले साक्षुषादिवारणाय चाक्षुषादिकं प्रत्युपमितिसामग्र्याः प्रतिबंधकत्वस्योभयसि
द्धतया सामान्यतः प्रत्यक्षं प्रत्युपमितिसामग्र्याः प्रतिबंधकत्वस्य ममाप्यकल्पनेनोक्तलाघवासंभवात् अथोपमितित्वं
मानसत्वव्याप्यमेवास्तां उपमितिसामग्रीकाले शक्तिमानसवारणाय तन्मानसं प्रति उपमितिसामग्र्याः प्रतिबं
धकत्वाकल्पनेन लाघवात् न चोपमितिसामग्रीकाले घटादिमानसवारणाय तत्प्रतिबंधकत्वस्यावश्यकतया त

त्वेन घटादिविषयविशेषणसन्निवेशस्य मानसत्वस्यैव प्रतिबध्यतावच्छेदकत्वांगीकाराल्लाघवमिति वाच्यं घटादिमानसं जाय
त्तामित्याद्येच्छाया मनुत्तेजकत्वानुरोधेन घटादिविषयविशेषनिवेशस्यावश्यकत्वादिति चेन्न घटादिचाक्षुषसामग्रीकाले मा
नसानुत्पादेन चाक्षुषसामग्र्या मानसं प्रति प्रतिबंधकत्वपाघटादिचाक्षुषसामग्रीकालेउपमितेरुत्पत्त्या तद्व्यभिचारवार
णायोपमितित्वस्य मानसत्वव्याप्यत्ववादिमतेउपमितेस्समानसत्वस्यैव चाक्षुषसामग्रीप्रतिबध्यतावच्छेदकत्वस्य वाच्य
त्वात्तत्रोपमितिस्यमानसत्वानिवेशप्रयुक्तगौरवस्य दुर्वारत्वात् किं चोपमितिसाम[redacted]ग्रीकालेउपमितेस्समानत्ववारणायोपमि
~~त्वात्तत्रोपमितिव मानसत्वनिवेशप्रयुक्तगौरवस्य दुर्वारत्वात् किंचोपमितिसामग्री~~मानसत्ववादिनोपमितेस्समानसत्वमेवोपमि
तिसामग्रीप्रतिबध्यतावच्छेदकं वाच्यमिति मानसउपमितिसामग्र्याः प्रतिबंधकत्वकल्पनं तन्मतेप्यावश्यकं उपमितेस्समानत्व
निवेशप्रयुक्तं गौरवं पुनरस्तन्मते धिकमितुपमितेर्मानसत्वानंगीकारलाघवं अधिकेमनुमानप्रामाण्यवस्यापन्नेरीत्याः
वच्चेपमितिर्दिक् अत्रोपमितावतिदेशवाक्यार्थानुभवः करणं तदर्थविषयकस्मरणं व्यापारः गोसदृशपिंडदर्शनं सहका
रीति केचित् मिश्रास्तु अतिदेशवाक्यार्थस्मरणोद्बोधकीभूतगोसदृशपिंडदर्शनमेव तदर्थविषयकस्मरणद्वाराकरणा शिव
मित्याहुः अपरे तु अतिदेशवाक्यज्ञानं करणं तदर्थानुभवादिकं व्यापारः स्वद्वितीयपक्षे गोसदृशपिंडदर्शनेन सदृशपिंडद
र्शनेन सहकृता इति देशवाक्यार्थानुभवादेव घटादिउपमितेरानुमविकत्वापातू र्वोक्तमतद्वयस्योपमोजकत्वात् न चयत्रकी

हगावयइतिप्रश्नानंतरंचित्रत्वेनसादिनाताहशपिंडदर्शनेकृतंतत्रातिदेशवाक्यंविनापिमानसादतिदेशवाक्यार्थज्ञाना
दप्युपमितिस्तुदयस्यानुभविकत्वात्तव्यभिचारेणातिदेशवाक्यज्ञानस्योपमितिकरणत्वंसंभवतीतिवाच्यम्ः शाब्दीह्याकांक्षा
शब्देनैवपर्यंतरइतिसापेनतत्रापिगोसहशोगवयइत्यतिदेशवाक्यात्मकाभिप्रायिकशब्दकल्पनापात्रावृपक्षत्वात्ः शाब्दी
आकांक्षाशाब्दविषयापिसिच्छाशब्देनैवविषयसिद्धिद्वारानिवर्तितइत्यकल्पनापार्थादिमाहुः अत्र न आः पत्रप्रभुः ज्ञानमात्रेण
वेच्छा न तु शाब्दबोधे तत्रशाब्दगोचरेच्छायाअभावेनताहशन्यायावतारेशाब्दकल्पनापात्रसंभवेनोक्तरीत्याः तिदेशवा
क्यज्ञानस्योपमितिकरणत्वमसंभवेः परंतुअतिदेशवाक्यार्थशाब्दत्वेनैवोपमितिहेतुत्वेननुतादृशज्ञानत्वेनतथास
तिसंशयप्रसाधारणाचारणापनिश्चयत्वप्रवेशेगौरवापत्तेः एवंचपत्रज्ञानमात्रेच्छातत्रापिशब्दकल्पनमादृश्यकेपदज
न्यपदार्थोपस्थितेरेवशाब्दबोधहेतुत्वात्ः शाब्दोहीतिमापस्यशाब्दोमाशब्दोधोपमोगितीआकांक्षाअन्वयप्रतियोग्यु
पस्थितिरूपाशब्देनैवपूर्वतेसंपाद्यतेइत्यर्थकतत्पातस्याप्यवतारादितितदसत्ः निश्चितव्यभिचारकत्वादतिदेशवा
क्यार्थज्ञानत्वेनैवहेतुतयासंदिग्धव्यभिचारकतादृशशाब्दत्वेनाहेतुत्वात्ः नचोक्तलाघवात्संदिग्धव्यभिचारकत्वपरा
पिहेतुत्वंसंभवत्येवेतिवाच्यम्ः अतिदेशवाक्यार्थशाब्दत्वेनहेतुतामतेपिस्वजन्यस्मृतिद्वारैवहेतुत्वस्यवाच्यतयातादृ

१ ७

वा·कौ·
ति

शज्ञानत्वेनैवहेतुत्वेपिक्षतिविरहेणोक्तनाद्यवच्छेदकाभावात्· शब्दत्वघटितरूपेणाहेतुतामतद्वाक्यार्थस्मृतेपिसंशयस्यलेशोऽतिदे
शवाक्यार्थस्यविरूपद्वाराभावादेवानतिप्रसंगोनिश्चयत्वविवेशेप्रयोजनाभावात्· नस्यान्गोसदृशपिंडदर्शनानंतरंसर्वत्रा
तिदेशवाक्यार्थस्मरणंकल्प्यनोपमितिसादृश्यविशिष्टपिंडदर्शनंकरणंतादृशस्मरणंव्यापारः· यद्वासादृश्यज्ञानमेवसादृ
श्यज्ञानत्वेनज्ञानत्वेनैवाकरणंसादृश्यविशिष्टपिंडदर्शनंव्यापारः· अतिदेशवाक्यार्थनिश्चयःसहकारी· अथवैधर्म्यज्ञा
नादप्युपमितेर्हेतुत्वेनकथंसादृश्यज्ञानत्वेनोपमितौहेतुत्वंनचाविदितसंगतिकसंज्ञासमभिव्याहृतवाक्यार्थज्ञान
त्वेनसादृश्यवैधर्म्यज्ञानयोरनुगमात्रदोषइतिवाच्यम्· अननुगतसमभिव्याहारादिघटितत्वेनोक्तरूपस्याप्यननुगत
त्वादितिचेन्न· स्वसमानाधिकरणस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेनसादृश्यज्ञानवैधर्म्यज्ञानविशिष्टोपमितौसा
दृश्यज्ञानवैधर्म्यज्ञानजन्योपमित्योःपरस्परव्याहतंजातिविशेषमुपेत्यतत्रद्विजातीयोपमितौवासादृश्यज्ञानत्वेनवैध
र्म्यज्ञानत्वेनचहेतुत्वोऽभ्युपगमात्· अतएवकापिपृथिवीत्वादिप्रश्नेगंधवतीपृथिवीत्याद्यतिदेशवाक्यात्तदर्थबोधेइदंपदंपृथिवी
पदवाच्यत्वस्याप्युपमितिरपिनिराकार्येतिप्राहुः· चिंतामणिकृतस्तुशब्दतावच्छेदकपरिच्छित्तिरेवोपमानफलंप्रश्नोत्तरस्यगवयादि
पदानांगवयादिपदप्रवृत्तिनिमित्तत्वेनजिज्ञासितोक्तत्वोपमितेर्गवयोगवयपदंपदमर्हतिनिमित्तवानित्याकारकत्वात्· नियत

रीव

धर्मसमानाधिकरणशब्दप्रवृत्तिनिमित्तज्ञानमुपमितिरित्युपमितिलक्षणं निपन्नः प्रवृत्तिनिमित्तीभूतस्य गवयत्वादेर्व्याप्ये
यस्तादृश्यपदेशसादृश्यादिरूपो धर्मस्तत्सामानाधिकरण्येन गवयादिशब्दप्रवृत्तिनिमित्तस्य ज्ञानमित्यर्थः न चोपमितौ गोसादृ
श्यादेरभानादसंभव इति वाच्यं अनुमितौ लिंगोपहितत्वैंगिकभानवदुपमितावपि गोसादृश्यपदेर्भानमित्याशयात् तदनंगी
कारे तु तादृशधर्मसामानाधिकरण्येन पदुपस्थितं गवयपत्वादितद्विषयकप्रवृत्तिनिमित्तस्य ज्ञानमित्यर्थः प्रवृत्तिनिमित्तत्वं
च प्रकारत्वपाशब्दशक्तिग्रहविषयत्वं न च व्यक्तौ शक्तिरिति ज्ञाने व्यक्तेः प्रकारत्वादतिव्याप्तिरिति वाच्यं शक्यतावच्छेदकस्य ज्ञा
न प्रकारत्वपाशब्दशक्तिग्रहविषयत्वं न च व्यक्तौ शक्तिरिति ज्ञाने व्यक्तेः प्रकारत्वादतिव्याप्तिरिति वाच्यं शक्यतावच्छेदकस्य ज्ञान
प्रकारत्वस्य विवक्षणात् न चैवमप्याकृतावतिव्याप्तिः तदन्यत्वेन विशेषणादित्येके अन्ये तु पदवच्छेदे न व्यक्तौ शक्तिग्रह
त्तत्तथा आकृतिस्तु न व्यक्तिशक्यतावच्छेदिका गौरवादित्याहुः वस्तुतस्तु साक्षात्संबंधेन प्रकारत्वविवक्षणान्नोक्तदोष इति तत्त्वं
अगृहीतसमयस्य संज्ञावाक्यार्थसामानाधिकरण्येन संज्ञानिमित्तपरिच्छेदो वा उपमितिः अत्र संज्ञावाक्यमित्यस्य संज्ञातमभि
व्याहृतवाक्यमित्यर्थः निमित्तमित्यस्य प्रवृत्तिनिमित्तमित्यर्थः न चोपमितिनैव रोतन्त्रे उपमितिविषयविषयके स्मरणोपनी
तप्रसक्षादावतिव्याप्तिरिति वाच्यं स्वविषयविषयकज्ञानाजन्यत्वेनापि विशेषणात् किंचिद्वा साधर्म्यसामानाधिकरण्येन सं

न्या॰कौ॰ ज्ञानिमित्तपरिच्छेदो वा। अत्राप्युक्तविशेषणान्नोक्तदोषः। द्वितीयतृतीयलक्षणयोः प्रथमलक्षणवदर्थो बोध्यः। अथ गोविसदृ
शो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानजन्योपमितावव्याप्तिः तत्र गोसादृश्यस्य वाक्यार्थत्वाभावात्। गोसादृश्याभावस्यैव वाक्यार्थ
त्वात् तत्सामानाधिकरण्येन संज्ञानिमित्तपरिच्छेदाभावात्। गोसादृश्यसामानाधिकरण्येनैव संज्ञानिमित्तपरिच्छेदादि
ति चेन्नैवं वाक्यार्थपदं वाक्यतात्पर्यविषयपरं एवं चोक्तवाक्यस्य विशब्दस्याभाववाचितया तत्र गोसादृश्याभावस्य न गवयपद
वाच्यत्वाभाव इत्यर्थे साक्षात्तात्पर्ये निर्णीते पश्चात्तद्गवयपदवाच्यत्वं गोसदृशस्यावृत्ति गोविसदृशस्यावृत्तित्वे सतिन्वात् गोसादृश्य
दित्यनुमानद्वारा गोसदृशो गवयपदस्यैतदर्थे तात्पर्यं निर्णीयते ऽधमोस्तीति वाक्यस्य वक्तृतात्पर्यमिवेति गोसादृश्यस्यापि वाक्यार्थ
त्वेनोक्तदोषाभावादिति सौत्रां तु अत्रेदं बोध्यं संज्ञासंज्ञिसंबंधपरिच्छेद एवोपमितिर्न तु प्रवृत्तिनिमित्तपरिच्छेदस्तथा सति उप
मितेः शाब्दबोधाद्भेदात्तस्य दुर्घटत्वात्। अत एव कुसुमांजलौ संबंधस्य परिच्छेद इति कारिकाप्रतीकमनुपादापननुप्रवृ
त्तिनिमित्तपरिच्छेदोपि तस्य शक्तिग्राहकत्वमित्यादिग्रन्थस्य नियमत उपस्थितौ मानाभावात्। तत्र ऊहस्य व्यवहारावगतेर्ना शिव
नुमतत्वेनोक्तेः तथा च गवयपदं विशिष्टवाच्यं तं सिद्धे बोधेन रूपतया सैवोपमानफलं। वस्तुतस्तु गवयशब्दः कस्यचिद्वाचकः शि
ष्टप्रयुज्यमानत्वादित्यसामान्यतो निर्धारितेपि गवयत्वविशिष्टधर्मो गवयशब्दवाच्य इति लाघवान्निर्णीयते तेन समानासहका

ऽनवतस्मांद्दृशाख्यं प्रमाणांतरमस्तु तोपस्यकारितम्त्रमाणांतरमास्येपमित्युपक्रमस्यस्पष्टघोपिंडे।। तिदेशवाक्यार्थं
स्यनस्तर्केसंहकारादृवयपत्वविशिष्टोधर्मीगवयशब्दवाच्यइतिप्रवृत्तिनिमित्तविशेषपरिच्छित्तिरूपमानफलमित्युपसं
हारस्यस्वचिंतामणिग्रंथस्यस्वारस्यात्सचिंतामणिकृतोभिसंतात्संज्ञिसंगतिपरिच्छेदस्यैवोपमितित्विस्वगम्यते। प्रवृत्तिनि
मित्तविशेषपरिच्छित्तिरूपमानस्यफलमित्युक्तिस्तुगोसदृशोगवयपदस्यातिदेशवाक्यादितिशेषगवयपदवाच्यत्वावगमेपिवयपदवा
च्यत्वपरिच्छेदस्योपमानस्वीकारस्यावश्यकइतिसूचनायः। अतएवकुसुमांजलौसामान्यविशेषवाचकत्वेऽस्यमानांतरप्र
नुसरणीयमित्युक्तंसामान्यविशेषोगवयपत्वादिस्त्रो[illegible]पैवेयव्यवहारादेरपिशक्तिग्राहकस्यव्याप्तिमात्रविषयकत्वाद्दृष्टत्वादेवा
व्याप्यग्रहायप्रमाणांतरस्वीकारापत्तिः नचलाघवादिसहकृतंव्याप्तिशक्तिग्राहकमेवमानेघटत्वादिवाच्यताग्राहकमितिवाच्यंप्रकृ खा
तेपितुल्यत्वादितिचेन्नतत्रव्याप्तिशक्तिग्राहकस्यव्यवहारलिंगकानुमानस्यघटत्वादिवाच्यताग्राहकत्वसंभवेपिप्रकृतेऽतिदेश ५
वाक्येनविशेष्यगवयपदवाच्यत्वग्रहकाले[illegible]गवयत्वानुपस्थि[illegible]त्यानतदुपस्थितेश्चशब्दस्यजनितान्वयबोधतयानिराकांक्षत्वेन
गवयत्वादिवाच्यत्वाग्राहकतयावैषम्येणातत्रमानांतरस्वीकारेपिप्रकृतेमानांतरस्वीकारस्यावश्यकत्वादितिदिक्।। जरन्मी
मांसकास्तुसादृश्यज्ञानमेवोपमितिः नचैवंसादृश्यस्यसाधारणधर्मरूपत्वमानस्यचप्रम[illegible]क्षादेरेवावगमसंभवेनोप
मानस्यप्रमाणान्तरत्वासिद्धिप्रसंगइतिवाच्यम्। सादृश्यस्यपदार्थांतरत्वात्। तस्यसाधारणधर्मरूपत्वेइंद्रियसन्निकर्षादिमात्रवेद्य

४

ना॰कौ॰ तथागवादिसंबंधिज्ञानाभावेपि ज्ञानापत्तेः नचतत्सपदार्थांतरत्वेपुंक्तदोषो दुर्वार इतिवाच्यं तस्यानिरूपकभेदेनाभ्य
पभेदेनचभिन्नत्वागवयादिनिष्ठत्यातिरिक्तस्यगवादिसादृश्यस्यगवादेः सन्निकर्षाद्यभावेनप्रत्यक्षादिगम्यत्वासंभवात्
अपिसादृश्यस्यातिरिक्तत्वेनसंभवतितथादितादृग्भावोऽभावोवापरस्पराभावरूपत्वेनोभयोः प्रकारांतरासंभवात् भावोपि
सामान्यवानिःसामान्योवासामान्यवद्दपिसमुदायंनिर्गुणंवानिर्गुणमपिकर्मात्मकमकर्मात्मकंवानिःसामान्येपृथक्सम
वेतमसमवेतंवासमवेतमपिएकसमवेतमनेकसमवेतंवेतिपृथग्वयमुक्तोतभावस्यभेदेनतस्यनातिरिक्तत्वमितिचे
न्नः एवंसतितद्घटादीनामप्यतिरिक्तत्वविलोपापत्तेः तत्रापितादृस्पर्शवत्त्रिस्पर्शवाऽऽघटपृथिव्यादित्वोपात्तगंधमेवद्वितो
पेत्राकाशादौतगतिमेवेन्यस्यवस्तुशावयात्वात् नचकुत्रैवधर्म्यघटघटादीनामतिरिक्तत्वमितिवाच्यं सादृश्यस्यापिगु
णाकर्महेतित्वपारव्यादिभिन्नतयासामान्येपिहेतित्वपासामान्यादिभिन्नपातविधिमुख्येनप्रतीयमानतयाऽभावाच्च
वैधर्म्यसंभवेनातिरिक्तत्वसंभवादित्याहुस्तन्नः सादृश्यस्यातिरिक्तत्वेवाद्विज्ञापितरुग्जकत्वेसाधारणधर्मेणागमव
रूपमुपगंतव्यमितितेरेवसदृशव्यवहारोपपत्तौतस्यातिरिक्तपदार्थत्वेमानाभावात् नचैवंगवादिसंबंधिज्ञानाभावेपि
तज्ज्ञानापत्तिरूपदोषोदुरुद्धरइतिवाच्यं इष्टापत्तेः वस्तुगतसाधारणधर्मरूपसादृश्यंगवादिज्ञानंविनापिज्ञायत शिव
एवसाधारणधर्मत्वरूपसादृश्यत्वंपरंसाधारण्यंनिरूपकगवादिव्यक्तिमज्ञात्वानज्ञायतेतद्धटितत्वात् नतुसाधारण

धर्मस्य निरूपितप्रतियोगिकत्वं सादृश्यस्य तु सप्रतियोगिकत्वमिति तयोर्भेदान्न सादृश्यस्य साधारणधर्मरूपतासंभवः पत्व
न्नेव हि मिहतं साधारणधर्ममात्रेण सादृश्यं स्वस्यापि स्वसादृश्यतापत्तेः किं तु तद्भिन्नत्वविशेषितमिति विशेषणांशस्य भे
दस्य सप्रतियोगिकत्वात्सादृश्यस्य सप्रतियोगिकत्वोपपत्तिः न चैवं गगनं गगनाकारमित्यादौ च भेदे सादृश्यविरोध इ
ति वाच्यं तत्र स्वलोकान्तरीयगगनादेः स्वलोकान्तरीयगगनादिना भेदविवक्षया तथाबुद्ध्युपपत्तेरिति तत्तुच्छम् अधिकर
णभेदेनाभावभेदाभावेन भेदस्य प्रसाभ्रूपे भिन्नत्वाभावेन सादृश्यस्याभ्यपभेदेन भिन्नत्वानुपपत्तेरिति चेन्न अस्साधा
रणधर्मस्य तत्त्वे सति तद्गतवहुधर्मवत्त्वं सादृश्यं तद्गतवहुधर्मवत्त्वं च तन्निरूप्यमितीतरनिरूप्यत्वमेव सादृश्यस्य सप्रति
योगिकत्वमिति तस्य साधारणधर्मरूपत्वेपि सप्रतियोगिकत्वसंभवात् ननु वहुत्वस्य त्रित्वचतुःपंचादिभेदेनाननुगमात्कु
यं सादृश्यस्योक्तसाधारणधर्मरूपताः न च कपिंजलाधिकरणन्यायेन त्रित्वपर्यवसानान्नदोष इति वाच्यं तथा सति वि
सदृशयोरपि हस्तिमशकयोः सादृश्यप्रसंगादिति चेन्न त्रिचतुरादिसाधारणस्य वहुत्वस्य वहुत्वत्वेनानुगतस्य निवेशा
त्। न चोक्तातिप्रसंगः हस्तिमशकयोरपि किंचिद्धर्ममादाय सादृश्ये इष्टापत्तेः धर्मान्तरैस्तैर्वैसादृश्यप्याद्रेकात्वा
दिकमादाय चंद्रवन्मुखं पुष्पादिमत्त्वमादाय महिषीवगोरित्यादिप्रयोगात्तस्मात्किंचिन्न विद्धर्मेणाकुत्रचित्सादृश्यं नत्व
नुगतमिति तव कोपि दोष इति दिक् अधिकमस्मत्कृतसादृश्यविचारेऽनुसंधेयः शवरस्वामिमतस्थ पापिनस्तु सादृश्य

न्या·कौ

ससाधारणधर्मरूपतत्पदार्थातिरेकेपि सादृश्यज्ञानमेवोपमितिः न च साधारणधर्मरूपस्येंद्रियसन्निकृष्टे गवये प्रत्यक्षतए
व ज्ञानसंभवे उपमानस्य प्रमाणत्वासिद्धिरेवेति वाच्यं इंद्रियसन्निकृष्टे गवये गोसादृश्यज्ञानस्योपमानत्वे विना निर्वाहेपि
तज्ज्ञाने जाते इंद्रियासन्निकृष्टे गादिगवयसदृशो गौरित्याकारकज्ञानस्य प्रत्यक्षजन्यत्वासंभवेन प्रत्यक्षादिविजातीयो
पमितिरूपतयातत्करणतया गवयपिंडनिष्ठगोसादृश्यज्ञानस्योपमानप्रमाणत्वेन स्वीकारस्यावश्यकत्वात् न च तस्य निर्व्या
पारतया कथं तस्य करणत्वमिति वाच्यं अनुपलब्धेः करणतावादिनां शरस्याभिनोः करणे सव्यापारत्वनियमाभावात्
न च साधकतमं करणमिति सूत्रानाभिज्ञापस्यैव करणत्वं अतिशयश्च सव्यापारत्वमेवेति कथं निर्व्यापारस्य करण
त्वमिति वाच्यं फलायोगव्यवच्छेदस्यैवातिशयत्वात् प्रतुफलायोगव्यवच्छेदरूपातिशयस्याहितस्य मितरकारणाभावे
चक्षुरादीनामपि नास्तित्वेतरकारणसमवधाने तादृशातिशयसाहित्यं च सकलकारकसाधारणमिति कारणा
करणविभागो न स्यादिति तदसत् अतिशयस्य सव्यापाररूपत्वेपि तुल्यत्वात् न चानेन रूपेण सर्वेषां कारकाणां क
रणत्वमिष्टमेव उपधेयसंकरेप्युपाधेरसंकर इति न्यायेन षड्विधत्वेन विभागस्योपाधिविभागत्वादिति वाच्यं मम शिव
पि तुल्यत्वात् यदपीन्द्रियासन्निकृष्टगाविगवयसादृश्यस्य साधारणधर्मरूपस्य गोगवयपिंडनिष्ठस्यैकत्वेन प्रत्यक्षत्वं तए
व तज्ज्ञानं संभवति गवयद्वारा तस्येन्द्रियसन्निकृष्टत्वादि सुपमानमनर्थकमिति तदप्यसत् एकस्यैव साधारणध

र्निरूपकस्य सादृश्यस्य गोनिरूपितत्वविशिष्टस्य गतेर्गवयनिष्ठसादृश्यत्वेन गवयनिरूपितत्वविशिष्टस्य च गोनिष्ठसादृश्य
त्वेन गोरसंनिकर्षे चरमसंदिग्धसविकल्पत्वासंभवेन प्रत्यक्षेणानिर्वाहादिति वदंति । अत्र चिंतामणिकृतः परस्पर
सदृशं हस्तादिकं पश्यतो योर्विशेषसादृश्यप्रतियोगी स तत्प्रतियोगिकसादृश्याश्रय इति सामान्यतो व्याप्तिज्ञाने गौर्ग
वयप्रतियोगिकसादृश्याश्रयः गवयनिष्ठसादृश्यप्रतियोगित्वात् यथाश्वादिरित्यनुमानादेव गोरसंनिकर्षे
ऽपि गवि गवयसादृश्यज्ञानसंभवेनोपमानस्यानर्थक्यं उर्वीरसः न च पत्त्वतत्त्वयोरननुगमेनाचणिनसंभवत्येव व्यतिरेकानु
मानेनानुगवयप्रतियोगिकसादृश्याप्रसिद्ध्या व्यतिरेकानिरूपणादेव न संभवतीति नानुमानेन निर्वाह इति वाच्यं । गवय
प्रतियोगिकसादृश्याश्रयस्य कस्यचिद्दर्शनस्यैवोक्तानुमाने स्वीकारादित्याहुः । अत्र वदंति । सादृश्यज्ञानहेतोपमितेह
नेदिशानुमानेनान्यथासिद्धेः पूर्वोपदर्शितरीत्या साऽस्य संज्ञासंज्ञिसंबंधपरिच्छेदरूपोपमितेरप्यनुमानेनान्यथासिद्धि
हेत्वारेतिभवन्नहेतुरुपमानमर्थक्यः वृद्धिश्च पूर्वप्रदर्शितानुमानसामग्र्यभावे देशायामपि तादृशपरिच्छेदस्यानुमे
वसिद्धतयोपमिनोमीत्यनुव्यवसायानुरोधेन चोपमानाख्यमानातिरिक्तं प्रमाणमावश्यकमिति विभाव्यते तदा सादृश्यज्ञानस्यो
पमितित्वमतेऽपि उक्तसामान्यव्याप्तिग्रहरूपानुमानसामग्र्यभाववद्दशायामप्यनुमानासंभवेन गवयप्रतियोगिकसा
दृश्यस्याप्यत्राज्ञानदशायां व्यतिरेकानिरूपणान्न व्याप्तिरेवानुमानासंभवेन च गवि गवयसादृश्यज्ञानेऽनुपमानं विना न निर्वह

न्या० कौ० तीत्युपमितेर्नोमनुव्यवसायानुरोधेन चोपमानस्वीकार आवश्यकः पुंस्त्वे चोपमितेर्नोमनुव्यवसायस्य सादृश्यज्ञानहेतोपमितित्वि
षयत्वे वक्रमध्ये कहपे गागवपेदृष्टे गवयेन गामुपमिनोमि चंद्रेदृष्टे चंद्रेण कांतामुखमुपमिनोमीत्याद्यनुभवासंगतेः अतए
व कान्याले क्वारादावपि सादृश्यप्रतियोग्युपमानं सादृश्यानुयोग्युपमेयं सादृश्यवर्णनमुपमेति व्यवहाराः स्वरसतः संगच्छंते
न चैते व्यवहारा गौणा एवेति वाच्यम् मुख्ये बाधकाभावात् अन्यथैवं गोविधर्मो करभ इति ज्ञाने सति करभो विधर्मी गोरिति ज्ञान
मुपमितेरनंतरं तज्ज्ञानकं च करभगतवैधर्म्यज्ञानं मानांतरं स्यात् एवं तस्मादयं ह्रस्व इति ज्ञानेनास्मात्स दीर्घ इति ज्ञानमुपमितेरनंतरं
तज्ज्ञानकं च तस्मादयं ह्रस्व इति ज्ञानं प्रमाणांतरं स्यादेवं प्रमसत्त्रापीति चेत्तः संप्रतियोगिकपदार्थज्ञानत्वेनैवैतेषां सर्वेषामेवो
स पमानत्वेनैव संग्रहात् संप्रतियोगिकत्वसंबंधिकत्वेनैव संबंधांतराणामपि संग्रहस्य अलं पल्लवेन संक्षेपेणोपमानं स्वप्र
वृद्धैर्निरूपितः अतः किंचिद्विस्तरेणास्माभिस्तद्विनिरूपितं १ इति श्रीमन्मुकुंदपंडितात्मजपुणतामकरोपनामकमहादे
वपंडितविरचिते न्यायकौस्तुभे उपमानकौस्तुभः संपूर्णः शुभं भूः श्रीरस्तु॥